Among the alaṁkāras dealt with by Ruyyaka at the end of his work, figures like Svabhāvokti, Bhāvika, Rasavat, Preyas and Ūrjasvin (related to rasa), stand on a different and higher footing. In the treatment of Svabhāvokti and Bhāvika especially Ruyyaka has clarified in a detailed manner, the conceptions of these figures and marked off the respective spheres of these two and Rasavat. Vidyācakravartin has further explained, in a lucid manner, the text of Ruyyaka on these two alaṁkāras, Svabhāvokti and Bhāvika, and even takes credit for having contributed his share to the elucidation of Bhāvika (Sañjīvanī, p. 250 [illegible]).

[illegible]

[illegible]

1. [illegible]
2. [illegible]
3. [illegible]
4. Ibid. p. [illegible]

श्रीमद्राजानकरुय्यकप्रणीतम्

अलङ्कारसर्वस्वम्

नमस्कृत्य परां वाचं देवीं त्रिविधविग्रहाम् ।
निजालङ्कारसूत्राणां वृत्त्या तात्पर्यमुच्यते ॥

श्रीमद्विद्याचक्रवर्तिविरचिता

सञ्जीवन्याख्या व्याख्या

विश्वं प्रकाशयति या जातिगुणाद्यात्मकैः[1]निजैः प्रसरैः[2] ।
संस्कारगुणसमृद्धा वाणी मामवतु सरल[3]सन्दर्भा ॥
[4]रुचकाचार्योपज्ञे सेयमलङ्कारसर्वस्वे[5] ।
सञ्जीवनीति[6] टीका श्रीविद्याचक्रवर्तिना क्रियते ॥
[7]उदाहरणशेषोऽत्र ध्वनौ[8] ग्रन्थकृताऽकृतः ।
तदीयन्याय[9]सम्पन्नैः स्वपद्यैः पूरयामि तम्[10] ॥

---

1. D. आत्मकैः प्रसरैः E. आत्मकनिजैः प्रसरैः 2. B. द्रव्य 3. F. तरल 4. B. E.F. रुचकार्यो D. रुचकार्थो

5. In A. this verse is found with a different First-half, omitting the verse of prayer :

अकृत यदलङ्कृतीनां सर्वस्वं सान्धिविग्रहीतस्य ।
सञ्जीवनीति टीका श्रीविद्याचक्रवर्तिना क्रियते ॥

C. begins with the following verse given before अकृत etc.

गुणालङ्कार-वक्रोक्ति-भोग-कृत्य-गुणस्पृशः ।
वामनोद्भटवक्रोक्तिभट्टेशानन्दवर्द्धनाः ॥

which is clearly an additional note by some student or scribe as a resume of the initial discussion in the Sarvasva ; the mention of the authors in the second line associated with the various theories is hardly satisfactory.

6. All except B. सञ्जीविनी 7. A.C.F. उदाहृतिविशेष 8. A.C.F. यो यः 9. D. न्यास 10. E. तत

[1]ध्वनिदर्शनानुरक्ताः[2] सूक्ष्मेक्षिकया निरीक्ष्य टीकां मे ।
कवयस्सचेतना अपि वितनुत साहित्यसाम्राज्यम् ॥
किं विस्तरेण बहुना[3] टीकां[4] सञ्जीवनीमिमां कश्चित् ।
यद्यभ्यसूयति जडः स्वमेव पाण्डित्यमभ्यसूयति सः ॥

तत्र तावदधिकृतेष्टदेवतानमस्कार[5]पुरस्कारेण[6] प्रकरणप्रतिपाद्यमर्थं प्रतिजानीते **नमस्कृत्य[7] परामिति ।**

सर्वैव खल्वियं वाक् परा पश्यन्ती मध्यमा वैखरीति[8] चतुर्भिः पदैः[9] परिमीयते । [10]यच्छ्रुतिः—"चत्वारि वाक्परिमिता पदानि" इत्यादिका । तत्र परा नाम निरुपाधिकं रूपम्[11] । पश्यन्त्यादीनि त्रीणि पुनरौपाधिकानि स्थूलत्वात् विग्रहस्थानीयानि[12] । तथा चागमः—

स्वरूप[13]ज्योतिरेवान्तः परा वागनपायिनी ।
यस्यां दृष्टस्वरूपायाम् अधिकारो निवर्तते ॥
[14]अविभागेन वर्णानां सर्वतस्संहृतक्रमा ।
प्राणाश्रया तु पश्यन्ती मयूराण्डरसोपमा ॥
मध्यमा [15]बुद्ध्युपादाना कृतवर्णपरिग्रहा ।
अन्तस्सङ्कल्प[16]रूपा सा[17] न श्रोत्रमुपसर्पति ॥
ताल्वोष्ठ व्यापृति[18]व्यङ्ग्या[19] परबोधप्रकाशिनी ।
मनुष्यमात्रसुलभा बाह्या वाग्वैखरी मता ॥ इति ॥

तत्र पश्यन्त्याद्य[20]परवाक्त्रयापेक्षया ज्येष्ठत्वादाद्या[21] परा । द्वितीया विश्वाभिमुखीभावात्पश्यन्ती । तृतीया नाभ्यन्तरी न च बाह्येति कृत्वा मध्यमा । तुरीया[22] तु [23]परावबोधार्थं प्रवृत्तेति वैखरी[24] । यद्वा "खं[25] सुखं दुःखं च; तद्विशिष्य राति

1. This verse is not found in A. & C. 2. B. रक्ता सूक्ष्म D. अनुक्ता सूक्ष्म 3. F. बहुधा 4. all except E. टीका 5. A. & C. omit नमस्कार 6. C. कारेण प्रति 7. E. कृत्येति 8. B.E. वैखरी चेति 9. A.B. omit पदैः C. पद्यैः 10. A.C. तथा च श्रुतिः—"चत्वारि वाक् परिमिता पदानि
तानि विदुर्ब्राह्मणा ये मनीषिणः ।
गुहा$ त्रीणि निहिता नेङ्गयन्ति*
तुरीयं‡ वाचो मनुष्या वदन्ति इति । का तत्र
[$ A.C. गुहासु * A. नैवायन्ति C. नेङ्गायन्ति ‡ A. तुरीयां वाचम्]
B.F. तथा च आमनन्ति । तत्र परा 11. B. स्वरूपा D.E. स्वरूपं 12. C. स्थानि 13. C. रूपं 14. D. अपि भागे 15. A. B. बुद्ध्यपा 16. C. सङ्कल्प 17. A's alt. & B. तु या श्रो D. E. तु न 18. C. व्याप्रतिव्या ? 19. A. B. व्यक्ता 20. A. परवाक्यात् त्रयवेत्तया B. वाक्रया C. वाक्यवाक्त्रयवेतया D. परत्रयापेक्षया 21. D. त्वादपरा 22. A. C. चतुर्थी 23. D. विशेषणपरा 24. A. वैखरीति ज्ञेयम् । तदेव C. वैखरीज्ञेयं तदेव F. वैखरीतिज्ञेयम् । तदेतदभि—25. D. यद्वा सुखदुःख च तद्विशेषेण राति ।

इह हि तावद्भामहोद्भटप्रभृतयःचिरन्तनालङ्कारकाराः प्रतीयमानमर्थं

ददातीति विखरो देहेन्द्रियसङ्घातः तत्र भवा वैखरीति" ज्ञेयम्[1]। तदेवाभिसन्धायोक्तम्[2]—**वाचं त्रिविधविग्रहामिति**। चतुर्विधामपि। कीदृशीं देवीम् ? परादिभिश्चतुर्भिः पदैः[3] क्रीडन्तीं[4] नामपूर्वकत्वात्[5] सर्वस्यैव रूपस्य जगदेतद्विजिगीषमाणां समस्तव्यवहारात्मिकां[6] स्वरूपावबोधक्षमतया [7]द्युतिमयी[8]मन्यस्तुतौ स्तोतव्यतायां च प्रभवन्तीमविमर्शान्धतमस[9]ध्वंसनात् [10]कान्तिमयीमप्रतिहतप्रसरत्वात्[11] गत्यात्मिकाञ्चेत्यर्थः[12]। तामिमां नमस्कृत्य। नमस्कारो हि नाम पृथगहङ्कारपरित्यागेन नमस्कर्तव्यमहिमोद्घाटनं[13] सामरस्यमिति‡ यावत्। तथाहि—येयं परा[14] सा[15] शक्तत्वम्। या पश्यन्ती सोद्युक्तता[16]। या तु मध्यमा सा प्रवृत्तता। या[17] पुनर्वैखरी सा निर्वाहकतेति। शक्तिमतो वक्तुरेव स्वरूपं परादिशक्तयः।

इत्थमिमां वाचं नमस्कृत्य निजानां स्वेनैव प्रणीतानाम् अलङ्कारसूत्राणां तात्पर्यमुच्यते। हृदयमुद्घाटयते। केन प्रकारेण ? **वृत्त्या** वृत्ति[18]स्वरूपेण सन्दर्भेण।

अथ [19]ध्वनिदर्शनानुसारेण प्रकरणं प्रणिनीषुः[20] [21]भामहोद्भटादीनां[22] दर्शनस्थितिं [23]पूर्वपक्षत्वेनो[24]पन्यस्यति—**इह[25] हि तावद्भामहोद्भटेत्यादिना**। अत्रेयं दर्शनस्थिति[26] दिक्। [27]काव्यं हि नाम विशिष्टशब्दार्थात्मकम्। तत्रार्थो वाच्यः[28], प्रतीयमानश्च। यथा[29]

भम[30] धम्मिअ[31] वीसत्थो सो सुणओ अज्ज मारिओ देण।
गोलाणइ कच्छ कुडङ्ग[32] वासिणा दरिअ सीहेण[33] ॥

अत्र स्वैरिण्युक्तौ [34]श्वभयनिवृत्त्या धार्मिकभ्रमण[35]विधि[36]र्वाच्यत्वेन स्थितः,

---

1. B. ज्ञेया। 2. A. C. उक्तं त्रिविध 3. C. पादैः 4. A. B. D. क्रीडन्ती 5. A. पूर्वं (कृ) त्वात् 6. A. हारात्मकस्य रूपे पराचबोध C. आत्मकस्य रूप परा च बोध F. आत्मकस्वरूपा 7. E. द्विति 8. A's alt. C. F. मतीं 9. A. B. C. तमसो 10. C. मयी प्रति 11. C. प्रवरत्वात् 12. A. दात्यात्मिका 13. A. मोद व्यागनं 14. F. परान्वास्य श 15. B. D. E. सास्य 16. C. सोत्युक्तता 17. C. Omits या 18. D. E. omit स्व 19. A's alt B. C. स्वनिदर्श 20. A. B. C. D. H. I. प्रणिनिनीषुः 21. C. omits भा 22. D. E. उद्भटादिदर्शन 23. A's alt पूर्वपौर्व C. पूर्वकत्वेन 24. B. E. F. यथोपयोगं उप- 25. A. इह भामहोद्भटेत्यादि D. E. F. तावदिह भामहोद्भटेत्यादिना 26. A. D. F. स्थितिः C. वृत्त्यादिका 27. A. B. C. F. H. I. तत्र काव्यं 28. D. E. F वाच्यं 29. A. B. C. यच्च 30. A. B. भए 31. E. अम्मिअ 32. D. कुडग 33. D. सिंहेण 34. C. स्व 35. A. B. C. धार्मिकत्व भ्रम- 36. A. B. D. वाचकत्वेन।

‡ Vidyācakravartin's allegiance to Kashmir Śaivism is clear also from his vocabulary which naturally comes to him, for example, in his comments on the first verse and his use of the expression 'सामरस्य' which is peculiarly characteristic of this School.

वाच्योपस्कारकतयालङ्कारपक्षनिक्षिप्तं मन्यन्ते। तथा हि—पर्यायोक्ताप्रस्तुतप्रशंसासमासोक्त्याक्षेपव्याजस्तुत्युपमेयोपमानन्वयादौ वस्तुमात्रं गम्यमानं वाच्योपस्कारकत्वेन

साक्षात्सङ्केतितत्वेना[1]व्यवधान[2]प्रतीतिकत्वात्[3]; गोदावरीतीरे [4]सिंहोपलब्ध्या भ्रमणनिषेधस्तु प्रतीयमानः[5], वाक्यार्थसमन्वयसमनन्तरमसङ्केतितत्वेन[6] प्रतीतेः[7]। इत्थं वाच्य[8]विलक्षणः[9] प्रतीयमानो योऽर्थः स यथायोगं रस[10]वस्त्वलङ्कारस्वरूपेण त्रिस्कन्धः[11]सन् सचमत्कारत्वात्[12] कविसंरम्भ[13]गोचरत्वात् सहृदयप्रतीति[14]विश्रान्तिविषयत्वाच्च काव्यात्मा[15]। तस्य माधुर्यादयो गुणाः शौर्यादिवत्समवायवृत्त्या उपकुर्वते। उपमादयः पुनः [16]कटकादिवत्संयोगवृत्त्येति ध्वन्याचार्याः[17]। त्रिविधोऽपि[18] प्रतीयमानो वाच्योपस्कारकत्वादलङ्कारकक्ष्यैवेत्यन्ये।

अथ[19] ग्रन्थमवयवशो व्याकुर्मः[20]। इह काव्यमार्गे। अलङ्कारपक्ष[21]निक्षिप्तं मन्यन्ते, तत्त्वं [22]पुनरन्यथेति यावत्। [23]यन्मन्यन्ते [24]तत्सविशेषं दर्शयितुमाह—**तथाहीत्यादिना**[25]। पर्यायोक्तमप्रस्तुतप्रशंसा समासोक्ति[26]राक्षेपः व्याजस्तुतिरुपमेयोपमा अनन्वयः[27] इत्यादिषु[28] [29]वस्तुमात्रमेव प्रतीयते न तु रसालङ्कारौ। [30]व्यञ्जनाव्यापारस्येह[31] लक्षणामूलत्वात्। लक्षणामूलत्वे[32] रसालङ्कारयोर्व्यङ्ग्यत्वासम्भवात्। तत्र प्रतीयमानस्याप्यर्थस्य[33] प्रकारान्तरेणाभिधानं[34] पर्यायोक्तम्। यद्वक्ष्यति "गम्यस्यापि भङ्ग्यन्तरेणाभिधानं[35] पर्यायोक्तम्" इति। यथा—

स्पृष्टास्ता नन्दने शच्याः केशसंभोगलालिताः[36]।
सावज्ञं पारिजातस्य मञ्जर्यो यस्य सैनिकैः॥

अत्र हयग्रीवस्य स्वर्गविजयः[37] सैनिकसावज्ञपारिजातमञ्जरी[38]स्पर्शलक्षणेन कार्येण[39] प्रत्याय्यते।

सामान्यविशेषभावादीनां[40] सम्बन्धेन यदप्रस्तुतात्प्रस्तुतप्रतीतिः सेयमप्रस्तुत-

---

1. C. त्वेन व्यव 2. E. धानेन 3. C. कृत्वा A.B.D.H.I. कृत्वात् 4. A.B. सिंह्यो D. तीरोप-5. D. प्रतीयमानं 6 D. असङ्कितित 7. A's alt B. C. प्रतीयमानः 8. A. वार्थ 9. D. E. यो प्रतीय F. यं प्रतीयमानार्थं 10. F. वस्त्वलङ्काररसरूपेण 11. E. F. स्कन्धकः 12. D. कारकत्वात् 13. A's alt गोचरत्यार्थ—14. A. B. C. D. H. I. प्रीति- 15. A's alt काव्यस्यात्मा B. काव्यात्मतास्य 16. E. कटकमकुटादिवत् 17. D. आचार्यः 18. A.C. तथोपस्कारत्रिविध—19. A's alt C. आद्यग्रन्थ 20. A. C. व्याकुर्मः। पर्यायोक्त- 21. पक्षे 22. A. पुनराहेति 23. B. D. E. F. यं 24. B. तत्त्वविशेषं- 25. F. आदि पर्या- 26. A. C. उक्त्याक्षेपोपमा 27. A's alt अनन्यग 28. A's alt आदौ 29. F. वस्तु तावत् 30. F. व्यञ्जन 31. A's alt C. व्यापारस्यैव 32. D. E. F. मूलत्वेन 33. A's alt C. मानस्यार्थ F. मानार्थ 34. F. अन्तराभिधानं 35. A's alt पर्यायोक्तं—यथा 36. F. पालिताः। 37. C. विजय 38. A's alt. मालिका C. कलिका 39. A's alt B. पर्यायेण 40. D. भावादिना F. भावादि।

प्रशंसा[1] । यद्वक्ष्यति—"अप्रस्तुतात्सामान्यविशेषभावे कार्यकारणभावे सारूप्ये[2] च प्रस्तुतप्रतीतावप्रस्तुतप्रशंसा" इति । यथा—

तण्णत्थि किंपि पइणो पकप्पियं जं ण णिअइ घरणीए ।
अणवरअगमणसीलस्स कालपहिअस्स पाहिज्जं ॥
[तन्नास्ति किमपि पत्युः प्रकल्पितं यन्न नियतिगृहिण्या ।
अनवरतगमनशीलस्य कालपथिकस्य पाथेयम् ॥ इति च्छाया ।]

अत्र अनवरतगमनशीलस्य पत्युर्निजगृहिण्या पाथेयत्वेन यन्न कल्पितं तद्यथा नास्ति, तथा कालपथिकस्य पाथेयत्वेन यदकल्पितं तन्नास्तीत्यत्र[3] कालस्सर्वं ग्रसतीति सामान्यरूपादप्रस्तुतात् प्रस्तुतो विशेषात्मा प्रहस्तवधः प्रत्याय्यते ।

विशेषणसाम्यादप्रस्तुतोऽर्थो[4] यदवगम्यते सा समासोक्तिः । यद्वक्ष्यति— "विशेषणसाम्यादप्रस्तुतस्य गम्यत्वे समासोक्तिः" इति । यथा—

उपोढरागेण विलोलतारकं तथा गृहीतं शशिना निशामुखम् ।
यथा समस्तं तिमिरांशुकं तया पुरोऽपि[5] रागाद्गलितं[6] न लक्षितम् ॥

अत्रोपोढरागत्वादिना विशेषणसाम्येनाप्रस्तुतो नायकवृत्तान्तः प्रतीयते ।

उक्तस्य वक्ष्यमाणस्य वा प्राकरणिकस्य[7] विशेषप्रतीत्यर्थम्[8] आभासतो निषेधनमाक्षेपः[9] । यद्वक्ष्यति उक्तवक्ष्यमाणयोः[10] प्राकरणिकयोर्विशेषप्रतीत्यर्थं[11] निषेधाभास आक्षेपः इति । यथा—

बालअ ! णाहं दूई तीए पिओसि त्ति णम्हवावारो ।
सा मरइ तुज्झ अयसो एअं धम्मक्खरं भणिमो ॥
[बालक ! नाहं दूती तस्याः प्रियोऽसीति नास्मद्व्यापारः ।
सा म्रियते तवायश एतद्धर्माक्षरं भणामः ॥ इति च्छाया]

अत्र 'नाहं दूतीति' दूतीत्वनिषेधो विशिष्टास्मि[12] दूतीत्यवगमयति ।

[13]स्तुतिनिन्दयोः निन्दास्तुतिगमकत्वे व्याजस्तुतिः । यद्वक्ष्यति[14]—"स्तुतिनिन्दाभ्यां निन्दास्तुत्योर्गम्यत्वे व्याजस्तुतिः" इति[15] । यथा—

हे हेलाजितबोधिसत्त्व वचसां किं विस्तरैस्तोयधे[16] !
नास्ति त्वत्सदृशः परः परहिताधाने[17] गृहीतव्रतः[18] ।
तृष्यत्पान्थजनोपकारघटनावैमुख्यलब्धायशो[19]
भारप्रोद्वहने[20] करोषि कृपया साहायकं यन्मरोः ॥

1. A's alt C. प्रशंसेति 2. साम्ये 3. A. C. तत् तन्नास्ति 4. A. C. अप्रस्तुतार्थो 5. A. पुरोप 6. Except F. all have विलितं 7. A. 'प्राकरणिकार्थविशेष' D. E. 'प्राकरणिकस्य यद्विशेष' 8. E. प्रतिपत्त्यर्थं 9. A. नं स आरोपः आक्षेपः, C. निषेधसंज्ञारोपः D.E. स आक्षेप- 10. C. उत वक्ष्यमाणायाः अत्र नाह··· तीति । 11. E.F. प्रतिपत्त्यर्थं 12. A's alt सती 13. F. स स्तुति- 14. D. वक्ष्यति, यथा C. यथा वक्ष्यति । 15. A. C. स्तुतिः । य 16. A's alt स्तूयसे 17. A's alt. हितायाने 18. A's alt. व्रते 19. C. लब्धाशयो 20. A's alt. हार प्रोन्यहते

"स्वसिद्धये पराक्षेपः परार्थं स्वसमर्पणम्" ।
इति यथायोगं द्विविधया भङ्ग्या प्रतिपादितं तैः ।

अत्र मरोरुपकारं[1] करोषीति स्तुतिर्निन्दामवगमयति । उपमानोपमेययोः पर्यायेण तथात्वं[2] चेदुपमेयोपमा । यद्वक्ष्यति—

"द्वयोः पर्यायेण तस्मिन्नु[3]पमेयोपमा" इति । यथा—'खमिव जलं जलमिव खं हंसश्चन्द्र इव हंस[4] इव चन्द्रः ।' अत्रोपमानोपमेयभावविनिमयः तृतीय[5]सब्रह्मचारिणं निवर्तयति[6] । एकस्यैवोपमानोपमेय[7]भावत्वेऽनन्वयः[8] । यद्वक्ष्यति—"एकस्यैवोपमानोपमेयत्वेऽनन्वय" इति । यथा—'युद्धेऽर्जुनोऽर्जुन इव प्रथितप्रभावः'—इति । अत्र द्वितीयसब्रह्मचारिनिवृत्तिः ।

[9]आदि[10]शब्दाल्लाटानुप्रासादि[11]परिग्रहः । एषु पर्यायोक्तादिषु यदेतद्वस्तुमात्रं प्रतीयते स्वर्गविजयादिकं[12] रसालङ्कारपरिहारेण तदिदं सर्वैरपि [13]प्रमाणैरात्मत्वेना[14]वभासमानमेव सद्व्रज[15] [16]निमीलिकया वाच्योपस्कारकत्वेन तैरुद्भटादिभिः[17] प्रतिपादितम् । न्यग्भावितवाच्यस्य वाच्यकक्ष्यातिलङ्घिनः[18] कथमस्तु[19] वाच्योपस्कारकत्वमिति भावः । केन[20] प्रकारेण प्रतिपादितम् ? [21]"स्वसिद्धये पराक्षेपः परार्थं स्वसमर्पणम्" इति द्विवि[22]धया भङ्ग्या । भङ्गिः प्रकारः ।

[23]अत्रायमाशयः । लक्षणामूलोऽयं पर्यायो[24]क्तादिषु प्रतीयमानोऽर्थः[25] । लक्षणा च द्विरूपा—अजहत्स्वार्थैका "कुन्ताः प्रविशन्ति" इत्यादौ । परा तु जहत्स्वार्था—"गङ्गायां घोष" इत्यादौ । [26]तत्राजहत्स्वार्थायां कुन्तानां[27] स्वतः प्रवेशासंभवे[28] कौन्तिकान्[29] आक्षिप्य प्रवेशसंभवः । अतस्स्व[30]सिद्धये परानाक्षिपतीति[31] तत्र लक्षणा[32] । स्वकीय[33]प्रवेशादेस्सिद्धये[34] परस्य[35] [36]कौन्तिकस्याक्षेप[37] इति । जहत्स्वार्थायां तु गङ्गादेर्मुख्या[38]र्थस्यात्यन्तमनुपपत्तिरेव । अतः परार्थं[39] [40]स्वसमर्पणमिति लक्षणम् ।

1. C. D. उपकरोषीति 2. D. E. F. उपमानोपमेयभावे सत्युपमेय 3. A's alt. C. तस्मिन्सत्युपमे 4. F. चन्द्र इव हंसः । 5. D. E. तृतीयं 6. D. निर्वर्तयति 7. A. उपमेयत्व (स्व) भाव C. भावेत्वनन्वयः । 8. A. C. D. E. F. अनन्वयः । यथा—9. F. अत्र 10. C. सौधप्रासादि 11. F. आदि omitted. 12. C. विजयादिकं सर्वैरपि । 13. C. omits णै E. प्रमाणैः प्राधान्यदशायां (P. 8.) 14. C. अवभासमेव A's alt भासमानमपि 15. A. सदा(द्वा) 16. A. निमू 17. B. उद्भटप्रभृतिभिः 18. A. क (जा) तिलङ्घिनः C. वाच्यकं-जातिलङ्घनं 19. A's alt C. कथमस्य 20. D. तेन 21. C. तस्य सिद्ध 22. C. omits ध 23. C. omits अत्र 24. A. C. उक्त्यादिषु 25. A. C. अर्थः 'कुन्ताः प्रविशन्तीत्यादौ अजहत्स्वार्था । परा तु— 26. A's alt C. अत्र तु 27. C. कान्तानां 28. A. सम्भवो 29. C. कोन्तिकान् 30. C. स्वाभिप्राये 31. A's alt. D. E. F. आक्षेप इति । 32. E. F. लक्षणं- 33. D.F. स्वकीयस्य 34. D. परप्रवेश 35. D. चरस्य 36. A's alt परस्य क·········तिकादेराक्षेपात् 37. D. E. कौन्तिकादेराक्षेपः । ज 38. F. omits अर्थ 39. D. E. परार्थे C. परमार्थस्य 40. C. omits स्व ।

रुद्रटेनापि भावालङ्कारो द्विधैवोक्तः। रूपकदीपकापह्नुतितुल्ययोगितादावुपमालङ्कारो वाच्योपस्कारकत्वेन उक्तः। रसवत्प्रेयऊर्जस्विप्रभृतौ

परार्थं तटादे[1]र्घोषाद्यधिकरणार्थं स्वसमर्पणं स्वस्वरूपपरित्याग इति। इत्थं च सति 'स्पृष्टास्ता नन्दन' इति पर्यायोक्तोदाहरणे सैनिकानां सावज्ञपारिजातमञ्जरीस्पर्शः[2] स्वर्गविजयम[3]नाक्षिप्य न संभवतीति[4] कुन्तादिनयेन स्वसिद्धये पराक्षेपः। एवम् "उपोढरागेण" इति[5] समासोक्त्युदाहरणेऽपि ज्ञेयम्। नायक[6]त्वाक्षेपे सति निशादेः तिमिरां[7]-[8]शुकादियोगसंभवात् अजहत्स्वार्थत्वम्[9]। अथ "तं णत्थी"[10]ति अप्रस्तुतप्रशंसोदाहरणे मुख्यार्थस्याप्रस्तुतत्वात्; "बाळग्र[11] णाहम्" इत्याक्षेपोदाहरणे दूतीत्वनिषेधस्या[12]-भासरूपत्वात् "हे हेलाजिते"ति व्याजस्तुत्युदाहरणे स्तुतेर्व्याजरूपत्वात्[13] 'खमिव जलं[14] जलमिव खम्' इत्युपमेयोपमोदाहरणे खजलयोर्द्वयोरपि प्राकरणिकत्वेनोपमानोपमेयभावात्[15] 'युद्धेऽर्जुनोऽर्जुन इव' इत्यनन्वयोदाहरणे चैकस्यानेकत्वलाभाभावात् मुख्यार्थस्य अत्यन्तमनुपपत्तिरेव। अतः परार्थं[16] स्वसमर्पणमिति लक्षणम्। तमिमं[17] विषयविभागम् अभिसन्धायोक्तम्—**यथायोगं द्विविधयेति**[18]। योगो योग्यता[19] तामनतिक्रम्येत्यर्थः। इत्थं वस्तुध्वनौ विमतिर्भामहादिषु दर्शिता[20]।

अथ रुद्रटे[21] [22]रसालङ्कारध्वन्योर्विमतिमुपन्यस्यति—**रुद्रटेनापीत्यादिना**। भावालङ्कारः प्रेयोऽलङ्कारः[23] स[24] द्विधैवोक्तः[25]।

तथा हि—

> यस्य विकारः[26] [27]प्रभवन्नप्रतिबन्धेन हेतुना येन।
> गमयति [28]तदभिप्रायं तत्प्रति[29]बन्धं च भावोऽसौ॥ इति[30]

भावस्थितिभावशान्तिरूपेण रुद्रटो भावालङ्कारं द्विधैवोक्तवान्। तदिदम् उत्प्रेक्षावत् कृत्यमिति भावः। यतो भावालङ्कारस्य[31] सन्धिशबलतादि[32] लक्षणा अपि भेदाः

---

1. C. E. घोषाधि D. F. घोषाधिकरणाद्यर्थं 2. E. स्पर्श 3. C. आक्षिप्य 4. C. कान्तादि 5. A. रागेति। 6. A's alt आरोपे 7. C. तिमिनांशु 8. A. अंशुकाति E. अंशुकत्वादि A. D. E. F. 9. अर्थत्वं यतः। अ 10. A. तंण णफी (द्वी) E.F. तंणद्दी 11. A. "बाल(ज) अ णाह" C. बालज्ज णाहं D. बाल अह 12. A's alt निरवयवस्याभास C. निवेशस्य-षेधस्य भासरूप 13. C. नैपत्यात् 14. D.E. जलमित्युपमेय 15. all except D. read भावाभावात् 16. C. अर्थस्यसमर्प- 17. A's alt तमो विषय 18. C. विधायेति 19. D. omits ता 20. C. आदिषु शीता 21. D. रुद्रटेन 22. C. omits रेफ 23. D. प्रयोगालं 24. A's alt स्य 25. E. I. उक्तं। आकार व्यङ्ग्यतया वाक्य व्यङ्ग्यतया च द्विधैवोक्तः। तथा— 26. C. विकार 27. A's alt प्रभवैव नप्रति 28. A. C. तमभि D. तदभिप्रायः 29. बन्धं..........ध्वसाविति भावः। 30. E. I. इति।

> अभिधेयमभिदधानं* तदेव तदसदृशसकलगुणदोषम्।
> अर्थान्तरमवगमयति यद्वाक्यं‡ सोऽपरो भावः॥ इति च

तदिदं [*. E.I. omit द ‡. E.I. वाक्यं तया सः] 31. E. I. स्य व्यञ्जकभेदादसंख्याः। व्यङ्ग्यभेदाः सन्धि— 32. D. बहल F. शबलादि।

रसभावादिर्वाच्यशोभाहेतुत्वेनोक्तः। उत्प्रेक्षा तु स्वयमेव प्रतीयमाना कथिता। तदित्थं त्रिविधमपि प्रतीयमानमलङ्कारतया ख्यापितमेव।

वामनेन तु सादृश्यनिबन्धनाया लक्षणाया वक्रोक्तिचलङ्कारत्वं ब्रुवता कश्चिद्ध्वनिभेदोऽलंकारतयैवोक्तः।

संभवन्ति। वक्ष्यति हि—भावोदय[1]सन्धिशबलताश्च[2] पृथगलङ्कारा इति। रूपकादिष्वपि उत्तान[3]दर्शिता[4]मुद्घाटयति—**रूपकदीपकेत्यादि**। रूपकं दीपकम्[5] अपह्नुतिस्तुल्ययोगिता। आदिशब्दान्निदर्शनादिकं च[6] लक्षयिष्यते। तत्रोपमालङ्कारः प्रतीयमानो[7] वाच्यशोभा[8]हेतुत्वादुप[9]सर्जनत्वेन[10] नोक्तः। तदप्यसारमिति भावः। उपमालङ्कारस्य[11] वाच्यरूपकादिस्वरूप[12]न्यग्भावनेन[13] उत्थापितस्य प्राधान्येन तेष्ववस्थानात्। अथ रसभावयोः अयथादृशमुद्घाटयति—**रसवत्प्रेयऊर्जस्वीत्यादि**[14]। रसो[15] गुणीभूतो रसवानलङ्कारो, भावस्तु प्रेयान्, [16]रसाभास[17] ऊर्जस्वी, भावाभासस्समाहितम्। एवं रसभावादिः[18] वाच्यशोभा[19] हेतुत्वेनोक्तः[20]। तदपि मन्दमिति भावः। यतो रसादेरलङ्कारत्वं सदातनं न भवति, प्राधान्यदशायामलङ्कार्यत्वात्।

उत्प्रेक्षात्विति। प्रतीयमाना स्वयमेव कथिता प्रतीयमानाप्यलङ्कार्यत्वेन कथितेत्यर्थः। तदप्य[21]गंभीरमिति यावत्। प्रतीयमानदशायां[22] सर्वस्यैव [23]अलङ्कारस्यालङ्कार्यत्वं[24] सिद्धान्तितं यतः। त्रिविधं वस्त्वलङ्काररसरूपमलङ्कार्यतया[25] ख्यापितमेव[26]। काव्यजीवितत्वेनालङ्कार्यमेव[27] सत्तथा[28] न चेतितमिति[29] यावत्। इत्थं[30] काव्यजीवितांशविचारविमुखानाम् अलंकारमात्ररसिकत्वात् उत्तानदृशां मतम् उपन्यस्य[31], काव्यजीवितांशपराणां[32] मतानि यथावदुपन्यस्यति—**वामनेन त्वित्यादिना**। सादृश्यनिबन्धनाया[33] इति वदता सादृश्य[34] संबन्ध-निबन्धना[35] शब्दवृत्तिर्गौणीति वदन्तो[36] दूष्यत्वेन कटाक्षिताः। ध्वन्याचार्याणां[37] गौण्या वृत्त्या[38] लक्षणान्तर्भावो[39] नेष्टः।

---

1. A. उदय (शान्ति) (भाव) सन्धि (भाव) शबलाश्च (श्चैते) 2. D. शबलाश्च 3. D. उक्तान 4. A's alt C. उपदर्शयति 5. A's alt दीपकं पन इति स तुल्य 6. C. omits च 7. A. C. व्यज्यमानो 8. A's alt C. शोभावहत्वात् 9. E. सर्वत्र उपं 10. C. उपसर्जनत्वेनोक्त्या D. F. सर्जनेनोक्तः 11. F. अन्यत्र वा 12. A. रूपे 13. A's alt. and C. भावेनापि स्थितस्य D. भावनोत्था 14. C. प्रज्ञस्विद् E. प्रेयस्विद् 15. C. गुण 16. C रस 17. C. भाव F, भावः 18. F. रसाभासादि 19. A's alt C. शोभावहत्वेन 20. C. D. उक्तं 21. C. गम्भीरमिति यावत्। यतः 22. A. अलङ्कार्यत्वात् सर्व 23. A's alt. D. अलङ्कार्य 24. A's alt कारत्वं 25. B. D. E. F. कार 26. All except E. omit एव 27. C. कार 28. D. E. अपि 29. F. चेतितमतीति 30. A. C. F. इत्थं काव्यजीवितांशपराणां म 31. C. स्व 32. A's alt., C. पराणि 33. D. E. लक्षणाया इति 34. C. दृश्यनिब 35. A's alt. निबन्धिनी C. निबन्धीनि F. निबन्ध शब्द 36. C. वदन्ते 37. D. आचाराणां 38. Except C. all read वृत्तेः 39. A's alt. D. भावे E. भावे नेष्टः।

केवलं गुणविशिष्टपदरचनात्मिका रीतिः काव्यात्मत्वेन उक्ता। उद्भटादिभिस्तु गुणालङ्काराणां प्रायशः साम्यमेव सूचितम्। विषयमात्रेण भेदप्रतिपादनात्।

साहश्यनिबन्धना[1] लक्षणा[2] वक्रोक्त्यलङ्कार" इति प्रथयता[3] कश्चित् ध्वनिभेदो[4] लक्षणामूलो[5]ऽत्यन्ततिरस्कृतवाच्य[6]नामाऽलङ्कारत्वेनोक्तः काव्यात्मभूतस्सन्नलङ्कार्यत्वेन नावधारित इति यावत्। यस्त्वंशोऽलङ्कार्यो न भवति सोऽप्यलङ्कार्यत्वेन कथित इत्याह— **केवलं गुणविशिष्टेति**। केवलग्रहणाद्रसालंकारनैरपेक्ष्यं[7] कटाक्षितम्[8]। [9]रसालङ्कार[10]निरपेक्षैर्माधुर्यादि[11]भिर्गुणैर्विशिष्टा[12] येयं संघटनाधर्मभूता[13] वैदर्भ्यादि[14]रूपिणी रीतिः सैव काव्यात्मेत्युक्ता[15]। तथा च सूत्रितं तेन—"रीतिः आत्मा काव्यस्य"इति। प्रख्यापितं च[16]—

> अविदितगुणाऽपि[17] [18]सत्कविभणितिः कर्णेषु वमति मधुधाराम्।
> [19]अनधिगतपरिमलापि हि हरति दृशं मालतीमाला॥ इति॥

इदमप्ययुक्तमिति भावः। तथाहि—काव्यस्य[20] शरीरस्थानीयौ (शब्दार्थौ) कटकमुकुटादिकल्पा[21] अनुप्रासोपमादयः। व्यङ्ग्यार्थस्तु[22] आत्मभूत इति स्थिते, शब्दालंकारेभ्योऽपि[23] यो बाह्यो वर्णालंकारो[24]ऽनुप्रासस्तत्समकक्ष्यका[25] एता[26] रीतयः। यतो [27]द्वयोरपि वर्णधर्मता[28]। एतदभिसन्धाय [29]वृत्त्यनुप्रासवर्णालंकारप्रस्तावे वैदर्भ्यादयो[30] रीतयो विवेचिताः काव्यप्रकाश[31]कृदादिभिः। ग्रन्थकारोऽपि तत्र विवेचयिष्यति। [32]व्यञ्जकास्वेतासु [33]व्यङ्ग्यरससन्निकर्षादात्मत्व[34]भ्रमः उत्तान[35]धियाम्। तदनुप्रासादावपि समानमिति [36]मन्दमेतद्रीतिमात्रपक्षपातित्वम्। वस्तुतस्तु व्यङ्ग्यार्थ[37] एव आत्मा काव्यस्य[38]।

अथोद्भटादिभिः गुणालंकारयोर्भेदोऽपि[39] नावधारित इत्याह—**उद्भटादि-**

---

1. A.C.F. बन्धनाया 2. A.C.F. लक्षणाया 3. A.C.F. वदता 4. A.C. भेद अलंकार्यत्वेन 5. E. मूल 6. D. वाच्यो 7. D. ग्रहणात्सोऽलङ्कार 8. A's alt. C. गृह्यते 9. C. omits रस 10. C. निरपेक्षैव 11. F. भास्वर्यादिभिः 12. D. भूषणविशिष्टा 13. A. धर्मरूपा C. omits धर्मभूता 14. A. C. वैदर्भ्यादिकोऽसौ A's alt. reading वैदर्भ्यादि रूपिणीमिति सैव 15. A's alt. D. F. उक्तं 16. C. omits च 17. A.C. गुणगणापि 18. A's alt. C. सुकवेर्भणितिः 19. A's alt. C. अविदित 20. D. E. F. काव्ये 21. C. तुल्या 22. E. F. व्यङ्ग्योऽर्थः। 23. C. अलङ्कारेऽपि 24. A. योऽनुप्रास C. यानु F. कारश्च अनु 25. D. कक्षमा E. कक्ष्याका 26. A's alt. C. F. एता एव री 27. A's alt. द्वयो 28. A's alt. धर्मत्वा दनु (भि) सन्धाय C. धर्मत्वं तदभि E. धर्मत्वं एत 29. A. वृत्त 30. A's alt. D. F. आदि वृत्तयो 31. A. कृतादि 32. Except C. all read. व्यञ्जिका 33. A. व्यङ्ग रस (ङ्ग्य) D. व्यङ्गरस 34. E. omits त्व 35. A. उक्तान C. उत्तान प्रियः 36. A's alt. मन्दमितिरीति C. मन्दमिति मात्र 37. F. व्यङ्ग्योऽर्थ 38. A's alt. C. काव्ये 39. A. C. गुणालङ्कारयोरपि भे-

संघटनाधर्मत्वेन शब्दार्थधर्मत्वेन चेष्टेः । तदेवमलङ्कारा एव काव्ये प्रधानमिति प्राच्यानां मतम् । वक्रोक्तिजीवितकारः पुनः वैदग्ध्यभङ्गीभणितिस्वभावां बहुविधां वक्रोक्तिमेव प्राधान्यात्काव्यजीवितमुक्तवान् । व्यापारप्राधान्यं च काव्यस्य प्रतिपेदे । अभिधाप्रकारविशेषा एवालङ्काराः । सत्यपि च त्रिविधे

भिस्त्विति । साम्यं सजातीयत्वमित्यर्थः । तत्र हेतुः[1]—**'विषयमात्रेण भेदप्रतिपादनादिति'** । मात्रग्रहणात्स्वरूपभेदाभावः कटाक्ष्यते । काव्यशोभाहेतु[2]त्वलक्षणं तु स्वरूपमेकविध[3]मेवेति तेषामाशयः । विषयभेदं[4] दर्शयति—**'सङ्घटनेत्यादि** । "सङ्घटनाधर्मा गुणा[5], अलंकारास्तु शब्दार्थधर्माः" इति । तदिदमप्यगम्भीरमिति भावः । गुणालंकारयोश्च[6] स्वरूपत एवातिविभिन्नत्वात् ।

तथाहि—अङ्गिनो रसस्य धर्मा गुणाः अङ्गयोः [7]शब्दार्थयोस्त्वलङ्काराः । गुणास्तु [8]नियमेनोत्कर्षहेतवः[9], अलङ्कारास्त्वनियमेन । [10]गुणास्समवायेन वर्तन्ते, अलङ्कारास्तु संयोगेन[11] । यदाह—

"ये रसस्याङ्गिनो धर्माः[12] शौर्यादय[13] इवात्मनः ।
उत्कर्षहेतवस्ते स्युः अचलस्थितयो गुणाः ॥
उपकुर्वन्ति तं सन्तं येऽङ्गद्वारेण जातुचित् ।
हारादिवदलङ्कारास्तेऽनुप्रासोपमादयः" ॥ इति ॥

इत्थं च सति अलङ्कारापेक्षया गुणेष्वेव प्रकृष्टः[14] काव्योपस्कारः[15] यद्वदस्फुटालङ्कारत्वेऽपि [16]काव्यत्वाभ्युपगमः, न हि तद्वत् [17]अस्फुटगुणत्वे । यदाह—'अनलङ्कृती पुनः क्वापीति'[18] । यदेतदेवंविधं गुणानामलङ्काराणां च[19] प्राधान्यं[20], तत्रापि पुरातनानां [21]दृष्टिरसमीचीनेत्याह—**'तदेवं अलङ्कारा[22] एवेति'** ।

अथ[23] वक्रोक्तिजीवितकारभट्टनायक[24]योस्सं[25][दृष्टी]सन्निकृष्टे[26] ध्वनिदर्शनस्येत्यभिप्रायेणाह — **'वक्रोक्तिजीवितकारः पुनरित्यादिना** । [27]वैदग्ध्यभङ्गी[28]-

---

1. A.C. omit Visarga. 2. A's alt. शोभावसत्व C. शोभावहत्व 3. A.C. omit विध 4. D.E.F. विभेद 5. D. गुणाऽगुणाः 6. D.E. omit च 7. A. शब्दालङ्काराः 8. A.C. नियमेस्तत्र विद्यमानेऽपि (P.24.) A.C. make a confusion here. The portion उत्कर्षहेतवः ...to प्रतीयमानोऽर्थः (P. 24) is omitted in this context but is found later after यदा तु (P. 29) 9. A. उत्कृष्टहेतौ 10. A.C. गुणानामङ्गिनि संभवात् । अलङ्काराणां तु 11. A.C. योगाद्यदाह—12. F. भावाः । 13. A. C. भेर्यादय 14. A. C. प्रकृष्ट 15. D. F. उपकारः 16. E. काव्यत्वाद्युप 17. A. अस्फुटक 18. E. F. क्वापि काव्यमिति 19. C. omits च 20. A.C. प्रसाधनं 21. A. C. दृष्टिस्समीचीना । D. असमपीने 22. F. अलङ्कार 23. अथवावृत्ति 24. C. भटानय कार्या दृष्टि 25. All read संदृष्टि 26. A. C. D. H. I. सन्निकृष्ट 27. C. वैदग्ध्यां 28. A. C. omit भङ्गी ।

प्रतीयमाने व्यापाररूपा भणितिरेव कविसंरम्भगोचरः। उपचारवक्रतादिभिः समस्तो ध्वनिप्रपञ्चः स्वीकृतः। केवलमुक्तिवैचित्र्यजीवितं काव्यं, न व्यङ्ग्यार्थजीवितमिति तदीयं दर्शनं व्यवस्थितम्।

भट्टनायकेन तु व्यञ्जनव्यापारस्य प्रौढोक्त्याभ्युपगतस्य काव्यात्मत्वं कथयता न्यग्भावितशब्दार्थस्वरूपस्य व्यापारस्यैव प्राधान्यमुक्तम्। तत्राप्यभिधाभावकत्वलक्षणव्यापारद्वयोत्तीर्णो रसचर्वणात्मा भोगापरपर्यायो व्यापारः प्राधान्येन विश्रान्तिस्थानतयाङ्गीकृतः।

भणितिस्वभावां[1] वैदग्ध्यप्रकारोपेतभणिति[2]स्वरूपामित्यर्थः। जीवितमुक्तवानित्यलङ्कारमात्रदुराग्रहाभावो[3] द्योतितः। अन्योऽपि सारभूतः[4] सूक्ष्मोंऽशः[5] तेन अवधारित इत्यभिप्रायेणाह—**व्यापारप्राधान्यं चेति**। व्यापारो रसप्रत्यायनात्मा। तस्य प्राधान्यं-प्रतिपेदे। न पुनः अप्रधानस्य[6] अलङ्कारमात्रस्येति यावत्। अलङ्काराः पुनर्वाच्यकक्ष्यैवास्य सम्मतेत्याह—**अभिधाप्रकारेत्यादि**। यश्च वस्त्वलङ्काररसरूपः त्रिविधः प्रतीयमानोऽर्थः तत्र विद्यमानेऽपि तत्प्रत्यायनलक्षणस्य[7] व्यापारस्यैव[8] प्राधान्यमस्य[9] मतमित्याह—**सत्यपि चेत्यादि**। [10]उपचारो लक्षणाश्रयणं तद्वक्रतेति[11] अविवक्षितवाच्यादि[12]समस्तध्वनिः[13] कटाक्षितः। इत्थं च सति ध्वनिदर्शना[14]देत[15]द्दर्शनस्याल्पको—भेद इत्याह—**'केवलमुक्तिवैचित्र्येति।'**

अथ भट्टनायकमतम्— **भट्टनायकेनत्वित्यादि**[16]। [17]**प्रौढोक्त्याभ्युपगतस्येति**[18]। भोग[19] इति स्वकपोल[20]कल्पितो[21] व्यवहारः प्रौढोक्तिस्तयाऽङ्गीकृतस्येत्यर्थः। ईदृशस्य व्यञ्जनव्यापारस्य काव्यात्मत्वं कथयता न्यग्भावितशब्दार्थ[22]स्वरूपोऽयं[23] [24]व्यापारस्तस्यैव प्राधान्यमुक्तम्। स च व्यापारो लौकिको न भवतीत्याह—**तत्राप्यभिधाभावक[25]त्वेत्यादि**। तत्र तेषु व्यापारेषु मध्यादभिधाभावकत्वे[26] इति। साक्षात्सङ्केतार्थ[27]विषया शक्तिरभिधा। असाधारण्येन प्रतीतेष्वर्थेषु[28] साधारणीकरणरूपा शक्तिर्भावकत्वम्[29]। एतद्व्यापारद्वयो[30]त्तीर्णःसाधारणीकृतेषु विभावादिषु[31] रसचर्वणात्मा

---

1. A.C. स्वभावा E.F. स्वभावात् 2. A.C. भणितिरित्यर्थः। E.F. भणितिस्वभाव रूपमित्यर्थः 3. F. भावत्वम्। अन्य 4. A.C. भूतः तेन 5. D. सूक्ष्मांशश्च 6. D. अप्राधान्यस्य 7. A.C.F. लक्षणोऽस्य 8. A.C.F. व्यापारस्तस्यैव 9. A. D. F. अन्यस्य 10. E. यश्च यावद्ध्वनिभेदः स सर्वोऽपि पर्यायान्तरेण परिगृहीत इत्याह—उपचारवक्रतेत्यादि। उप 11. C. तद्वत्कृतेति 12. D. क्रसम 13. A's alt. E.F. ध्वनिकटाक्षः 14. A's alt. दर्शता 15. A. -देस्य तद्दर्श C. नादेस्तद्द-F. नादेस्तद्दर्शनस्य 16. A's alt. C. 'नायकस्त्वित्यादि' 17. C. प्रौढाक्त्या……पगत 18. D. इति स्व 19. F. प्रौढ इति 20. A's alt. F. परिकल्पितो 21. A's alt. C. कल्पितव्य 22. Except D. all have वाच्यार्थ 23. A's alt. C. स्वभावो 24. F. व्यवहारः 25. A's alt. C. भावुक 26. A's alt C. भावुकत्वं 27. E. सङ्केतितात्वंवि 28. A's alt. प्रतीतेषु साधा- 29. A's alt. C. भावुक 30. D. F. त्रयो 31. C. आदि रस।

ध्वनिकारः पुनरभिधालक्षणातात्पर्याख्यव्यापारत्रयोत्तीर्णस्य ध्वननद्योतनादिशब्दाभिधेयस्य व्यञ्जनव्यापारस्यावश्याभ्युपगम्यत्वाद्व्यापारस्य च वाक्यार्थत्वाभावाद्वाक्यार्थस्यैव च व्यङ्ग्यरूपस्य गुणालङ्कारोपस्कर्त्तव्यत्वेन प्राधान्याद्विश्रान्तिस्थानत्वादात्मत्वं सिद्धान्तितवान् ।

व्यापारस्य विषयमुखेन स्वरूपप्रतिलम्भात् तत्प्राधान्येन प्राधान्यात् स्वरूपेण विचार्यत्वाभावाद्विषयस्यैव समग्रभरसहिष्णुत्वम् । तस्माद्विषय एव

भोगापर[1]नामधेयो व्यापारो[2] विश्रान्तिस्थानतया प्राधान्येनाङ्गीकृतः । अत्र दर्शने भोगादिव्यवहारस्य स्वकपोलकल्पित[3]व्यापारप्राधान्यमि[4][त्यंशो] ध्वनिकारदर्शनविलक्षणः ।

अथ सिद्धान्तः—**ध्वनिकारः पुनरित्यादि** । ध्वनिकारस्तु व्यङ्ग्यात्मनो वाक्यार्थस्यैव काव्यात्मत्वं सिद्धान्तितवान् । तत्रहेतुः—**व्यञ्जन[5]व्यापारस्यावश्याभ्युपगम्यत्वा[6]दिति** । कीदृशस्य ? **अभिधालक्षणातात्पर्याख्य[7]व्यापारत्रयोत्तीर्णस्य** । तात्पर्यं[8] नाम [9]पदार्थाधिगमसमनन्तरभाविनी समन्वयशक्तिः । एतत्त्रयोत्तीर्णस्येति चतुर्थकक्ष्यावस्थायितोक्ता[10] । [11]**ध्वननद्योतनेति** । ध्वननं[12] द्योतनं[13] प्रत्यायनं[14] [15]व्यञ्जनमित्यादि प्रसिद्धपर्यायसहस्रस्यावश्याभ्युपगम्यत्वात्[16] तदनभ्युपगमे व्यङ्ग्यार्थप्रतीतौ न गत्यन्तरं यतः, अतः व्यङ्ग्योऽर्थ[17] एवात्मेत्यर्थः । ननु[18] व्यञ्जनव्यापारः प्रधानं किं न भवति, इत्यत आह—**व्यापारस्य च वाक्यार्थत्वाभावादिति** । अप्रत्यक्षत्वेन निरुक्त्यनर्हत्वाद्वाक्यार्थत्वाभावः । सर्वा एव[19] खलु पदार्थशक्तयः कार्यादिप्रतीत्यन्यथानुपपत्त्या [20]अभ्यूह्यन्त एव । अतो व्यापारो न प्रधानम् । यश्च हेतुः प्राधान्ये सोऽपि व्यङ्ग्य एवोपपद्यते, न तु व्यञ्जनव्यापार इत्याह—**वाक्यार्थस्यैवेति** । गुणालङ्कारोपस्कर्त्तव्यत्वं विश्रान्तिस्थानत्वं[21] च[22] प्राधान्ये[23] हेतुः । अतो[24] व्यङ्ग्यार्थं एव काव्यात्मेति सिद्धान्तितवान् ।

अत्र भूयस्तरा[25]युक्तीरभ्युच्चिनोति—**व्यापारस्य विषयमुखेनेत्यादि** । व्यञ्जनादेर्हि व्यापारस्य व्यङ्ग्यार्थमुखेनैव स्वरूपसिद्धिः । अतो न[26] वाक्यार्थत्व[27]संभवः । यथास्वरूपोपलम्भो विषयमुखेन[28] तथा प्राधान्यं विचारक्षमत्वमपि तन्मुखेनैवेत्याह—**तत्प्राधान्येन प्राधान्यात्**[29] । **स्वरूपेण विचार्यत्वाभावादिति च**[30] । विषय[31] एव तु पुष्कलं वाक्यार्थ[32]

---

1. D. भोगः परं 2. C. व्यापारित वि 3. A's alt. D. E. F. परिक्लृप्ति व्यापारे 4. A's alt. C. H. इत्यंश हृदयमेव D. अंशद्वयमेव……दर्शन E. अंशमेव B. F. अंशेध्वनिः, द्वयं एव ध्वनि 5. A. व्यञ्जना 6. A—C. गम्यमानत्वात् 7. A's alt. –पर्य व्या 8. E. हि नाम 9. A's alt. अर्थाङ्क, C. अर्थसम 10. A's alt. अवसायिनोऽव 11. A. ध्वनि द्योतनमिति ध्वन 12. Except E all have ध्वनन 13. A. द्योतक (न) C. द्योतन 14. A. प्रत्यायक (न) C. प्रत्यायकं 15. A.C. व्यञ्जकं 16. A. गमभा (म्यमा) न त्वा— 17. A.C. व्यङ्ग्यार्थ 18. D. न स 19. C. सर्वाखलु 20. C. अप्यू 21. D. स्थानं च 22. C. न 23. C. प्रधानत्वे A. प्राधान्ये (नत्वे) 24. B. अतो स्वरूप 25. D. युक्ति 26. D. omits न 27. A. omits सं 28. A. मुखेनैव तथा तत्प्राधान्येन C. मुखेनैव एतत्प्राधान्येन 29. D. यथास्व 30. omitted in C.D. 31. D. विस्मय 32. F. अर्थी ।

व्यङ्ग्यनामा जीवितत्वेन वक्तव्यः यस्य गुणालङ्कारकृतचारुत्वपरिग्रहसाम्राज्यम्। रसादयस्तु जीवितभूता नालङ्कारत्वेन वाच्याः। अलङ्काराणामुपस्कारकत्वाद्रसादीनां च प्राधान्येनोपस्कार्यत्वात्। तस्माद्व्यङ्ग्य एव वाक्यार्थीभूतः काव्यजीवितमिति। एष एव पक्षो वाक्यार्थविदां सहृदयानामावर्जकः। व्यञ्जनव्यापारस्य सर्वैरनपह्नुतत्वात्तदाश्रयणे च पक्षान्तरस्याप्रतिष्ठानात्।

यत्तु व्यक्तिविवेककारो वाच्यस्य प्रतीयमानं प्रति लिङ्गतया व्यञ्जन-

---

भावमर्हतीत्याह—**विषयस्यैवेति**। साक्षात्स्वरूप[1]प्रतिलंभः स्वतः प्राधान्यं स्वरूपेण विचार्यत्वं[2] चेत्यादि[3] समग्रो भरः। तत्सहिष्णुत्वं[4] हि व्यङ्ग्यार्थलक्षणस्य विषयस्यैव। अतो विषयस्यैवात्मत्वं युक्तमित्याह—**तस्माद्विषय एवेति**। समग्रभर[5]सहिष्णुत्वात् स निरवशेष[6]वैभवमर्हतीत्यत[7]आह—**यस्य गुणालङ्कारेत्यादि**।

ननु रसादयो [8]रसवदाद्यलङ्कारा[9] एव प्राचां मताः। कथमेषामलङ्कार्यत्वमित्यत आह—**रसादयस्त्विति**। तत्र[10] हेतुः—**अलङ्काराणामुपस्कारकत्वात् रसादीनां च प्राधान्येनोपस्कार्यत्वाच्च इति**। रसादीनां हि यदा गुणीभावः[11] तदालङ्कारत्वं, यदा तु प्राधान्यं तदालङ्कार्यत्वमेव। यत इत्थं[12] व्यवस्था[13], अतो व्यङ्ग्यार्थ एव काव्यात्मेति निगमयति—**तस्माद् व्यङ्ग्य एवेत्यादि**। वाक्यार्थीभूत इति प्राधान्यदशां[14] कटाक्षयति, [15]अप्राधान्य[16]दशायामनात्मत्वात्[17]। तदिदं ध्वनिकृतो दर्शनम्[18]। [19]एतदनुसारित्वमात्मनो दर्शयितुमाह—**एष एव[20] पक्ष इत्यादि**। एवकारेण पक्षान्तरेष्वनुपपत्तिराविष्क्रियते। [21]आवर्जकः [22]बलादात्माभिमुखीकारकः[23]। तत्र[24] हेतुः—**व्यञ्जनव्यापारस्येत्यादि**। य इच्छन्ति व्यङ्ग्यार्थस्य काव्यात्मतां[25], ये च नेच्छन्ति,सर्वैरेव खल्वेभिः न शक्यते हि[26] व्यञ्जनव्यापारोऽपह्नोतुम्। यदि नापह्नुतः किं तत इत्यत[27] आह—[28]**तदाश्रयणे चेत्यादि**।

पक्षान्तरस्याप्रतिष्ठानं[29] दर्शितचरीभिर्युक्तिभिः सिद्धम्[30]। यत्तु[31] तत्र व्यक्तिविवेककारः प्रत्यवस्थितः[32] तदुपन्यस्यति—[33]**यत्तु[34]व्यक्तिविवेककारः** इत्यादिना। लिङ्ग-

---

1. Except C. all have रूपे 2. A. विचार्यकत्वं 3. A आदिः 4. A's alt. सहितस्याङ्गस्य व्य C. सहितस्य रहस्यस्य……लक्षण 5. C. भास 6. A. C. शेष 7. A. अर्ह……स्तीत्यत— 8. C. वदलङ्कारा……चामताः। 9. D. अलङ्कार 10. C. तत्रतु अलङ्काराचेति रसा' 11. C. गुणि 12. F. अव्यवस्था 13. C.व्यवस्थानात् 14. D. प्राधान्या दशाः 15. C. omits अ 16. D. भूतदशा 17. A. अन्यूनकत्वात् 18. C. दर्शन……हारित्व D. दर्शनः 19. A. तदनु 20. D. F. एव च 21. A. वर्जलः 22. A's alt बलानभि C. बलादभि 23. A. तद्धेतुः। तत्र 24. C. तस्य 25. C. आत्मता। 26. C. omits हि 27. A's alt अत्र C. F. इत्याह 28. A's alt C. यदाश्रयेण D. तदनाश्रयणे 29. D. अप्रत्यादिना 30. A's alt C. सिद्धान्तयन् 31. A. omits यत्तु 32. A. प्रत्यपाक्वस्थतत्र अ (पास्थित तदु) C. अवास्थितः 33. F. omits यत्तु 34. A. अविवेक।

स्यानुमानान्तर्भावमाख्यत्, तद्वाच्यस्य प्रतीयमानेन सह तादात्म्यतदुत्पत्त्यभावादविचारिताभिधानम् । तदेतत्कुशाग्रीयधिषणक्षोदनीयमतिगहनमिति नेह प्रतन्यते ।

अस्ति तावद्व्यङ्ग्यनिष्ठो व्यञ्जनव्यापारः । तत्र व्यङ्ग्यस्य प्राधान्याप्राधान्याभ्यां ध्वनिगुणीभूतव्यङ्ग्याख्यौ द्वौ काव्यभेदौ । व्यङ्ग्यस्यास्फुटत्वेऽलङ्कारवत्त्वेन चित्राख्यः काव्यभेदस्तृतीयः । तत्रोत्तमो ध्वनिः । तस्य लक्षणाभिधामूलत्वेनाविवक्षितवाच्यविवक्षितान्यपरवाच्याख्यौ द्वौ भेदौ ।

तया गमकतया । **तादात्म्यतदुत्पत्त्यभावादिति** । धर्मधर्मिणोर्लिङ्गलिङ्गिभावे तादात्म्यं नाम नियतस्सम्बन्धः[1] । कार्यकारणयोस्तु[2] तदभावे[3] तदुत्पत्तिर्नामास्तीति । अनयोर्नियतसम्बन्धयोः यद्यन्यतरो न स्यात् तदा व्यभिचारान्न संभवति लिङ्गलिङ्गिभाव इति यावत्[4] । यत इत्थमेतत्[5] अतस्तदविचारिताभिधानं, तदेतद्व्यक्ति[6]विवेककृतो[7] दर्शनं वायसवाशित[8]कल्पमिति यावत् । एवं ध्वनिदर्शनसमर्थने यद्यावदस्ति युक्तिजातं तदतिगहनम्[9] । ध्वनिगुणीभूतव्यङ्ग्ययोरेव [10]काव्ययोर्मीमांसायामुपयुज्यते; चित्रकाव्यमीमांसायां तु नात्युपयुज्यते इत्याशयेन निगमयति—**तदेतत्[11]कुशाग्रीयेत्यादि** । इह[12] चित्रकाव्ये[13] । न प्रतन्यते, यथोपयोगमनूद्यत एवेति यावत् ।

अथ[14] यावानुपयोगश्चित्रप्रस्तावे[15] [16]ध्वनेस्तावन्मात्रमनुवदति—**अस्ति तावदित्यादिना** । यद्यस्ति किं तत [17]इत्यत आह—**तत्र व्यङ्ग्यस्येत्यादि** । प्राधान्ये ध्वनिर्नामोत्तमः काव्यभेदः । अप्राधान्ये [18]तु गुणीभूतव्यङ्ग्य[19]नामा मध्यमः । चित्रस्य विषयमाह—**व्यङ्ग्यस्यास्फुटत्व इति** । चित्रमवरमित्यर्थः । तत्र भेदान् संक्षिप्य [20]संख्यातुमाह—**तत्रोत्तमो ध्वनिरित्यादिना** । स चाभिधामूलतया लक्षणामूलतया च प्रथते[21] इत्याह —**तस्य लक्षणाभिधामूलत्वेनेति** । लक्षणामूलत्वे सति अविवक्षित[22] वाच्याख्यः[23] मुख्यार्थबाधशालिन्यां[24] लक्षणायां वाच्यांशस्याविवक्षितत्वात् । अभिधामूलत्वे तु विवक्षितान्यपरवाच्याख्यः[25]; अभिधायां वाच्ये[26] बाधाभावाद्[27] विवक्षितत्वं, व्यङ्ग्याङ्गत्वेन विवक्षणात् अन्यपरता चेति[28] विवक्षितान्यपरत्वम् अभिधामूलस्य । इत्थं लक्षणामूलो[29]ऽभिधामूलश्चेति सामान्यतो[30] ध्वनिर्द्विराशिकः[31] ।

---

1. C. नियतसं- 2. A's alt तथास्तु तद 3. A's alt पत्तिर्ननास्ति C. पत्तिर्नास्ति D. नामा । अनयो 4. D. भाववत् युक्ति 5. E.F.G. इत्थमतः— 6. C. तदेव तद्व्यक्ति 7. A's alt C. कृद्दर्शनं 8. E. F. वाशितादिक 9. D. गर्हितम् 10. F. भाव्य 11. D. कुशालीये F. कुशाभ्रिये 12. A. C. E. इ ह तु 13. A's alt C. काव्यं 14. A's alt C. अवयवानुप 15. A. C. चित्रकृत्प्र 16. A's alt. C.F. ध्वनौ 17. D. F. इत्याह— 18. C. न्ये गुणी 19. C. व्यङ्ग्यं E. व्यङ्ग्यास्फुट 20. C. संख्यामाह 21. C. प्रयत 22. E. वाच्याः मु 23. A.C.F. आख्या 24. D. अर्थ वाचिन्यां 25. A. C. आख्या F. आख्याः 26. C. वाच्यः 27. A's alt. C. बाधाया अभा 28. A's alt. C. परत्वं 29. Except F. all read. मूलाभिधा 30. A's alt. सामान्येन अनिः, C. सामान्येनध्वनिः 31. F. राशितम् ।

आद्योऽर्थान्तरसंक्रमितवाच्यात्यन्ततिरस्कृतवाच्यत्वेन द्विविधः। द्वितीयोऽप्यसंलक्ष्यक्रमसंलक्ष्यक्रमव्यङ्ग्यतया द्विविधः। लक्षणामूलः शब्दशक्तिमूलो वस्तुध्वनिः। असंलक्ष्यक्रमव्यङ्ग्योऽर्थशक्तिमूलो रसादिध्वनिः। संलक्ष्यक्रमव्यङ्ग्यः

तत्र लक्षणामूलस्यावान्तरभेदमाह—**आद्योऽर्थान्तर**[1] इति। आद्यो [2]लक्षणामूलस्सो[3]ऽर्थान्तरसङ्क्रमितवाच्यो अत्यन्ततिरस्कृतवाच्यश्चेति द्विधा। अजहत्स्वार्थतया[4] स्वसिद्धये पराक्षेपे सति अर्थान्तरसङ्क्रमितवाच्यः[5]। यथा—

प्रारम्भे श्रुतिसुन्दरं परिणतौ [6]पथ्यं जनैस्सुग्रहं
नानाशास्त्ररसैः[7] प्रसन्नमधुरैः[8] प्रत्यक्षरं[9] क्षालितम्[10]।
आह्लादाय[11] न कस्य नाम विदुषां वक्त्राम्बुजादुद्गतं
[12]चित्तान्तर्विकसद्विवेक[13]मुकुलामोदानुबिद्धं वचः॥

[14]अत्रैवंविधवच उपदेशलक्षणे अर्थान्तरे सङ्क्रामति। [15]वचोमात्रस्यैवं वैशिष्ट्यासंभवात्[16]।

अथ यदा जहत्स्वार्थतया परार्थं स्वसमर्पणं तदात्यन्ततिरस्कृतवाच्याख्यः[17]। यथा—

[18]एके [19]मूकवदासते जडधियो जिह्लेति तत्सन्निधा
वन्ये दुर्विचिकित्सितं विदधते तेभ्योऽपि बीभत्सते[20]।
अस्थाने बहुधा स्तुवन्ति कतिचित्तैरुल्कया[21]दह्यते
विद्या विक्लवते कया न विधया प्राप्यान्तिकं[22] दुष्प्रभोः॥

अत्र विद्यायां [23]ह्रीबीभत्सादिः[24] गङ्गादौ[25] घोषाधिकरणतादीव[26] सर्वथा[27] स्वसंयोगिने स्वार्थं परित्यज्य [28]न संभवतीत्यत्यन्त[29]तिरस्कृतवाच्यता।

इत्थम[30]विवक्षितवाच्यस्यार्थान्तरसंक्रमित[31]वाच्योऽत्यन्ततिरस्कृतवाच्यश्चेति द्वौ भेदौ। अथाभिधामूल[32]प्रभेददिक्। **द्वितीयोऽपीति**[33]। द्वितीयोऽभिधामूलो विवक्षितान्यपरवाच्याख्यः। तत्र क्वचिद् व्यङ्ग्य[34]क्रमो न संलक्ष्यते। क्वचित्संलक्ष्यते। तस्माद्विवक्षितान्यपरवाच्योऽपि असंलक्ष्यक्रमव्यङ्ग्यः संलक्ष्यक्रमव्यङ्ग्यश्चेति द्विविधः। [35]अथानयोः[36]लक्षणाभिधामूलध्वन्योर्वस्त्वलङ्कार[37]रसरूपता[38]विषयविशेषं[39] व्यवस्था-

---

1. D. अर्थोऽन्तर 2. D. लक्षण 3. C. मूलास्सा 4. D. स्वार्थयोः C. अथर्तयास्य सिद्धये 5. C. वाच्या 6. C. पत्युज्जनैः D. पथ्जनैः 7. C. रसः 8. A's alt. F. शिशिरैः 9. A, D. अक्षर 10. D. क्षालितः 11. A's alt C. आह्लादायत कस्य 12. C. विक्रान्तः 13. A. B. C. G. सरोजमुकु 14. F. अत्र वचः 15. D. वचामात्र 16. A. अभावात् 17. C. आख्यं 18. C. येते A's alt. येते A. B. D.F. येके 19. A's alt. C. मूढ 20 C. भत्स्यते, 21. F. उत्कया 22. D. प्राच्यान्ति 23. C. omits ह्री 24. C. आदि 25. A. C. गङ्गायां 26. A. आदिवत् C. करणादिव 27. C. सर्वधा 28. C. omits न 29. C. इति अत्र. 30. F. omits अ 31. D. संक्रामित 32. C. omits प्र 33. C. इति अभि 34. A.C. व्यङ्ग्यस्य 35. D. तथा 36. D.E.F. मूलयोः 37. D. स्वरूप 38. C. रूपत 39. A.C.E. विशेषे।

शब्दार्थोभयशक्तिमूलो वस्तुध्वनिरलङ्कारध्वनिश्चेति । तत्र रसादिध्वनिः

पयितुमाह—**लक्षणामूल इत्यादिना** । यो हि लक्षणामूलः स नियमेन शब्दशक्तिमूलो वस्तुरूपश्च भवति । यद्धि यावदस्ति जातिगुणक्रियाद्यात्मकं[1] पदार्थजातं सर्वमेवैतद्वस्तु कथ्यते[2] । तदेव कवि[3]कल्पितविच्छित्ति[4]सध्रीचीनमलङ्कारः[5] । रसास्तु विभावानुभावव्यभिचारिभिरभिव्यज्यमाना रत्यादयः सहृदयप्रतीतिविशेषाः[6] । अथ विवक्षितान्यपरवाच्यो[7] योऽयं असंलक्ष्यक्रमव्यङ्ग्यः स नियमेनार्थशक्तिमूलो रसादिरूपश्च भवति । संलक्ष्यक्रमव्यङ्ग्यस्तु शब्द[8]शक्तिमूलोऽर्थशक्तिमूल उभयशक्तिमूलश्च भवति । नियमेन वस्तुरूपो[9]ऽलङ्काररूपश्च भवति । तत्र यदा रसभावरसाभास[10]भावाभासभावोदयभावशान्ति[11]भावसन्धिभावशबलता व्यज्यन्ते, तदा क्रमो न [12]संलक्ष्यत इति असंलक्ष्यक्रमत्वम्[13] । तत्र रसेषु [14]शृङ्गारस्संभोगात्मा यथा—

पुष्पोद्भेदमवाप्य केलिशयना[15]द्दूरस्थया चुम्बने
कान्तेन स्फुरिताधरेण निभृतं भ्रूसंज्ञया याचिते ।
आच्छाद्य स्मितपूर्ण[16]गण्डफलकं[17] चेलाञ्चलेनाननं
मन्दान्दोलितकुण्डलस्तबकया तन्व्या विधूतं शिरः ॥

अत्र नायिकानायकवृत्तान्तलक्षणो यो[18] वाच्योऽर्थः[19] या च सहृदयप्रतीतेः[20] वेद्यान्तरविगलनेन वर्ण्यवस्तुतन्मयीभावलक्षणा रससंवित्, न खलु तयोः क्रमस्संलक्ष्यते । विद्यमानोऽपि पद्म[21]पत्रशतव्यतिभेदनयेन[22] अविद्यमानवदुपलक्ष्यते ।

विप्रलम्भश्शृङ्गारो यथा—

नान्तःप्रवेशमरुणद्विमुखी न चासी[23]दाचष्टरोष[24]परुषाणि[25] न चाक्षराणि ।
सा केवलं सरलपक्ष्मभिरक्षिपातैः कान्तं[26] विलोकितवती जननिर्विशेषम् ॥

एवमादिष्वक्रमत्वं[27] प्राग्वदनुसन्धेयम् ।

हास्यो यथा—

पइमरणमण्डणज्जलवेसा पासंग एसु तरुणेसु ।
णिद्धसरं परुअंती सविब्भमं हण इ थणवट्टम् ॥

---

1. C. क्रियात्मकं 2. C. तथ्यते 3. C. omits क F. omits कवि, 4. A's alt. संध्रीची 5. F. कार 6. A. विशेषाविव 7. D. F. वाच्ये 8. A's alt. C. शब्दशक्त्यर्थशक्ति उभयशक्तिमूलश्च 9. F. मूलो 10. D. रस 11. C. यद्रूपरस्थया भाव 12. D. नलक्ष्यत 13. A's alt क्रमता 14. A. C. F. संभोगश्शृङ्गारात्मा 15. A. C. शयनादुत्थाय दूरस्थया 16. A's alt. C. पूर्व 17. A's alt. C. फलकाञ्चाञ्चनेन 18. F. अन्तो यो 19. A. C. F. वाच्यार्थः 20. A's alt C. प्रतीतो 21. C. पत्रा तद्यति 22. A.C. F. क्रमरहित वदु 23. C. वासी A's alt आसीत्राचष्ट 24. C. दोष 25. A. कोप न 26. A.C.D. सा तं A's alt. कान्ता 27. C. 'आदि प्रक्रम' ।

अत्र [1]पतिमरणमण्डनो[2]ज्ज्वलवेषायाः[3] तरुणेषु पार्श्वमुपगतेषु[4] सत्सु[5] सद्यः स्निग्धस्वरं प्ररुदत्याः[6] सविभ्रमं [7]यदेतत्स्तनवृत्त[8]हननं तत्[9]प्रच्छन्नानुरागस्यानौचित्येन प्रवृत्तेर्हास्यमभिव्यनक्ति ।

करुणस्य यथा—

[10]साहित्यलक्षणकले समुपैषि[11] नव्य[12]वैधव्यमद्य[13] विरते [14]गुरुविष्णुदेवे ।
कर्णान्तिकप्रणयन[15]प्रणयोत्सवाय तालीदलार्पणमितः[16]परमक्षमं[17] ते ॥

रौद्रस्य[18] यथा—

दृप्यत्सूकर[19]कालकण्ठ[20]शकलव्याकीर्ण[21] धारा[22]न्तरा
[23]क्रोधोत्तालुलायकण्ठनलकच्छेदार्धवक्त्राननाः ।
श्रीबल्लाल[24] विधाय केलि[25]मृगयामावर्तमानस्य ते
शार्दूलेन्द्रवसाभिषेकसमये[26] [27]जीयासुरुग्राश्शराः ॥

वीरस्य यथा—

[28]आधातुर्भुवनं[29] तदेतदखिलं चक्षुष्मदाकीटका-[30]
द्दिव्यं चक्षुरनन्यलभ्य[31]मुभयत्रास्ते[32] परं[33] दुस्सहम् ।
फाले भूतपतेर्मनोभवमुख[34]क्षुद्र[35]क्षयोज्जागरं[36]
बाणे[37] च प्रतिराजदर्पदलनं[38] बल्लाल[39]पृथ्वीपतेः ॥

भयानकस्य यथा—

गिरिकुञ्जेषु[40] गूढानां तवारि[41]वरयोषिताम् ।
असूर्यंपश्यतामात्रं[42] [43]भूतिचिह्नेष्वशिष्यत[44] ॥

बीभत्सस्य यथा—

स्वात्मानन्दं किमपि[45] परमं[46] साधु[47] संभुञ्जते[48] ये[49]
तेषामस्यां विषयविततौ[50] जायते हेयबुद्धिः ।

1. A's alt. C. प्रकरण 2. C. मराडलो 3. F. वेषवेषायाः 4. Except E. all read अपगते 5. F. omits सत्सु 6. A.C. प्ररुद्य 7. A's alt C. यदि तत् 8. A's alt पृष्ठ 9. C. प्रच्छिन्न 10. A's alt. हाहित्य 11. A's alt. सकपैहि (षि) D. समुपैति 12. Except C. all read नव्यं 13. A's alt. अन्य 14. C. गरु 15. C. प्रणयिन 16. C. इतं 17. A's alt अन्तमस्स्यात् 18. A's alt. रौद्रे C. रौद्रो 19. A's alt. C. मस्तक 20. Except A's alt all read खराड 21. A. व्याकीणाया 22. F. सारा 23. A's alt C. क्रोधात्ता— 24. A. C. वल्लाल 25. A's alt केन्द्रि 26. A's alt. C. सरसा 27. B.D.E.F. दीयासु 28. C. आग्रातु 29. A.B.C.D.F.H.I. भवनं 30. Except C. all read आकीटका 31. लभ्यं कथय 32. A. उभयं त्रासे (ते) 33. A.C. पुनः 34. C. मुखं 35. C. रुद्रा 36. A's alt. C. त्रयेष्वादरं 37. C. पाणौ 38. A's alt. C. दलने 39. A.C. वल्लाल 40. A.F. कूटेषु 41. C. पर 42. A's alt. read पश्यां गात्रं C. पश्यतां गात्रं 43. A's alt. भून्त्रिचिनौ E. भूमि 44. D. अपश्यत 45. A.C.D.F. कमपि 46. E. परमस्साधु 47. A's alt. C. स्वादु 48. A's alt. C.F. संभुज्यते । 49. A's alt. F. यैः, 50. A's alt. विनतौ—

अन्येषां तु प्रसरतितरां[1] प्रत्युतास्वादनेच्छा
छर्दिक्लिन्ने[2] कफकलुषिते मक्षिकाणामिवान्ने[3] ॥

अद्भुतस्य यथा—

आ[4]कर्णितोत्तमगुणानुगुणेति कृत्वा[5] यामुल्लिलेख सुचिरेण मनो मदीयम् ।
तामाकृतिं[6] विसदृशीमतिमात्र[7]मस्या दास्येऽपि[8] नास्मि विनिवेशयितुं विदग्धः[9] ॥

अत्र [10]सुचिर[11]मदृष्टचरनायिकारूपस्यानुगुण[12]श्रवणानुरागिणो नायकस्य नायिकाप्रथमदर्शने आकर्णितोत्तम[13]गुणानुगुणतया मनसा [14]समुल्लिखितचरी[15] या नायिकामूर्तिः, सा सम्प्रति[16] [17]साक्षात्कृतनायिकामूर्तेरतिमात्रं[18] विसदृशी सती [19]दासीत्वेनापि निवेशयितुं[20] न शक्यत [21]इत्युक्तिराभिरूप्यनिबन्धनस्य[22] परां काष्ठामाविष्करोति ।

शान्तस्य यथा—

मा भैषीः कुल[23] मा व्यथस्व[24] विनय क्लेशोऽस्तु मा ते[25] श्रुत[26]
प्रध्वंसाय यतस्व[27] मा खलु मते माहात्म्य मा मा त्यज[28] ।
युष्मद्गौरवसारदारणपरान्मत्वा तृणाय प्रभून्
भिक्षापर्यटनार्जितेन कलये[29] पिण्डेन पिण्डस्थितिम्[30] ॥

इत्थं रसध्वनिर्दिङ्मात्रे[31]णोदाहृतः[32] ।

अथ **भावध्वनिः**—भावो हि नाम नायिकाव्यतिरिक्ते [33]देवतागुरुनृपपुत्रादौ व्यज्यमाना रतिर्वाक्यार्थत्वेन[34] व्यज्यमाना निर्वेदादयो व्यभिचारिणश्च[35] । यथा—

अद्य[36] स्वप्नमुपागतेन यमुनातीरे[37] मयावस्थितं[38]
दृष्टस्तत्र च वेणुवादनिपुणो[39] बालो गवां पालकः ।
तं दृष्ट्वा करणैरनन्य[40]विषयैरन्तर्विलीनो[41]ऽभवं
[42]यावत्तावद्[43]अहं चिरादुपचितैः पापैः प्रबोधं गतः[44] ॥

---

1. F. प्रसरसितरां 2. D. छिन्ने 3. C. अन्ते 4. F. कुणिठत 5. A's alt. F. मत्वा 6. E. कामाकृतिं 7. D. मात्र दास्य 8. D. विनास्मि 9. A's alt. समर्थः 10. A's alt. सुभृश 11. A.C. दृष्टनायि 12. D. रूपस्य गुण 13. C. उत्तम गुणतया 14. C. समाश्रित 15. D. चरया 16. F. तं प्रति 17. A's alt. C. साक्षाद्दृष्ट— 18. F. अतीतमात्रं अति 19. A's alt. C. दासत्वेन 20. A.C. विनिवेशयि—21. A's alt. C. इत्याभिरूप्य 22. D. निबन्धस्य 23. C. काल 24. All except C. व्यधस्व 25. C. वाते 26. A.B.C.D. श्रुते 27. C. omits व 28. D.E.F. मान्त्यज 29. C. कलय 30. C. स्थितिः 31. A's alt मात्रमुदा 32. C.F. उदाहृतम् D. उदितः 33. C. देवतानृप 34. D. omits न 35. E. आद्योयथा 36. C. अस्य D. आद्य 37. A's alt C. तीरेण यावत् 38. C. स्थितः 39. A's alt C. नादनपरो 40. F. अनन्तः— 41. C. निलीनो F. विलिलो 42. A's alt C. स्वापात् 43. A's alt यावत् 44. C. गतः सं ।

यथा च—

संसारार्त्या[1] विधुरविधुरो ब्रह्म यत्ना[2]द्विचिन्वन्
नानारूपं[3] जगदिदमहं [4]दृष्टवानेव पूर्वम् ।
हस्ते न्यस्ते[5] सति तव गुरो सांप्रतं मस्तकेऽस्मिन्
ब्रह्मैवैतत्सकलमभवन्नो जगन्नापि चाहम्[6] ॥

यथा च[7]—

[8]काष्ठाप्राप्तिरियं परा खलु परीपाकस्य[9] भाग्योन्नतेः
श्री[10]बल्लाल नृपाल ! यद्वयमिमौ[11] पादौ तवोपास्महे ।
यस्तिष्ठेत्प्रतिहार[12]सीम्नि भवतो रुद्धप्रवेशश्चिरं
किं नासावपि चोलपाण्ड्यपृथ्वीपालैस्समं गण्यते ॥

इत्थं पुत्रादिविषयो व्यभिचारिरूपश्च भावः स्वयमूह्यः[13] ।

रसाभासो यथा—

स्फुरन्मुखामोदविवृद्ध[14]गन्धं, जिघ्रन्मुहुर्मीलितरक्तनेत्रः ।
पूर्वं प्रियाचञ्चुपुटोपयुक्तं[15] चूताङ्कुरं चुम्बति चञ्चरीकः ॥ इत्यादि ।

अत्र तिर्यग्विषयत्वाद्रसस्याभासता[16] । [17]धीरोदात्तत्वाद्यभावात् । यदाह—
"उत्तमप्रकृतिरुज्ज्वलवेषः[18] शृङ्गारः" इति [19] ।

भावाभासो[20] यथा—

क्वणद्द्विरेफावलिनीलकङ्कणं[21] प्रसार्य शाखाभुजमात्र[22]वल्लरी ।
कृतोपगूहा[23] कलकण्ठकूजितैः अनामयं पृच्छति दक्षिणानिलम् ॥

अत्र सौहा[24]र्दस्यारोपितत्वात् भाव आभासो[25]भवति ।

भावोदयो यथा—

केलितल्पगत[26]मङ्घ्रियावकं, सूचयत्युषसि[27] चक्षुषा[28] प्रिये[29] ।
भू [भ्रू][30] त्रिभागमुपकल्प्य भंगुरं, गूढ[31]हास[32]मधुरं चुकोप सा ॥

---

1. A's alt. C. संसाराद्यो F. सं सारात्यें 2. A's alt. C. यत्तत् 3. C. रूपात् 4. C. द्रष्ट 5. D. तव सति गु 6. F. चाह—7. A. C. वा 8. C. कष्ठ 9. A's alt. परिपाकस्य 10. A.C. वल्लाल 11. A.C. इमे 12. C. हारि— 13. D.E.F. अभ्यूह्यः 14. D. मोहं 15. A. C. युक्त 16. A's alt. C. भासत्वं— 17. D. उदात्तादि 18. A.C. बेषः च D. बेष 19. E. इति *नायकत्वाद्यारोपात् अयमपि रस इत्याचार्याः । भावा 20. C. भावो 21. H. कान्तणं 22. A. मात्र ब 23. C. गूहः D. 24. आर्दितस्य 25. C. आभासं 26. H. नवमङ्घ्रि 27. A's alt C.H. त्यसित 28. A's alt. C. चक्षुषः 29. H. प्रिया 30. All mss read भू. 31. H. मुग्ध 32. A. भास ।

* This is a note by the scribe or manuscript-owner to show the view of some other writers who would take such cases too as Rasa as there is the Samādhi of Nāyaka-Nāyikā-bhāva here.

अत्र[1] लज्जाहर्षयोरुदयः[2] ।

भावसन्धिर्यथा—

नेत्रे जिह्म[3]खरारुणे क्षणमथ [4]व्यामील्यमानेक्षणं
हस्तं[5] व्यग्रगमागमं क्षणमथो दन्ते[6] शयानं[7] क्षणम् ।
सञ्चारं विषमाकुलं[8] क्षणमथ प्रक्रान्तलीलं क्षणं
धत्ते तोत्त्रिषु[9] षट्पदेषु च समं दत्तावधानो गजः ॥

अत्र गजस्य मदाकुलस्य [10]यदेतत्क्षणमात्रं नेत्रयोः [11]जिह्मखरा[12]रुणयोः धारणं समनन्तरमेव[13] यच्चैतद्व्यामीलनं, तथा हस्ते च [14]यत्क्षणमात्रं व्यग्रो गमा[15]गमः यच्च समनन्तरमेव दन्ते[16]शयनं, सञ्चारे च[17] क्षणमात्रं[18] येयं विषमाकुलता, समन्तर[19]-मेव यश्चायं[20] लीलाप्रक्रमः, तदेतत् विविधं[21] विलक्षणं विचेष्टितद्वयं[22] उद्भवा[23]-भिभवध[24]मितया क्षणं[25] क्षणमाविर्भवत्[26] तोत्त्रिविषयं रोषं षट्पद[27]शब्दलक्षित[28]-षट्पदगीतविषयं हर्षं च परस्परस्यादत्ता[29]वसरतया समुत्क्षुभितम् [30]अभिव्यनक्ति। द्वन्द्व[31]वृत्तिषु च[32] त्रिष्वपि[33] वाक्येषु प्रतिस्वं[34] क्षणं क्षणमित्युपा[35]दानाद्यथा यथा [36]समुत्क्षुभिताब्धिकल्लोलकल्प[37][ल]तया तोत्त्रिणामुपर्युपरि विनिपात[38]जन्मानो[39] रोषा-वेशमहावेगाः[40] तथा तथा तदभिभवक्षमाणां षट्पदगीताकर्णनसुखाभिनिवेश-विकासानां मध्ये मध्ये प्रादुर्भाव इति प्रत्याय्यन्ते । धत्त इति वर्तमाननिर्देशेन प्रारब्धापरिसमाप्तभावादेकतरस्यां कोटावनिष्ठेति द्योत्यते । तथा जिह्मखरारुणत्वव्यग्र-गमागमत्वविषमाकुलत्वलक्षणधर्मयोगाद्व्यामील्यमानत्वदन्तेशयनत्वप्रक्रान्तलीलत्वलक्षण धर्मयोगाच्चानुक्षणमाकुलीभावमापाद्यमानैर्नेत्रहस्तसञ्चारैर्लिङ्गैर्यदेतद्बोध्यते, तोत्त्रिषु[41] षट्पदेषु च तुलितमवधानदानं [42]तदप्येक[43]तरस्यां कोटा[44]वनिष्ठामेव व्यनक्ति । अतो रोषहर्ष[45]भावयोरयं[46]सन्धिः[47] ।

---

1. D. तत्र 2. C. दयः नेत्रे 3. A's alt. C. दिङ्मुख 4. A. D. व्यानील्य 5. F. हस्त 6. A.C. दन्ते 7. A. शयानु 8. D. व्याकुलः 9. H. तोद्रि 10. A's alt. C. यत्क्षणं 11. A's alt. C. दिङ्मुख— 12. A's alt. मुखारुण 13. D. एवदन्ते 14. A's alt. E.F.H. यं क्षण 15. H. समागमः 16. A. दान्त C. दन्ते 17. E. च येयं 18. A.C.D.F. मात्रकं- 19. A's alt. F.H. अनन्तरं च 20. A's alt. C.H. omit च लीला 21. D. E. F. विलक्षणं विविधं 22. E. प्रविचेष्टित H. चेष्टित ममं क्षणं 23. A's alt. C. क्षुद्भाव E. उद्भव 24. A. सम्मतया (धर्म) C. समतया 25. A's alt. D. E. क्षणात 26. C. भवतो त्रि H. भवन् 27. C. पदलक्षि 28. C. लक्षितं 29. A's alt. मदत्तार्थिकापसर C. मदत्ता विका पसर 30. F. व्यनक्ति 31. H. वर्ति 32. C. omits च 33. D. अपि च 34. A's alt प्रातिस्वकं लक्षणं C. प्रातिस्विकं लक्षणं 35. H. उपपादनात् 36. A's alt. समुत्सृष्टभूतार्थ C. क्षुभितार्थ 37. All mss read. कल्पलत 38. D. पातजनेषु तोत्त्रिषु 39. H. जन्मनो 40. C.F. H. वेगाः तेषु तोत्त्रिषु 41. E. I. अतो त्रिषु 42. C. तदाऽपि 43. C. H. एकस्यां 44. A. कोहावनिष्ट C. कोवनिष्ट 45. H. भावे । मध्ये 46. F. भावःस 47. D. भावं भा

भावशबलता यथा—

मध्येसखीजनमुपह्वरवृत्तजातं वाचा प्रकाशयति मय्यु[1]पदेशवृत्त्या[2]।
सासूयसप्रणयसत्रप[3]सप्रसादै:[4] सा मां विलोकितवती चटुलै:[5] कटाक्षै: ॥

अत्रासूयादीनां कटाक्षेषु समारोपाद्वाच्यता[6] न मन्तव्या। अतो ह्येवं भावशबलता व्यज्यते।

भावशान्तिर्यथा—

[7]तौ सम्मुखप्रचलितौ सविधे गुरूणां मार्गप्रदानरभसस्खलितावधानौ[8]।
[9]पार्श्वापसर्पणमुभावपि[10] भिन्नदिक्कं[11] कृत्वा मुहुर्मुहुरपासरतां सलज्जौ[12] ॥

अत्र मतिविबोध[13]योरुपशम:।

एषु रसादि[14]ध्वनिषु प्रपञ्चोऽन्यतो ज्ञेय:। चित्रकाव्यप्रपञ्चनपरेण ग्रन्थकृतै[15]वातिसङ्कोचितत्वात् अस्माभिर्दिङ्मात्रमुदा[16]हरणै: प्रदर्शितम्[17]।

अथ संलक्ष्यक्रमे[18] शब्दशक्तिमूलोऽलङ्काररूपो[19] वस्तुरूपश्च नियमेन भवति।

[20]तत्रालङ्काररूपो यथा—

प्राप्याधरद्वयधुरां[21] परिचुम्बतीव लीलोत्तरं विलिखतीव नखत्वमेत्य।
तस्या: कटाक्षवलनं गुरुसन्निधौ मामाश्लिष्यतीव समवाप्य[22] च बाहुभावम् ॥

अत्रोत्प्रेक्षा[23]लङ्कारेण चुम्बनादिकारणा[24]भावेऽपि संभोगसुखा[25]वाप्तिलक्षणकार्योत्पत्तिरूपा[26] विभावना व्यज्यते।

वस्तुध्वनिर्यथा—

दृष्टि: कातरतामुपैति सहसा तस्मिन्पुरो[27]ऽवस्थिते,
नर्मालापिनि तत्र न प्रतिवचो जिह्वाग्रमारोहति।
संस्पर्शं[28] च न तस्य [29]वेत्युप[30]चितस्तम्भं [31]ममैतद्वपु:
संवृत्तस्सखि सङ्गमोऽपि विरहप्रायो विधातास्मि[32]किम् ॥

अत्र वस्तुनि अवस्तुत्वभ्रमात् मौग्ध्यलक्षणं वस्तु प्रत्याय्यते[33]। [34]अथार्थशक्ति-

1. D.E.F.H.I. अप 2. E. वत्या 3. H. सद्भय 4. H. प्रसारै: 5. H. विमलै: 6. A's alt E. वाच्यानुमन्त D. वाच्यतामनन्तव्या 7. A. D. interchange the first two feet. 8. A.C. धान 9. A. पार्श्वौ (श्वे) C. पार्श्वौ 10. C.H. अविभिन्न 11. C. दत्तं 12. D. F. सलज्जम् H. ससर्जम् 13. As alt. C. H. विभेद 14. A. आदिषु 15. D. कृतैव सं 16. A's alt. उदाहृत: F उदाहृतम्। 17. C. दर्शिता: 18. H. क्रमेण 19. A's alt. C. रूपश्च नियमेन H. रूपत्वानियम 20. H. omits. तत्र 21. C.F. सुधां 22. A's alt. H. समुपेत्य 23. A. उत्प्रेक्षायालं F. उत्प्रेक्षयाऽलम्ब 24. D. करण 25. A's alt. C. सुखा 26. A's alt. रूपो 27. A. पुरोप 28. A's alt. C. स्पर्शश्च 29. A.C.F.H.I. चेत्यु 30. A's alt. अपनत 31. A's alt. C.H. मया तत् 32. As alt. C. भयादास्मि 33. As alt. F. प्रकाश्यते H. प्रताय्यते 34. C. omits. अथ।

मूलो व्यञ्जकोऽर्थः स्वतः संभवी[1] कविप्रौढोक्ति[2]निष्पादितः[3] कविनिबद्धवक्तृप्रौढोक्तिनिष्पादितश्चेति त्रिरूपः। स चालङ्काररूपो वस्तुरूपश्चेति प्रत्येकं द्वैविध्ये षोढा। षड्विधस्य च व्यञ्जकस्य व्यङ्ग्योऽर्थो[4] वस्तुरूपोऽलङ्काररूपश्चेति द्वादश[5]भेदोऽयम्।

तथा हि—स्वतस्संभविना वस्तुना[6] वस्तु[7] स्वतस्संभविना वस्तुना अलङ्कारः। स्वतस्संभविनालङ्कारेण वस्तु, तेन अलङ्कार इति चतुर्धा। तथा कविप्रौढोक्तिनिष्पादितेन वस्तुना वस्तु, तेनालङ्कारः[8] कविप्रौढोक्तिनिष्पादितेन अलङ्कारेण वस्तु तेन अलङ्कारः इत्यपि[9] चतुर्धा। इत्थं कविनिबद्धवक्तृप्रौढोक्तिनिष्पादितेऽपि[10] विषये चातुर्विध्यमनुसन्धेयम्। अत्र प्रपञ्चः **संप्रदायप्रकाशिन्यां[11] काव्यप्रकाशटीकायां[12]** अस्माभिः वितत्योप[13]दर्शित इति[14] [15]ततोऽवधार्यः। इह तु ग्रन्थगौरवभयात् प्रस्तावानुपयोगाच्च न प्रतन्यते। दिङ्मात्रन्तूदा[16]ह्रियते—

तत्र स्वतस्सं[17]भविना वस्तुना[18] वस्तु यथा—

अद्यापि लोके न कविर्न सोऽस्ति प्राचां तुलां यः प्रबलोऽधिरोढुम्।
पुरातनो नाय[19]मितीय[20]देव तथापि निन्दा यदि किं करोतु॥

अत्र[21] स्वतस्संभविना वस्तुना अहम् एवंविध इति [22]वक्तुः स्वमाहात्म्यप्रख्यापनलक्षणं वस्तु प्रत्याय्यते[23]।

कविनिबद्धेनालङ्कारेण वस्तु[24] यथा—

दृष्टिर्निष्ठुर[25]बद्धसारखदिरांगार स्फुलिङ्गोपमा
जिह्वे सज्जन[26]तर्जनोल्बण[27]बलत्कालाङ्गुली[28]चञ्चले।
दन्ताश्चान्तककेलिकाननविषां[29] (?) [30]क्रूरानुकारास्सखे
जङ्घे द्वे यदि [31]ते भुजङ्ग भुवनं[32] वल्मीकशेषं [33]भवेत्॥

अत्र कविप्रौढोक्तिनिष्पादितेन अप्रस्तुतप्रशंसालङ्कारेण[34] विधिविहितमनार्णां[35] क्वचिदंशे[36] दौर्बल्यं विश्वमभिरक्षतीति वस्तु। कविनिबद्धवक्तृप्रौढोक्तिनिष्पा-

---

1. E. संभवीति 2. F. After. प्रौढौ and before. उक्ति we have the portion विचित्रान्योन्यव्याघात...... to प्रकरणं समाप्तम्। that comes in the end of this commentary. 3. D. निष्पादितं 4. C. व्यंग्यार्थौ 5. A's alt C. विधोऽयं 6. D. वस्तुना अलं 7. A. वस्तुनः H. वस्तुतः 8. D. कारः इत्यपि 9. A's alt. इति 10. H. निष्पादितेनापि च 11. A's alt. C. प्रदर्शिन्यां 12. A. टीकायां वित 13. A's alt. C. प्रदर्शित 14. A's alt. इत्यतो 15. E. तत एव 16. A's alt. मात्रमुद्रा- 17. H. स्वविना 18. C. omits वस्तुना. 19. H. नाम विमीति यद्येकधापि 20. C. इति यदेव 21. I omits. अत्र 22. A. C. प्रतिवक्तुः H. इति वस्तुक्त स्वरूपविमर्श्य प्रख्या 23. A's alt. प्रकाश्यते 24. A. वस्तुध्वनिर्यथा 25. C. निष्कुर 26. F. सर्जनी 27. A's alt. C. चमत्कारा E. H. बलात्कारा 28. C. अङ्गुलीनं चले 29. C. विषाकूरा 30. A. क्रूरोऽनु 31. A's alt. D.E.F. ते 32. A's alt. C भवनं 33. A's alt. C. H. I. च तत्. 34. D. कारो यथा 35. A's alt. नारीणां 36. A."क्वचिद् (अङ्ग) दौर्ब"।

‡कालिदासादिप्रबन्धेषु । गुणीभूतव्यङ्ग्यं वाच्याङ्गत्वादिभेदैर्यथासंभवं समासोक्त्यादौ प्रदर्शितम् ।

दितोऽलंकारेणालंकारो यथा—

अणिवारिओवगूहण संछंदालावसोअ ववसजण ।
बंधवमरणमहूसव दिअहे दिअहे समो अरसु ॥

छाया—अनिवारितोपगूहनस्वच्छन्दालापशोकविवशजनः ।
बान्धवमरणमहोत्सवः दिवसे दिवसे समवतरतु ॥ इति ।

कविनिबद्धायाः[1] स्वैरिण्याः प्रौढोक्तिनिष्पादितेन रूपकालङ्कारेण उपगूहनादिनिवारण[2]शालिभ्योऽस्य[3] बान्धवमरण[4]महोत्सवस्य अतिशयप्रत्यायनात्मा[5] व्यतिरेकालङ्कारः प्रत्याय्यते[6] । इत्थमन्यदप्यूह्यम्[7] ।

अथ [8]गुणीभूत[9]व्यङ्ग्यस्वरूपदिक् । **गुणी[10]भूत[11]व्यङ्ग्यं वाच्याङ्गे[12]त्यादि** । वाच्याङ्गत्वमगूढत्वमपराङ्गत्वमस्फुटत्वम्, सन्दिग्धप्राधान्यं तुल्यप्राधान्यं काक्वाक्षिप्त[13]मसुन्दरत्वम् इति वाच्याङ्गत्वादयो भेदाः । **समासोक्त्यादौ[14] प्रदर्शित[15]मिति** । ध्वनिकारादिभिरिति शेषः । तत्र वाच्याङ्गत्वं यथा—

शून्ये[16] त्वद्रिपुराजधाम्नि सुदृशां चित्रार्पिता[17]नां करं
सँल्लापस्पृहया पतन्नपि मुहुः कीरस्समारोहति ।
श्रीबल्लालनृपाल ! शिञ्जितरसान्मञ्जीररेखामुखं
चञ्च्वग्रेण च हन्त हंसपृथुकस्सञ्चालयन्क्रन्दति ॥

अत्र शून्यीकृतरिपुराजवेश्मा[18] नायकप्रभावातिशयः [19]प्रतीयमानोऽपि शुकहंसवृत्तान्तोपपादकत्वेन स्थित[20] इति वाच्याङ्गत्वम् । इत्थमगूढत्वादयोऽपि भेदा ज्ञेयाः ।

इत्थं ध्वनिगुणीभूतव्यङ्ग्ययोः काव्ययोस्स्वरूप[21]मुपोद्घातत्वेन[22] यथायोग-

---

1. C. बद्धायां 2. C. शाली 3. A. भ्यो वा 4. A's alt. C. मरणोत्सव 5. A's alt प्रत्ययनाद्व्यति 6. A's alt प्रतीयते D.H. प्रथते 7. D.E.I. अभ्यूह्यम् । 8. A's alt C. गुण 9. D. गुणस्वरूपभूतं, 10. A's alt C. गुण 11. D. भूतं 12. C. D. अन्ते 13. C.D. क्षिप्तत्वं सु. 14. A.C.D. सोक्त्यादिषु 15. A's alt C. दर्शिता 16. Except E. all read देव 17. H. अर्पितादी 18. A.C. वेश्मना ना A's alt वेश्मात्माना, 19. A's alt प्रत्याय्यते 20. A's alt स्थितं 21. A. रूपग्रहणमुपो 22. H. उपोद्यत्वेन ।

‡ The N. S. ed. here adopts the reading अलङ्कारमञ्जर्यां दर्शितः काव्यस्य श्रृङ्गारप्रधानत्वात् । शिष्टस्तु यथावसरं तत्रैव विभक्तः । गुणी" though there is no positive evidence from Jayaratha for the same. The Sañjīvanī does not help us to fix the reading.

चित्रं तु शब्दार्थालङ्कारस्वभावतया बहुतरप्रभेदम् । तथा हि—

इहार्थपौनरुक्त्यं शब्दपौनरुक्त्यं शब्दार्थपौनरुक्त्यं चेति त्रयः पौनरुक्त्यप्रकाराः ॥१॥

आदौ पौनरुक्त्यप्रकारवचनं निरूपयिष्यमाणालङ्काराणां कक्ष्याविभागघटनार्थम् । अर्थापेक्षया शब्दस्य प्रतीतावन्तरङ्गत्वेऽपि प्रथममर्थगतनिर्देशश्चिरन्तनप्रसिद्ध्या पुनरुक्तवदाभासस्य पूर्वं लक्षणार्थः । इह शाब्दे प्रस्थाने । इतिशब्दः प्रकारे । त्रिशब्दादेव संख्यापरिसमाप्तिसिद्धेः ।

मुपन्यस्य प्रकरण[1]प्रतिपिपादयिषितं[2] चित्राख्यं काव्यमधिचिकीर्षुराह—**चित्रं त्विति ।** ध्वनिगुणीभूतव्यङ्ग्यापेक्षया भेदबाहुल्यं तरबर्थः ।

अथादिसूत्रमवतारयितुमाह—**तथाहीति**—अथ सूत्रम्[3] । इहार्थपौनरुक्त्यं शब्दपौनरुक्त्यं[4] शब्दार्थपौनरुक्त्यं चेति त्रयः[5] पौनरुक्त्यप्रकाराः[6] ।

ननु चित्र[7]मित्युपक्रम्य पौनरुक्त्यप्रकारकथने का सङ्गतिः इत्यत[8] आह—**आदौ पौनरुक्त्येत्यादि ।** पौनरुक्त्यप्रकाराणाम् एषां यदेतदादौ वचनं[9]तन्निरूप[10]यिष्यमाणानां शब्दार्थोभयाश्रयतया[11] कक्ष्या[12]विभागं घटयितुं कक्ष्याविभागस्यैव[13] च स्फुटीकाराय[14] प्रत्येकं पौनरुक्त्यग्रहणम् । अतोऽनुप्रासयमकादयः शब्दालङ्काराः । उपमारूपकादयोऽर्थालङ्काराः । लाटानुप्रासादयस्तूभयालङ्काराः इति कक्ष्याविभागोऽनुसन्धेयः ।

ननु शब्दप्रतीतिपूर्वक[15]त्वादर्थ[16]प्रतीतेः प्रथमं अर्थपौनरुक्त्यनिर्देशो न युज्यत इत्यत आह—**अर्थापेक्षयेत्यादि ।** अन्तरङ्गत्वं प्राथमिकत्वं, अर्थगतनिर्देशः[17] अर्थविषयक[18]पौनरुक्त्य[19]निर्देश[20] इत्यर्थः । चिरन्तनप्रसिद्ध्या भामहोद्भटादिपूर्वाचार्यप्रसिद्ध्यनुसारेण । ते हि[21] पुनरुक्तवदाभासाख्यमर्थालङ्कारमेव[22] पूर्वं लक्षितवन्तः[23] । निर्दिष्टस्य च[24] पौनरुक्त्यत्रयस्य सम्प्रतिपन्नतामभिसन्धायाह—**शाब्दे प्रस्थान इत्यादि ।** [25]इतिशब्दं योग्येऽर्थे व्यवस्थापयति—**इतिशब्दः प्रकार इति ।** ननु[26] त्रय एवेति समाप्त्यर्थता किं नेष्यत इत्यत आह—**त्रिशब्दादेवेत्यादि**[27] ।

---

1. A's alt. D.E. करणे 2. D. यिषति 3. A. सूत्रं चा सि C. सूत्रं चाह 4. F. पुनरक्तवदाभासा शब्द 5. D. त्रयं 6. D. प्रकारः 7. C. च क्रमं 8. H. अत्र 9. A's alt तत्र निरू 10. H. निरूप्यमाण 11. H. आश्रयत्वेन 12. A. C. कथया 13. A's alt. E. भागस्य च C. D. H. omit च 14. A's alt. करणाय 15. H. पूर्वक पदार्थ 16. A. C. अर्थादीनां 17. A's alt निर्देशकत्व विषय C निदशं D. निर्देशाः 18. C. विषयकं 19. C. पौनरुक्त्यं 20. F. निर्देश इत्यर्थः । चिर 21. D. तेन 22. Except H. all read एवं 23. D. लक्षितवन्ता निर्दिष्ट 24. H. omits च 25. H. omits इति 26. A. C. repeat 'नतुत्रय एवेति' 27. C. शब्दादेनैत्यादि' ।

तत्रार्थपौनरुक्त्यं प्ररूढं दोषः ॥२॥

प्ररूढाप्ररूढत्वेन द्वैविध्यम् । प्रथमं हेयवचनमुपादेये विश्रान्त्यर्थम् । तत्रेति त्रयनिर्धारणे । यथावभासनं विश्रान्तिः प्ररोहः ।

आमुखावभासनं पुनरुक्तवदाभासम् ॥३॥

आमुखग्रहणं पर्यवसानान्यथात्वप्रतिपत्त्यर्थम् । लक्ष्यनिर्देशे नापुंसकः

अत्रायमाशयः । विभागेनैव[1] त्रित्वमवगतम् । त्रिशब्दात्तु[2] परिसमाप्तिस्सिद्धा, 'सिद्धे सत्यारम्भो नियमाय' इति न्यायात्[3] । अत इतिशब्दः प्रकारे[4] विवक्ष्यते । न च मन्तव्यं सति[5] प्रकारशब्दे पौनरुक्त्यं प्रसजेदिति[6] । प्रकारशब्दो हि पौनरुक्त्यप्रकारमाह—स च पौनरुक्त्यप्रकारः केन प्रकारेण त्रिप्रकार इति जिज्ञासायाम् इतिशब्दः[7] तत्प्रकार[8] वचन इति सर्वमव[9]दातम् ।

विभागा[10]धिगतं त्रित्वं त्रिशब्देन समाप्यते ।
[11]त्रिप्रकारत्व[12]वचनः[13] इति शब्दस्ततो मतः[14] ॥ इति

अथैषु[15] पौनरुक्त्येषु हेयांशं[16] विभक्तुं[17] सूत्रम्—**तत्रार्थपौनरुक्त्यं प्ररूढं[18] दोषः** । प्ररूढग्रहणस्य[19] व्यावर्त्यमुद्घाटयति[20]—**प्ररूढाप्ररूढत्वेनेति । उपादेये विश्रान्त्यर्थमिति** । उपादेये प्रतियोग्यन्तरे प्रसृतायाः[21] प्रतिपत्तृ[22]प्रतीतेः [23]अव्याक्षेपाय इत्यर्थः । [24]हेयांशैर्हि विविच्य त्यक्ते स्वरसा[25] भवत्युपादेयमीमांसा । **त्रयनिर्धारण इति** । भावानयने[26] द्रव्यानयनमिह अनुसर्तव्यं[27] निर्धारिते पौनरुक्त्यत्रय इत्यर्थः । ननु प्ररूढं[28] दोष इत्युच्यते । कोऽयं प्ररोह इत्यत आह—[29]**यथावभासनमित्यादि** । यच्छ्रवणसमनन्तरं यथावदव[30]भातं [31]तत्तथैव चेत्प्रतीतिः [32]विश्रान्त्यन्तं [33]निर्बाधम् [34]अवतिष्ठेत स प्ररोह इत्यर्थः ।

यथोद्देशं पौनरुक्त्यमधिकृत्य सूत्रम्—**आमुखाव[35]भासनं [36]पुनरुक्त[37]वदाभासम्[38]** । आमुखम् आरम्भः[39] । पर्यवसानान्यथात्व[40] इत्यनेन[41] हेयात्[42] वैधर्म्यं [43]दर्शितम् ।

---

1. H. विभागादेव. 2. C. omits. तु 3. H. न्यायतः 4. D. प्रकारेऽपि व- 5. A's alt. असति D. सप्रति 6. A. प्रसज्येदिति D. प्रसजदिति 7. C. शब्दत्वप्रकार 8. H. इतिवचन 9. A's alt. C. H. अनवद्यम् 10. H. त्रिभाग 11. C. त्रिः 12. H. omits. त्व 13. D. E. वचन इति 14. H. मतः अथ 15. A, C. अथैतेषु 16. C. हेयांश 17. C. विभक्तुः E. F. विभङ्क्तुं 18. A. C. प्ररूढ 19. A's alt. C. H. शब्दस्य 20. C. D. E. H. 'यति । उपादेय' 21. C. प्रहृतायाः 22. C. 'वक्तृ' 23. D. अव्याक्षेये F. आक्षेपाय 24. A's alt. C. H. ज्ञेयांशे 25. A's alt. स्वत एव भव 26. A. D. द्रव्यानयने द्रव्य 27. A. C. F. अनुपसर्तव्यं 28. A. F. प्ररूढ 29. A. यद्याभा (याभा) सन C. यद्याभास D. E. F. H. यथाभास । 30 A.C. आभातं । 31. A's alt. C. omit तत् 32. C. विश्रान्त्यं तन्निर्बा D. विश्रान्त्यर्थं 33. H. 'तन्निर्बाधमविघ्नतः स' 34. A. C. इव तिष्ठेत् 35. A. C. E. H. I. भासमानं 36. A.D. E. F. I. भासनं तु 37. A. C. 'तदाभासः 38. F. आभासः 39. C. आरंभ D. आरंभं 40, A's alt. C. अन्यथात्वेन अनपेक्षायां वै । 41. A. omits न 42. H. ज्ञेयात् 43. F. दर्शयति तं ।

संस्कारो लौकिकालङ्कारवैधर्म्येण काव्यालङ्काराणामलङ्कार्यपारतन्त्र्यध्वननार्थः। अर्थपौनरुक्त्यादेवार्थाश्रितत्वादर्थालङ्कारत्वं ज्ञेयम्। प्रभेदास्तु विस्तरभयान्नोच्यन्ते। उदाहरणं मङ्खीये श्रीकण्ठस्तवे—

अहीनभुजगाधीशवपुर्वलयकङ्कणम्
शैलादिनन्दिचरितं क्षतकंदर्पदर्पकम्॥
वृषपुङ्गवलक्ष्माणं शिखिपावकलोचनम्।
ससर्वमङ्गलं नौमि पार्वतीसखमीश्वरम्॥

ननु लक्ष्यपदे[1] पुनरुक्तवदाभास इति स्वरूपप्राधान्येन निर्देशो न्याय्यः; न तु पुनरुक्तवदाभास[2]मिति काव्यपरतन्त्रतया इत्यत आह—**लक्ष्यनिर्देश इत्यादिना**[3]। [4]नापुंसकः संस्कारः पुनरुक्त[5]वदाभासो यत्रेति बहुव्रीहिसमासाश्रय[6]णेनालङ्कार्यपारतन्त्र्यध्वननार्थः इति लौकिकालङ्कारवन्न काव्यालङ्काराणां[7] अलङ्कार्यपृथग्भावेनाप्य[8]वस्थानसंभवः। अपि तु नियमेन काव्यपारतन्त्र्यमेवेति[9] ज्ञापना[10]येत्यर्थः। अर्थालङ्कारत्वम् अस्य स्फुटमेवेत्याह—**अर्थपौनरुक्त्यादेवेति**[11]। [12]अतिगम्भीरेंऽशे वृथाप्रथनभीरुतामाविश्चिकीर्षुराह—**प्रभेदास्त्विवति**। अवान्तरभेदाः प्रभेदाः। मङ्खीये मङ्ख[13]ख्यकविकर्तृके[14]।

अहीनेति[15]। इनस्स्वामी अहीनाम्[16] इनो[17] भुजङ्गाना[18]मधीशश्चेति[19]। वलयं कङ्कणञ्चेति[20] आमुखे पौनरुक्त्या[21]वभासनं[22], पर्यवसानेषु[23] अहीनस्य महतो[24] भुजङ्गाधीशस्य वपुर्वलयं कङ्कणमस्येत्यन्यथात्वम्[25]। इत्थं शिला[26]देरपत्यं[27] शैलादिः शैलादेः नन्दिन[28] इव चरितमस्येति, शैलादिं नन्दयति चरितमस्येति च। तथा क्षतः[29] कन्दर्पो दर्पकश्चेति, क्षतः[30] कन्दर्पदर्पो येनेति[31] च। तथा वृषः पुंरूपो[32] गौश्चेति, वृषश्श्रेष्ठ इति च। तथा शिखी पावकश्च लोचने यस्येति च शिखिपावकलोचन[33] इति च[34]। तथा[35] सर्वमङ्गलासहितः पार्वतीश[36] इति च सर्वैर्मं[37]ङ्गलैस्सहितश्चेति[38]

---

1. A. F. पदेन। 2. A's alt. आभास इति 3. H. आदिना। अर्थालंकारत्वमस्य घटपटेत्यत आह—अर्थपौनरुक्त्यादेवेति। 4. A. C. 'नपुंस' 5. D. भावतदा 6. D.E. आश्रयणात्मालंका 7 D. अलंकाराः 8. A's alt. भावेन व्य D. भावेन अव्य 9. A's alt. C. omit. इति 10. A's alt. 'ज्ञापयितुमि' 11. D.E. इत्यादि 12. A.'अनति' 13. A's alt. C. 'मङ्खुकाख्य' D. 'मेङ्खाख्य' 14. D. भर्तृके 15. D. अनीनेति 16. A. अहीनानां 17. D. ईशः 18. D. ईशश्चति 19. C. omits इति 20. C. इत्यस्य दर्पकश्चेति त्यामुखे 21. A. C.D. उक्त्यावदाभासनं, 22. F. अवसादनं 23. D. पर्यवसानान्यथात्वं च अनुसन्धेयम्। 24. C.'महाभु' 25. E. इत्यर्थः शि 26. C. शाला 27. E. शिलादस्या 28. A's alt. इव नन्दि चरितं C. उपनन्दनं चरि 29. C. कृतः 30. E. omits तः C. कृतकन्दर्पो 31. A's alt. C. येन चेति 32. C. पुरुषो 33. A's alt. D. पावन 34. Omitted in C. 35. Except E. all omit तथा 36. A's alt. E. पावतीसखश्चेति 37. A's alt. C. सर्वमङ्ग 38. A. असहित C. आसहित।

दारुणः काष्ठतो जातो भस्मभूतिकरः परः ।
रक्तशोणार्चिरुच्चण्डः पातु वः पावकः शिखी ॥

एतच्च सुबन्तापेक्षया । तिङन्तापेक्षया च यथा तत्रैव—

भुजङ्गकुण्डली व्यक्तशशिशुभ्रांशुशीतगुः ।
जगन्त्यपि सदापायादव्याच्चेतोहरः शिवः ॥

शब्दपौनरुक्त्यं व्यञ्जनमात्रपौनरुक्त्यं स्वरव्यञ्जनसमुदायपौनरुक्त्यं च । अलङ्कारप्रस्तावे केवलस्वरपौनरुक्त्यमचारुत्वान्न गण्यत इति द्वैविध्यमुक्तम् ।

पौनरुक्त्यं [1]चामुखाभासनं, पर्यवसानान्यथात्वं च अनुसन्धेयम् ।

अथ व्यस्ततया समासान्तरायश्रयतया च दर्शयितुमुदाहरणान्तरं—दारुण इति । पौनरुक्त्या[2]पेक्षया दारुण इति पञ्चम्यन्तम्[3] । पर्यवसाने तु[4] प्रथमान्तम् । इत्थं भस्म च[5] भूतिश्चेति भस्मनोऽभि[6]वृद्धिरिति च । तथा[7] रक्तं च शोणं[8] चेति च रुधिरवच्छोण[9]मिति [10]चावगन्तव्यम्[11] । इत्थं सुबन्तापेक्षया [12]द्विधोदाहृतम्[13] ।

अथ[14] तिङन्तापेक्षया—भुजंगेति[15] । कुण्डली[16] सर्पो[17] भुजंगश्च कुण्डली[18] चेति भुजंगकुण्डलवानिति च[19] । शशी[20] शुभ्रांशुः, शीतगुश्चेति[21] । शं शिवः शुभ्रैः अंशुभिः शीतं चक्षुरिन्द्रियमिति च[22] । हरश्शिव इति[23] चेतो हर इति[24] च योजनीयम् । शशि[25]-शुभ्रांशुशीत[26]गुरिति त्रिषु[27] पौनरुक्त्यं दर्शितम् । पायादव्याच्चेति तु [28]तिङन्तापेक्षया इत इत्यपायविशेषण[29]त्वेन पर्यवसाने पञ्चम्यन्ततया पायादव्यादि[30]त्यन्यथात्वम् ।

पुनरुक्तवदाभासो यत्रे[31]त्येवं हि संस्क्रिया ।
अलङ्कार्यैक[32]निघ्नत्वव्यक्तये समुपाश्रिता[33] ॥

अथ शब्दपौनरुक्त्यप्रस्तावाय सूत्रम्—शब्दपौनरुक्त्यं[34] व्यञ्जनमात्र[35]पौनरुक्त्यं स्वरव्यञ्जन[36]समुदायपौनरुक्त्यं च । अत्राद्यं[37] पदमु[38]द्देश्यं[39] चरमं[40] तु द्वयं

---

1. F. चाभास 2. C. उक्त्य 3. D. पञ्चम्या 4. C. तुचेति भुजंग (But the omitted portion is found after. शिव इति) । 5. C. omits च 6. A. अभि वृचारिति 7. Omitted in C. 8. A's alt. C. शोणमिति च 9. D. शोणइ 10. D. omits. च 11. E. गन्तव्यः, 12. A's alt द्विविधं 13. A's alt. 'हृतः' 14. Omitted in C. 15. D. भुजगेति 16. D. कुली 17. C. प्रसर्पे 18. C. ली भुज 19. च omitted in C. D. 20. C. शशि 21. A. C. D. E. H. I. शीतांशुश्चेति 22. C. omits च 23. A's alt. C. इतश्चेतो 24. A. C. E. F. H. I. हरश्चेति 25. D. E. शशी 26. A's alt. C. F. शीतांशु 27. omitted in C. 28. A's alt. C. 'तिङोपस्कृतया' 29. C. 'विशेषणं । त्वनपर्य' 30. A. C. F. H. I. इति तदन्य 31. A's alt C. इति सं 32. D. कार्येक C. कायकविघ्नं 33. A's alt. उदाश्रिता 34. A. 'तु' 35. A. मात्र निघ्नतया 36. A's alt. न चित्रपौनरुक्त्यं स्वरपौन 37. A's alt. E. आद्य द्वयमु C. आद्यद्वयमु 38. C. अपदेश्यं 39. A. E. F. च चरमा 40. A.F. चरमं तद्द्वयं C. चरमद्वयं E. यं चरमं तु द्वयं ।

संख्यानियमे पूर्वं छेकानुप्रासः ॥४॥

द्वयोर्व्यञ्जनसमुदाययोः परस्परमनेकधा सादृश्यं संख्यानियमः । पूर्वं व्यञ्जनसमुदायाश्रितं यथा—

किं नाम दर्दुर दुरध्यवसाय ! सायं कायं निपीड्य निनदं कुरुषे रुषेव ।
एतानि केलिरसितानि सितच्छदानामाकर्ण्य कर्णमधुराणि न लज्जितोऽसि ॥

अत्र सायंशब्देऽस्यालङ्कारस्य यकारमात्रसादृश्यापेक्षया वृत्त्यनुप्रासेन सहैकाभिधानानुप्रवेशलक्षणः संकरः । छेका विदग्धाः ।

अन्यथा तु वृत्त्यनुप्रासः ॥५॥

केवलव्यञ्जनसादृश्यमेकधा समुदायसादृश्यं त्र्यादीनां च परस्परसा-

---

विधेयम् । शब्दपौनरुक्त्यं[1] व्यञ्जनमात्रनिष्ठतया,[2] स्वरव्यञ्जनसमुदायनिष्ठतया च द्विप्रकार-मित्यर्थः ।

ननु केवलस्वरपौनरुक्त्यस्य[3] किं वृत्तमित्यत आह—**अलङ्कारप्रस्ताव इत्यादि** । अलङ्कारो हि[4] विच्छित्तिः, तत्प्रस्तावे केवलस्वरपौनरुक्त्यम[5]चारुत्वात् न गणनामर्ह-तीति भावः ।

तत्र व्यञ्जनमात्रमधिकृत्य सूत्रम्–**सङ्ख्यानियमे पूर्वं[6] छेकानुप्रासः** । कोऽयं सङ्ख्या-नियम इत्यत आह—**द्वयोर्व्यञ्जनेत्यादि** । युग्मशोऽवस्थितानां व्यञ्जनसमुदायानां[7] परस्पर-[8]मनेकधासादृश्यम् इह सङ्ख्यानियमः ।

किन्नामेति । दर्दुरो भेकः[9] । कायं निपीड्य वपुरायास्य[10] । सितच्छदाः हंसाः[11] । अत्र[12] दर्दुरदुरध्यवसाय इत्यादौ सङ्ख्यानियमः[13] । ननु सायं [14]कायमित्यत्र कोऽलङ्कार इत्यत आह—**अत्र सायं शब्देत्यादि** । यकारमात्रसादृश्यापेक्षया हि साय सायेतिच्छेका-नुप्रासः । सायं कायमिति तु[15] सानुस्वार[16] यकारमात्रापेक्षया[17] वृत्त्यनुप्रासः । इत्थं च सति सायं शब्दे[18] द्वयोरेकाभिधानलक्षणस्सङ्करः[19] अभिधत्त इत्यभिधानं वाचक[20]शब्दः एकवाचकानुप्रवेशलक्षण[21] इत्यर्थः । लक्ष्यपदं निर्विवक्षुराह[22]—**छेका विदग्धाः[23] इति** । छेको[24]पलालितत्वाच्छेकानुप्रास इत्यर्थः ।

अथानुप्रासान्तराय सूत्रम्—**अन्यथा तु [25]वृत्त्यनुप्रासः** । अन्यथात्वं त्रिधा संभवतीत्याह—**केवलव्यञ्जनेत्यादि** । केवलव्यञ्जनसादृश्यं समुदायत्वाभावादन्यथा-

---

1. D. व्यञ्जनमात्रपौनरुक्त्यं 2. A's alt. C. निष्ठतया 3. F. उक्त्यं किं C. उक्त्यम-चारु 4. H. विचित्रित प्र 5. C. क्त्यं चारु 6. A's alt. पूर्वश्चैका 7. A. repeats. 'व्यञ्जनसमुदायानां' 8. C. परं साद 9. D. भेकं 10. A's alt. आयस्य C. च पुरा यस्य 11. omitted in D. 12. A. करव्यवसाय (अत्र दुरदुरसाय) साये C. दुरध्यवसाय साये 13. D. नियमं 14. A's alt. C. 'सायं' 15. D. omits. तु 16. A. C. अनु-प्रासार A's alt अनुप्रस्वार 17. D. omits य 18. A. after शब्दे repeats the portion from अनुस्वार''' to शब्दे 19. A. धानानुप्रवेशलक्ष 20. D. वाचकः श 21. H. वाचकतानु 22. C. विविक्षु 23. A. दग्धा 24. A's alt. C. D. छेकैरुपलालितोऽनु 25. C. 'प्रत्यनु'—

दृश्यमन्यथाभावः । वृत्तिस्तु रसविषयो व्यापारः । तद्वती पुनर्वर्णरचनेह वृत्तिः । सा च परुषकोमलमध्यमवर्णारब्धत्वात् त्रिधा । तदुपलक्षितोऽयम् अनुप्रासः । यथा—

सह्याः पन्नगफूत्कृतानलशिखा नाराचपाल्योऽपि वा
राकेन्दोः किरणा विषद्रवमुचो वर्षासु वा वायवः ।
न त्वेताः सरलाः सितासितरुचः साचीकृताः सालसाः
साकूताः सरसाः कुरङ्गकदृशां मानानुविद्धा दृशः ॥

त्वम् । एकधा[1] समुदायसादृश्यं[2] [3]त्वनेकधात्व[4]विरहात् । त्र्यादीनां[5] पुनस्समुदायानां[6] [7]द्वयातिरिक्तत्वादन्यथात्वम् अनुसन्धेयम् । लक्ष्यपदं निर्वक्ति—**वृत्ति[8]स्त्विति** । शृङ्गारादिरसविषयो[9] योऽयं प्रति[10]नियमभाजां वर्णानां व्यञ्जनव्यापारः स वृत्तिरुच्यते[11] । सोऽयं वर्णव्यापारो[12]ऽस्मिन्[13]वर्णरचनात्मके कविव्यापारेऽस्तीत्युपचारेण वर्णरचनावृत्तिरित्याह—**तद्वती**[14] **पुनरित्यादि** । तस्यास्त्रैविध्यं दर्शयति—**सा च परुषेत्यादि** । श्रुतिप्रतिकूलता वर्णानां परुषत्वम्[15] । या परुषवर्णारब्धा सा गौडीया रीतिः । या तु कोमलवर्णारब्धा सा [16]वैदर्भी । मध्यमवर्णारब्धा तु पाञ्चाली । एता रीतयो वामनादिभिः[17] काव्यात्मत्वेन[18] सिद्धान्तिताः । उपपत्तिपर्यालोचनायां तु काव्यात्मकथा तावदास्ताम् । यावता शब्दालङ्कारेष्वपि यो बहिरङ्गो वृत्त्यनुप्रासात्मा वर्णालङ्कारः तद्धर्मत्वात् तच्छेषभूता एता[19] इत्यलम[20]प्रासङ्गिकवैदग्ध्य[21]प्रवचनेन ।

सह्या[22] **इति** । विषद्र[23]वमुच इति । [24]किरणापेक्षया दुस्सहत्वम् । [25]वाय्वपेक्षया तु गरलकल्पजलकण[26]योगः । सरला अनरालपातिन्यः[27] । सितासितरुचेः[28] उत्तरलतारकत्वात् अनवस्थितवर्णसन्निवेशाः साचीकृताः अपाङ्गान्निर्गन्तुम् इवेहमानास्सालसा रसानुशयं निवर्तमानाः ।

यदुक्तं भावप्रकाशे—"[29]आलस्यं [30]तदभीष्टार्थात् व्रीडादे[31]र्यन्निवर्तनम्" इति । साकूता[32] भवतु पश्याम इतीव[33] व्याहरन्त्यः[34] सरसाः ।

रसो रागे विषे वीर्ये[35] तिक्तादौ पारदे[36] द्रवे ।

---

1. As' alt. C. अथवा 2. C. सादृश्यत्व 3. H. इयं लक्ष्य 4. D. विहोत्र्या 5. A's alt. C. आदीनां 6. A's alt. C. समुदायद्वय- 7. C. 'द्वयत्यति' 8. D. वृत्तिस्त्वति 9. D. 'विषयोऽयं' 10. D. वियम 11. As' alt. C. इष्यते D. इत्युच्यते 12. C. पारोऽयमस्मि 13. A. यस्मिन् 14. A. तद्वदिति । पुनरि C. E. तद्वति 15. D. पुरुष 16. D. सा तु 17. A's alt. वामनमतादि 18. A's alt. C. आत्मतया 19. A. एवता C. omits. एता 20. D. E. प्रासङ्गि 21. D. E. प्रथनेन H. वर्णनेन 22. Except E all have सह्यास्ता 23. D. विषय C. द्रुव 24. D. करण 25. A's alt. C. वस्त्वपे 26. C. कल F. जल प्रकरण 27. H. पातिनः, 28. A's alt. रूपः 29. C. कूल 30. H. यद 31. C. व्रीडादेयं निव 32. F. साकूतां 33. A's alt. C. H. इति व्या 34. C. हरन्त्यः रोषा 35. H. विद्ये 36. C. पारद्रवे

यथा वा—

आटोपेन पटीयसा यदपि सा वाणी कवेरामुखे
खेलन्ती प्रथते तथापि कुरुते नो सन्मनोरञ्जनम् ।
न स्याद्यावदमन्दसुन्दरगुणालङ्कारझङ्कारितः
सप्रस्यन्दिलसद्रसायनरसासारानुसारी रसः ॥

रोषारुणिम्ना[1] विषयं विलिपन्त्यः मानानुविद्धाः [2]दृष्टश्रुताद्यपराध[3]जन्मा रोषो मानस्तेन सम्मूर्च्छिताः ज्वलत्कल्पा इत्यर्थः । अत्र केवलव्यञ्जन[4]पौनरुक्त्यलक्षणमन्यथात्वम् । वृत्तिस्तु रोषवर्णनात्परुषा[5] ।

आटोपेनेति । यद्यपि कवेर्वाणी प्रबलेन शब्दाडम्बरेण[6] खेलन्ती प्रारम्भे प्रथते, तथापि[7] सतां मनोरञ्जनं न कुरुते[8] अमन्दैः सुन्दरैश्च गुणालङ्कारैः मुखरीकृतः[9] सनिष्पन्दं[10] विलसद्रसायन[11]रसा[12]सारा[13]नुसारी[14] शृङ्गारादिको रसो यावन्न स्यादित्यत्र केवलवर्ण[15]साम्यञ्चतु[16]र्ष्वपि पादेष्वलङ्कारः[17] । झङ्कारितेत्यादावेकधा[18] समुदायसादृश्यं रसायन[19]रसेत्यत्र तु रसेति [20]समुदायत्रयस्य परस्परसादृश्यमित्यनुसन्धेयम् । तथा च ' "आटोपे[21]"त्यादौ गौडीया "अमन्दसुन्दरे"त्यादौ वैदर्भी, "गुणालङ्कारे"त्यादौ पाञ्चालीया च[22] तत्तदर्थानुसारेण द्रष्टव्या ।

प्रकृष्टो वर्णविन्यासो[23] रसाद्यनुगतो[24] हि यः[25] ।
सोऽनुप्रासस्स च छेक वृत्त्यु[26]पाधिव[27]शाद्द्विधा ॥
समुदायद्वयं यत्र विविधं साम्यमृ[28]च्छति[29] ।
सच्छेकलालनात्प्रौढैः[30] छेकानुप्रास ईरितः ॥
व्यञ्जनव्यापृति[31]र्वृत्तिः[32] वर्णानां रसगोचरा ।
तत्संयोगादियं वर्णरचना वृत्तिरिष्यते ॥
सा वैदर्भ्यादिभेदेन[33] त्रिधा पूर्वैर्निरूपिता[34] ।
तयोपलक्षितत्त्वात्तु वृत्त्यनुप्रास इष्यते[35] ॥

इत्थं वर्णालङ्कारो द्विधा दर्शितः[36] ॥

---

1. E. अरुणिमा 2. A's alt. C. दृष्टसुताद्य 3. C. अपराय 4. C. व्यञ्जना 5. D. परुषां A.C.D.E.F.I परुषाटोपे 6. H. अलंकारेण 7. A's alt. F. अथापि H. अद्यापि 8. H. कुरुते त्वं रावण (P. 31) 9. A. C. कृता 10. D. निष्य—11. A. रसारसारसायन C. विलसतु सारसारसाधन रसधारा 12. All mss. read रस 13. All except F. धारा 14. C. सार 15. A's alt. ल व्यञ्जन सा 16. A's alt. C. साम्यञ्च त्रिष्वपि 17. C. अलंकार शङ्का 18. A's alt. एदद्वैव C. एकदैवत्य D. एकका 19. C. रसायना 20. समन्ताय त्रय 21. A's alt. च द्वयोषेत्यादौ C. च घोषेत्या 22. D. E. omit च 23. C. 'वित्यासो' 24. A. C. अनुगुणो A. B. गतस्तु यः, 25. D. यं 26. D. अनुप्रासतोद्वि 27. C. उपाय 28. D.F. इच्छति 29. F. ति ईरितः 30. D. E. प्राज्ञैः 31. C. व्यावृत्ति 32. A.B.C. व्यक्तिः 33. A. भेदात्रिधा C. भेदोत्रधा 34. A's alt. C. उदाहृता 35. A.C. उच्यते 36. D. दर्शितं ।

स्वरव्यञ्जनसमुदायपौनरुक्त्यं यमकम् ॥६॥

अत्र क्वचिद्भिन्नार्थत्वं क्वचिदनर्थकत्वं क्वचिदेकस्यार्थवत्त्वमपरस्यानर्थकत्वमिति संक्षेपतः प्रकारत्रयम् । यथा—

यो यः पश्यति तन्नेत्रे रुचिरे वनजायते ।
तस्य तस्यान्यनेत्रेषु रुचिरेव न जायते ॥

इदं सार्थकत्वे । एवमन्यज्ज्ञेयम् ।

शब्दार्थपौनरुक्त्यं प्ररूढं दोषः ॥७॥

प्ररूढग्रहणं वक्ष्यमाणभेदवैलक्षण्यार्थम् । यदाहुः—शब्दार्थयोः

अथ शब्दालङ्कारप्रस्तावः ॥ तत्र यमकलक्षणाय सूत्रम् । **स्वरव्यञ्जनसमुदायपौनरुक्त्यं यमकम्**[1] ॥ स्वरव्यञ्जना[2]त्मकस्य शब्दसमुदायस्य यत्तेनैव रूपेण पुनर्वचनं तद्यमनाद्य[3]मकम् । तस्य पदावृत्त्यर्धावृत्तादयो भेदाश्चिरन्तनैरेव बहुधा प्रपञ्चिताः । ते काव्यगडु[4]भूता इति नेह प्रतन्यन्ते[5] । किन्तु [6]सर्वेषामेवैषां भेदानामेत[7]द्वैचित्र्यत्रयम्[8] आवहतीति अभिप्रायेणाह—**अत्र क्वचिद्भिन्ना[9]र्थेत्यादि** । यम्य[10]मानयोः [11]समुदाययोर्द्वयोरपि क्वचिद्भिन्ना[12]र्थता, क्वचिद[13]नर्थकता, क्वचिदेकस्यार्थ[14]वत्त्वमपरस्य अनर्थकत्व[15]मिति क्रोडीकृतसकलविशेषमेतद्भेदत्रयम् । **यो य[16] इति** । रुचिरे रम्ये [17]वनजायते पद्म[18]-दलवत् दीर्घे तस्याः[19] नेत्रे यो यः पश्यति, तस्य[20] तस्यान्यनेत्रेषु अभिरतिरेव न जायते । इदं[21] द्वयोस्सार्थकत्वे[22] अनर्थकत्वे द्वैरूप्ये[23] यथा—

त्वं रावण ! जगत्पुण्यैर्लङ्कालङ्कारभूरभूः ।
वाल्मीके[24]र्येन ववृधे सारस्सारस्वतस्स्वतः ॥

अत्र "रभूरभूरि"ति अनर्थकता । "लङ्कालङ्कारे[25]" त्यादौ[26]द्वैरूप्यम् ।

इत्थमर्थपौनरुक्त्ये[27] पुनरुक्तवदाभासं[28] शब्दपौनरुक्त्ये तु अनुप्रासयमकालङ्कारौ च विवेचितौ । अथोभयपौनरुक्त्ये हेयांशं विभक्तुं[29] सूत्रम् । **शब्दार्थपौनरुक्त्यं प्ररूढं दोषः** ॥

प्ररूढग्रहणस्य[30] प्रयोजनमाह—**प्ररूढग्रहणमित्यादि** । [31]अप्ररूढपौनरुक्त्यं वक्ष्य-

---

1. D. कम् । आवृत्त्या 2. C. व्यञ्जनार्थक 3. C. यमनादि यम 4. C. गूढ 5. D. E. प्रतन्यते 6. D. समैवेषां 7. A's alt. तदेतद् 8. A. C. D. 'अयं त्रैगुण्यभाव' 9. A. भिन्नार्थे 10. A's alt. धर्मानयोः C. धर्म्यमानयोः F. गम्यमान 11. A.C. द्वयोरपि समु— 12. A. भिन्नार्थकता । भिन्नार्थकतं 13. omitted in. F. 14. C. एकस्यात्यर्थ 15. A's alt. F. H. I. अर्थवत्त्वं 16. F. यं 17. C. च वन 18. A's alt. C. पद्मवत् 19. C. तस्य 20. A.C. omit. तस्य 21. A's alt. C. इति 22. F. कत्वे यथा 23. E. च यथा 24. C. वाल्मीके येन 25. A. इत्यत्र 26. E. तु 27. D. उक्त्यं 28. A. C. E. F. आभासः 29. E. विभङ्क्तुं 30. F. स्य प्ररूढाद्वै 31. A's alt. अत्र दोषः । पौनरुक्त्यस्य वक्ष्य D. प्ररूढं E. अप्ररूढं

पुनर्वचनं पौनरुक्त्यमन्यत्रानुवादात् इति ॥

तात्पर्यभेदवत्तु लाटानुप्रासः ॥८॥

तात्पर्यमन्यपरत्वम् । तदेव भिद्यते यत्र, न तु शब्दार्थस्वरूपम् । यथा—

ताला जाअन्ति गुणा जाला दे सहिअएहि घेप्पन्ति ।
रइकिरणाणुग्गहिआइ होंति कमलाइ कमलाइ ॥

"अत्राब्जपत्रनयने ! नयने निमील्य" इत्यादौ विभक्त्यादेरपौनरुक्त्येऽपि बहुतरशब्दार्थपौनरुक्त्याल्लाटानुप्रासत्वमेव । "काशाः काशा इवे"-

---

माणो[1] भेदः । तस्य प्ररूढाद्वैलक्षण्य[2]मदोषात्मकत्वम् । तदेवादोषात्मकत्वमभियुक्तसंवादेन द्रढयति[3]—**यदा[4]हुरित्यादि[5]** । शब्दस्या[6]र्थस्य च पुनर्वचनमनुवादा[7]दतिरिक्ते विषये[8] दोष इत्यर्थः ।

अथोपादेयांशमधिकृत्य सूत्रम् । **तात्पर्यभेदवत्तु[9] लाटानुप्रासः** । यत्र पौनरुक्त्ये शब्दार्थौ तावेव, तात्पर्यमात्रं त्वन्यत् । सोऽयं लाटोप[10]लालनात् लाटानुप्रासः[11] । तस्मादसार्व[12]जनीनत्वात् [13]ग्राम्यानुप्रास इति[14] केचित् । **ताला [15]जाअन्तीति** ।

तदा जायन्ते गुणाः यदा ते सहृदयैर्गृह्यन्ते ।
रविकिरणानुगृहीतानि भवन्ति [16]कमलानि कमलानि ॥

अत्र[17] द्वितीययोर्गुण‡कमलशब्दयोः श्लाघाद्या[18]श्रयत्वं तात्पर्यभेदः ।

ननु[19] यत्र प्रकृतिमात्रं[20] तदर्थश्च पुनरुच्यते, न प्रत्ययतदर्थौ; अत्र कोऽलङ्कार इत्यत[21] आह—[22]**अत्राब्ज[23]पत्रेत्यादि[24]** । [25]**विभक्त्यादेरिति** । आद्यो हि नयनशब्दो बहुव्रीहि[26]वर्तित्वात् अन्यपदार्थलिङ्ग[27]वचनविभक्तिकः[28] । द्वितीयस्तु स्वलिङ्गवचनविभक्तिकः । अतो नेह विभक्त्यादेः पुनरुक्तिः । नापि लाटानुप्रासत्वहानिः । कुत इत्यत आह—**बहुतरशब्दार्थपौनरुक्त्यादिति** । इत्थं च सति पदनिबन्धनतया प्रातिपदिक[29]मात्रनिबन्धनतया च[30] लाटानुप्रासो द्विधा मन्तव्यः ।

---

1. A's alt. यो भेदः 2. A's alt. वैलक्षण्यात् 3. D. रूढयति 4. D. यमाहुः 5. A's alt. C. इति । 6. H. शब्दस्य चार्थ- 7. C. अनुवादयति 8. C. विषयो 9. A's alt. D. भेदवतु 10. A's alt. C. omit. लाटानुप्रा 11. C. प्रासं 12. A. जानेकत्वात् 13. A. ग्रामानु 14. A's alt. F. इत्यपि 15. A's alt C. ज अस्ती D. लाजा अतीति 16. A. विमल—17. E. गुणास्तदा गुणा जायन्त इति अध्याहारः । दार्ष्टान्तिकत्वात् । अत्र 18. A. C. आगन्तृत्वं A's alt. श्लाघास्पदत्वात् E. 'आस्पदत्व तात्प' 19. A's alt. C. 'न च' H. न तु 20. C. मात्रं यत्र 21. A's alt. अत्राह C. इत्याह— 22. A's alt. प्रकृति मात्र अत्र 23. C. अंजपुत्रे 24. A's alt. पुत्र 25. D. विभादेरिति 26. A's alt. C. वृत्ति 27. C. विभवचन 28. D. विभक्तिकं अतो 29. पदिकार्थ निव— 30. A's alt. C. omit. च

‡ In this verse the word कमल alone is expressly repeated, and the word गुण mentioned by Vidyācakravartin as repeated is so only by implication.

त्यादावनन्वयेन सहास्य सङ्करः। अन्योन्यापेक्षशब्दार्थगतत्वेनार्थमात्रगतत्वेन च व्यवस्थितेर्भिन्नविषयत्वात्।

अनन्वये च शब्दैक्यमौचित्यादानुषङ्गिकम्।
अस्मिंस्तु लाटानुप्रासे साक्षादेव हि लक्षणम्॥

तदेवं पौनरुक्त्ये पञ्चालङ्काराः ॥९॥

निगदव्याख्यातमेतत्।

वर्णानां खड्गाद्याकृतिहेतुत्वे चित्रम् ॥१०॥

अनन्वयाद्विशेषमस्य दर्शयति—**काशाः काशा इवेत्यादि**। अनन्वये[1] ह्येकस्यैवोपमानोपमेयत्वम्। तत्र[2] यद्यपि अर्थपौनरुक्त्यं लक्षणन्[3], अथापि शब्दपौनरुक्त्यं[4] दोषभयादङ्गीक्रियत एव[5]। "[6]यथोद्देशस्तथैव प्रतिनिर्देश" इति न्यायोल्लङ्घने पर्यायप्रक्रमभेददोषप्रसङ्गात्[7]। लाटानुप्रासे[8] तु शब्दपौनरुक्त्य[9]मपि लक्षणमिति विशेषः[10]। तदेतदाह—**अन्योन्यापेक्षेत्यादि**। परस्परव्यपेक्षिणोः शब्दार्थयोः पौनरुक्त्यं लाटानुप्रासः। अनन्वये[11] त्वर्थमात्रपौनरुक्त्यमित्यर्थः। अत्रार्थे[12] सङ्ग्रहश्लोकः[13]—**अनन्वये तु इत्यादि**। [14]औचित्यादुद्देशप्रतिनिर्देशयोः ऐकरूप्यसमाश्रयणलक्षणात्[15]॥

यत्र तावेव शब्दार्थौ तात्पर्यं तु विभिद्यते[16]।
तत्पौनरुक्त्यमाचार्यैर्लाटानुप्रास इष्यते॥
दोषापत्तिभयादेव शब्दैक्यं स्यादनन्वये।
अस्मिंस्तु लाटानुप्रासे साक्षादेव हि लक्षणम्[17]॥

अथ पौनरुक्त्यनिबन्धनाना[18]मलङ्काराणां नियमनाय[19] सूत्रम्। **तदेवं पौनरुक्त्ये [20]पञ्चालङ्काराः**। यथैवं[21] पौनरुक्त्यं व्यपाश्रित्य वर्गशोऽवतिष्ठन्ते[22]। तथोपमादयोऽपि साधर्म्यादिव्यपाश्रयेण[23] वर्गशोऽवस्थायिन इत्यव[24]बोधितं मन्तव्यम्। तदिदं न्यायविदामव[25]गतमेवेत्यभिप्रायेणाह—**निगदव्याख्यात[26]मिति**। [27]निगद[28]शब्दोच्चारणं तन्मात्रेण प्रतीतार्थत्वात् व्याख्यातकल्पमित्यर्थः।

अथ चित्रार्थं सूत्रम्। **वर्णानां खड्गाद्याकृतिहेतुत्वे चित्रम्**॥ सङ्गतिमाह—

---

1. D. E. अनन्वयो 2. A's alt. D. omit. तत्र 3. A's alt. लक्षण न? थापि 4. C. पौनरुक्त्य 5. A's alt. D. एवं यावत्तयोर्निर्देशः। 6. C. तयोर्निर्देशः H. यो देशः 7. D. भङ्गात् 8. C. प्रासं 9. D. उक्त्यलक्षणे 10. D. विशेषं 11. D. E. H. अनन्वयस्तु 12. A's alt. C. अर्थं 13. A's alt. सङ्ग्राहक D. श्लोकाः 14. A's alt C. औपचित्या 15. A's alt लक्षणान्य C. लक्षणाद्यत्र यत्र 16. D. ते तथापि (P. 34) 17. H. एवं 18. C. निबन्धन नाम 19. E. निगमनाय 20. A's alt. C. पञ्च प्रकाराः 21. All except E. read. एव 22. A's alt. E. F. तिष्ठते 23. A's alt. आश्रयणेन H. आश्रयतो 24. C. इत्येव 25. A's alt. E. अवदातं E. वगत मोचेत्यभि 26. A's alt. व्याख्यान 27. A. निगदन निगद 28. H. निगदः

पौनरुक्त्यप्रस्तावे स्थानविशेषश्लिष्टवर्णपौनरुक्त्यात्मकचित्रवचनम् । यद्यपि लिप्यक्षराणां खड्गादिसन्निवेशविशिष्टत्वं तथापि श्रोत्राकाशसमवेत-वर्णात्मकशब्दाभेदेन तेषां लोके प्रतीतेर्वाचकशब्दालङ्कारोऽयम् । आदिग्रहणा-द्यथाव्युत्पत्तिसंभवं पद्मबन्धादिपरिग्रहः । यथा—

भासते प्रतिभासार ! रसा भाता हताविभा ।
भावितात्मा शुभा वादे देवाभा बत ते सभा ॥

एषोऽष्टदलपद्मबन्धः । अथ दिग्दलेषु निर्गमप्रवेशाभ्यां श्लिष्टाक्षर-

---

पौनरुक्त्य-प्रस्ताव [1]**इत्यादि** । स्थानविशेषेषु[2] खड्गाद्यवयवविशेषेषु विन्यासक्रमेण [3]श्लिष्टानां[4] वर्णानां[5] यत्पाठे पौनरुक्त्यं तदात्मकस्य खड्गबन्धादिचित्रस्य कथनं पौन-रुक्त्यप्रस्तावे [6]सङ्गच्छत इत्यर्थः । ननु कथमयं शब्दालङ्कारः ? लिपिसन्निविष्टानां वर्णानां वाचकत्वाभावात् इत्यत आह—**यद्यपीत्यादि** । खड्गादिसन्निवेशो हि लिप्यक्षराणाम् एव न श्रोत्राकाश[7]समवायिनाम् । वाचकत्वं तु श्रोत्राकाशसमवायिनामेव न पुनर्लिपि सन्निवेशिनाम् । इत्थं च[8] सति खड्गादिबन्धगतानां यद्यपि वाचकशब्दालङ्कारता नोप-पद्यते, तथापि लौकिकानां लिप्यक्षरेष्वपि वाचकत्वप्रतीतेर्वाचकशब्दालङ्कारत्वमुपचर्यत[9] इति भावः । अतः[10] स्थूलबुद्धिलालनीयत्वात् वाचकशब्दबहिर्भावाच्च नात्र कविभिरादरः कार्य[11] इति मन्तव्यम्[12] । आदिशब्दार्थमाह—**आदिग्रहणादि**[13]**त्यादि** । यथाव्युत्पत्ति[14]-संभवं, यथा[15] शब्दः प्रत्येकमभिसंबध्नाति[16] । अतो यथाव्युत्पत्ति[17] यथासंभवं च पद्म[18]-मुरज[19]गोमूत्रिकादिबन्धानां परिग्रहो[20]ऽभ्यनुज्ञायत[21] इति शेषः[22] ।

भासत इति[23] । प्रतिभया सारभूत[24] सभा ते भासते । बतेत्याश्चर्ये । रसाभाता शृङ्गारादिना [25]समन्तादुपशोभिता । हताविभा[26] निर्णाशितव्यामोहा[27] । भावितात्मा [28]तत्संस्कारैः आत्मानं [29]भावितवती । शुभा वादे[30] तत्त्वबुभुत्सा (सया ?) तु[31] (वा ?) विजिगीषया[32] वा वादमात्रे विदग्धा । अत एव देवाभा [33]सुधर्मासदृशीत्यर्थः । अत्रोद्धार-प्रकारमुपदिदिक्षु[34]राह - **एषोऽष्टदल इत्यादि**[35] । [36]दलानि दिक्षु चत्वारि[37] चत्वारि च

---

1. A's alt. C. इति 2. A's alt. D.E.F.H.I. गञ्जनकपालिका कुणिडकेषु खड्ग 3. C. शिष्टा 4. A.C. "नां यन्नियत्या पौन" A's alt. नां यत्पौन 5. H. 'वर्णा-नायत्पाठे' 6. H. सङ्घटते 7. C. श्रोत्रार्थाकाश 8. च omitted in A. C. D. F. 9. C. उपचीय्यते 10. A's alt. D. H. अथ 11. A's alt. C. कर्तव्यः 12. D. मन्तव्य 13. A's alt. C. इति 14. C. पत्त्यसंभवे 15. E. यद्यथा 16. A's alt. C. बध्यते । 17. C. पत्तिः 18. A's alt: C. पद्म 19. D. मुरजबन्धगो 20. A's alt. C. ग्रहइत्यनु-ज्ञायते 21. A's alt. C. ते । भास 22. D. शेषं । 23. H. इति । अत्रायं 24. F. भूतं 25. D. रसेन आसम E. रसेन न सम 26. A. हतापिहा (भा) निः । F. विभावानाशित 27. D. व्यामोहो C. मोहात्मा 28. A.C. सत् 29. D. भवि 30. A's alt. वादेन 31. Omitted in C. 32. Except A. all read विजिगीषा 33. C. सधर्मा 34. A. दिदिक्षु (ददिक्षु) । 35. A.C.F.H.I. दलबन्ध इति 36. F. दलादिषु च 37. C.D.F. वारिच ।

त्वम् । विदिग्दलेषु त्वन्यथा । कर्णिकाक्षरं तु श्लिष्टमेव ।

उपमानोपमेययोः साधर्म्ये भेदाभेदतुल्यत्वे उपमा ॥११॥

अर्थालङ्कारप्रकरणमिदम् । उपमानोपमेययोरित्यप्रतीतोपमानोपमेयनिषेधार्थम् । साधर्म्ये त्रयः प्रकाराः । भेदप्राधान्यं व्यतिरेकादिवत् । अभेदप्राधान्यं रूपकादिवत् । द्वयोस्तुल्यं यथास्याम् । यदाहुः—"यत्र किंचित्सा-

---

विदिक्षु, प्रथमाक्षरं कर्णिकायाम् । अथ[1] दलेषु द्वयं द्वयमक्षराणां प्राग्दलात् प्रादक्षिण्येन[2] पाठः । दिग्दलेषु प्रवेशनिर्गमौ । अत्रायं निष्कर्षः—

कर्णिकायां लिखेदेकं द्वौ द्वौ दिक्षु विदिक्षु च ।
प्रवेशनिर्गमौ[3]दिक्षु पद्मबन्धो भवेदयम् ॥
आरोप्यलिपिवर्णानां साम्याद्वाचकवर्णता[4]म् ।
खड्गबन्धादिकं चित्रं काव्यालङ्कार इष्यते ॥इति॥

इति श्रीविद्याचक्रवर्तिकृतौ अलंकारसर्वस्वसञ्जीवन्यां[5] शब्दालङ्कारप्रकरणम् ॥

॥ अथार्थालङ्काराः ॥

तत्र सादृश्यविच्छित्तिविशेषैः नानालङ्कारबीजभूता[6]मुपमा[7]मादौ लक्षयितुं सूत्रम्[8] । **उपमानोमेययोस्साधर्म्ये भेदा[9]भेदतुल्यत्वे[10] उपमा** । उपमीयते[11] साधर्म्यं [12]नयतीत्युपमानम् अप्राकरणिकोऽर्थः तच्च नियमेन अधिक[13]गुणमेव भवति गुणाधातृत्वात् । उपमीयते साधर्म्यं नीयते इत्युपमेयं प्राकरणिकोऽर्थः तच्च नियमेना[14]धेयगुणत्वात् न्यूनगुणमेव भवति । तयोर्यस्तुलित[15]भेदाभेदांशः समानधर्माभिसम्बन्धः, स[16] उपमालङ्कार इति सूत्रार्थः । तदेतद् व्याचिख्यासुः[17] प्रकरणविभागा[18]याह—**अर्थालङ्कारेति** ।

ननु साधर्म्यं नाम[19]तदुपमानोपमेययोरेव भवति । न कार्यकारणादिकयोः । इत्थम[20]पर्यवसान[21]सिद्धयोरनयोः किं शब्दोपादानेनेत्यत आह—**उपमानोपमेययो[22]रिती[23]त्यादि** । सिद्धे सत्यारम्भोऽयं, प्रसिद्धयोरेवोपमानोपमेययोरलंकारत्वमिति नियमाय । अतो मेरुसर्षपादौ विवक्षया परिकल्पयितुं शक्योऽपि उपमानोपमेयभावो नालङ्कारविषयः । अप्रतीतत्वा[24]दित्यनुसन्धेयम् । भेदाभेदेत्यस्य व्यावर्त्यं दर्शयितुं साधर्म्य[25]प्रकारान्विविनक्ति **साधर्म्ये त्रय इत्यादि** । **व्यतिरेकवदिति[26]** । "तत्र[27] तस्येवेति" वतिः । व्यतिरेकालङ्कारे यथेत्यर्थः । **यथास्या[28]मिति** । उदाहरिष्यत इति शेषः ।

---

1. D. य द्वयं दलेषुद्वयम 2. C. येन न पाठः 3. C. निर्गमो 4. C. वर्णतः । 5. A. C. D. जीविन्यां 6. A's alt. C. भूतामादौ 7. C. उपमां ल 8. F. उपमेत्यादि 9. A. 'भेदाद्भेदे' 10. C. तुल्यत्वं 11. E. उपमिमीते 12. A's alt. नीयत 13. A. गुणकं 14. D. नियमेनाधिकगुणमेव भवति । 15. A. C. E. F. तुल्यित 16. Omitted in D. 17. C. व्याख्यासुः 18. F. विभागार्थे 19. C. नाममेतद् 20. C. अप्यवसान 21. D. omits न 22. D. 'मेययोरित्वा' 23. A. C. इतीति (प्रतीतोपमानोपमेयनिषेधार्थमिति) आह—सिद्धे 24. A.C.F.H.I. त्वादनु 25. C. धर्म— 26. H. इत्यादि 27. All mss. read तत्रैवेति 28. A.D.F. स्यात् ।

मान्यं कश्चिच्च विशेषः स विषयः सदृशतायाः" इति । उपमैव च प्रकारवैचित्र्येणानेकालङ्कारबीजभूतेति प्रथमं निर्दिष्टा । अस्याश्च पूर्णालुप्तात्व-

---

भेदाभेदतुल्य[1]त्व एवोपमा स्यादिति यदुक्तं तत्प्रामाणिकसंवादेन द्रढयितुमाह—**यदाहुरित्यादि** । भाष्यकृदा[2]दय इति[3] शेषः । सामान्यं साधर्म्यम् । विशेषो[4] वैधर्म्यम् । सदृशतायाः[5] उपमाया; साधर्म्यवैधर्म्ययोः तुलया[6] वृत्ता[7]वुपमा[8] स्यादिति यावत् । यद्देतदस्या उद्देशे[9] प्राथम्यं तत्र प्रयोजनं दर्शयति—**उपमैव चेति । प्रकारवैचित्र्येणेति** । तथाहि—मुखं चन्द्र इवेत्युपमा । मुखं मुखमिवेत्यनन्वयः[10] । मुखं चन्द्र इव स[11] तदिवेत्युपमेयोपमा । दृष्ट्वा मुखं चन्द्रमनुस्मरामीति[12] स्मरणम् । मुखमेव चन्द्र इति रूपकम् । मुखचन्द्रेण तापः शाम्यतीति परिणामः[13] । किं चन्द्र आहोस्विन्मुखम्[14] इति सन्देहः । मुखं[15] चन्द्र[16] इति चकोरा नन्दन्तीति भ्रान्तिमान् । चन्द्र[17] एव न मुखम् इति अपह्नुतिः[18] । नूनं[19] चन्द्र इवेत्युत्प्रेक्षा । चन्द्रं पश्येत्यतिशयोक्तिः । अस्यां प्रावृषि मुखं चन्द्रबिम्बञ्च विच्छायमित्येका तुल्ययोगिता । शरदि [20]रम्यमिति[21]त्वन्या । इदं च[22] तच्च[23] रम्यमिति दीपकम् । मुखमेव रम्यं[24] चन्द्र एव हृद्य इति [25]प्रतिवस्तूपमा । [26]भुवि मुखं दिवि चन्द्र[27] इति दृष्टान्तः । मुख[28]दूषणं [29]चन्द्रमसो मलिनीकरणमिति निदर्शना । चन्द्राद[30]धिकं मुखं, मुखादधिक[31]श्चन्द्र इति[32] व्यतिरेकः । चन्द्रेण सह मुखमिति सहोक्तिः । न[33] मुखेन विना चन्द्र[34] स्समीचीन इति विनोक्तिः । कलाभिरामं[35] मुखमिति समासोक्तिः । कलाभिरामौ मुखचन्द्राविति श्लेषः[36] । नमस्ते चन्द्र प्रसन्नोऽसि[37] इत्यप्रस्तुतप्रशंसा । मुखे रोषो[38] न दोषाय[39] नहीन्दो[40] र्निन्दायै कलङ्करेखेत्यर्थान्तरन्यासः । इत्थं स्वप्रकारवैचित्र्येण [41]सादृश्यविच्छित्तिविशेषात्मना यतो नानालङ्कारनिदानभूता, [42]अतोऽर्थालङ्कारेषु प्रथमं[43] निर्दिष्टेति यावत् ।

स्थूलप्रभेदप्रथनभीरुता[44]माविश्चिकीर्षुराह—**अस्याश्च पूर्णेत्यादि** । पूर्णालुप्तात्वे[45]

---

1. D. त्व यदा 2. C. कृदादिति 3. A's alt. इत्यर्थः । 4. A.C.H. विशेषं F. शेषो तत्र 5. A.H. तयोपमायाः C. तयोस्साधर्म्य 6. A.C.F.H.I. तुलनया 7. C. प्रवृत्ता 8. C. मानस्या 9. A's alt. उद्देश साधर्म्यं C. उद्देशे साधर्म्यं 10. D. अनन्वया 11. A's alt. C. H. चन्द्रो मुखमिवे 12. A's alt. स्मरति 13. H. णामालंकारः, 14. D.E. मुखपद्म 15. Omitted in D. 16. C. चन्द्र ˙ ˙ ˙ कोशा नन्द 17. C. चन्द्रमिव 18. A's alt. अपह्नवः । C. अनुभवः 19. A. नन्दनात् मुखं मुखं चन्द्र C. H. मुखं चन्द्र D. आनं चन्द्र 20. A's alt. C. तच्चेदं रम्य 21. A's alt. C. इत्यन्या 22. H. omits च 23. D. तन्वरम्यं 24. D. रम्य 25. D. omits प्रति 26. D. omits भु 27. A. C. इवेति । 28. C. मुखं 29. A. C. चन्द्रमलि 30. C. D. अधिक मुखं 31. D. अधिकं 32. A's alt. E.F.H. इति च 33. D. omits न 34. A.C.F. चन्द्र इति । 35. A's alt. D. E. पूर्णं मुखं 36. D. शेषः । 37. C. प्रसीदोऽसि H. प्रसन्नो 38. H. दोषः, 39. D. E. H. I. दोषः, 40. A's alt. C. इन्दौ निन्दा निन्दांश इत्य 41. A's alt. साधर्म्य 42. D. omits अतो 43. C. प्रथमनिर्दि 44. A's alt. भीरुत्वं 45. A's alt. C. H. 'लुप्ता चेत्यत्र' ।

भेदाद् बहुविधत्वं चिरन्तनैरुक्तम्। तत्रापि साधारणधर्मस्य क्वचिदनुगामितयैक-रूप्येण निर्देशः। क्वचिद् वस्तुप्रतिवस्तुभावेन पृथङ्निर्देशः। पृथङ्निर्देशे च संबन्धिभेदमात्रं प्रतिवस्तूपमावत्। बिम्बप्रतिबिम्बभावो वा दृष्टान्तवत्। क्रमेणोदाहरणानि—

त्यत्र भाषितपुंस्कत्वाभावात् न पुंवद्भावः। संज्ञे हि खलूपमाया एते[1] पूर्णा लुप्ता चेति। तत्रोपमानोपमेयसाधारणधर्म[2]उपमाप्रतिपादकानां चतुर्णामपि[3] शब्दो[4]पादाने पूर्णा। एकस्य द्वयोस्त्रयाणां वा लोपे लुप्ता। अनयोर्भेदप्रभेद[5]वैचित्र्य[6]सहस्रमस्माभिः **संप्रदाय[7]प्रकाशिन्यां काव्यप्रकाशबृहट्टी[8]कायां** वितत्य[9] दर्शितम्। **लघुटीकायां**[10] च[11] [12]यथोपयोगमिति ततोऽवधार्यम्। अयं[13] पुनराचार्यः सर्वस्यैवोपमाप्रपञ्चस्य अन्यैः अनुप[14]पादितचर[15]वैचित्र्यत्रयमुपपिपादयिषुराह—**तत्रापि साधारणधर्मस्येत्यादि**। अनुगामितया उभयाभिसंबन्धार्हतया। मुखं[16] चन्द्र इव हृद्यमित्येकेनैव रूपेण हृद्य[17]त्वादेस्साधारणधर्मस्य निर्देशः क्रियते इत्येकं वैचित्र्यम्। अथ वस्तुप्रतिवस्तुभावेन पृथङ् निर्देश इति द्वितीयम्। एकोऽर्थो वस्तुत्वेनोपमेयगतः[18] प्रतिवस्तुत्वेन निर्दिश्यत इति यावत्[19]। यदैवं पृथङ्निर्देशः, [20]तदावान्तरभेदोऽस्तीत्याह—**पृथङ्निर्देशे[21]चेत्यादिना। सम्बन्धिभेदमात्रमिति।** "वलितकन्धरमाननमावृत्तवृन्त[22]शतपत्रनिभम्"इत्यादौ हि[23] येन सह संबध्नाति साधारणो धर्मः स[24] सम्बन्धी, केवलं[25] भिन्नः[26] एकत्र कन्धरा अपरत्र वृन्तं तद्भे[27]दोपाधिना स्वयमभि[28]न्नोऽपि अभेदो धर्मो[29] भेदेन निर्दिष्टः। इदमेकं वैचित्र्यम्। **प्रतिवस्तूपमावदिति।** यथा प्रतिवस्तूपमायाम्। [30]अभिन्न[31]धर्मस्य भेदेन निर्देशे[32] न्यायो यस्स[33] इहापि संभवतीति यावत्। यदा पुनरंसार्पित[34]हारोऽयं [35]सनिर्झरो[36]द्रार इवेत्यादौ [37]साधर्म्य[38] धर्मि[39]द्वारकं, तदा द्वयो[40]रैकात्म्य[41]भावात् न वस्तुप्रतिवस्तुभावः। अपि तु बिम्बप्रतिबिम्बभावनय इत्याह—**बिम्बप्रतिबिम्बभावो वेति।** प्रतिबिम्बं प्रतिमा। हारनिर्झरादौ हि बिम्बप्रतिबिम्बनयेन साधर्म्यावगतिः। अत्र नये दृष्टान्ता-

---

1. A. हते 2. C. धर्मोपमा 3. H. अपि उपा 4. A. C. शब्दतोपा A's alt. शब्दे न 5. D. प्रभेदा 6. A's alt. C. वैचित्र्यात् 7. C. प्रकाशाप्रकाशि 8. D. 'दीपिका' 9. C. विद्यत इति द 10. C. दीपिकायां 11. A's alt. C. तु 12. A's alt. C. यथायोग 13. H. तु पुन 14. A's alt. अनुत्पादित 15. A's alt. C. D. चरं उप 16. 'मुख चन्द्र' 17. A's alt. D. H. हृद्यता 18. A. C. F. 'अन्योऽर्थस्तूपमानगत इति प्रति' 19. H. 'त् यदा पुनः' 20. E. 'तदवान्त' 21. A's alt. C. निर्देशश्च 22. A's alt. वृक्त 23. H. omits. हि 24. A. omits. स० 25. A's alt. C. केवलो 26. A's alt. C. भिन्न एक 27. C. तद्भाव 28. C. अभितो 29. A's alt. C. धर्मभे 30. A's alt. C, सामान्यस्य धर्म 31. H. अभिन्नस्य 32. A's alt. निर्देशन्या 33. A's alt. E. H. अयं स 34. A's alt. C. हारसनिर्धारो 35. A. omits स 36. F. रोगिरिरिति वेत्यादौ 37. D. साहधर्म्य 38. C. धर्म्य 39. A. धर्म 40. A's alt. C. एकात्मता न D. E. एका H. एकान्त्य भावेन वस्तु 41. A. E. अभावात्,—

प्रभामहत्या शिखयेव दीपस्त्रिमार्गयेव त्रिदिवस्य मार्गः ।
संस्कारवत्येव गिरा मनीषी तया स पूतश्च विभूषितश्च ॥
यान्त्या मुहुर्वलितकन्धरमाननं त-
दावृत्तवृन्तशतपत्रनिभं वहन्त्या ।
दिग्धोऽमृतेन च विषेण च पक्ष्मलाक्ष्या
गाढं निखात इव मे हृदये कटाक्षः ॥

लङ्कारं दृष्टान्तयति[1]—**दृष्टान्तवदिति** । [2]अत्रैतदाकूतम् । या यावती[3] संभ[4]वत्युपमा पूर्णा लुप्ता च[5] सप्रभेदप्रपञ्चा सा[6] सर्वैवास्म[7]दुपदर्शितेन वैचित्र्य[8]त्रयेण त्रिधा प्रथत इति[9] ।

प्रभामहत्येति । प्रभापेक्षया[10] महतीति कथनात् स्वापेक्षया तन्वीति [11]विवक्ष्यते । तदेतत्प्रभामहत्त्वं[12]दीपशिखापेक्षया देव्याः साधारणो धर्मः । उभे हि[13] खलु एते स्वापेक्षया तनीयस्यौ प्रभापेक्षया तु महत्यौ । एवं संस्कारवत्त्वं वागपेक्षया । तत्र वाचि संस्कारो व्याकृतिः, देव्यां तु निसर्गसिद्धदिव्यानुभाववासनानु[14]वृत्तिः । त्रिमार्गयेत्यत्र तु[15] साधारणधर्मः प्रतीयमानः । न चात्र प्रक्रमभेदः शङ्क्यः । [16]जगत्पावनत्वादेस्साधारण[17]-धर्मस्य उभयत्रा[18]पि सुप्रसिद्धतमस्य शब्दोपादाननिरपेक्षत्वात्[19] । इत्थं च सत्य[20]नुपात्तस्यापि साधारणधर्मस्यानु[21]गामितयैक[22]रूप्येण[23] निर्देश[24] उदाहृतो मन्तव्यः । यद्वा त्रिमार्ग[25]येत्येतदेव तन्त्रेण न्यायेन देवीविशेषण[26]तयापि सङ्गच्छते । तथाहि—त्रिवृत्करणादिवैदिकप्रक्रियानुसारेण[27] वा, [28]त्रैपुरादितान्त्रिकप्रक्रियानुसारेण वा देव्यास्त्रिमार्गत्वं प्रसिद्धमेव । हिमगिरेस्तु दीपत्रिदिव[29]मार्गमनीषिभिस्सह साधारणो[30] धर्मः [31]पूतत्वम् । विभूषितत्वं या आद्यन्तवाक्यापेक्षया पूर्णोपमा । मध्यमवाक्यापेक्षया[32] लुप्तसाधारणधर्मा । तत्रापि[33] सा पूर्णैव वा[34] । सा[35] च मालारूपेणावस्थानान्मालोपमेत्यादि वैचित्र्यमनुसन्धेयम् ।

अथ वस्तुप्रतिवस्तुभावेनोदाहरति—**यान्त्येति** । मालतीविलाससाक्षात्कारोत्क्षुभितमन्मथस्य माधवस्ये[36]यमुक्तिः । यान्त्या उपवनात्पुरं प्रति करेणुकया गच्छन्त्या[37]

---

1. Omitted in D. 2. A's alt. अत्रेदं C. अत्रेदं 3. H. यायाचती 4. A's alt. सहवत्युप C. सहपत्युप । 5. A's alt. C. H. च । सा 6. Omitted in D. 7. E. 'मद्दर्शि' 8. A's alt. C. वैचित्र्येण 9. H. ति । अत्रैक 10. C. 'प्रभावेक्षा' 11. D. लक्ष्यते 12. D. महत्त्वं 13. D. ह खलोते 14. D. omits. नु 15. Omitted in D. 16. D. जल्पावन 17. D. धारणे 18. D. यत्र व्रत सिद्ध E. 'यंत्र प्रसि' 19. C. पेक्षत्वादिकं च 20. D. E. सत्यार्थस्यानु 21. C. नानुमितैव 22. A's alt. एव 23. A's alt. C. रूपेण 24. Omitted in D. 25. D. मार्गयेवेत्येत 26. D. 'विशेषत' 27. A's alt. सरणेव C. सरणेव D. E. सरणेन 28. A's alt. ने त्रिपुर C. नेत्रपुर 29. A. C. H. दीप - 30. A. C. साधारण 31. A's alt. C. धर्मपूत 32. D. E. तु लुप्त 33. F. तत्रविधिपूर्वैव वा । सा 34. C. omits वा 35. A's alt. C. साऽपि च 36. A's alt. C. धवस्योक्तिः 37. A's alt. C. गच्छन्त्यस्सह ।

अत्र वलितत्वावृत्तत्वे संबन्धिभेदाद्भिन्ने। धर्म्यभिप्रायेण तु बिम्बप्रतिबिम्बत्वमेव।

पाण्ड्योऽयमंसार्पितलम्बहारः क्लृप्ताङ्गरागो हरिचन्दनेन।
आभाति बालातपरक्तसानुः सनिर्झरोद्गार इवाद्रिराजः॥

अत्र हाराङ्गरागयोर्निर्झरबालातपौ प्रतिबिम्बत्वेन निर्दिष्टौ।

एकस्यवोपमानोपमेयत्वेऽनन्वयः ॥१२॥

वाच्याभिप्रायेण पूर्वरूपावगमः। एकस्य तु विरुद्धधर्मसंसर्गो द्वितीयसब्रह्मचारिनिवृत्त्यर्थः। अत एवानन्वय इति योगोऽप्यत्र संभवति यथा—

सहचरीसँल्लापादिव्यपदेशेन वारंवारमप[1]वृत्तशिरोधरा[2], अत एव आवृत्त[3]वृन्तस्य कल[4]-हंसकर्ण[5]कण्डूयनादिना विवलित[6]बन्धनस्य कुशेशयस्य सदृशम् आननम् वहन्त्याः कटाक्षो मे हृदये निखातः। अपाङ्गे[7] निक्षिप्ता चक्षुःप्रभा स कटाक्षः, सः[8] कीलित इव। केन[9] प्रकारेण ? गाढं परिचाल्याऽपि उत्कीलयितुं न शक्यते, यथा तथेति यावत्। कीदृक्कटाक्षः ? अमृतेन दिग्धः लिप्तः, यतस्तदा जीवातुरभूत्। विषेण च दिग्धः यतस्संप्रति दहति। अत्रैक[10] एव [11]धर्मस्सम्बन्धिभेदेन वलितावृत्तशब्दाभ्यां वस्तुप्रतिवस्तुभावेन निर्दिष्टः।

वस्तुप्रतिवस्तुभावोऽयं धर्मापेक्ष एव। बिम्बप्रतिबिम्बभावस्तु धर्म्यपेक्ष इति व्यवस्थार्थ[12]माह—**धर्म्य[13]भिप्रायेणेत्यादि**। **पाण्ड्योऽयमिति**। हारनिर्झरादीनां [14]धर्मित्वाद्बिम्बप्रतिबिम्बभावः।

भेदाभेदतुलावृत्तौ साधर्म्यमुपमोच्यते।
धर्मविच्छित्तिवशतः त्रैविध्यमुपयाति सा॥

अनन्वयं सूत्रयति[15]—[16]**एकस्यैवोपमानोपमेयत्वे[17] अनन्वयः**। ननु[18] उपमेयत्वमुपमानत्वं च कथमेक[19]त्रैव सङ्गच्छत इत्याह[20]—**वाच्याभिप्रायेणेत्यादि**। पूर्वं[21] रूप[22]मुपमेयत्वं तदनुगमो वाच्याभिप्रायेण यत्पुनरपूर्वं[23] रूपमुपमानत्वं तदनुगमो व्यङ्ग्याभिप्रायेणेति यावत्। [24]नन्वेकत्र विरुद्धधर्मोपनिबन्धलभ्यः[25] कोऽर्थ इत्यत आह—**एकस्य तु[26]**

---

1. A's alt. अप्रवृत्त D. आवृत्त 2. E. धरं— C. धरात् त एव 3. C. आवृत्तस्य 4. A's alt. C. कलभकर्ण 5. D. omits. कर्ण 6. A's alt. विचलित D. विवचत्तु: 7. C. अयाङ्गेन E. अपाङ्ग 8. A's alt. C. omit. स 9. A's alt. C. केनापि 10. A's alt. F. अत एक 11. A's alt. C. धर्मः वलि— 12. A's alt. C. स्थानार्थं 13. C. धर्म्यभि F. धर्माभि 14. A. C. F. धर्म 15. C. सूचयति। 16. A's alt. F. एकस्येति। ननु 17. C. त्वेन अन्वयः। 18. A. ननु च उपमानत्व यत्व मुपमानत्वं च। 19. A's alt. C. एकस्यैव D. omits इव, 20. A.E. इत्यत H. omits इति 21. C. 'पूर्णरूप' 22. All read 'रूपकमुप' 23. A.C.H. पूर्वरूपक 24. A's alt. C. नन्वत्र 25. A's alt. C. बन्धनलभ्य 26. Omitted in all except C.

युद्धेऽर्जुनोऽर्जुन इव प्रथितप्रतापो भीमोऽपि भीम इव वैरिषु भीमकर्मा ।
न्यग्रोधवर्तिनमथाधिपतिं कुरूणामुत्प्रासनार्थमिव जग्मतुरादरेण ॥

द्वयोः पर्यायेण तस्मिन्नुपमेयोपमा ॥१३॥

तच्छब्देनोपमानोपमेयत्वप्रत्यवमर्शः । पर्यायो यौगपद्याभावः । अत एव त्वत्र वाक्यभेदः । इयं तु धर्मस्य साधारण्ये वस्तुप्रतिवस्तुनिर्देशे च द्विधा । आद्या यथा—

खमिव जलं जलमिव खं हंसश्चन्द्र इव हंस इव चन्द्रः ।
कुमुदाकारास्तारास्ताराकाराणि कुमुदानि ॥

विरुद्धेत्यादि । सब्रह्मचारी सदृशः । एकस्यैवोपमानोपमेयत्व[1]क्लृप्तिः सदृशान्तरसम्बन्धनिवृत्त्यर्थमित्यर्थः[2] । यत इत्थं सदृशान्तरस्यानन्वयः अतस्संज्ञेय[3]मन्वर्थेत्याह—**अत[4] एवानन्वय इत्यादि** । योगः प्रवृत्तिनिमित्तम् । अपि शब्देन सदृशान्तरनिवृत्ति[5]स्समुच्चीयते[6] । **युद्धेऽर्जुन[7] इति** । [8]उत्प्रासनमभिप्रायपरिज्ञानम् । अत्र प्रथमार्जुनभीमशब्दौ वाच्यपरौ, चरमौ[9] तु व्यङ्ग्यपरौ ।

विरुद्धधर्मसं[10]सर्गस्तुल्यान्तरनिवृत्तये ।
[11]अतस्तदन्वयाभावात् भवेदयमनन्वयः ॥

अथ तृतीयसब्रह्मचारिनिवृत्तिफला[12]मुपमेयोपमां सूत्रयति—**द्वयोः[13] पर्यायेण तस्मिन्नुपमेयोपमा** । द्वयोरुपमानोपमेयभावविनिमये सत्युपमेयोपमालङ्कार इत्यर्थः । तदेतद्व्याचष्टे—**तच्छब्देनेत्यादि** । तच्छब्देनोप[14]मानोपमेयत्व[15]प्रत्यवमर्श इति वदता सन्निहितानन्वयप्रत्यवमर्शशङ्का निवार्यते[16] । अनन्वयाद्वैधर्म्यान्तरं दर्शयितुमाह—**पर्याय[17] इत्यादि** । यौगपद्यमिहैकवाक्यानुप्रवेशः । तदभावाद्भिन्नवाक्यत्वमेवेत्याह—**अतएवत्विति** ।

अत्रायमाशयः । उपमेयमुद्देश्यम्, उपमानं तु विधेयम् । [18]इत्थं च सत्युपमानोपमेयभावव्यत्ययो वाक्यैकवाक्यतामन्तरेण न संभवति[19] । अनन्वये तु पदैकवाक्यतैवेति । अत्र बिम्बप्रतिबिम्बभावो न संभवति । भिन्नवाक्यत्वेन तन्निबन्धन[20]वैचित्र्यप्रतीतेः[21] । साधर्म्यनिबन्ध[22]नमन्यत्[23] । वैचित्र्य[24]द्वयं[25] संभवतीत्याह—**इयं तु[26] धर्मस्येत्यादि[27]** । साधारण्यमैक्यरूप्येण निर्देशः । वस्तुप्रतिवस्तुभावस्तु प्रतीतत्चर:[28] ।

---

1. D.E. omit त्व 2. A's alt. अर्थम् । यत 3. A's alt. C. 'अनन्वयेऽर्थत्या' D.E. 'अन्वर्थिके' 4. C. अत्र A. अतः 5. A's alt. D.E.H. वृत्तिरपि समु 6. C. ते । अत्र H. ते । विरु - H. omits from, युद्धे ··· व्यङ्ग्यपरौ 7. F. इवेति 8. A.C. F. उद्राशनं D.E. उत्प्राश 9. D. परमौ 10. A's alt. C. सम्बन्ध 11. A's alt. यतः- D.E. ततः 12. A's alt. परां C. परत्वं H. फलं 13. A's alt. F. द्वयोरिति । 14. D. उपमेय 15. C. omits त्व 16. A's alt. C. निवृत्तये- 17. D. पर्यायेण- 18. H. एवं 19. D. ति । भिन्न 20. A's alt. बन्धनात् D. बन्धना 21. C. प्रतीयते । 22. D. बन्धनो 23. A.D.H. 'अन्यत्त' C. अन्यन्तु 24. E. वैचिन्त्रियं 25. C. द्वय 26. Omitted in all except D. 27. D. आदिना 28. C.H. चरम् ।

द्वितीया यथा—

सच्छायाम्भोजवदनाः सच्छायवदनाम्बुजाः ।
वाप्योऽङ्गना इवाभान्ति यत्र वाप्य इवाङ्गनाः ॥

सदृशानुभवाद्वस्त्वन्तरस्मृतिः स्मरणम् ॥१४॥

वस्त्वन्तरं सदृशमेव । अविनाभावाभावान्नानुमानम् । यथा—

अतिशयितसुरासुरप्रभावं शिशुमवलोक्य तवैव तुल्यरूपम् ।
कुशिकसुतमखद्विषां प्रमाथे धृतधनुषं रघुनन्दनं स्मरामि ॥

साद‍ृश्यं विना तु स्मृतिर्नायमलङ्कारः । यथा—

अत्रानुगोदं मृगयानिवृत्तस्तरङ्गवातेन विनीतखेदः ।
रहस्त्वदुत्सङ्गनिषण्णमूर्धा स्मरामि वानीरगृहेषु सुप्तः ॥‡

खमिवेति । अत्र प्रतीयमानस्य नैर्मल्यधर्मस्यानुगामित्वेन साधारण्यम् । **सच्छायेति** । छाया, शोभा अत्र सच्छायत्वं सम्बन्धि[1]भेदाद्भिन्नम् ।

उपमानोपमेयत्व[2]व्यत्ययो[3] न क्रमं विना ।
उपमेयोपमा तेन वाक्यभेदैक[4]गोचरा[5] ॥

अथ स्मरणं सूत्रयति[6]—**सदृशा[7]नुभवा[8]द्वस्त्वन्तरस्मृतिस्स्मरणम्** । सदृशानुभवात् सदृशान्तरस्मरणं स्मरणालङ्कारः । व्याचष्टे—**वस्त्वन्तरमिति** । सदृशं[9] समभिव्याहाराद्वस्त्वन्तरसदृशमेवेति भावः ।

द्विष्ठस्य धर्मस्य एकत्र[10] स्थास्नोः प्रतियोग्यपेक्षामन्तरेण [11]अनुपरमादनुमानवैध[12]र्म्याyah—**अविनाभावे[13]त्यादि** । अविनाभावो व्याप्तिः । नहि गवादिदर्शने नियमेन गवयादि[14]सदृशान्तर[15]स्मरणमस्ति । तादात्म्यवदुत्पत्त्योरन्यतराभावेना[16]लिङ्गत्वात् । **अतिशयितेति** । [17]इयं योद्धुकामं लवमालोक्य सकौतुकस्य सूतस्य चन्द्रकेतुं प्रत्युक्तिः[18] । **तवैव[19] तुल्यरूपमिति** सदृशानुभवो[20]द्‌घाट[21]नम् । असा[22]दृश्यहेतुका स्मृतिर्न स्मरणालङ्कार

---

1. C. बन्ध- 2. H. 'मेयत्वं' 3. A's alt C. H. व्यत्ययेन 4. A's alt C. भेदेन 5. A. गोचरात्वं समभि 6. D. सूचय 7. F. सदृशेति । 8. D. 'भवस्तु अन्तर' 9. D. 'सदृशं अभि' 10. A's alt अनवस्थानात् D. अनवस्थेस्नाः E. अवस्था F. अनवस्थास्नोः 11. C. अनुपम 12. D. धर्माय 13. A.C. इति 14. A's alt B. C. F. गवादि 15. C. अन्तरं 16. H. भावात् 17. Omitted in C. 18. A's alt C. H. उक्तेः 19. A's alt C. तस्यैव D.E.F.H.I. तथैव 20. A. C. D. भाव 21. न सादृश्य 22. F. omits सा ।

‡ The normal reading is सुप्तः but the variant सुप्ति is also found which, however, seems to have been brought about under the supposition of a grammatical difficulty in the quite idiomatic usage स्मरामि वानीरगृहेषु सुप्तः । So for as Vidyacakravartin himself is concerned the word सुप्ति is used in the course of his explanation but

अत्र च कर्तृविशेषणानां स्मर्तव्यदशाभावित्वे स्मर्तृदशाभावित्वमसमीचीनम्। प्रेयोऽलङ्कारस्य तु सादृश्यव्यतिरिक्तनिमित्तोत्थापिता स्मृतिर्विषयः। यथा "अहो कोपेऽपि कान्तं मुखम्" इति। तत्रापि विभावाद्यागूरितत्वे, न स्वशब्दमात्रप्रतिपाद्यत्वे यथा—"अत्रानुगोदम्" इत्यादि।

इत्याह—**सादृश्यं विना त्विति**[1]। प्रत्युदाहरति—**अत्रानुगोदमिति**[2]। अत्र हि पूर्वानु-[3]भूतार्थदर्शनादेव स्मृतिः न तु सदृशानुभवात्[4]। प्रसङ्गात्[5] गूढमभवन्मतयोग[6]दोषमु[7]-द्घाट[8]यति—**अत्र च कर्तृविशेषणानामित्यादि**। मृगया[9]दशाभाविकर्तृ[10]विशेषणानां स्मरामीति[11] स्मरणक्रियाकर्तुर्दाशरथेर्विशेषणानां मृगयानि[12]वृत्त्यादीनां स्मर्तव्यदशाभावित्वेऽनुभूतचरत्वात्। स्मर्तव्यमृगयादशाभावित्वे युक्ते[13] स्मर्तृदशाभावित्वं[14] मृगयानिर्वृत्ति[15] स्मरामीति स्मरणकालभावित्वमसमीचीनम्। नहि मृगयानिवृत्त्यपनीतखेदत्वा[16]दिविशिष्टस्मृतिः[17]। किन्तु मृगयानिवृत्त्यादिकं स्मर्तव्यसुप्तिविशेषण[18]मत इष्टार्थोऽपि[19] न भवतीत्यभवन्मतयोगाख्योऽयं दोषः।

ननु यदि प्रेयोऽलङ्कारो[20] रतिभावात्मकः, न तदा स्मृतिः। यदा[21] तु व्यभिचारिभावात्मकस्तदा स्मृतिरूपोऽपि कदाचित्संभवति। ततोऽस्य स्मरणालङ्कारस्य किं वैधर्म्यमित्यत आह—**प्रेयोऽलङ्कारस्य त्वित्यादि**। उदाहृत्य दर्शयति—**अहो कोपेऽपि कान्तं मुखमित्यादि**[22]। अत्रा[23]भिनिविष्टस्य नायकस्य प्रियानुरागसंस्काराणां संस्कारान्तराभिभाव[24]-कतया भूयो[25]भूयस्स[26]मुद्बुध्यमानानां महिम्नैव स्मृतिः, नहि सदृशानुभवात्। वैधर्म्यान्तर-[27]मुद्भावयति—**तत्रापि विभावेत्यादि**। विभावानुभावा[28]दिभिः यदा स्मृतिर्व्यज्यते, तदैव हि भावालङ्कारः।

---

1. C. ति। **स्मृतिस्सा** 2. C. ति। **पूर्वं** 3. A.C.F.H.I.**भवार्थ** 4. C. **भवात्। गूढ** 5. D. **उपसङ्गात्** 6. D. **योगमदोषमुद्धाटभाव** 7. Except C. all read **उद्भावयति** E. **दोषमप्यु—** 8. A's alt C. **उद्भास** 9. A's alt C. **मृग्या** 10. A.C.H. **कर्म** 11. A's alt C. **स्मरती** 12. All Mss. omi **नि** 13. A's alt C. **युक्तं** 14. A's alt C. **भावित्वे** 15. Except C. all read **निवृत्तं** E. **निवृत्त** 16. D. **आदिकं स्मर्तव्य सुप्ति-** 17. E. **स्मरति** 18. A's alt **विशेषणं वै अतः।** E. **षणमेव अतः।** 19. C. omits **अपि** 20. A's alt C. **यदा रति।** 21. C. **यदा स्मृति।** 22. D. E. **इति।** 23. D. E. **अत्रात्यभि** 24. A's alt C. **भावुकः।** 25. C. omits **भूयो** D. **भूतो** 26. A's alt C. **सम्बध्यमाना** D. **सम्बन्ध्यमाना** 27. A's alt D. **मप्युद्भा** 28. E. **भावादीनां।**

that does not justify taking it as a variant. For, in his anuvāda of the first pāda, he says more than once **मृगयानिवृत्तिः**; and on that score we may not be justified in restoring the reading **अत्रानुगोदं मृगयानिवृत्तिः**. The correct explanation of the nominative usage **सुप्तः** is given by Mallinātha.

यैर्दृष्टोऽसि तदा ललाटपतितप्रासप्रहारो युधि
स्फीतासृक्स्रुतिपाटलीकृतपुरोभागः परान्पातयन् ।
तेषां दुस्सहकालदेहदहनप्रोद्भूतनेत्रानल-
ज्वालालीभरभासुरे स्मररिपावस्तं गतं कौतुकम् ।।

इत्यादौ सदृशवस्त्वन्तराभावे अशक्यवस्त्वन्तरकरणात्मा विशेषालङ्कारः । करणस्य क्रियासामान्यात्मनो दर्शनेऽपि संभवात् । मतान्तरे काव्यलिङ्गमेतत् ।

यैर्दृष्टो[1]**ऽसीति** । प्रासप्रहारनेत्रयो[2]रसृक्[3]स्रुत्यनलज्वालयोः पर[4]पातनकाल[5]दहनयोः[6] नायकस्म[7]ररिप्वो[8]श्च सादृश्यं विवक्ष्यते । अत्र योऽयं सदृशवस्त्वन्तरानुभवो यैर्दृष्टो[9]ऽसीति निर्दिष्टः । नासौ[10] स्मररिपुस्मरणजननात्स्मरणालङ्कारः कि[11]न्त्व[12]शक्यस्मररिपुदर्शनकौतुका[13]स्तमयरूपार्थान्तिरकरणात्मा विशेषालङ्कारः[14] । एतद्दर्शनेन तदपि सिद्धमिति प्रतीतेः । नन्वशक्यवस्त्वन्तरकरणं विशेषालङ्कारस्य लक्षणं, इह तु करणं[15] नोपलभामह इत्यत आह—**करण**[16]**स्येत्यादि** । कृञ्भ्व[17]स्त्यर्थानां सर्वधात्वनुयायित्वात् क्रियाया[18]स्सामान्यात्मा करोत्यर्थः[19] दर्शनेऽपि[20] संभ[21]वति[22] ।

यदुक्तमस्माभिः प्रयोग[23]**दीपिकायाम्** ।

"[24]तेऽस्त्यर्था धातवो[25] ज्ञेया य[26] उदासीनकर्तृकाः ।
विकुर्वाणप्रयुञ्जानकर्तृका भूकृञ[27]र्थकाः" ।। इति ।।

येषां कर्तारः[28] उदासते तेऽ[29]स्त्यर्थाः । येषां[30] विकुर्वते ते भवत्यर्थाः । येषां तु प्रयुञ्जते ते करोत्यर्थाः । अतो[31] दृशिः प्रयुञ्जानकर्तृ[32]कत्वात् करोत्यर्थ एवेति सिद्धम् । ननु स्म[33]ररिपुदर्शनकौतुकास्त[34]मये प्रकृतनायकदर्शनं हेतुरिति काव्यलिङ्गं किं न स्यादित्यत आह—**मतान्तर इत्यादि** । अस्मद्दर्शने विशेषालङ्कारः, मतान्[35]तरे काव्यलिङ्गं[36], स्मरणं तु सर्वत्र न[37] भवतीति भावः । काव्यलिङ्गत्वाभावे अशक्यकरणात्मा विच्छित्तिविशेषहेतुः[38] ।

---

1. A. स्पृष्टा(दृष्टो)सीति । C. रयोःस्पृष्टासीति । 2. A's alt नेतुस्सृक् C. नेत्र स्सृक् । 3. C. सृत्या 4. A.C.F. 'परि' 5. A's alt काम 6. C. न नाय 7. D. स्मृतिः अरिपोश्च 8. C. रिप्सोः D. स्मररिपुस्मरण 9. A's alt 'दृष्टो भवति' 10. C. नासौ स्मरण 11. C. किञ्च 12. D. omits अ 13. A's alt C. 'कौतुकार्थरूपा' 14. D. अलंकाराः 15. A's alt C. करणयोरूप 16. D. कारण 17. A. F. कृद्भ्वस्त्य C. कत ˙ ˙ ˙ वस्त्वर्थ D. कृद्वस्त्यर्था E. कृत्वस्त्यर्थ 18. D. क्रियास्सा 19. C. अर्था 20. All except C. read अपि न 21. A's alt संभवात् 22. Except C. all read संभवति इति । 23. A.F. 'गुप्तदीपि' 24. A's alt त्येऽस्त्य 25. C. यावतो 26. A's alt C. यदुदा 27. A's alt C. कृदः, F. कृत्य 28. Except E. all read कर्ता 29. A.C. ते भवत्य ? 30. C. येषां तु प्रयु- 31. A's alt अतोऽत्र अप्रयु- C. अतोऽन्न प्रयु- 32. F. omits कर्तृ 33. A's alt C. पुर 34. A's alt कौतुकात् सम C. 'कौतुकार्थ स'—35. A. F. तु काव्य 36. C. लिङ्गस्मर 37. F. न सदृशात् 38. C. D. E. 'विशेष एव हे' ।

तदेते सादृश्याश्रयेण भेदाभेदतुल्यत्वेनालङ्कारा निर्णीताः । संप्रत्यभेदप्राधान्ये कथ्यन्ते—

अभेदप्राधान्य आरोप आरोपविषयानपह्नवे रूपकम् ॥१५॥

अभेदस्य प्राधान्याद्भेदस्य वस्तुतस्सद्भावः । आरोपोऽन्यत्रान्यावापः । तस्य विषयविषय्यवष्टब्धत्वाद्विषयापह्नवेऽपह्नुतिः । अन्यथा तु विषयिण विषयस्य रूपवतः करणाद्रूपकम् । साधर्म्यं त्वनुगतमेव । यदाहुः—"उपमैव तिरोभूतभेदा रूपकमिष्यत" इति । आरोपादभेदेनाध्यवसायः प्रकृष्यते इति

स्मृतिस्सा स्मर्यते यत्र सदृशात्सदृशान्तरम् ।
असादृश्यादवाच्यत्वादितः प्रेयान्विभिद्यते ॥

इत्थं भेदाभेदतुल्यत्वेऽलङ्कारान्वि[1]विच्य अभेदप्राधान्यमधिचिकीर्षुराह—**तदेते सादृश्येत्यादि** । तत्राप्या[2]रोपमूलालङ्काराणां बीजभूतं रूपकमादौ सूत्रयति—[3]**अभेदप्राधान्य**[4] **आरोप**[5] **आरोपविषयान**[6]**पह्नवे रूपकम्** । 'मुखमेव चन्द्र[7]' इत्यादौ हि[8] साधर्म्यम[9]भेदप्राधान्यम् । चन्द्रत्वाद्यारो[10]पस्य यो विषयो मुखादिः तस्यानपह्नवश्च[11] रूपकालङ्कार इति सूत्रार्थः । तदेतद्व्याचष्टे—**अभेदस्येत्यादि** । भेदस्य वस्तुतस्सद्भाव[12] इत्यतिशयोक्तितो वैधर्म्यं[13] दर्शितम् ।

अथारोप[14]शब्दार्थं विवृण्वन् व्युदसनीयविषयविवेचनपुरस्कारेण विषयमस्य विवेचयति—**आरोपोऽन्यत्रान्येति**[15] । अन्यत्र हि मुखादौ अन्यस्य चन्द्रा[16]देरध्यवसान[17]मारोपः । स च द्विष्ठत्वात् विषयिणा विषयेण चावष्टभ्यते । इत्थं द्वौ शब्दौ[18] सिद्धौ । यदा[19] चन्द्र एव न[20] मुखमिति विषयस्यापह्नवः तदापह्नुत्यलङ्कारः । अन[21]पह्नवे तु रूपकमिति विभागः[22] ।

लक्ष्यपदं निर्वक्ति—**विषयिणा विषयस्य रूपवतः करणा**[23]**दिति** । विषयी विषयं स्वेन रूपेण रूपवन्तं करोतीति[24] रूपकमित्यर्थः[25] । उपमातः प्रभृति[26] साधर्म्याधिकारम् अनुस्मारयति—**साधर्म्यं त्वित्यादि** । तत्रार्थे संवादा[27]याह—**उपमैवेत्यादि**[28] । तिरोभूतभेदा नत्वपह्नुतभेदा । आरोपमूलस्याध्यवसायमूले[29]भ्य उत्प्रेक्षादिभ्यो निर्देश[30]प्राथम्यं[31] न्याय[32]तोऽवस्थापयति—**आरोपादभेदेनेत्यादि** । प्रकृष्यते । अतिसादृश्यप्रत्यायनाद्र-

---

1. A's alt C. H. विचार्य 2. A's alt C. आरोप्य D. व्यारोप 3. A's alt F. अभेदेत्यादि । 4. A. प्राधान्यं 5. A. आरोप्य D. आरोपस्य यो 6. A. विषयाप 7. C. चन्द्रं 8. H. हि अभेद 9. A's alt भेद 10. C. आरोपकस्य 11. A's alt D.E F.H.I. अपह्नवरू 12. C. भावः 13. A's alt C. वैलक्षण्यं 14. C. आरोपित 15. H. इति हि 16. Except C. all read 'चन्द्रत्वादे' 17. A.C.F.H. अध्यसनं- E. अध्या- 18. A's alt E. शब्दसिद्धौ 19. H. यथा 20. Omitted in H. 21. A's alt अनह्नुते C. अपह्नवे 22. D. विभागा 23. A's alt C. करणाद्विषयी 24. A's alt C. इत्यर्थं 25. H. अर्थः । तद्भेद 26. A.F. प्रभूति 27. C. संपादा 28. E. इति । 29. C. कूले 30. E. निर्देशे 31. C. प्राधम्यं 32. C. न्याय्यतो ।

पश्चात्तन्मूलालंकारविभागः । इदं च निरवयवं सावयवं परम्परितं चेति प्रथमं त्रिविधम् । आद्यं केवलं मालारूपकं चेति द्विधा । द्वितीयं समस्तवस्तुविषयमेकदेशविवर्ति चेति द्विधैव । तृतीयं तु श्लिष्टाश्लिष्टशब्दनिबन्धनत्वेन द्विविधं सत्प्रत्येकं केवलमालारूपकत्वाच्चतुर्विधम् । तदेवमष्टौ रूपकभेदाः ।

सस्य प्रत्या[1]सन्नोपकारी भवतीत्यर्थः[2] । इतिर्हेतौ[3] । यत इत्थमभेदेनाध्यवसायः प्रकृष्यते, अतस्तन्मूलालङ्काराणां विभजनं पश्चात्करिष्यत इति शेषः । अत्रेद[4]मनुसन्धेयम् । इह[5] यावानलङ्कारवर्गो विवेचयिष्यते, विवेचितचरश्च[6], स सर्व[7]श्चैव (तस्य सर्वस्यैव ?) अत्र रसं (प्रति ?) [8]प्रत्यासन्नोपकारिता[9] पुनराराादुपकारिता[10] । तत्र यद्यपि प्रत्यासन्नोपकारिणां[11] प्राधान्यं, तथापि तेषां [12]सूक्ष्मतरत्वात् स्थूलालङ्कारपुरस्कारेण व्युत्पादनमिति ।

तद्भेदा[13]नाह—**इदञ्च निरवयवमि[14]त्यादि**[15] । परम्परितं परम्परायातम् । प्रथम[16]ग्रहणं [17]प्रभेदान्तरप्रथनोपोद्घातः । निरवयवस्य द्वै[18]विध्यं दर्शयति—**आद्यमित्यादि** । केवलं सहचर[19]रूपकान्तर[20]रहितं[21] मालारूपकं नानारूपकसाहचर्यावस्थम् । सावयवस्य द्वैविध्यमाह—**द्वितीयं समस्तेत्यादि** । वस्तुशब्दोऽत्र पदा[22]र्थवचनः । समस्तानि निरवशेषाणि विशेषण[23]विशेष्यात्मकानि वस्तूनि[24] विषयो यस्य तत् समस्तवस्तुविषयम् । यत्पुनः विशेषणांशे क्वचिन्न क्रियते विशेष[25]णांशान्तरे विशेष्ये च क्रियते तदेकदेश एव[26] विशिष्य[27]वर्तनादेकदेशविवर्ति । परम्परितं तु[28] चतुर्वे[29]त्याह—**तृतीयं तु श्लिष्टाश्लिष्टेत्यादि** । [30]श्लिष्टशब्दम् अश्लि[31]ष्टशब्दं चेति द्वैरूप्यमनुप्रपद्य प्रतिस्वं[32] केवलं मालारूपं चेति प्रथत इत्यर्थः । भेदचर्चा[33] निगमयति—**तदेवमष्टाविति** । केवल[34]निरवयवं, मालानिरवयवं, समस्तवस्तुविषयं[35] सावयवम्, एकदेशविवर्ति सावयवं, श्लिष्टशब्द[36]केवलपरम्परितं, श्लिष्टशब्द[37]मालापरम्परितम्, अश्लिष्टशब्द[38]केवलपरम्परितम्, अश्लिष्टशब्द[39]मालापरम्परितं

---

1. C. आसन्नोप 2. A. D. E. F. H. I. अर्थः इति । इ 3. A.D.F.H. इति हे 4. A's alt. D. अत्रैतं E. अत्रैतदनु 5. Except D. all read यो यावा 6. D. रसश्च 7. A's alt. C. D.E. सर्वत्रैव 8. Except C. all read रसं प्रत्युत्तरोत्तरं प्र- 9. A's alt. कारितां C. उपकारं 10. Except C. all read 'कारिता पूर्वपूर्वं पु' D. उपकारिता A's alt उपकारितं 11. C. कारिणा 12. Except C. all read सूक्ष्मसू 13. A's alt C. omit तत् 14. A's alt इति आदि । 15. D. E. आदि निरवयवं विशेष्यमात्रनिष्ठं सावयवं विशेष्यविशेषणोभयनिष्ठं । परं 16. Except D. all read पृथग्ग्र 17. E. omit प्र E. F. प्रधानोपे 18. C. वैविध्यं D. प्राधान्यं 19. A's alt. चरितं 20. E. अन्तरे हि तन्माला 21. A's alt रहित 22. D. धर्मार्थ 23. D. 'वैशिष्ट्यात्म' 24. Omitted in F. 25. H. विशेषणान्तरे- 26. Omitted in D. E. 27. C. विवर्तना 28. Omitted in C. 29. A's alt चतुर्था—A. C. D. F. H. I. चतुर्थे । तृ- 30. C. 'शिष्टाशिष्ट' 31. C. शिष्ट 32. A's alt C.H. स्वयं 33. D. चर्चा 34. D. केवलं 35. C. विषये 36. Except C. all read शब्दं D. शब्दं श्लिष्ट 37. A's alt D. E. शब्द C. शब्दमाला 38. A's alt E. शब्दं 39. A's alt शब्दं ।

अन्ये तु प्रत्येकं वाक्योक्तसमासोक्तादिभेदाः संभवन्ति तेऽन्यतो द्रष्टव्याः । क्रमेण यथा—

दासे कृतागसि भवत्युचितः प्रभूणां
पादप्रहार इति सुन्दरि ! नास्मि दूये ।
उद्यत्कठोरपुलकाङ्कुरकण्टकाग्रै-
र्यत्खिद्यते तव पदं ननु सा व्यथा मे ॥

पीयूषप्रसृतिर्न वा मखभुजां दात्रं तमोलूनये
स्वर्गङ्गा विमनस्ककोकवदनस्रस्ता मृणालीलता ।
द्विर्भावः स्मरकार्मुकस्य किमपि प्राणेश्वरीसागसा-
माशातन्तुरुदञ्चति प्रतिपदि प्रालेयभानोस्तनुः ॥

विस्तारशालिनि नभस्तलपत्रपात्रे कुन्दोज्ज्वलप्रभभसञ्चयभूरिभक्तम्
गङ्गातरङ्गघनमाहिषदुग्धदिग्धं जग्धं मया नरपते ! कलिकालकर्ण ! ॥

आभाति ते क्षितिभृतः क्षणदा प्रभेयं निस्त्रिंशमांसलतमालवनान्तलेखा ।
इन्दुत्विषो युधि हठेन तवारिकीर्तीरानीय यत्र रमते तरुणः प्रतापः ॥

क्षितिभृत इत्यत्र श्लिष्टशब्दपरम्परितम् ।

चेति । यदा तु विशेषणांश[1]रूपणबलादेव विशेष्ये[2] रूपकमर्थादव[3]गम्यते, तदा समासोक्ति[4] रूपकम् । यद्वा समा[5]सेनोक्तम् । एवमादिभेदाः[6] स्थूलतया न प्रतन्यन्त[7] इति आह—**अन्येत्वित्यादि**[8] ।

दास इति । अस्मीत्यहमर्थे निपातः । अत्र पुलकाङ्कुराणां कण्टक[9]त्वेन निरव-[10]यवरूपणं । तच्च[11] रूपकान्तर-साहचर्याभावात् केवलम् ।

पीयूषप्रसृति[12]रिति । दात्रं लवित्रं, लूनि[13]र्लवनं । विमनस्कत्वं[14] निशि विरहेण द्विर्भावो द्वि[15]रुदयः एतन्मालानिरवयवम् । **विस्तारशालिनीति ।** पत्र[16]पात्रं पलाशोपरचितममत्रं, भानि[17] ताराः । भक्तम् अन्नं, घनं शृतम् । अत्र ग्राम्यजनोक्तौ समस्तपदार्थविषयत्वात् समस्तवस्तुविषयं सावयवं[18] रूपकम् ।

आभातीति । क्षितिभृद्राजा स एव क्षितिभृत् शैलः[19] । निस्त्रिंशः खड्गः[20] स एव तमाल[21]वनान्तलेखा[22] । अत्र कीर्तीनां[23] हठहृत[24]महिलात्वमर्थात् प्रतीयत इति एकदेशविवर्ति[25] सावयवम् । क्षितिभृत इत्यंशे तु संकरः इत्यभिप्रायेणाह—**क्षितिभृत इत्यत्रेत्यादि**[26] ।

---

1. A. C. F. रूपेण 2. C. विशेष्य रूपकत्वादर्थां 3. A's alt आपतति, 4. D. E. उक्तं 5. H. समासोक्तमेव । 6. H. भेदान् 7. A. C. F. H. 'प्रकाश्यन्त' 8. H. आदि—यत्वभेद । 9. C. कण्ठत्वेन 10. D. E. निरवयवं 11. A. D. F. अन्यच्च E. तच्च 12. E. प्रसृतिभिरि 13. C. लभूनिवलवनं 14. A's alt C. F. H. वा निशि 15. C. द्विरदय 16. A. पत्रं C. पत्रो 17. C. भानितरार्भकमन्नं 18. C. सावयव 19. C. omits शैलः 20. D. omits खड्गः 21. D. लतवन 22. D. वनान्तालखाः 23. C. कीर्ति 24. F. भृत C. संभृत । 25. A. C. F. H. विवर्तिरूपकं साव 26. C. आदि । अत्र ।

किं पद्मस्य रुचिं न हन्ति नयनानन्दं विधत्ते न किं
वृद्धिं वा झषकेतनस्य कुरुते नालोकमात्रेण किम् ।
वक्त्रेन्दौ तव सत्ययं यदपरः शीतांशुरभ्युद्गतो
दर्पः स्यादमृतेन चेदिह तदप्यस्त्येव बिम्बाधरे ॥

अत्र वक्त्रेन्दुरूपणहेतुकं पीयूषस्याधरामृतेन श्लिष्टशब्देन रूपणम् ।

विद्वन्मानसहंस ! वैरिकमलासङ्कोचदीप्तद्युते !
दुर्गामार्गणनीललोहित ! समित्स्वीकारवैश्वानर ।
सत्यप्रीतिविधानदक्ष ! विजयप्राग्भावभीम ! प्रभो !
साम्राज्यं वरवीर ! वत्सरशतं वैरिञ्चमुच्चैः क्रियाः ॥

किं पद्मस्ये[1]त्यादि । अत्र न हन्ति किमित्यादौ नञा[2] प्रथमतो हननादिनिषेधः किमिति काका[3] निराक्रियते । अतो हन्त्ये[4]वेत्याद्यर्थः सम्पद्यते । अत्र वक्त्रेन्दुरिति रूपणम् यस्येन्दुनिष्ठस्य पीयूषस्य हेतुः तद[5]धरामृतेन सह श्लिष्टम् । इतरथा[6] तदपीहास्तीत्युपन्या[7]सः कथं सङ्गच्छते । अत इन्दुरूपणद्वारा भातत्वात् परंपरितं केवलं च । तदेतद्दर्शयितुमाह—*अत्र [8]वक्त्रेन्दुरूप[9]णेत्यादि ।

विद्वन्मानसहंस इति । विदुषां मानसमेव मानसं तत्र हंसः[10], वैरिणां कमलायाः लक्ष्म्याः सङ्कोच एव कमलानामसङ्कोचः । तत्र दीप्त[11]द्युते गभस्तिमालिन् । दुर्गाणां नदीशैला[12]दि परिक्षेपवतामावासानां मार्गणमन्वेषणम्[13] । तदभाव एव दुर्गायाः कात्यायिन्या मार्गणं तत्र[14] नीललोहितः । [15]समितः संग्रामाः ता एव समिध[16] एधांसि तत्स्वीकारे वैश्वानरः[17] । सत्ये प्रीतिरेव । सत्यां[18] दाक्षायिण्याम् । [19]अप्रीतिस्तद्विधाने । दक्षः

---

1. F. इति 2. A.C. नासौ A's alt नात्रा 3. A's alt C. वाक्यात् 4. Except E. all read इत्यर्थः । 5. A's alt C. तदासारा 6. A.F.H. इतरधा 7. A's alt C. उपहासः 8. A. Except E all omit वक्त्र 9. Except D. all read रूपेण 10.D. हंसा वै वैकरिणां 11. E. दीप्र 12. C. omits आदि 13. D. omits णं 14. D. तत्रा नील 15. D. स्मितः 16. D. समिधाः 17. E. नर 18. C. सत्या 19. A.C.F.H. omit अ ।

* The N. S. edition reads the text as अत्र वक्त्रेण रूपणमहेतुकम् । पीयूषेणाधरामृतस्य श्लिष्टशब्दं रूपणम् । Evidently the reading अहेतुकं is a mistake. But the above second sentence is read as पीयूषस्याधरामृतेन श्लिष्टशब्देन रूपणं by both Samudrabandha and Vidyācakravartin. Jayaratha (p. 47) criticises the latter reading as a scribe's error. But both the readings could be justified. While the former specifically mentions the superimpositions of the non-contextual moon and the nectar on the contextual face and adharāmṛta, the latter refers to their superimpositions in a general manner. Jayaratha wrongly uses the word निरूपणं instead of रूपणं throughout in the explanation of the passage.

अत्र त्वमेव हंस इत्यारोपणपूर्वको मानसमेव मानसमित्याद्यारोप इति श्लिष्टशब्दमालापरम्परितम् ।

यामि मनोवाक्कायैः शरणं करुणात्मकं जगन्नाथम् ।
जन्मजरामरणार्णवतरणतरण्डं हराङ्घ्रियुगम् ॥

पर्यङ्को राजलक्ष्म्या हरितमणिमयः पौरुषाब्धेस्तरङ्गो
भग्नप्रत्यर्थिवंशोल्बण-विजयकरिस्त्यान - दानाम्बुपट्टः ।
संग्रामत्रास-ताम्यन्मुरलपतियशोहंस नीलाम्बुवाहः
खड्गः क्ष्मासौविदल्लः समिति विजयते मालवाखण्डलस्य ॥

अत्र क्ष्मासौविदल्ल इति परम्परितमप्येकदेशविवर्ति । एवमादयोऽपि भेदाः लेशतः सूचिता एव । इदं च वैधर्म्येणापि दृश्यते । यथा—

सौजन्याम्बुमरुस्थली सुचरितालेख्यद्युभित्तिर्गुण-
ज्योत्स्नाकृष्णचतुर्दशी सरलतायोगश्वपुच्छच्छटा ।

दक्षप्रजापतिः विजये[1] प्राग्भावोऽग्रे[2]सरता स एव विजयादर्जुनात्प्राग्भावः[3] पुरोजन्म तत्र भीम ! वत्सरशत[4]मित्यन्तसंयोगे द्वितीया । क्रियाः कुरु[5] । अत्र[6] विदुषां मानसे[7] त्वं हंस इति प्रतीतौ[8] कथमस्य हंसत्वमिति विमर्शो जातो, मानसपदे[9] श्लेषमवगमयति । तथाऽवगमितेन श्लेषेण हंसत्वमेव व्यवतिष्ठत इति श्लिष्टशब्द[10]परंपरितम् । तच्च मालारूपम् । तदिदम[11]भि[12]सन्धायाह—**अत्र त्वमेवेत्यादि** । समर्थत्वभयावहत्वलक्षणयोरर्थयोराभासनमात्रमेवेति न विरोधः । यद्वा तत्र अंशे श्लेष[13] एवास्तु । दक्षभीमपदयोः श्लेष एव प्रतीतिविश्रान्तः[14] अंशान्तर[15]मिहोदाहरणमिति सर्वमवदातम् ।

यामीति । तरण्डं[16] प्लवः । अत्र[17]तर[18]ण्डत्व[19]रूपणसिद्धिः । जन्मजरामरणानां अर्णवत्वरूपणा[20]यत्ते[21]त्यश्लिष्टशब्दरूपणं केवलं[22] परम्परितम् ।

पर्यङ्क इति । पर्यङ्को विष्टरः । वंशः[23]कुलम्, वेणुश्च । स्त्यानं[24] घनम्[25] । मुरलोदेशविशेषः । सौविदल्लः कञ्चुकी[26] । इदं स्पष्टमेवाश्लिष्टशब्दमालापरम्परितम् । ननु[27] क्ष्मा[28]सौविदल्ल इत्यत्र भूमेः महिष्यादिरूपणमशाब्दमित्यत आह—**अत्र क्ष्मेत्यादि** ।

[29]किमनेनांशविषमोदा[30]हरणेन प्रयोजनमित्यत आह—**एवमादयोऽपीत्यादि** । तथाहि अत्र[31] समा[32]सोक्त्यादिभेदो निरुदाहरणं सूचितम्[33] । आभाति[34] क्षितिभृत इत्यत्र

---

1. E. परपराभवे प्रा 2. A's alt अग्रेरस । 3. C. भाव 4. Except E. all read सतां 5. Omitted in D. 6. E. अत्र हि 7. C. मानस हंस 8. D. omits प्रती 9. A.C.F.H. पद 10. D. शब्दं 11. D. तमिमं 12. A's alt C. अनु 13. Except E. all read श्लिष्ट 14. D. विश्रान्तोऽशां 15. A's alt D. omit इह 16. A.F.H. तरणिः । C. तरं D. करण्डं 17. A's alt C. omit अत्र 18. A. तरित्व (तरणि) C. तरत्व D. करण्डरूप 19. E. त्व रूपकं पूर्व 20. C. रूपणायेत्यश्लि 21. A. आयत्तायेति 22. D. केवलं 23. D. वंशं 24. D. स्त्यानो 25. D. घनः 26. A.C.F. कौञ्चकी 27. D. omits ननु 28. A. C. चुर A's alt क्ष्मार 29. D. ननु किं 30. A's alt विषमेनोदा 31. A's alt. आदौ D. आसौ 32. D. सौक्त्या दि 33. A.D. सूचितः 34. D. अभातेति ।

यैरेषापि दुराशया कलियुगे राजावली सेविता
तेषां शूलिनि भक्तिमात्रसुलभे सेवा कियत्कौशलम् ॥

अत्र चारोप्यमाणस्य धर्मित्वादाविष्टलिङ्गसङ्ख्यात्वेऽपि क्वचित् स्वतोऽसंभवत्सङ्ख्यायोगस्य विषयसंख्यात्वं प्रत्येकमारोपात्। यथा—

"क्वचिज्जटावल्कलावलम्बिनः कपिला दावाग्नयः" इत्यादौ। न हि कपिलमुनेर्बहुत्वम्।

भ्रमिमरतिमलसहृदयतां प्रलयं मूर्च्छां तमः शरीरसादम्।
मरणं च जलदभुजगजं प्रसह्य कुरुते विषं वियोगिनीनाम् ॥

सङ्करः[1]। क्ष्मासौविदल्ल इत्यत्र[2] पर[3]परितमप्येकदेशविवर्तीत्येव[4]मादयो भेदा इति यावत्[5]। न [6]केवलमिदं परंपरितं[7] रूपकम् अन्वयमुखेनैव यावता[8] व्यतिरेकमुखेनापि संभवतीत्याह[9]—इदं चेत्यादि।

सौजन्येति[10]। सौजन्यरूपस्याम्बुनो[11] मरु[12]स्थली अत्यन्तम्[13] असंभवात्। सुचरित[14]रूपस्य चित्रकर्मणो गगनभित्तिरनधिष्ठानत्वादित्यनुसन्धेयम्[15]। दुराशया[16] दुरभिप्राया दुष्टया लिप्सया च।

ननु रूपके यस्यारो[17]पस्तस्य धर्मित्वादा[18]विष्टलिङ्गसङ्ख्याकत्वं युक्तम्। तत्राविष्टलिङ्गत्वं[19] व्याप्तम् आविष्टसङ्ख्यात्वं[20] तु क्वचि[21]द्व्यभिचरति। तत्र का गतिरित्यत[22] आह—अत्र चारोप्य[23]माणस्येत्यादि[24]। सत्यम्, आविष्टलिङ्गसङ्ख्याकत्वं धर्मिणो युक्तं, तत्र लिङ्गान्यथा[25] करणे गति[26]रस्ति काचित्। सङ्ख्यान्यथाकारस्तु[27] प्रत्येक[28]मारोपादुपपद्यते। तदेतदुदाहृत्य हृदयं गमयति—यथा क्वचिदित्यादि। दावाग्निषु प्रत्येकमारोपात्। कपिल[29]मुनावसत्यपि बहुत्वसङ्ख्योपपत्स्यत इति यावत्॥

निरवकाशत्वाद्बली श्लेषस्सर्वालङ्कारबाध इति सिद्धान्तयिष्यते। तेन[30] श्लेषेण रूपकबाध इति सोदाहरणमाह—भ्रमिमरतिमित्यादि। भ्रमिः शिरो[31]घूर्णि[32]ररतिरनवस्था। आलस्यम्[33] अभीष्टतानिवृत्तिः। प्रलय इन्द्रियोपरतिः, मूर्च्छा तेषामान्ध्यं तमोऽन्तर्धूमाय[34]मानता, शरीरसादः अङ्गानामप्रभविष्णुता, मरणं प्रतीतम्। तैरेतैः निमित्तैरष्टभिः विष-

---

1. D. संकर 2. A's alt D. इति तु 3. D. परिंपरि 4. D omits एव 5. A's alt. C. 'सावयवः' 6. A. C. D. F किञ्चन 7. D. परंपरित 8. A's alt. य''ता 9. All Mss read इत्यादि। 10. Omitted in. C. 11. A's alt C. अम्भनो 12. A's alt. मन 13. D. अत्यन्त संभ 14. A's alt. C. सच्चरित 15. C. अनुसन्धेयः। 16. A. C. दुराशा दुर A's alt. 'दुराया' 17. D. आरोपा 18. A. धर्म 19. A's alt. C. लिङ्गकत्वं 20. A. संख्यत्वं B. संख्याकं 21. D. अभि 22. C. अत्र 23. A. C. D. omit च 24. D. इतीत्यादि 25. A's alt. 'लिङ्गाद्यन्या' D. अत्यथिकर 26. D. गतिं 27. C. आकाशस्तु 28. A's alt. प्रत्येकमानापदप C. प्रत्येक माना पदुप 29D. रूपमुना 30. A. तेन न 31. D. शिरो निमित्तैः 32. D. घूर्णिरन 33. D. स्यं अरति 34. A. 'दूमा'।

इत्यत्र नियतसङ्ख्याककार्यविशेषोत्थापितो गरलार्थप्रभावितो विषशब्दे श्लेष एव। जलदभुजगजमिति रूपकसाधकमिति। पूर्वं सिद्धत्वाभावान्न तन्निबन्धनम्। विषशब्दे श्लिष्टशब्दपरंपरितमिति श्लेष एवात्रेत्याहुः॥

आरोप्यमाणस्य प्रकृतोपयोगित्वे परिणामः ॥१६॥

आरोप्यमाणं रूपके प्रकृतोपयोगित्वाभावात्प्रकृतोपरञ्जकत्वेनैव केवले-

---

कार्यैरेव गरलरूपोऽर्थ उद्भाव्यत[1] इति नेह विष[2]शब्द[3]श्लेषो रूपकहेतुकः। यथा विद्वन्मानस[4] इत्यादौ[5]। किन्तु श्लेषे[6] पूर्वसिद्धे[7] रूपकहेतुः इति। एवंविधे विषये श्लेष एव[8] न तु रूपकमित्याहुः। न्यायविद[9] इति शेषः[10]।

यत्त्व[11]भेदप्रधानं[12] स्यात्साधर्म्यं[13] तद्द्विधा मतम्।
आरोपाध्यवसानाभ्यामारोपे[14] रूपकं[15] भवेत्॥
वस्तुतो भेदसद्भावाच्छङ्कया[16] [17]नातिशयोक्तिता।
विषयस्यान[18]पह्नुत्या न चैत[19]त्स्यादपह्नुतिः॥
ततो विषयिरूपेण रूपवान्[20] विषयो मतः।
आरोपणेन क्रियते[21] तेनैतद्रूपकं मतम्॥
भेदस्तृतीयो यस्तत्र परंपरितसंज्ञकः[22]।
साधर्म्येणापि[23] तत्सिद्धिर्वैधर्म्येणापि दृश्यते॥
विषय्यारोप्यते येन प्रतिस्वं विषयेषु तत्।
भवेद्विषयसङ्ख्यात्वं सङ्ख्या[24]भेदेऽपि[25] धर्मिणोः[26]॥
रूपकं पूर्वसंसिद्धं श्लेषमुत्थापयेद्यदि।
तदा रूपकमेव स्यादन्यथा श्लेष इष्यते॥

अथ रूपकात्प्रकृतोप[27]योगलक्षणवैधर्म्यशालिने परिणामालङ्काराय सूत्रम्—**आरोप्य[28]माणस्य[29] प्रकृतोपयोगित्वे परिणामः॥** प्रकृतोपयोगित्वं विविच्य दर्शयितुमाह[30]—**आरोप्यमाणं[31] रूपकम्** इत्यादि। आरोप्यमाणं चन्द्रत्वादि[32]। **प्रकृतोपयोगित्वाभावादिति**। प्रकृतं[33] मुखादि, तत्रोपयोगित्वं वाक्यार्थानुप्रवेश[34]पर्यन्तमारोपण[35]विव-

---

1. A. C. F. भास्यत 2. A's alt. विद 3. A. शब्दे C. शब्दो 4. A. D. हंस इ 5. F. आदि 6. D. श्लेषा 7. A. D. F. सिद्धो 8. A's alt. C. पावनरूप 9. C. नन्या 10. D. शेषा 11. D. भेद 12. D. प्रभेदः 13. D. र्यं भावात् 14. A's alt. C. F. आरोपो 15. A's alt. C. मतम् 16. A. C. F. H. शक्त्या 17. A's alt. C. साति 18. H. अपह्नु 19. A's alt. C. चेत्तत् H. नत्वेते स्या 20. C. रूपं वा 21. A's alt. क्रियया 22. C. 'संज्ञि' 23. D. एव 24. A's alt. D. H. संख्यावेशे 25. A's alt. D. H. विधर्मि 26. H. धर्मिणः 27. D. E. रूपकालंकारात् 28. F. आरोप्येति 29. A's alt. इत्यादि प्र 30. A's alt. C. दर्शयति आरो 31. All except D. आरोप्यमाणो 32. Omitted in D. 33. D. प्रकृत 34. C. प्रवेशः 35. A's alt. C. आरोप्यमाण।

नान्वयं भजते। परिणामे तु प्रकृतात्मतया आरोप्यमाणस्योपयोग इति प्रकृतमारोप्यमाणरूपत्वेन परिणमति।

क्षायां स्यात्। तद्धि रूपके नास्ति। 'मुखमेव[1] चन्द्र' इत्येतावतैव रूपकत्वसिद्धिः[2]। तस्मादारोप्यमाणं चन्द्रत्वादि[3] मुखादौ प्रकृतार्थे ताद्रूप्यप्रतीत्या[4]धानरूपेण[5] उपरञ्जकत्वेनैव रूपकालङ्कारेऽन्वयं भजते। **परिणामे त्विति**। परिणामालङ्कारे पुनः आरोप्यमाणं न केवलं प्रकृतोपरञ्जकं यावता प्रकृतरूपमपह्नुवानं[6] सत्तदात्म[7]त्वेनोपयुज्यते। अत इह वाक्यानुप्रवेशान्तम्[8] आरोपविवक्षा। सा चाप्रकृतस्य प्रकृतरूपापत्तावेवोपयुज्यते[9]। न पुनः[10] रूपकवत् प्रकृतस्य[11] अप्रकृतरूपापत्तौ। तदेतदाह—**प्रकृतमारोप्यमाण[12] रूपत्वेनेत्यादि[13]**।

अत्रैतदुपह्वरम्। आरोपस्य द्विष्ठत्वेऽपि प्रकृताप्रकृतयोर्नैकविधा वृत्तिः[14]। विषय[15]विषयित्वेन विवक्षा[16] नियमात्। विषयः खलु[17] आधेय[18]गुण एव भवति। विषयी पुनर्गुणाधातैव[19] भवति। इत्थं च सति विषयित्वारोपणं विषये ताद्रूप्य[20]प्रतीतिमात्रं[21] चेद्विवक्ष्यते,[22] तदा ताद्रूप्यप्रतीति[23] जनकत्व[24]मात्रमु[25]परञ्जकत्वम्[26] इत्ये[27]तावतैव आरोपणस्य[28] चरिता[29]र्थता[30]। अतस्ताद्रूप्यप्रतीतिमात्र[31]प्रसिद्धयर्थं प्रकृतम्[32](अ)प्रकृत[33] रूपापन्नं भवति रूपके। परिणामे तु प्रकृतोपयोगान्तमारोपविवक्षयेति। स्वरूपादप्रच्युतस्यैव प्रकृतस्याप्रकृतरूपो[34]पग्राहित्वलक्षणावस्थान्तरापत्तिरेव। इतरथा रूपकन्यायेन प्रकृतस्य स्वरूपस्थगनेन[35] प्रकृतमेव[36] न प्रतीयेत। का तत्र प्रकृतोपयोगिता ? तदभावे च का रूपकस्य[37] विविक्तविषयता ? प्रायेणात्र प्राचामाचार्याणाम् अपि व्यामोह[38]कलानुवृत्तिरिति रहस्यमुद्घाटितम्। रूपकपरिणामविषयविवेचनस्यात्र संङ्ग्रहायावान्तरश्लोकौ—

विषय्या[39]कारमारोप्य विषयस्थगनं[40] यदा।
रूपकत्वं तदा तत्र रञ्जनेन समन्वयः॥

---

1. A. C. F. H. omit एव 2. H. सिद्धः 3. C. चन्द्र इत्यादि 4. A. C. अधीन 5. D. 'रूपेणोपकत्वेवरञ्जक' 6. D. अपह्नवानं 7. F. आत्मकत्वेन 8. D. अन्तर 9. E. उपपद्यते 10. H. प्रथा 11. D. E. अप्रकृ 12. D. माणस्य 13. E. omits ने। 14. A's alt. C. भक्तिः। 15. D. E. कुतः ? वि. 16. A. C. E. विवक्षण H. विवक्षणा 17. C. repeats खल्वाधेय 18. E. आधेयः 19. A's alt. F आधान C. आयातै 20. Except E. all read रूप्ये 21. D. मात्रान्तं 22. A's alt. C. संलक्ष्यते। 23. C. प्रतीतिः 24. A's alt. C. जनन 25. D. अप 26. A's alt. C. 'रञ्जन' 27. D. E. इति ताव 28. A's alt. आरोप्यमाण 29. A's alt. C. चारितार्थ्यात् 30. H. ता। विषय्या का 31. A's alt. C. मात्रं न प्रकृत सिद्ध्यर्थं 32. A's alt. C. D. E. F. H. I. अप्रकृ. 33. All Mss. omit अ. 34. D. omits पो 35. C. D. omit. न 36. C. omits व 37. D. E. omit स्य 38. A. C. व्याख्यामाह—कानुवृत्तिः। A's alt. व्यामोहनानुवृत्ति F. व्यामोहनासवृत्ति 39. C. विषया 40. H. 'विषयस्य ते यदा'।

आगमानुगमविगमख्यात्यभावात्साङ्ख्यीयपरिणामवैलक्षण्यम् ।

यदा तु विषयो रूपात्स्वस्मादप्रच्युतो[1] भजेत् ।
उपयुक्त्यै[2] पराकारं परिणामस्तदा मतः ।। इति ।।

नन्वयं लक्षण[3]परिणामः साङ्ख्यैरप्युपवर्णितः । तथाहि—धर्म[4]परिणामो लक्षणपरिणामोऽवस्थापरिणामश्चेति त्रिधा[5] परिणामः सङ्ख्यातः[6] । तत्र लक्षणपरिणामात्किमस्य वैधर्म्यमित्यत आह—**आगमानुगमेत्यादि** । आप्तोक्तिरागमः । अनुगमो व्याप्तिः । व्यावृत्तिर्विगमः[7] । तदभावात्तद्वैलक्षण्यम् । न खल्वयं काव्ये लक्षणपरिणामः[8] आगमरूपेण वा[9] अनुमानरूपेण वा[10] ख्या (त[11] इ) त्यलं प्रसंगेन[12] बहुना ।

तत्रापि[13] साङ्ख्ययोगादिशास्त्रविषयेण प्रतिज्ञातं खल्वस्माभिः श्रीगुरुप्रसादसमनन्तरं शैशव एव यथा[14]—

"शैवं[15] विष्णुनिबद्धमौपनिषदं साङ्ख्यं सपातञ्जलं[16]
शास्त्रं[17] स्वात्महिताय वेद सकलैस्साकं पुराणादिभिः ।।
भूपानां तु विनोदनाय भरतं[18] नीतिं च वात्स्यायनं
षड्भाषाकवितां च लक्षणवतीं[19] श्रीचक्रवर्ती[20] कविः" ।।इति।।

स्पर्धया[21] सिसाधयिषुः (षून्)[22] दुस्तार्किकजरद्गवान्[23] प्रत्युपहासपरस्य ममायमन्यः श्लोकः—

साङ्ख्यं वेश्मनि वेश्मनि श्रुतिशिरः[24] कक्ष्यासु कक्ष्यासु च
द्वारि द्वारि शिवागमाः पथि पथि प्राचां कवीनां गिरः ।
पठ्यन्ते[25] यदसूयिभिर्जडतरप्रज्ञैर्जरत्तार्किकैः
तत्सर्वं खलु[26] चक्रवर्तिकवितुर्विद्यायशोडिण्डिमः ।। इति

महाराज[27]वीरवल्लालास्थानजुषां विदुषां[28] प्रसादाशिषो हि[29] मय्येताः प्रथन्ते[30] । कास्ताः[31] ?

संस्कृतसार्वभौमः[32], प्राकृत[33] पृथ्वीश्वरः शौरसेनी[34]शिरोमणि[35]र्मागधीमकरध्वजः

---

1. D. प्रच्छृतो 2. A. C. उपयुक्तौ A's alt. E. H. उपयुत्त्य 3. C. विपरि 4. A's alt. C. धर्मि 5. A's alt. यथा 6. H. सङ्ख्यातः । स चायं परिणामः द्विरूपयति व्युत्पादयति (P. 53) आरोप्यमाणः प्रकृते (P. 55) 7. A's alt. आगमः । 8. All except. E. 'परिणाम' 9. A. D. F. H. omit वा 10. A's alt. D. व्याख्या 11. All mss. read. ख्यातिरित्य 12. F. प्रासंगिकेन 13. A's alt. C. तत्रादि 14. D. omits यथा 15. D. शैशवं 16. A's alt. C. च पा 17. C. शास्त्र 18. D. भरतः 19. C. लक्षणवीं 20. C. वर्तिः 21. स्पर्धयापि साध 22. D. E. साधयितुं 23. C. भवान् 24. D. गिरः 25. A's alt. C. पर्यन्ते विदुषां श्रवोरटरटद्गीर्भिः रसान्तार्किकैः 26. Except E. all read कविचक्र 27. C. महावल्ला 28. Omitted in D. 29. Omitted in C. 30. A's alt. प्रथान्ते 31. A's alt. त्यास्ताः 32. D. मः पृथ्वी । 33. A. प्रक्ृ 34. A. सौरसेन C. ईश्वरः ……न्तरसेन 35. E. मणिणे माग ।

तस्य च सामानाधिकरण्यवैयधिकरण्याभ्यां द्वैविध्यम् ।

आद्यो यथा—

तीर्त्वा भूतेशमौलिस्रजममरधुनीमात्मनासौ तृतीय-
स्तस्मै सौमित्रिमैत्रीमयमुपकृतवानातरं नाविकाय ।
व्यामग्राह्यस्तनीभिः शबरयुवतिभिः कौतुकोदञ्चदक्षं
कृच्छ्रादन्वीयमानस्त्वरितमथ गिरिं चित्रकूटं प्रतस्थे ॥

पैशाचीपरमेश्वरो[1]ऽपभ्रंश[2]राजहंसो[3]ऽलङ्कार[4]चक्रवर्ती[5] ध्वनिप्रस्थानपरमाचार्यः[6] सहजसर्वज्ञ[7](:) परमयोगीश्वरः[8] शैववैष्णवयोगसाङ्ख्यप्रमुख[9]समस्तस्वात्मविद्यातत्त्व[10] निष्णा[11](तः) श्रुता[12]धिगतसमस्तविद्याकला[13]पोऽद्वैतविद्याविद्वेषिवनदावानल(:)[14] कलियुगस्कन्द[15] (:) अभिनवभट्टाचर्य[16]वैदिकविद्याप्रतिष्ठापनपरमा[17]चार्य (:)[18] काव्यमीमांसाप्राभा[19]करवादि[20]मृगेन्द्र[21] (:) वेश्याभुजङ्ग इत्याद्या महाराजहोसल-राज[22] कुलद्वारि प्रशस्ति[23]शिलाशासन[24]प्रभृतिभिः[25] वयमुपशान्तरभसाः[26] । अत्र तु ग्रन्थे[27] काव्यमीमां[28](सा)निकषतां[29] ममो[30]पयान्तु वत्सलास्सचेतसः ।

प्रकृतमनुसरामः । स चायं[31] परिणामालङ्कारो द्विरूप[32] इति व्युत्पादयति— **तस्य सामानाधिकरण्येत्यादि ।**

तीर्त्वेति । धुनी सरित् । आत्मना तृतीय इत्यनेन सीतासौमित्रिव्यतिरिक्तपरिजनवि-सर्जनं[33] प्रत्याय्यते । आतरस्तरणपण्यम् । तस्मै[34] नाविकाय गुहाय । व्यामशब्देन तत्परि-[35]माणमुच्यते तदिह बाहुद्वयं[36] लक्षयति । तदग्राह्यस्तनीत्वेन[37] तु[38] कृच्छ्रानुयाने हेतु-रुपन्यस्तः । अत्रा[39]तरस्या[40]प्रकृतस्य न केवलं मैत्री[41]ताद्रूप्यप्रतीतिमात्रं विवक्ष्यते, अपि तु नदीतरण[42]प्रत्युपकरणात्मकं प्रकृतोपयोगित्वमपि । अतः[43] [44]अप्रकृतस्य प्रकृतरूपा[45]-

---

1. E. ईश्वराय 2. A. E. F. अंशिक C. अंशक 3. F. हंसा 4. E. 'आलङ्कारिक-चक्र' 5. I वर्ति, E. वर्तिन् 6. C. E. I. आचार्य 7. All mss. read सर्वज्ञ 8. E. ईश्वर 9. C. मुखस्वा 10. E. तत्त्वनित्यनि 11. A. C. निष्णातां D.E.F.H.I. निष्णाता 12. E. अश्रुत 13. D. E. I. कलापा 14. All mss. अनल 15. All mss. स्कन्द. 16. A. C. आचार्यः 17. A's alt. C. omit परम 18. All mss. आचार्य 19. D. E. F. G. I. प्रभा 20. D. वानि 21. All mss. इन्द्र 22. A's alt. होधिसल C. होयिसल F. भौसल 23. A. C. E. H. प्रशस्त 24. A's alt. D. शासन प्रतिष्ठापनात् प्र. 25. D. E. प्रभृतिवय 26. A's alt. शान्तभराः 27. C. ग्रन्थ 28. All mss. मीमांस 29. A. निन्नता D. E. H. I. निकषता 30. A's alt. ममा यापयन् C. ममोपयापयन् 31. E. स आत्मना 32. C. रूपक 33. D. तव्र A's alt. C. व्यज्यते 34. E. अस्मै 35. A's alt. C. प्रमाणं D. परिणाम 36. A's alt. आसीत वन्न इति C. बाहु भासि इति 37. E. स्नत्वेन 38. All except. E. न तु 39. Except. E all तत्र 40. A's alt. आतरस्याप्र E. स्य प्रकृ 41. C. अत्र ताद्रू 42. Except. E all. read तरणं 43. Omitted in A. C. F. K., E. अत्र 44. D. omits. अ 45. D. अप्रकृत ।

अत्र सौमित्रिमैत्री प्रकृता आरोप्यमाणसमानाधिकरणातररूपत्वेन परिणता। आतरस्य मैत्रीरूपतया प्रकृते उपयोगात्। तदत्र यथा समासोक्ता-वारोप्यमाणं प्रकृतोपयोगि तच्चारोपविषयात्मतया स्थितम्, अत एव तत्र व्यवहारसमारोपः, न तु रूपसमारोपः, एवमिहापि ज्ञेयम्। केवलं तत्र विषयस्यैव प्रयोगः, विषयिणो गम्यमानत्वात्। इह तु द्वयोरप्यभिधानं, तादात्म्यात्तु तयोः परिणामित्वम्।

द्वितीयो यथा—

पन्नस्य प्रकृतोपयोग इति प्रकृतस्य स्वरूपादप्रच्युतेः[1] परिणामत्वम्। तदेतद्दर्शयितुमाह—**अत्र सौमित्रिमैत्रीत्यादि**[2]। समानाधिकरण[3]ग्रहणं प्रथमप्रकारत्व[4]प्रथनाय। प्रकृतरूपा[5]-पन्नस्य प्रकृतोपयोग इति परिणामबीजभूतं[6] उपयोगित्व[7]मुद्घाटयितुमाह—**आतरस्य मैत्रीत्यादि**। यत इत्थं सामानाधिकरण्य[8]प्रयोगे परिणामालङ्कारस्य विषयव्यवस्था तस्मात् समासोक्तिसाधर्म्यमस्तीति व्युत्पिपादयिषुरुपक्रमते—**तदत्र[9] यथेत्यादिना**। विशेषणसाम्यादप्रस्तुतस्य[10] गम्यत्वे [11]समासोक्तिर्वक्ष्यते[12]।

उपोढरागेण विलोलतारकं तथा गृहीतं शशिना निशामुखम्।
यथा समस्तं तिमिरांशुकं तया पुरोऽपि[13] रागाद्गलितं न लक्षितम्[14]॥

अत्रो[15]पोढरागत्वविलोलतार[16]कत्वादि[17]हेतुना नायिकानायकयोः धर्मविशेषः गृहीतः[18]। न लक्षित[19] [मि] ति वाक्यानुप्रवेशान्तं विवक्षित इति प्रकृतोपयोगी। स चारोपविषयभूतसन्ध्याराग[20]नक्षत्रादिरूपेणैवास्ते[21]। अनेन प्रकृतस्य स्वरूपाद-प्रच्युतिर्दर्शिता[22]। अतो व्यवहारान्त[23]मारोपः। न तु[24] रूपकन्यायेन रूपसमारोपमात्र-मित्यंशे[25] परिणामसमासोक्त्योः[26] साधर्म्यमवगन्तव्यमित्यत[27] आह—**एवमिहापीति**। तर्हि किमनयोर्मिथो[28] वैलक्षण्यमित्याह[29]—**केवलं तत्रेत्यादि**। प्रयोगः शब्देनोपादानम्। ननु यदि द्वयोः प्रयोगस्तर्हि परिणामत्वमेव कथमित्यत आह—**तादात्म्या[30]त्त्विति**। न खलु तादात्म्ये सति "क्षीरं दधीति" प्रयोगमात्रात् परिणामत्वहानिः।

---

1. D. च्युतो 2. A's alt. C. मैत्रीमिति 3. D. E. करणप्रथ 4. C. कार परि 5. D. E. कृतोपयोग 6. C. बिम्ब 7. C. योग 8. A. करणयार्थे C करणये 9. A's alt. तद यत्यादिना। 10. C. सुगम्य 11. E. हि समा 12. A's alt. C. इष्यते 13. A's alt. C. नागा 14. D. E. लक्षितमिति। 15. E. omits. अत्र 16. D. E's alt. लोचनत्वादि 17. A's alt. आदयो D. E. F. आदिको नायक 18. D. E. गृहीतं 19. All mss. लक्षित इ 20. A's alt. C. रागत्वलक्षणादि। 21. A's alt. C. omit एव 22. A's alt C. उक्ता 23. All except E अन्तरमारो 24. A's alt. ननु 25. A. C. इयतांशेन A's alt. E. इयत्यंशे 26. All excpet. E. सोक्ति 27. E. इत्याह 28. C. मिथो 29. All except. E. इत्यताह 30. A's alt. C. तादा-त्म्यत्वेति। F. तादात्म्यंत्वि।

अथ पक्त्रिमतामुपेयिवद्भिः सरसैर्वक्रपथाश्रितैर्वचोभिः ।
क्षितिभर्तुरुपायनं चकार प्रथमं तत्परतस्तुरङ्गमाद्यैः ॥

अत्र राजसङ्घटने उपायनमुचितम् । तच्चात्र वचोरूपमिति वचसां व्यधिकरणोपायनरूपत्वेन परिणामः ॥

विषयस्य सन्दिह्यमानत्वे सन्देहः ॥१७॥

अभेदप्राधान्ये आरोप इत्येव । विषयः प्रकृतोऽर्थः, यद्भित्तित्वेनाप्रकृतोऽर्थः सन्दिह्यते । अप्रकृते सन्देहे प्रकृतोऽपि सन्दिह्यत एव । तेन प्रकृताप्रकृतगतत्वेन कविप्रतिभोत्थापिते सन्देहे सन्देहालङ्कारः । स च त्रिविधः । शुद्धो निश्चयगर्भो निश्चयान्तश्च । शुद्धो यत्र संशय एव पर्यवसानम् यथा—

वैधर्म्येणोदाहरति—**अथ पक्त्रि**[1]**मतामिति** । पाको[2] [विक्लित्तिः[3]] । पक्त्रिमता[4] प्रयोजनवत् लक्षणप्राचुर्यम् । वक्रः[5] पन्थाः । तदाश्रितैस्तदवलम्बिभिः । तत्परतः[6] तदनन्तरम् । अत्र लक्षणयोजनायाह[7]—**अत्र राजसङ्घटनेत्यादि**[8] । उचितग्रहणेन प्रकृतत्वं[9] द्योतितम् ।

आरोप्यमाणः प्रकृते यदासावुपयुज्यते ।
परिणामस्तदा तेन[10] रूपकादस्य भिन्नता ॥
रूपमात्रसमारोपाद्रूपके[11] रञ्जको ह्यसौ ।
व्यवहारसमारोपादिह[12] स्यात् प्रकृतान्वयः[13] ॥
परिणामसमासोक्त्यो[14]र्ज्ञातव्योऽस्माद्विपर्ययः ।
उपादानानुपादानकृतो भेदस्तयोर्मिथः ॥

विषयस्य सन्दिह्यमानत्वे सन्देहः । सङ्गत्यर्थमधिकारम् अनुस्मारयति—"**अभेदप्राधान्य इत्यादि**[15]" । ननु विषयत्वे निर्ज्ञाते 'कस्सन्देह इत्याह[16]—**विषय**[17](:) **प्रकृत इत्यादि** । निर्ज्ञातमेव[18] मुखादिलक्षणं[19] प्रकृतमर्थं[20] भित्ती[21]कृत्य[22] चन्द्रादा[7]वप्रकृतेऽर्थे[23] सन्दिह्यमाने सन्देहस्य द्विष्ठत्वात् प्रकृ[24]तोऽर्थोऽपि[25] सन्देहडोलामधिरोहति[26]। इत्थं प्रकृताप्रकृत[27]गतत्वेन य[28] उत्थाप्यते प्रतिभयैव सन्देहः, स सन्देहोऽलङ्कारः न[तु] स्थाणुपुरुषादाविव स्वरसवाही[29] । तद्विशेषार्थमाह—**स च त्रिविध इत्यादि** ।

---

1. A. C. F. K. पक्रि 2. A's alt. D. E. पाकेव 3. A. C. निर्वृत्तिः D. E. F. H. I. निवर्तिः । 4. A. पक्ति 5. A. C. F. H. अवक्रः । 6. E. ततः परं 7. A. E. F. H. omit ह 8. A. C. संघन्न इत्या A's alt. घटनायेत्या 9. E. प्रकृति 10. A. तदा नेरू C. तदा नेकरू 11. H. रूपाके 12. D. रोहा 13. A. C. E. F. H. वयः । भवेद् प्रकृतत्वेन रूपके प्रकृतस्थितिः । परि 14. C. सोक्त्या 15. H. इति 16. C. इत्यआह E. इत्यताह 17. All mss. विषय 18. A's alt. अज्ञात—वः C. H. अज्ञातमेव 19. A's alt. लक्षणा 20. H. कृतंभि 21. A. H. अभिभी C. अभिन्न 22. C. कृत्यं 23. C. अप्रकृतत्वे 24. A's alt. प्रकृतेऽर्थे C. प्रकृतार्थेऽपि 25. D. omits अपि 26. C. राहेति ब्रूमः । प्र 27. A. C. E. F. कृतत्वेन 28. All except. D. यत 29. D. वादी ।

किं तारुण्यतरोरियं रसभरोद्भिन्ना नवा मञ्जरी
लीला प्रोच्छलितस्य किं लहरिका लावण्यवारांनिधेः ।
उद्गाढोत्कलिकावतां स्वसमयोपन्यासविस्रम्भिणः
किं साक्षादुपदेशयष्टिरथवा देवस्य शृङ्गारिणः ॥

निश्चयगर्भो यः संशयोपक्रमो निश्चयमध्यः संशयान्तः । यथा—

अयं मार्तण्डः किं स खलु तुरगैः सप्तभिरितः
कृशानुः किं सर्वाः प्रसरति दिशो नैष नियतम् ।
कृतान्तः किं साक्षान्महिषवहनोऽसाविति तिरः
समालोक्याजौ त्वां विदधति विकल्पान्प्रतिभटाः ॥

निश्चयान्तो यत्र संशयोपक्रमो निश्चये पर्यवसानम् । यथा—

इन्दुः किं क्व . कलङ्कः सरसिजमेतत्किमम्बु कुत्र गतम् ।
ललितसविलासवचनैर्मुखमिति हरिणाक्षि ! निश्चितं परतः ॥

क्वचिदारोप्यमाणानां भिन्नाश्रयत्वेऽपि दृश्यते ॥ यथा—

किं तारुण्येति । उत्कलिका उत्कण्ठा । समयः सम्प्रदायः उपदेशयष्टिरक्षरनिर्देश-
दण्डः । शृङ्गारी[1] देवो मन्मथः । अत्र निश्चयानुपादानात् सन्देहः शुद्धः । निश्चय[2]गर्भं
विविच्य[3] दर्शयति—**निश्चय इति**[4] । संशयान्ते[5]कथनात् मध्ये निश्चयो निश्चया-
भासोऽनुसन्धेयः[6] ॥

अयं मार्तण्ड इति[7] । इतः प्राप्तः[8] । सर्वा दिशो[9] न[10] प्रसरतीति ऊर्ध्व[11]ज्वलनैक-
स्वभाव[12]रूपत्वात् । तिरस्तिर्यक् । अत्रासङ्ख्य[13] तुरगत्वा[14]दिना मार्तण्डत्वादिसन्देहा[15]-
पगम एव[16] जायते[17] । तेन[18] पुनर्नायकस्य शृङ्गग्राहिकया रूपनिर्ज्ञानमिति[19] निश्चया-
भासा[20] एते । अत एव पुनस्संशयो[21]त्थानमिति निश्चयगर्भता ।

तृतीयं विवेचयति—**निश्चयान्तः**[22] **इत्यादि** । **इन्दुः**[23] **किमिति** । परतो[24] निश्चित-
मिति कथनात् द्वितीया[25]र्धान्ते[26] इत्थं[27] सन्दिह्येत्यध्याहार्यम् । क्वचित्पुनर्विषये संशयित[28]-
व्येऽपि आरोप्य[29]माणानां धर्माणां[30] विषयान्तरत्वमपि[31] भवतीति आह—**क्वचिदि**[32]**त्यादि** ।

---

1. C. श्रृङ्गार 2. A's alt. निलय 3. H. विवेचयति । 4. H. इति । अयं मार्तण्ड इति । 5. A's alt. C. अन्तवताम 6. A. सन्देहः C. सन्देहः यः अ- 7. A's alt. C. इति प्रा 8. A's alt C. प्राप्तस्य स D. प्राप्त 9. A's alt. दिशं 10. Omitted in C. 11. H. 'उज्ज्वल' 12. E. F. H. स्वरूप 13. C. ख्यात तु 14. A's alt. तुरगादि 15. A. उपगम D. अवगम 16. A. इवाव 17. A's alt. C. गम्यते । 18. Omitted in D. 19. E. निर्ज्ञातं H. विज्ञानं 20. A's alt. C. भासयते । अ 21. A's alt. C. सन्देहोत्था 22. C. F. अन्त 23. Omitted in C. 24. A's alt. पातो 25. A. द्वितीयात्तच्यर्थः C. द्वितीया त्वित्यर्थः । 26. A's alt. यान्ते D. 'द्वितीयाद्धान्ते' 27. A. C. D. E. तेनैस 28. A's alt. त्वाल्पेऽपि C. त्वाह्लेऽपि 29. A's alt. C. आरोप्युदासीनानां वि 30. Omitted in H. 31. A's alt. अन्तरत्वे 32. A's alt. C. इति ।

रञ्जिता नु विविधास्तरुशैला नामितं नु गगनं स्थगितं नु ।
पूरिता नु विषमेषु धरित्री संहृता नु ककुभस्तिमिरेण ॥

अत्रारोपविषयतिमिरे रागादि तर्वादिभिन्नाश्रयत्वेन आरोपितम् । केचिदध्यवसायाश्रयत्वेनेमं सन्देहप्रकारमाहुः । अन्ये तु नुशब्दस्य संभावनाद्योतकत्वादुत्प्रेक्षाप्रकारमिमम् आचक्षते ॥

साद्दश्याद्वस्त्वन्तरप्रतीतिर्भ्रान्तिमान् ॥१८॥

असम्यग्ज्ञानत्वसाधर्म्यात्संदेहादनन्तरमस्य लक्षणम् । भ्रान्तिश्चित्तधर्मो विद्यते यस्मिन्भणितिप्रकारे स भ्रान्तिमान् । साद्दश्यप्रयुक्ता च भ्रान्तिरस्या विषयः । यथा—

ओष्ठे बिम्बफलाशयालमलकेषूत्पाकजम्बूधिया
कर्णालङ्कृतिभाजि दाडिमफलभ्रान्त्या च शोणे मणौ ।
निष्पत्त्यासकृदुत्पलच्छददृशामात्तक्लमानां मरौ

रञ्जिता इति । रञ्जिता[1] वर्णान्तरं नीताः । [2]संहृतास्संक्षिप्ताः । अत्र भिन्नाश्रयतां दर्शयति—अत्रारो[3]पेत्यादि ॥

नन्वत्र सम्भावनापि प्रतीयत इति कथं सन्देहालङ्कार इत्यत[4] आह—केचिदध्यवसायेत्यादि ॥ अध्यवसायः उत्प्रेक्षणम् । उत्प्रेक्षा[5]श्रयोऽयं सन्देह इति केचित् । उत्प्रेक्षैवेत्यन्ये । उभयत्र नु[6]शब्दस्य सन्देहसंभावनाद्योतकत्वमेव हेतुः । वस्तुतस्तु नेह संभावनाप्रतीतिः । वितर्कस्यैककोटिपक्षपाताभावात् । अतो[7] डोलायमाननानाकोटिकोऽयं सन्देह एवेति भावः ॥

सन्देहः[8] प्रकृतद्वाराऽप्रकृतं संस्पृशेद्यदि ।
प्रतिभो[9]त्थापिता सेयं सन्देहालङ्कृतिर्मता ॥

अथ भ्रान्तिमतः[10] सूत्रम् । साद्दश्या[11]द्वस्त्वन्तरप्रतीतिर्भ्रान्तिमान्[12] । साद्दश्यहेतुको विपर्ययो भ्रान्ति[13]मानित्यर्थः[14] । सङ्गत्यर्थमाह—असम्यग्ज्ञाने[15]त्यादि ॥ लक्ष्यपदं निर्वक्ति—भ्रान्तिश्चि[16]त्तेत्यादि । चित्त[17]धर्म[18]मात्रस्यालङ्कारता मा भूदित्या[19]शङ्कचाह—साद्दश्यप्रयुक्तेत्यादि ।

ओष्ठे[20] बिम्बेति[21] ॥ शोणो मणि[22]र्माणिक्यम् । निष्पत्य[23] आलीय[24] साद्दश्या-

---

1. E. रञ्जिताः 2. D. नीता 3. A's alt. C. F. I. आरोप्ये 4. C. अत्र 5. A's alt. C. उत्प्रेक्षाँ संयोजयति । क्वचित् उ H. प्रेक्षैवेति 6. Omitted in C. H. 7. C. अतो……माणि कोटि 8. A's alt. C. सन्देहे 9. A's alt. C. उत्पादित 10, A's alt. C. भ्रान्तिमान् । साद्द 11. F. द्दश्यादिति । 12. A. D. H. इति । सा 13. A's alt. C. भ्रान्तिरित्य 14. C. भ्रान्तिमांश्चेति सं 15. D. अज्ञाने 16. A's alt. C. omit. चित्त 17. D. चित्र 18. E. F. धर्मता 19. A. इत्याह 20. C. ओष्ठ H. ओष्ठ साद्द 21. C. बिम्ब साद्दश्या शोणो 22. D. मणिमाधिक्यं E. माणिक्यं 23. A. C. F. H. निष्पद्य D. निवत्य 24. C. आलं

राजन् ! गूर्जरराजपञ्जरशुकैः सद्यस्तृषा मूर्च्छितम् ॥

गाढमर्मप्रहारादिकृता तु भ्रान्तिर्नास्यालङ्कारस्य विषयः ।

यथा—

दामोदरकराघातचूर्णिताशेषवक्षसा ।
दृष्टं चाणूरमल्लेन शतचन्द्रं नभस्तलम् ॥

साहश्यहेतुकापि भ्रान्तिर्विच्छित्त्यर्थं कविप्रतिभोत्थापितैव गृह्यते यथोदाहृतम् । न स्वरसोत्थापिता शुक्तिकारजतवत् । एवं स्थाणुर्वा स्यात्पुरुषो वा स्यादिति संशयेऽपि बोद्धव्यम् ।

एकस्यापि निमित्तवशादनेकधा ग्रहणमुल्लेखः ॥१६॥

यत्रैकं वस्त्वनेकधा गृह्यते स रूपबाहुल्योल्लेखनादुल्लेखः । न चेदं निर्निमित्तमुल्लेखमात्रमपि तु नानाविधधर्मयोगित्वाख्यनिमित्तवशादेतत्क्रियते ।

दिति यदुक्तं तत्र प्रत्युदाजिहीर्षुराह—**गाढमर्मेत्यादि** । **दामोदरेति**[1] । [2]वक्षोरूप[3]-मर्मचूर्णनं[4] नभसः शतचन्द्रत्वेन दर्शने[5] हेतुः ।

साहश्यहेतुकाऽपि लोकविल[6]क्षणैव भ्रान्तिरलंकारबीजमित्याह—**साहश्यहेतु[7]कापीत्यादि** । विच्छित्तिरलौकिकी शोभा । **शुक्तिकारजतवत्** । शुक्तिकारजते यथेत्यर्थः[8] । अलौकिकत्वन[9]योऽयं[10] सन्देहेऽपि समान इति व्युत्पादयति—**एवं स्थाणुरित्यादि** ।

"साहश्योत[11]थापिता भ्रान्तिर्यत्रा[12]सौ भ्रान्तिमान्मतः ॥"

अथोल्लेखालङ्काराय सूत्रम्—**एकस्यापि[13] निमित्तवशादनेकधाग्रहणमुल्लेखः** । एकस्यापि[14] वस्तुनो नाना[15]विधधर्मयोग[16]निमित्तवशादनेकधाग्रहे सत्युल्लेखालङ्कारः । तच्च[17] अनेकधात्वं[18] गृहीतृभेदाद्भवति विषयभेदाद्वा भवति । तदेतद् व्याचष्टे—**यत्रैकं[19] वस्त्वित्यादि** । यत्रोक्तिप्रकारे । गृह्यते ज्ञायते । उल्लेखनं निर्धारणम् । [20]नानाविधधर्माभावे त्वनेकधाग्रहणमात्रेण नोल्लेख इत्याह—**न चेद[21]मित्यादि** । एतत्क्रियते, उल्लेखनं निष्पाद्यत इत्यर्थः ।

ननु नानाविधधर्मयोगमात्रा[22]न्नानेकधाग्रहणमनुपश्यामः इत्यत आह—**तत्र च रुच्य[23]र्थित्वेत्यादि** । रुचिरभिरतिः । अर्थित्वं लिप्सा । व्युत्पत्तिः शब्दार्थसङ्केतज्ञानम् ।

---

1. A's alt. इत्यादि 2. C. वक्तो 3. C. रूपत्व E. रूपं 4. A. C. घूर्णनं D. पूर्णनं 5. C. दर्शनं हेतु साद 6. H. विचक्ष 7. E. हेतुकेत्यादि 8. H. अर्थसाह 9. A's alt. C. अविषयो 10. C. यः 11. D. दृश्ये भ्रा० 12. D. E. 'यत्र स' 13. F. एकस्यापि इति । एकस्यापि नाना A. C. D. H. omit अपि 14. A's alt. अपि नाना 15. A's alt. H. नाना धर्म 16. D. E. F. योग लक्षणानि 17. C. अनेकधा च 18. A's alt. omits. त्वं H. अनेकधा वा गृ 19. D. एतं 20. D. repeats नाना 21. Except. E. all read चेदिदं 22. A. मात्रान्तानेक D. मात्रानेक 23. A. C. F. H. अर्थं ।

तत्र च रुच्यर्थित्वव्युत्पत्तयो यथायोगं प्रयोजिकाः । तदुक्तम्—

यथारुचि यथार्थित्वं यथाव्युत्पत्ति भिद्यते ।
आभासोऽप्यर्थ एकस्मिन्ननुसन्धानसाधिते ॥इति॥

यथा—"यस्तपोवनमिति मुनिभिः कामायतनमिति वेश्याभिः सङ्गीतशालेति लासकैः" इत्यादि श्रीकण्ठाख्यजनपदवर्णने । अत्र ह्येक एव श्रीकण्ठजनपदस्तत्तद्गुणयोगात् तपोवनाद्यनेकरूपतया निरूपितः । रुच्यर्थित्वव्युत्पत्तयश्च प्रायशः समस्ता व्यस्ता वा योजयितुं शक्यन्ते । नन्वेतन्मध्ये "वज्रपञ्जरमिति शरणागतैरसुरविवरमिति वादिकैः" इत्यादौ रूपकालङ्कारयोग इति कथमयमुल्लेखालंकारविषयः ? सत्यम् । अस्ति तावत् "तपोवनम्" इत्यादौ रूपकविविक्तोऽस्य विषयः । यदत्र वस्तुतस्तद्रूपतायाः संभवः, यत्र तु रूपकं व्यवस्थितं, तत्र चेदियमपि भङ्गिः संभाविनी तत्संकरोऽस्तु । नैतावतास्याभावः शक्यते वक्तुम् । ततश्च न दोषः कश्चित् । एवं तर्हि तत्र विषये भ्रान्तिमदलं-

---

यथायोगमिति । [1]योगो योग्यता[2] । तामनतिक्रम्य रुच्यादिषु त्रिषु यथायोगमेकं द्वयं त्रयमेव वा प्रयोजकं भवतीति यावत् । तत्र संवादायाह[3]—तदुक्तम्[4] । यथारुचीत्यादि । रुच्यर्थित्वव्युत्पत्त्यनुसारेण एकस्मिन्नप्यनुसन्धानेन[5] साधिते निर्धारितेऽर्थे आभासः प्रतीतिर्भिद्यते । नानोल्लेखात्मिका जायत इत्यर्थः ।

यस्तपोवनमित्यादि[6] । एक एव श्रीकण्ठजनपदः मुन्यादिभिस्तपोवनत्वाद्या[7]-कारेण गृह्यते । तथा चानेकधा ग्रहणे[8] तपोवनत्वादिनानाविधधर्मयोगो निमित्तम्[9] ।

जनपदे हि तपोवनत्वादि धर्मा निसर्गत एव सन्ति । इतरथा नोल्लेखः[10] । रूपकत्वप्राप्तेः[11] । लक्षणं योजयति— [12]अत्र ह्येक[13]एवेत्यादि[14] । समस्ता[15] व्यस्ता[16] इति मुन्यादीनां तपोवना[17]दित्वेनोल्लेखे तथाविधा रुच्यादयो हि समस्ततया व्यस्ततया वा संभवन्ति । विषयपरिशुद्धयै चोदयति—नन्वेतन्मध्ये इत्यादि । वज्रपञ्जरत्वादेर्हि तपोवनत्वादि[18]-वन्न जनपदधर्मत्वमिति रूपकत्वमेव । परिहरति—सत्यम्, अस्ति तावदित्यादि । न तावदस्य रूपकविविक्तविषयता नास्ति । यत्र त्वंशे रूपकं तत्र[19] यद्युल्लेखात्मिका विच्छित्तिर्न संभवति तदा नास्त्येव विवादः । अथ संभवति, तदा सङ्कर एव न्याय्यः । न पुनरस्य स्वरूपत एवापलापः शक्यः ।

भ्रान्तिमतो विविक्तविषयतामस्य दर्शयितुम् आक्षिपति—एवं तर्हीत्यादि ।

---

1. E. क्रियायोगो 2. C. Omits ता 3. H. आह । लक्षणं योजयति । 4. A. E. F. H. I. उक्तमिति । 5. D. omits. ने 6. E. इति 7. A's alt. D. त्वाद्यनेका कारत्वेन E. त्वाद्यमनेकाकारत्वेन F. त्वादि धर्मानिस 8. A. C. F. H. I. गृह्यमाणे 9. A. C. D. F. H. I. अतिमात्रं 10. C. लेख 11. A's alt. C. अप्राप्तिः 12. A's alt. C. तत्र 13. A. C. D. F. H. I. एकः 14. H. आदि । नाना धर्मबला- (P. 62.) 15. C. समस्तव्य 16. A's alt. ताश्चेति । 17. D. वनत्वा देनो 18. D. F. वनादि । 19. All mss. read अत्र ।

कारोऽस्तु । अतद्रूपस्य तद्रूपताप्रतीतिनिबन्धनत्वात् । नैतत् । अनेकधाग्रहणाख्यस्यापूर्वस्यातिशयस्याभावात् । तद्धेतुकत्वाच्चास्यालंकारस्य संकरप्रवृत्तिस्त्वङ्गीकृतैव । यद्येवं अभेदे भेद इत्येवंरूपातिशयोक्तिरत्रास्तु । नैष दोषः । ग्रहीतृभेदाख्येन विषयविभागेनानेकधात्वोट्टङ्कनात्तस्य च विच्छित्त्यन्तररूपत्वात्सर्वथा नास्यान्तर्भावः शक्यक्रिय इति निश्चयः । यथा वा—

णाराअणोत्ति परिणअवहूहिं सिरिवल्लहो त्ति तरुणीहिं ।
बालाहिं उण कोऊहलेण एअमेअ सच्चविओ ॥

तत्रेति । यो रूपविविक्तः तत्र विषय इत्यर्थः । भ्रान्तिमत्त्वशङ्काया बीजमुद्घाटयति—अत[1]द्रूपस्य तद्रूपतेति । यद्यपि जनपदे तपोवनत्वादयः सन्त्येव धर्माः । वस्तुतस्तु न तद्रूपो जनपदः[2] । तस्मादतद्रूपस्य तद्रूपताप्रतीति[3]निबन्धनेन भ्रान्तिमानस्त्विति[4] यावत्[5] । परिहरति—नैतत् । अनेकधेत्यादि । न ह्यनेकधाग्रहणरूपं वैचित्र्यं भ्रान्तिमति लक्षणम् । इह तु लक्षणमेव । अतो न भ्रान्तिमात्र[6]मिति यावत् । नन्विह भ्रान्तिमानपि स्व[7]लक्षणोपपन्न इत्यत आह—सङ्करप्रवृत्तिस्त्विति । अतिशयोक्ति[8]विषयतोऽप्यस्य विभक्त[9]विषयतायै शङ्कते—यद्येवमभेदे भेद इत्यादि । वस्तुतो हि तपोवनाद्य[10]वयवापेक्षया न[11] जन[12]पदस्यावयविनो भेदोऽस्ति । इत्थं च सत्यभेदे भेद इत्येवं[13]रूपातिशयोक्तिर[14]त्रास्तु कि[15]मन्यकल्पनेनेत्याक्षेपनिष्कर्षः[16] । परिहरति—नैष दोषः । ग्रहीतृभेद इत्यादि । न ह्यतिशयोक्तौ ग्रहीतृभेदोपयोगः । अत्र पुनरुप[17]योग इति । [18]नातिशयोक्तिमात्रमेतत् । न च ग्रहीतृभेद[19]स्याप्रयोजकत्वं शङ्क्यमित्याह—तस्य चेत्यादि । यत इत्थमतः[20] सर्वथा नास्यान्त[21]र्भावः शक्यक्रियः ।

रूपकासङ्कीर्णतयोदाहरति—णाराअणोत्तीति । नारायण इति परिणतवयोभिः श्रीवल्लभ इति तरुणीभिः । बालाभिः पुनः कौतुकेन एवमेव दृष्टः ।

अत्र पुरः प्रवेशावसरे एक एव कृष्णो [22]जरतीभिः साक्षान्मोक्षप्रदो[23] नारायण इति दृष्टः । तासां रुच्यादेस्तथाविधत्वात् । तरुणीभिः पुनः लक्ष्म्याः[24] प्राणवल्लभ इति[25] । बालाभिः पुनः कौतुकेन एवमेव दृष्टः । एवमेवेति निपातो यत्किञ्चिदित्यर्थे विवक्षितः । न चात्र शङ्कनीयं कौतुकेनेति प्रयोजकान्तरोपादानान्नेह रुच्यादयः प्रयोजका इति । कौतुकस्यापि रुच्या[26]दिकमन्तरेणासंभवात् ।

---

1. D. एत 2. D. पदः तद्रूप 3. A. प्रतीतिः 4. A. C. D. F. H. I. अस्तीति । 5. D. यावत् । नन्विह 6. A's alt. C. मानिति । 7. A's alt. C. स्वल्प लक्ष्यो 8. A's alt. विशेषोऽपि C. विशेपेऽपि 9. A's alt. C. विभक्ति विशेषतोऽप्यस्यैव विषयता एवं कृते यद्ये 10. A. C. अवस्था A's alt. Omit. आदि 11. Except E. all omit. न 12. A's alt. C. नन्दन 13. D. एव 14. A's alt. C. उक्तिरेवास्तु 15. D. तिम 16. C. र्षः । गृहीतृ । 17. C. उपायो योग 18. A's alt. C. नन्विति शक्तिमात्रमेवैतत् । 19. D. भेदक 20. A's alt. ततः 21. A. C. D. F. H. I. नान्तर्भा 22. C. जाती 23. A's alt. D. E. प्रदोऽयमादिना 24. D. लक्ष्याः 25. A. C. F. H. I. इति दृष्टः । 26. A. अतिकान्तरेण C. आदिकान्तरेण ।

एवं "गुरुर्वचसि पृथुरुरसि अर्जुनो यशसि" इत्यादाववसेयम्। इयांस्तु विशेषः—पूर्वत्र ग्रहीतृभेदेनानेकधात्वोल्लेखः, इह तु विषयभेदेन। नन्वयं श्लेषालङ्कारविषय इति कथमलङ्कारान्तरमत्र स्थाप्यते? सत्यम्। अनेकधात्वनिमित्तं तु विच्छित्त्यन्तरमत्र दृश्यत इति तत्प्रतिभोत्पत्तिहेतुः श्लेषोऽत्र स्यात्, न तु सर्वथा तदभावः। अतश्चालङ्कारान्तरं, यदेवंविधे विषये श्लेषाभावेऽपि विच्छित्तिसंभवः। तस्मादेवमादावुल्लेख एव श्रेयान्। एवमलङ्कारान्तरविच्छित्त्याश्रयेणाप्ययमलङ्कारो निदर्शनीयः॥

एवं ग्रहीतृभेदादुदाहृत्य विषयभेदादुदाहरति—**एवं गुरुर्वचसीत्यादि**। वचसि विषयभूते गुरुः प्रामाणिकत्वात् अनुल्लङ्घ्यो वाचस्पतिश्च। तथोरसि पृथुः[1] प्रथीयान् पृथुनामा नृपश्च। यशस्यर्जुनोऽवदातो धनञ्जयश्च। इत्यादौ ह्येक एव उपवर्ण्यो नायको वचःप्रमुख[2]विषयभेदाद्ग्र[3]हीतृभेदनैरपेक्ष्येण रुच्यादिवशात् अनेकधा गृह्यत इत्यु[4]ल्लेखालङ्कारत्वम्। प्रकारद्वयस्यावान्तरवैधर्म्यायाह—**इयांस्त्वित्यादि**। अत्रोल्लेखाभावम् आश[5]ङ्कते—**नन्वयमित्यादि**। श्लेषस्य सर्वालङ्कारबाधकत्वं हि[6] वक्ष्यते[7]। अतो लक्षणोपपन्नम् अलङ्कारान्तरं सति श्लेषे न स्यादिति [8]नात्रोल्लेखो युक्त इत्याक्षेपः। परिहरति—**सत्यमित्यादि**। सत्यम्। उक्तनयेन श्लेषेणोल्लेखो बाध्यते। अथापि स्वरूपेण अ[9]विद्यमानस्य बाधासंभवात् बाध[10] एवोल्लेखसद्भावे लिङ्गम्। अनेकधा ग्रहणरूपविच्छित्तिविशेषबलात् प्रतिभा[11]त्युल्लेख इति यावत्। यत इत्थमतो न तु सर्वथा [12]तद[13]भाव इत्यलङ्कारान्तरमेव। एतदेव साधयितुम् अत्रैवोदाहरणे श्लेषनैरपेक्ष्यं दर्शयति—**यदेवंविध इत्यादि**। अत्र[14] 'अनुल्लङ्घ्यो[15] वचसि, प्रथीयान् उरसि, निर्मलो यशसि" इति श्लेषा[16]भावेऽपि न उल्लेखाभावः[17]। [18]यस्मादित्थं तस्मादेवमादौ विषये उल्लेखा[19]लङ्कार एव विशेष[20]विच्छित्तिक[21] इति अलङ्कारान्तरापेक्षया [22]श्रेयान् प्रशस्यतर[23] इत्यर्थः।

इत्थं[24] रूपकाति[25]शयोक्तिश्लेषादिविच्छित्त्याश्रयत्वन्यायेन [26]अलङ्कारान्तरविच्छित्त्याश्रयेणाप्ययं संभवति। [27]स तु स्वयमनुसन्धेयः। न्यायस्य व्युत्पादितत्वात् इत्यभिप्रायेणाह—**एवमलङ्कारा[28]न्तरेत्यादि**। निदर्शनीयः[29] उदाहरणीयः[30]। क्वचित्

---

1. C. पृथु 2. A's alt. C. प्रभृति 3. A. भेदागृ 4. D. omits इति 5. Except. E. all read. शङ्क्यते। 6. A's alt. F. विवक्ष्यते 7. A's alt. C. व्यज्यते। 8. A's alt. C. नोल्लख 9. C. omits. अ. 10. A. D. H. अबाध 11. A's alt. C. भासत एवो D. E. 'भात्येवो' 12. D. थानतु 13. E's alt. तदाभा··· 14. E. हिअनु 15. C. लङ्घ्ये 16. D. षोपोहे A's alt. E. F. षापोहे 17. A's alt. D. E. F. अपोहः 18. A's. alt. C. तस्मा 19. C. लेख्या 20. D. विषय एव वि 21. A. C. F. H. I. कर 22. A's alt. C. प्रेयान् 23. A. C. D, F. H. I. प्रशस्यत 24. A's alt. C एवं 25. A's alt. रूपकादि C. रूपका श्लेषा वि 26. A. C. अलङ्कारान्तर विच्छित्त्याश्रयत्व न्यायेन अल 27. A's alt. इति F. सति। 28. A. कारेत्या 29. C. नीय 30. C. हरणं यः D. हर्तव्यः।

विषयापह्नवेऽपह्नुतिः ॥२०॥

प्रक्रान्तानपह्नववैधर्म्येणेदमुच्यते । आरोप-
वस्त्वन्तरप्रतीतिरित्येव ।

---

*[1]कारकान्तरेति पाठः ।

नानाधर्मबलादेकं[2] यदि नानेव गृह्यते ।
नानारूपसमु[3]ल्लेखात्स उल्लेख इति स्मृतः[4] ॥
यदेकं[5] तद्धि[6] नानेति गृह्यते रूप[7]भेदतः
[8]रुच्यादिवशतो लोके नानात्वं चेद[9]कृत्रिमम् ॥
अतद्रूपस्य ताद्रूप्यान्नह्यसौ भ्रान्तिरिष्यते ।
न चाप्यतिशयोक्तिस्स्यादभेदे भेदरूपिणी[10] ॥
आद्ये नानेकधात्वं स्याज्ज्ञातृभेदौ[11] न चान्तिमे ।
विषयज्ञातृभेदाभ्यां विना नोल्लेखसंभवः ॥
यद्यपि श्लेषतो बाधो न तथाप्यस्य निह्नवः ।
अन[12]पेक्ष्या[13]पि यच्छ्लेषं [14]तथैव स्थातुमर्हति ॥

ननु मुखं न भवतीति विषया-
अथापह्नुत्यै सूत्रम् । **विषयापह्नवेऽपह्नुतिः**[15] ॥ ननु मुखं न भवतीति विषया-
पह्नवमात्रे सत्यपि नापह्नुतिरित्य[16]तोऽधिकारं स्मारयति—**वस्त्वन्तरप्रतीतिरित्येवेति** ।
अतः प्रकृतनिषेध[17]पुरस्कारेण[18] अप्रकृतसमर्थनमपह्नुतिरित्यर्थः । तथाहि **काव्यप्रकाश-
कृत्**—

"प्रकृतं [19]यन्निषिध्यान्यत् साध्यते सा त्वपह्नुतिः ।"

ननु यदि[20] सादृश्याद्वस्त्वन्तरप्रतीतिरिहापि को विशेषः [21]तर्ह्यस्य भ्रान्तिमत इत्यत
आह—**प्रक्रान्तानपह्नवेत्यादि** । प्रक्रान्तं प्रकृतम् । तस्य ह्यत्रापह्नवः । भ्रान्तिमत्यनप-
ह्नव इति विशेषः । उल्लेखे तु न [22]प्रकृतानपह्नवमात्रं विशेषः किन्तु[23] अनेकधाग्रहणमपि[24]

---

1. A's alt. C. कारिकान्तरेपि 2. A's alt. C. एष 3. A's alt. C. समुद्भेदावुल्लेख इति सः 4. All mss. स्मृतः इति । 5. D. एतं 6. A. C. F. तर्हि 7. A. C. D. F. H. I. धर्म 8. A's alt. C. प्राच्या 9. A's alt. C. भेदकृत्तथा 10. A's alt. रूपिणः C. रूपिणि 11. A's alt. C. भेदनिबन्धनं H. भेदे 12. C. अना 13. A. C. D. F. H. पेक्ष्यैव 14. A's alt. D. E. F. H. तत्रैव 15. Except E. all read तिः इति 16. A इत्यन्ताधिका A's alt. अन्यारोपाधि C. अन्वारोपाधि D. F. रित्यर्थः । तथाहि 17. A's alt. C. षेधना प्रकृत समर्थनं 18. A. H. कारेण सम 19. A. E. H. हि नि 20. Omitted in C. 21. D. तस्य 22. A's alt. अप 23. A's alt. C. omit किन्तु 24. A's alt. C. अपीति ।

* The T. S. S. Edition adopts the reading कारकान्तर Samudrabandha says that गुरुर्वचसि etc. is an illustration of उल्लेख having the locatives in वचसि, उरसि etc. The commentator then gives his own illustrations for the other Cases. Jayaratha expressly says that kārakāntara is a wrong reading (p. 62).

प्रस्तावादारोपविषयापह्नुतावारोप्यमाणप्रतीतावपह्नुत्याख्योऽलङ्कारः । तस्य त्रयी बन्धच्छाया अपह्नवपूर्वक आरोपः, आरोपपूर्वकोऽपह्नवः, छलादिशब्दैरसत्यत्वप्रतिपादकैर्वापह्नवनिर्देशः । पूर्वकभेदद्वये वाक्यभेदः । तृतीयभेदे त्वेकवाक्यम् । आद्यो यथा—

यदेतच्चन्द्रान्तर्जलदलवलीलां प्रकुरुते
तदाचष्टे लोकः शशक इति नो मां प्रति तथा ।
अहं त्विन्दुं मन्ये त्वदरिविरहाक्रान्ततरुणी-
कटाक्षोल्कापातव्रणकिणकलङ्काङ्किततनुम् ॥

अत्रैन्दवस्य शशस्यापह्नव उपक्षिप्ते शशकप्रतिवस्तुकिणवत इन्दोरारोपो नान्वयघटनां पुष्यतीति न निरवद्यम् । तत्तु यथा—

ज्ञेयम्[1] । इदमिति वचनं[2] क्रियाविशेषणम् । [3]यत्त्वेवमिदमप[4]ह्नुतिवचनं तत्प्र[5]क्रान्तान[6]पह्नव[7]वैधर्म्येणेत्यर्थः । लक्षणं निष्क्रष्टुमाह—आरोपप्रस्ता[8]वादित्यादि[9] । आरोपप्रस्तावो रूपका[10]त्प्रभृतीति ॥

तत्प्रकारवैचित्र्यायाह—तस्य त्रयीत्यादि । त्रयी त्रिप्रकारेत्यर्थः । बन्धच्छाया ग्रथ[11]नवैचित्र्यम्[12] । त्रैविध्यं विविनक्ति—अपह्नवपूर्वक इत्यादि । छलादयः[13] छलछद्मकैतवनिभादयः[14] । तैरपि[15] हि[16] नञ[17]र्थ एव अवस्थाप्यते । [18]तर्हि [19]तृतीयभेदे को विच्छित्तिविशेषः इत्यत आह—पूर्वक[20]इत्यादि ।

यदेतदिति[21] । नो[22] मां प्रति तथेति प्रकृता[23]पह्नवः उत्तरार्धेऽप्रकृतसाधनमिति । यद्यपि अपह्नुतिरेषा तथापि दोषानुविद्धत्वात् उदाहरणाभास इत्यत[24] आह—अत्रैन्दवस्येत्यादि । शशक[25]प्रतिवस्त्विति । अपह्नोतुमिष्टस्य[26] शशकस्य यः प्रतिवस्तुभूत उल्का[27]पातकिणः[28] तस्यैवारोपो न्याय्यः । न पुनस्तद्वतः इन्दोःअतो नान्वयः[29] संघटते । इत्थं लक्षणोपपन्नोऽपि[30] अलंकारो दोषानुविद्ध[31]स्सन् आभासी[32]भवतीति व्युत्पाद्य[33] सम्यगुदाजिहीर्षुराह—तत्तु यथेति ॥

---

1. A. C. D. ध्येयम् । 2. E. 'वचन' 3. A. यात्ववमिद A's alt. H. यच्चैवमिद C. यद्येत 4. A. अपि 5. A's alt. प्रकृता 6. D. F. H. अनप 7. H. ह्नुति 8. D. प्रस्ताव इति 9. H. आदि । मादुरापुह्नति (P. 65) 10. A. C. H. रूपक 11. A. C. F. H. I. ग्रहण 12. A's alt. 'क्रयत्रै' 13. All except E. Omit छलादयः C. छलादि शब्दै छद्म 14. A's alt. C. निह्नवादयः 15. D. नैतदपि 16. A. C. हीन इत्यर्थ एव 17. D. repeats. नञर्थे E. न अर्थ 18. A's alt. तत्र 19. C. त्रितय 20. A. C. पूर्वमित्या D. पूर्वज इ 21. A's alt. इत्यादि । 22. A. C. नो मात्रेति । A's alt. न तन्मां प्रति 23. A's alt. C. प्रकान्ता 24. E. इत्याह 25. F. शशाङ्क 26. A. C. स्यायं प्रति A's alt. D. F. स्ययः 27. D. उल्कापातकिनः 28. A. F. किरणः C. किणिः 29. A's alt. C. नत्वस्य स्यघट 30. C. omits अपि 31. D. 'विद्धस्सा भा' 32. C. आभासं 33. A's alt. C. D. पाद्यः ।

पूर्णेन्दोः परिपोषकान्तवपुषः स्फारप्रभाभास्वरं
नेदं मण्डलमभ्युदेति गगनाभोगे जिगीषोर्जगत् ।
मारस्योच्छ्रितमातपत्रमधुना पाण्डु प्रदोषश्रिया
मानोन्नद्धजनाभिमानदलनोद्योगैकहेवाकिनः ॥

द्वितीयो यथा—
विलसदमरनारीनेत्रनीलाब्जषण्डान्यधिवसति सदा यः संयमाधःकृतानि ।
न तु रुचिरकलापे वर्तते यो मयूरे वितरतु स कुमारो ब्रह्मचर्यश्रियं वः ॥

तृतीयो यथा—
उद्भ्रान्तोज्झितगेहगूर्जरवधूकम्पाकुलोच्चैःकुच-
प्रेङ्खोलामलहारवल्लिविगलन्मुक्ताफलच्छद्मना ।
सार्धं त्वद्रिपुभिस्त्वदीययशसां शून्ये मरौ धावतां-
भ्रष्टं राजमृगाङ्क ! कुन्दमुकुलस्थूलैः श्रमाम्भःकणैः ॥

अत्र शून्य इत्यस्य स्थाने मन्ये-शब्दप्रयोगे सापह्नवोत्प्रेक्षा स्थापयिष्यते । 'अहं त्विन्दुं मन्ये' इति वाक्यभेदे 'मन्ये' शब्दप्रयोगे नोत्प्रेक्षेति च

पूर्णेन्दोरिति । दृष्टश्रुताद्यपराधजन्मा रोषो मानः । तेनोन्नद्धः उत्सिक्तो जनः शृङ्गारी लोकः तस्याभिमानस्सा[1]न्त्वासहिष्णुता । हेवाकः स्वाच्छन्द्यम् । अत्र न मण्डलम् अपि तु आतपत्रमे[2]वेत्यन्वयो घटते [3]अयमपह्नवपूर्वक[4] आरोपः[5] ॥

आरोपपूर्वकमुदाहरति—**विल[6]सदमरेति** ॥ संयमो [7]मनोनिग्रहः । तेनाधःकृतान्याक्रान्तानि । अत्र नेत्रषण्डानि अध्यास्ते । न तु मयूरे वर्तत इत्यारोपपूर्वकता[8] ।

उद्भ्रान्तेति[9] । सार्धं धावतामित्यनेन यशसस्तत्प्रदेशव्याप्तिः समकालमेव सूचिता । मुक्ताफलच्छद्मना । अम्भः[10]कणैर्भ्रष्ट[11]मित्यत्र हि[12] न मुक्ताफलानि, अपि तु अम्भःकणा एवेति प्रतीतिः[13] । इत्थ[14]मेवापह्नुतिम् उत्प्रेक्षाङ्गत्वेन प्रतिपिपादयिषुरुपक्षिपति—**अत्र शून्य [15]इत्यस्य इत्यादि** ॥ "मन्ये मरावि"त्यादि पाठे [16]हि मन्येशब्दमाहात्म्यादुत्प्रेक्षा । छद्म[17]शब्दत[18]स्त्वपह्नुतिः सा चोत्प्रेक्षाङ्गं [19]भविष्यति । इत्थमुत्प्रेक्षाङ्गत्वं[20] न केवलं तृतीयभेदस्यैव, यावता पूर्वभेद[21]द्वयस्यापि [22]संभवतीत्याह इत्थ[24] अहं त्विन्दुमित्यादि ॥ वाक्यभेदग्रहणं प्राथमिकभेद[23]द्वयप्रथनाय ।

---

1. A's alt. C. F. सत्त्वा 2. E. omits. एव 3. A's alt. आद्यः C. आद्याप 4. A. C. D. omit. क. 5. A's alt. आरोप्यः। C. आरोप्य 6. A's alt. विकस 7. D. मान 8. A. कृता 9. A's alt. C. भ्राम्येति 10. A. अम्बु C. D. अथः, 11. A. E. F. दृष्टं 12. C. ही 13. A's alt. प्रतीतिं 14 A's alt. E. F. H. I. इमां 15. A. F. इत्यादि A's alt. इत्यास्यत्वादि 16. Omitted. in D. 17. A's alt. C. D. E. F. H. I. छल 18. A. C. D. F. H. I. omit. त 19. A's alt. C. D. E. F. H. I. इति भ 20. C. अत्र न 21. A's alt. E. पूर्वक 22. A's alt. C. H. omit सं 23. A's alt. C. 'भेदग्रहणाय' 24. D. इत्थं ।

वक्ष्यते । एतस्मिन्नपि भेदेऽपह्नवारोपयोः पौर्वापर्यविपर्ययभेदद्वयं संभवदपि न पूर्ववच्चित्रतामावहतीति न भेदत्वेन गणितम् । तत्रापह्नवपूर्वक आरोपे समनन्तरमुदाहृतम् । आरोपपूर्वके त्वपह्नवे यथा—

ज्योत्स्नाभस्मच्छुरणधवला बिभ्रती तारकास्थी-
न्यन्तर्धानव्यसनरसिका रात्रिकापालिकीयम् ।
द्वीपाद् द्वीपं भ्रमति दधती चन्द्रमुद्राकपाले
न्यस्तं सिद्धाञ्जनपरिमलं लाञ्छनस्यच्छलेन ॥

क्वचित्पुनरसत्यत्वं वस्त्वन्तररूपताभिधायिशब्दनिबन्धनम् । यथा—

त्रिरू[1]पाऽप्यपह्नुतिरुत्प्रेक्षाङ्गत्वेन सूचिता । ननु[2] च्छलादिप्रयोगेऽप्यपह्नवारोपपौर्वापर्यविपर्ययनिबन्धनं वैचित्र्यं किं नोच्यत इत्यत आह—**एतस्मिन्नपीति** ॥

अत्रेद[3]माकूतम् । यद्यप[4]ह्नवारोपपौर्वापर्य[5]विपर्यये भेदद्वयं भवत्येव, न तु चमत्कारः कश्चित् । न[6]हि भेदसंभवोऽलङ्कारप्रथन[7]हेतुरपि[8] तु सचमत्कारभेदसंभवः । सचमत्कारता च सति वाक्यभेदे स्यात्, एकवाक्यतायां तु च्छलादि शब्दस्य पौर्वापर्यविप[9]र्ययप्रस[10]ङ्गेऽपि न प्रतीतिभेदः कश्चित्[11] । क्रियाविशेषण[12]त्वेन क्रियापेक्षया प्रतीतौ प्राथम्य[13]नियमात्[14] [15]अत[16]श्छलादिप्रयोगे द्विधा न गणितम् । वैचित्र्याभावमेव सोदाहरणं दर्शयितुमाह—**तत्रा[17]पह्नवेत्यादि** । [18]समनन्तरमिहोक्त[19]प्रतियोगिकम् उद्भ्रान्तो[20]ज्भितेत्यत्रेति यावत् ।

ज्योत्स्ना भस्मेति । छुरणमुद्धूलनम्[21] । अन्तर्धानं रात्रिपक्षे[22] तिरस्कृतिः विलयः, अन्यत्र त्वदृश्यत्व[23]सिद्धिः । मुद्रा[24] भिक्षापिण्डस्तदर्थं कपालं मुद्राकपालम् । परिमल[25] (:) परिमर्दस्तेन तज्जनितं लक्ष्म[26] लक्ष्यते । यथाच्छलादिप्रयोगेण अर्थाक्षेपात्[27] असत्यत्वं, तथा प्रकारान्तरेणापि[28] संभवतीत्याह—**क्वचित्पुनरित्यादि** । वस्त्वन्तरं प्रकृतापह्नवक्षमम् ।

अमुष्मिन्निति । अत्र हि धूमशिखा रोमावलिवपुः[29] [30]परिणमतीत्युक्तौ, न रोमा-

---

1. A's alt. निरूप C. त्रिरूप्यप 2. A's alt. C. H. न तु । 3. A. C. H. अत्रैतत्प्राकृतं 4. H. यद्यपि अ 5. C. पर्यभेद 6. E. न तु 7. A. C. H. प्रधान 8. C. तुः सच 9. E. F. पर्याय 10. E. F. प्रयोग 11. Omitted in D. 12. A's alt. त्वेतु 13. C. प्राधाम्य 14. A's alt. नियमनात् । 15. D. एत 16. E. जला 17. D. तथा 18. D. सदन 19. A's alt. D. E. F. त्तरत्वं 20. A's alt. C. उक्तिते H. न्तोंकृते 21. C. H. नम् । रात्रि 22. A. C. पक्षे विरतिः अ A's alt. F. पक्षे विलयः तिरस्कृतिः H. पक्ष विल 23. H. Omits 'त्व' 24. A's alt. C. अभिज्ञापि 25. All mss. मल 26. F लक्ष्यते । य. 27. A's alt. C. अपेक्षायां स्यादसत्य H. अपेक्ष पाद सत्य 28. A's alt. C. प्रधानान्त । 29. A. D. E. F. H. I. वली 30. D. परिमण ।

अमुष्मिँल्लावण्यामृतसरसि नूनं मृगदृशः
स्मरः शर्वप्लुष्टः पृथुजघनभागे निपतितः ।
यदङ्गाङ्गाराणां प्रशमपिशुना नाभिकुहरे
शिखा धूमस्येयं परिणमति रोमावलिवपुः ॥ इति ॥

एवमभेदप्राधान्ये आरोपगर्भानलङ्कारांल्लँक्षयित्वा अध्यवसायगर्भा-ल्लँक्षयति । तत्र—

अध्यवसाये व्यापारप्राधान्ये उत्प्रेक्षा ॥२२॥

विषयनिगरणेनाभेदप्रतिपत्तिर्विषयिणोऽध्यवसायः । स च द्विविधः—

वलिरपितु धूम[1]शिखेति प्रतीयते । अनेनैषा प्रतीयमानापि दर्शिता मन्तव्या ॥

प्रकृतं यन्निषिध्यान्यत्साध्यते सा त्वपह्नुतिः ।
नञा[2] च्छलादिशब्दैश्च सा शब्दान्तर[3]तस्त्रिधा ॥
स्याद्भेदाभेदतुलया[4] विच्छित्तिरुपमादिकः ।
रूपकादिस्त्वभेदांशे[5] मुख्ये[6] त्वारोपसंश्रयात् ॥

तामेव[7] सङ्गतिं विशदीकुर्वन् उत्प्रेक्षाप्रस्तावायाह-**एवमभेदप्राधान्य इत्यादि** । आरोपमूला रूपकादयो अपह्नुत्यन्ताः । अध्यवसायगर्भास्तु[8] उत्प्रेक्षादयः । अत[9]एव टीका—**तत्रेति**[10] । अध्यवसायगर्भेषु मध्ये[11] इत्यर्थः ।

अथ सूत्रम्—**अध्यवसाये व्यापारप्राधान्ये उत्प्रेक्षा** ॥ अध्यवसायो निश्चय-ज्ञानम् । स च लोके द्विरूपः सम्यगात्मा[12] मिथ्यारूपश्च । उभयरूपोऽप्ययं नालङ्कारः । नहि शुक्तिरिति सम्यगध्यवसाये रजतमिति मिथ्याध्यवसाये वा विच्छित्तिः[13] काचित् । उभय[14]विलक्षणस्तु जानतोऽप्येतस्मिन् तदेवेति योऽध्यासरूपस्स इहालङ्कारत्वेन परि-गृह्यते । तस्यैव [15]अलौकिकस्य विच्छित्तिरूपत्वात् ।

तस्य च द्वयी गतिः । कदाचिदध्यवसाया[16]त्मनः स्वरूपस्य प्राधान्यं, कदाचिद-ध्यवसितस्य विषयस्य । इत्थं च सत्यध्यवसाये विषयभूते यदा अध्यवसानस्य प्राधान्यं [17]तदोत्प्रेक्षाऽलङ्कार इति सूत्रार्थः[18] । तदेतदवयवशो व्याचष्टे—**विषयनिगरणेनेत्यादि** । निगरणं[19]निगलनम् । स्वरूपतोऽपलाप इत्यर्थः । [20]विषयं निगीर्णवतो विषयिणो विषयि-तादात्म्येन प्रतीतस्स इहाध्यवसायो अभिमत इति[21] यावत् । अनेनालौकिकस्यैवा-[22]

---

1. A's alt. C. शिखैव 2. A's alt. C. नसा 3. A. अन्तरस्त्र 4. A's alt. तुल्या 5. A's alt. आदिष्वभे C. आदिषु भे 6. A's alt. C. मुख्यैकारोपसंभवात् H. मुख्ये चारो 7. As' alt. D. E. F. H. एनां 8. D. गर्भोत्प्रे 9. A's alt. C. अतस्तट्टीका 10. A. D. तत्रति 11. D. E. मध्या 12. A's alt. C. सत्यात्मा 13. C. त्तिः इहालङ्कार 14. E. तदुभय··· 15. C. Omits अ 16. Except F all read वसानात्म 17. A repeats. तदोत्प्रेक्षा A's alt. C. H. तत्र 18. A's alt. C सूत्रात्तदे 19. A. निगरणनं 20. A's alt. D. E. येयं वि C. येयं 21. D. विषयाव 22. A. B. C. F. G omit एव ।

साध्यः सिद्धश्च । साध्यो यत्र विषयिणोऽसत्यतया प्रतीतिः असत्यत्वं च विषयिगतस्य धर्मस्य विषय उपनिबन्धे विषयिसंभवित्वेन च प्रतीतेः । धर्मो गुणक्रियारूपः तस्य संभवासंभवप्रतीतौ संभवाश्रयस्य तत्रापरमार्थतयासत्यत्वं प्रतीयते, इतरस्य तु परमार्थतया सत्यत्वम् । यस्यासत्यत्वं, तस्य सत्यत्वप्रतीतावध्यवसायः साध्यः । अतश्च व्यापारप्राधान्यम् । सिद्धो यत्र विषयिणो वस्तुतोऽसत्यस्यापि सत्यतया प्रतीतिः । सत्यत्वं च पूर्वकस्यासत्यत्व-

---

ध्यवसायस्य अलङ्कारबीजत्वं दर्शितम् । व्यापारप्राधान्यग्रहणस्य व्यावर्त्यमुद्घाटयितुमाह—**स च द्विविध इत्यादि**[1] । तत्र साध्यस्य[2] स्वरूपमाह—**साध्यो यत्रेत्यादि** । साध्य-इति [3]यदैकं वाक्यमाक्षिप्तेन[4] तच्छब्दे[5]नार्थेनाभिसंबन्धः । उत्तरवाक्यगतोऽपि यच्छब्दः पूर्व[6]वाक्या[7]च्छब्दोपादाननिरपेक्ष[8] एव तदर्थेन[9] सम्बन्ध[10]मीष्टे । यत्र[11] विषयिणोऽसत्यतया प्रतीतिः स[12] साध्य[13] इत्यर्थः । अत्रेदमनु[14]सन्धेयम् । मुखं मुखत्वेन जानन्नेव[15] यदा[16] नूनं चन्द्र इति संभावयति तदा विषयी चन्द्रो मुखत्वेनासत्यः प्रतिभाति तदाध्यवसायः साध्यः[17] ।

ननु साध्य एवास्तु अध्यवसायः सिद्धो वा, [18]अभेदप्रतीतौ कथमसत्यत्वं[19] इत्यत आह—**असत्यत्वं चेत्यादि** । विषयिगतस्य चन्द्रादिगतस्य माधुर्यादेः धर्मस्य[20] विषये, मुखादावुपनिबन्धे, नूनं चन्द्र इत्यस्यां दशायां विषयिण्येव[21] संभव[22]त्ययं विषये तु न संभवतीति प्रतीयमानत्वात्[23] । विषयविषयिणोरभेदस्फुरणेऽपि धर्मस्या[24]सत्यताप्रतीत्या न प्ररोहति । अतो[25]ऽध्यवसानव्यापारस्य साध्यता । ननु को धर्मः ? किंप्रमाणा चासौ[26] ? तदाश्रयस्य सत्यत्वासत्यत्व[27]प्रतीतिरित्यत आह—**धर्मो गुणक्रियारूपः**[28] इत्यादिना । गुणक्रिया[29]रूप इति धर्मस्य साकल्यकथनात् तदुभयमूलतया उत्प्रेक्षासंभ[30]वस्सूचितः । अस्य[31] हि धर्मस्य संभवोऽसंभवश्च विषय्या[32]श्रयतया संभवः [33]असंभवस्तु विषया[34]श्रयतया । इत्थं[35] च सति[26] सत्यत्वासत्यत्व[37]प्रतीतिर्न[38]प्रामाणिका । कुतः ? संभवाश्रयस्य तत्रावस्थायां परमार्थबुद्ध्यनुदयात् असत्यत्वं प्रतीयते । यतस्तदितरस्य तु [39]सत्यत्वमेव

---

1. H. आदि । अत्रेदं 2. D. ध्यस्वरू 3. A. यत्रैकं C. यत्रैक E. इयदैव एकं F. यदेवैकं 4. F. आक्षिप्यते 5. D. F. शब्दार्थेन 6. A. omits पूर्व 7. C. वाक्य F. वाक्ये 8. C. पेक्षण 9. D. तदनेन न 10. C. संबद्धुं 11. A C. यत्र यत्र 12. C. D. F. omit स. 13. C. साध्यत 14. H. इदमनु 15. H. न्नपि 16. F एव चन्द्रं चन्द्र इति 17. E यः इति । 18. A. C. E. H नाभेद 19. A D. F. H असदृशत्वं 20. A. धर्ममात्रस्य 21. Except D. E. all read विषयिणैव 22. C. भव इत्ययं 23. A. C. D. F. नूनं चन्द्र इत्यस्यां दशायां वि 24. A. असत्ता प्र D. स्यासत्यासत्यप्र H. असत्य 25. C. अतोऽस्याध्य 26. C. णाभासो 27. D. omits त्व 28. A. C. F. H. यादि 29. A. C. D. H. I. क्रियादि 30. A's alt. C. H. सञ्चित: 31. A. C. तस्य च 32. A's alt. C. विषयाश्र 33. C. अतस्संभ 34. A's alt. C. विषय्या 35. C. इयं 36. Omitted in D. 37. A's alt. C. त्वमप्राक 38. A. C. H. अप्राकरणिकात् 39. A. C. H. असत्य ।

निमित्तस्याभावात् । अतश्चाध्यवसितप्राधान्यम् । तत्र साध्यत्वप्रतीतौ व्यापारप्राधान्ये अध्यवसायः संभावनमभिमानस्तर्क ऊह उत्प्रेक्षेत्यादिशब्दैरुच्यते । तदेवमप्रकृतगतगुणक्रियाभिसंबन्धादप्रकृतत्वेन प्रकृतस्य संभावनमुत्प्रेक्षा । सा च वाच्या इवादिभिः प्रदर्श्यते । प्रतीयमानायां पुनरिवाद्यप्रयोगः । सा च जातिक्रियागुणद्रव्याणामप्रकृतानामध्यवसेयत्वेन चतुर्धा । प्रकृतस्यैतद्भेदयोगेऽपि न वैचित्र्यमिति न ते गणिताः । प्रत्येकं च भावाभावाभिमानरूपतया द्वैविध्येऽष्टविधत्वम् । भेदाष्टकस्य च प्रत्येकं निमित्तस्य गुणक्रियारूपत्वे षोडश भेदाः । तेषां च प्रत्येकं निमित्तस्योपादानानुपादानाभ्यां द्वात्रिंशत्प्रभेदाः तेषु च

---

[1]परमार्थत्वात्[2] । चर्चितमर्थं निष्कर्षयति[3]—**यस्यासत्यत्वमित्यादि** । **अतश्चेति** । यत इत्थमध्यवसायः साध्यः अतः[4] उत्प्रेक्षायामध्यवसाय[5]व्यापारस्यैव प्राधान्यमित्यर्थः ।

अथ सिद्धं विवेचयति—**सिद्धो यत्रेत्यादि**[6] । सिद्ध इति पूर्ववदेकं वाक्यम् । स इति द्योतितः[7] कोऽसावित्यत आह **यत्र विषयिणो वस्तुत इत्यादि** । यदा तु मुखमुद्दिश्य चन्द्रोऽयमिति प्रयोगः तदा[8] वस्तुतो[9]ऽसत्योऽपि[10] विषयी सत्यतया प्रतीयते । [11]सत्यत्वप्रतीतेर्हेतुमाह—**सत्यत्वं चेत्यादि** । संभवाश्रयस्य [12]अपरमार्थत्व[13]प्रतीतिरसत्यत्व[14]स्य निमित्तम् । यत इत्थमतश्चाध्य[15]वसितस्यार्थस्यैव प्राधान्यं, तदाऽतिशयोक्तिर्वक्ष्यते । यदा साध्यत्वप्रतीतिः तदाध्यवसायस्य पर्यायान्[16] व्युत्पादयति—**तत्र साध्यत्वेति** । [17]चर्चितलक्षणनिष्कर्षणम्[18]—**तदेवमित्यादि** ।

तस्यास्सामान्यतस्तावद्द्वैविध्यमाह—**सा च वाच्येत्यादि** । तत्रापि सामान्याच्चातुर्विध्यं दर्शयति—**सा च जातिक्रियेत्यादि** । अध्यवसे[19]यत्वेन संभाव्यत्वेन ।

नन्व[20]प्रकृतग्रहणं किम् ? प्रकृतेऽप्येवं संभवादित्यत आह— **प्रकृतस्यैतदित्यादि** । प्रकृतं हि लौ[21]किकं कविक्लृप्त[22] विच्छित्तिविधुरतया न वैचित्र्याय[23]। भेदचतुष्ट[24]यमपि द्विधा दर्शयति—**प्रत्येकं च भावाभावेत्यादि** । भावरूपा संभावना[25] [26]अभावरूपा[27]चेति । अयं व्यापारभेदा[28]द्भेदः । पूर्वं व्यापारवद्भेदात् व्यापारनिमित्तभेदादाह— **भेदाष्ट[29]कस्य चेत्यादि** । भेदषोडशकमपि निमित्तोपादानानुपादानाभ्यां द्विगुणयति—**तेषां[30]चेत्यादि** । अथ संभाव्यस्य हेत्वादि[31]रूपतया पुनस्त्रैविध्यमाह—**तेषु च प्रत्येकमित्यादि** । वा (च्यां)[32] निग-

---

1. A. C. H. अपरम 2. C. त्वाच्च । 3. F. कर्षति 4. D. अत्र 5. A. C. D. E. H. I. साय साध्यस्य व्यापा 6. H. इत्यादि तत्र तुल्ययोगितार्थं (see below under Tulyayogitā) 7. Except A. C. all read द्योतितं 8. C. तद्वस्तु 9. E. सत्यो 10. D. omits अपि 11. D. सत्यतः प्रतीयते हे 12. A. F. omit अ 13. A's alt. अर्थिका C. अर्थत्वाप्र D. E. अर्थताप्र 14. D. omits त्व 15. C. चाप्यवसित सार्थ 16. C. पर्यायाद्यत्पा D. पर्याया व्यु 17. E. चर्चितं 18. D. E. कर्षति । 19. A's alt. धेयत्वेन 20. D. अप्रस्तुत 21. A's alt. C. तार्किकं 22. A. C. F. H. क्लृप्ति 30. A.C.F. H. I. वैचित्र्यायाह । 24. D. चतुष्क 25. C. भावनात् 26. C. omits अ. 27. A. C. F. रूपा संभावनेत्यर्थः । अयं 28. A. C. F. भेदाभे 29. A. अष्टकं 30. D. तदेषां 31. A. C. F. हेतुत्वा 32. A. C. H. I. वाच्यन्नि D. F. वाच्यः निग ।

प्रत्येकं हेतुस्वरूपफलोत्प्रेक्षणरूपत्वेन षण्णवतिर्भेदाः । एषा गतिर्वाच्योत्प्रेक्षायाः । तत्रापि द्रव्यस्य प्रायः स्वरूपोत्प्रेक्षणमेवेति हेतुफलोत्प्रेक्षाभेदास्ततः पातनीयाः । प्रतीयमानायाश्च यद्यप्युद्देशत एतावन्तो भेदाः तथापि निमित्तस्यानुपादानं तस्यां न संभवतीति तैर्भेदैर्न्यूनोऽयं प्रकारः । इवाद्यनुपादाने निमित्तस्य चाकीर्तने उत्प्रेक्षणस्य निष्प्रमाणत्वात् । प्रायश्च स्वरूपोत्प्रेक्षात्र न संभवति । तदेवं प्रतीयमानोत्प्रेक्षाया यथासंभवं भेदनिर्देशः । एषा चार्था-

---

मयति[1]—**एषा गतिरित्यादि** । तत्रापोह्य अंशायाह—**तत्रापि द्रव्यस्येत्यादि** । पात[2]-नीयाः हाप[3]नीयाः । प्रतीयमानां विभक्तुमाह—**प्रतीयमानायाश्चेत्यादि** । उद्देशत एतावन्तः । लक्षणपरीक्षयोस्तु कृतयोः कतिचन हीयन्त इति भावः । ये हीयन्ते तान् प्रस्तौति—**तथापि निमित्तस्येत्यादि**[4] । तैरिति (निमित्ता[5])नुपादाननिबन्धनैः । अयं प्रकार इति प्रतीयमानोत्प्रेक्षाप्रकारः इत्यर्थः । निमित्तानुपादानं न संभवतीति यत्प्रतिज्ञातं तत्प्रमाणेन द्रढयति—**इवाद्यनुपादान इत्यादि** । इवा[6]द्यनुपादाननिमित्तकीर्तनयोरन्य[7]तराभावे न किञ्चित्प्रमाणमुत्प्रेक्षणे । अनुपात्तनिमि[8]त्तका हि या वाच्योत्प्रेक्षा[9] तस्याम् इवाद्युपादानबलादेवोत्प्रेक्षणप्रतीतिः । इह पुनरिवा[10]द्यनुपादानवन्ध्यायां[11] प्रतीयमानायां निमित्त[12]-बलादेवेति निमित्तोपादाननियमः । स्वरूपोत्प्रेक्षणमपि न संभवतीत्याह—**प्रायश्चे**[13]-**त्यादि** । प्रायोग्रहणात् पर्यायोक्तनयेन[14] स्वरूपस्य क्वचित्संभवदप्युत्प्रेक्षणं गम्यस्यापि भङ्ग्यन्तराभि[15]धानान्न निरूपणार्हमिति द्योतितम् । प्रतीयमानां[16] निगमयति—**तदेव**[17]**मिति** । यथासंभवं संभव[18]मनतिक्रम्य ।

तथा हि प्रतीयमानोत्प्रेक्षा तावत् वा[19]च्योत्प्रेक्षाप्रकृतिका । वाच्योत्प्रेक्षा [20]षण्णवतिधोद्दिष्टा । यथा जातिगुणक्रियाद्रव्याणाम् [21]उत्प्रेक्ष्यत्वेन चतस्र उत्प्रेक्षाः । जातयः[22] प्रतिस्वं चतुर्विंशतिधा प्रथन्ते । [23]यथा जात्युत्प्रेक्षा तावत् भावा[24]भावाभिमानरूपतया [25]द्विधा । द्विविधा[26]ऽपि गुणनिमित्तिका, क्रियानिमित्तिका च । इत्थं[27] चतुर्धा । साचो[28]पात्तनिमित्तानुपात्तनिमित्ता चेत्यष्टधा । अष्टविधाऽपि हेतुस्वरूपफलोत्प्रेक्षा[29]रूपतया त्रिविधा इति चतुर्विंशतिप्रकारा । अनेनैव नयेनान्यदप्युत्प्रेक्षा[30]त्रयं प्रत्येकं चतुर्विंशतिधा

---

1. A. C. गमयति— एषां परीक्ष 2. D. वात नानाः 3. D. हावनीयाः । 4. A. C. F. आदि निमि 5. All mss. निपातानु 6. A. C. इवाद्यन्यतरोपा F. द्रवाद्यनुपादान 7. D. अन्यत्वाभावे हि न 8. Except F all read निमित्तिका 9. Except F all read प्रेक्षा इह पुनः 10. A. C. D. E. H. I. उपादान 11. A's alt. दानबलादेव 12. C. निमित्त 13. A. C. चित्तेत्या A's alt. D. E. चेत्तेत्या 14. A. C. न क्वचि 15. A. C. E. F. अन्तरतोऽभि 16. A's alt. C. मानं 17. A. C. D. E. तदेतदिति F. तेवेदमित्यादि 18. C. वनमति 19. C. प्राच्यो 20. D. E. तु ष 21. A. C. प्रेक्ष्यतया F. प्रेक्षत्वेन 22. C. इति प्रति 23. D. याथा 24. D. omits भावा 25. Omitted. in D. 26. A. C. F. द्विधा 27. A. C. सा चतु 28. D. इत्थं चो 29. A. C. प्रेक्षणतया 30. D. प्रेक्षाश्रयं ।

अथापि धर्मविषये श्लिष्टशब्दहेतुका क्वचिद् दृश्यते । क्वचित्पदार्थान्वयवेलायां सादृश्याभिधानादुपक्रान्ताप्युपमा वाक्यार्थतात्पर्यसामर्थ्यादभिमन्तृव्यापारोपारोहक्रमेणोत्प्रेक्षायां पर्यवस्यति । क्वचिच्छलादिशब्दप्रयोगे सापह्नवोत्प्रेक्षा

मन्तव्यम् । तथा च[1] प्रत्येकं त्रिस्क[2]न्धिका एता हेतुस्वरूपफलोत्प्रेक्षणतया[3] स्कन्धत्रयमपि प्रतिस्वमष्टविधम् । तथा हि उपात्तगुणनिमित्ता[4] भावाभिमानरूपिणी[5] हेतुजात्युत्प्रेक्षा[6] । सैवानुपात्तगुणनिमित्ता । तथोपात्तक्रियानिमित्ता, सैवानुपात्तक्रियानिमित्ता [7]चेति भावाभिमानरूपतया चतुर्धा । एवमभावाभिमानरूपतया चतुर्धेति हेतूत्प्रेक्षास्कन्धो[8]ऽष्टविधः[9] । अनयैवरीत्या स्वरूपोत्प्रेक्षास्कन्धः फलोत्प्रेक्षास्कन्धश्च प्रतिस्वमष्ट[10]विधेति[11] जात्यु[12]त्प्रेक्षा[13] त्रिस्कन्धतया चतुर्विंशतिधा ।

एवं गुणक्रियाद्रव्योत्प्रेक्षा[14]ऽपि प्रत्येकं चतुर्विंशतिधा विज्ञेया[15] । तत्र द्रव्योत्प्रेक्षायां हेतुफलोत्प्रेक्षापाते[16] षोडशकहानिः[17] । अतः स्थूलदृशा तावत्[18] अशीतिविधा वाच्या[19] । प्रतीयमानायां[20] तु[21] अनुपात्तनिमित्ताया[22] निरवशेषं[23] पाते अष्टचत्वारिंशद्धानिः । उपात्तनिमित्तायां च स्वरूपो[24]त्प्रेक्षा[25]पाते षोडश[26]कहानिः । अतो द्वात्रिंशद्भेदाः प्रतीयमाना मन्तव्याः ।

उभयरूपाया[27]मपि अस्य वैचित्र्यान्तरायाह—**एषा चेत्यादि** । अर्थाश्रया[28]ऽपि अर्थालंकारोऽपीत्यर्थः । धर्मो[29] गुणक्रियात्मको[30] विषयो यस्य सः । श्लिष्टशब्दः कश्चिद्धेतुर्भवत्यस्याः । उत्प्रेक्षा ह्यर्थालङ्कारः । श्लेषः पुनरुभयालङ्कारोऽलङ्कारान्तरबाधकश्च । तथाऽपि धर्मविषये श्लिष्टशब्द[31]हेतुका संभवत्येषा न [32]बाध्यते, न चो[33]भयालङ्कारप्राप्तिरिति यावत् । यथेत्थं श्लेषमुत्प्रेक्षाङ्गं तथोपमा[34]ऽपि अङ्गमस्याः भवतीत्याह—**क्व[35]चित्पदार्थान्वयेत्यादि** । पदार्थसमन्वयदशायाम् उपम[36]योपक्रमः । तथोप[37]क्रान्ताऽप्युपमा[38] वाक्यार्थतात्पर्यपर्यालोचनमहिम्ना अभिमन्तु[39]स्संभावयितु[40]र्व्या[41]पारो[42]ऽपारोहक्रमेण

---

1. Omitted in A. C. 2. A's alt. स्कन्दि C. त्रिस्सन्धि 3. E. क्षण-रूपतया 4. D. त्ताति भावा 5. C. रूपण F. रूपिणीर्हेतु 6. F. प्रेक्षारूपतया स्कन्धत्रयमपि । सैव 7. A. C. omit च 8. A. स्कन्धे 9. A C. F. विधा 10. D. आष्टधेति 11. C. विधत्वेति 12. A's alt. ताद्युत्प्रे F. ह्युत्प्रे C. तस्योत्प्रेक्षा 13. A. C. E. F. H. I. प्रेक्षास्त्रि 14. A. प्रेक्षासा C. प्रेक्षा ⋯ ⋯ प्रत्ये 15. D. E. ज्ञेयाः 16. A. C. पाते स्थूल D. पाते अतः षोड 17. D. निः तदशीति 18. A. त षोडशकक्ष्या तथा अ F. त् षोडशकहानिः तदशी 19. D. प्राच्या 20. D. मानात्तु 21. A. C. F. न अनु. 22. A. C. या निपाते 23. D. शेषा 24. All except D read. त्रिरूप 25. E. प्रेक्षणपाते 26. D omits श 27. D. याऽपि 28. A. C. F. आश्रयोऽपि 29. A. C. धर्मा 30. A. D. F. आत्मका 31. C. शब्दाद्धेतु 32. A. C. E. F. H. I. न च 33. A. C. F. न तूभ 34. D. उपमाहि 35. D. तस्मिन्पद 36. A. C. उपमैवो A's alt. उपमाया F. उपमोप 37. A's alt. क्रमान्ता C. क्रमाङ्गा 38. D. उपमान 39. D. मन्त 40. D. भावयितुं 41. C. D. व्यापारोहणक्रमे 42. A. उपरोह ।

भवति । अतश्चोक्तवक्ष्यमाणप्रकारवैचित्र्येणानन्त्यमस्याः । सांप्रतं त्वियं दिङ्मात्रेणोदाह्रियते । तत्र जात्युत्प्रेक्षा यथा—

स वः पायादिन्दुर्नवबिसलताकोटिकुटिलः
स्मरारेर्यो मूर्ध्नि ज्वलनकपिशे भाति निहितः ।
स्रवन्मन्दाकिन्याः प्रतिदिवससिक्तेन पयसा
कपालेनोन्मुक्तः स्फटिकधवलेनाङ्कुर इव ॥

अत्राङ्कुरशब्दस्य जातिशब्दत्वाज्जातिरुत्प्रेक्ष्यते ।

क्रियोत्प्रेक्षा यथा—

लिम्पतीव तमोऽङ्गानि वर्षतीवाञ्जनं नभः ।

अत्र लेपनवर्षणक्रिये तमोनभोगतत्वेनोत्प्रेक्ष्येते । उत्तरे त्वध

संभावनव्यापारस्य प्रतीतिविश्रा[1]न्त्यन्तं उपर्युपरि प्रसर[2]परिपाट्या उत्प्रेक्षायां पर्यवस्यति । अथ अपह्नुतिप्रस्तावः[3] । उत्प्रेक्षाङ्गत्वेन[4] यदपह्नुतिः[5] प्रतिज्ञाता, तस्या अयमवसर इत्यभिप्रायेणाह—**क्वचिच्छलादि[6]** इत्यादि । इत्थं [7]ये प्रकाराः उक्ताः, ये च[8] वक्ष्यन्ते तेषां वैचित्र्यादस्या इयत्तैव नास्तीत्याह—**अतश्चोक्तवक्ष्यमाणेत्यादि** ।

ननु यद्यानन्त्यं कथमुदाहरणतो दर्शयिष्यते[9] इत्यत आह—**साम्प्रतं[10]त्वित्यादि** । **दिङ्मात्रेणेत्यादि** । यथा दिङ्मात्रेणोदाहृता अपि न्यायत[11]स्साकल्येन ज्ञातुं[12]शक्यते[13], तथेति यावत् । उद्देशक्रममाविश्चिकीर्षुराह—**तत्र जात्युत्प्रेक्षा यथेति** ।

स वः पायादिति । कुटिलत्वलक्षणो गुणो निमित्तम् । अंकुरशब्दो जातिवचनः । अत उपात्तगुणनिमि[14]त्तिका भावाभिमानरूपिणी जात्युत्प्रेक्षेयम् । तत्र यद्यपि स्वरूपमुत्प्रेक्ष्यते न तु हेतु[15]फले, अथाप्युद्देशक्रमविरोधात्सोंऽशो नोदा[16]जिही[17]र्षितः । एव[18]मुदाहरणेषूदाहर्तव्या [19]विशेषांशाः स्वयमनुसन्धेयाः । क्रमस्याविवक्षणात्[20] नास्माभिः प्रतिस्वं प्रतन्यन्ते[21] । अत्र जात्युत्प्रेक्षात्वं विविच्य दर्शयति—**अत्रांकुरेत्यादि[22]** ।

अथ क्रियोत्प्रेक्षा—**लिम्पतीवेत्यादि** । क्रियोत्प्रेक्षात्वं विवेचयति—**अत्र लेपनेत्यादि** । न च मन्तव्यं [23]वर्षणस्य नभःकर्तृ[24]कत्वात् न तमोगतत्व[25]मिति । नभसोऽपि तमसा[26]ऽधिष्ठितस्यैव वर्षणकर्तृ[27]कत्वसंभवादनेन परंपरायाताया अपि सम्भावनाया

---

1. D. श्रान्तमुप 2. A's alt. F. प्रतिभाप E. प्रसरण । 3. A. C. प्रस्तावादुत्पे D. E. प्रस्ताव 4. D. omits न । 5. D. अपह्नुति 6. Except E all read छलादित्या 7. D. प्रिये 8. D. omits. च 9. D. यिष्येत 10. D. प्रतमित्या 11. D. न्यायताः 12. D. न शक्य 13. C. शक्यन्ते 14. A. C. E. निमित्त 15. D. हृतेतु फ 16. A's alt. C. नोज्जिही । 17. F. हीर्षतः C. हीर्षितम् । 18. A's alt. C. भाव 19. A. C. F. हि शेषां 20. D. अविवक्षया 21. A. C. F. प्रतन्यते । 22. D इत्यादि । क्रियोत्प्रेक्षात्वं 23. D नर्षण 24. A. C. F. omit क 25. A's alt. C omit त्व 26. A. C. तमोऽधि D. तमसोऽधि 27. A's alt. omits क ।

"असत्पुरुषसेवेव दृष्टिर्निष्फलतां गता" ॥ इत्यत्रोपमैव, नोत्प्रेक्षा । गुणोत्प्रेक्षा यथा—

सैषा स्थली यत्र विचिन्वता त्वां भ्रष्टं मया नूपुरमेकमुर्व्याम् ।
अदृश्यत त्वच्चरणारविन्दविश्लेषदुःखादिव बद्धमौनम् ॥

अत्र दुःखं गुणः । द्रव्योत्प्रेक्षा यथा—

पातालमेतन्नयनोत्सवेन विलोक्य शून्यं मृगलाञ्छनेन ।
इहाङ्गनाभिः स्वमुखच्छलेन कृताम्बरे चन्द्रमयीव सृष्टिः ॥

अत्र चन्द्रस्यैकत्वाद् द्रव्यत्वम् । एतानि भावाभिमाने उदाहरणानि ।

अभावाभिमाने यथा—

कपोलफलकावस्याः कष्टं भूत्वा तथाविधौ ।
अपश्यन्ताविवान्योन्यमीदृक्षां क्षामतां गतौ ॥

उत्प्रेक्षात्वं द्योतितम्[1] । ननूत्तरार्धानुदाहरणे को हेतुरित्यत आह—**उत्तरेत्वित्यादि । उपमैव नोत्प्रेक्षेति ।** अत्रैत[2]दुपह्वरम्— उपमानांशश्चेल्लोकतः सिद्धस्तदोप[3]मैव द्वयोस्सिद्धत्वादिवशब्दः साधर्म्यद्योतकः । [4]यदा तु कविकल्पितः तदोत्प्रक्षैव । उपमानस्य [5]लोकतो [6]ऽसंभवादिवशब्दः संभावनां द्योतयति यतः । अत्रावान्तरश्लोकौ—

यदा[7]यमु[8]पमानांशो लोकतस्सिद्धि[9]मृच्छति ।
तदोपमैव येनेव[10]शब्दः साधर्म्यसूचकः[11] ॥
यदा पुनरयं लोकादसिद्धः[12] कविकल्पितः[13] ।
तदोत्प्रेक्षैव येनेवशब्दस्संभावनापरः[14] ॥ इति ॥

अथ गुणो[15]त्प्रेक्षा—**सैषा[16]स्थलीति**[17] । इयं [18]प्रतिष्ठमानस्य दाशरथेः सीतां प्रत्युक्तिः[19] । गुणोत्प्रेक्षा[20]त्वं दर्शयति[21]—**दुःखं[22] गुण इति ।**

अथ द्रव्योत्प्रेक्षा—**पातालमेतदिति ।** द्रव्यत्वं दर्शयति—**चन्द्रस्येत्यादि ।** उदाहरणचतुष्केऽपि अनुगतं विशेषम् उद्घाटयति—**एतानि[23] भावाभिमान इत्यादि ।**

अथाभावाभिमाने—**कपोलफलकाविति ।** कष्टं[24] कृच्छ्रात् । तथाविधाविति । परस्पर[26]-स्वानुभवैकसमधिगम्यो रमणीया[25]तिशयो द्योत्यते । क्षामतागमनं नैसर्गिकम् । परस्पर-दर्शनाभावो हेतुत्वेनोत्प्रेक्ष्यते[27] । [28]अत एवाभावाभिमानरूपना । तदेतद्दर्शयति—**अत्राप-**

---

1. D. द्योतितः 2. D. अत्रेति । तदु 3. C. तदेव उप 4. D. F. यतः य 5. D. लोकतोस्सं 6. E. तत्संभा 7. F. यदासावुप 8. D. यदुप 9. D. सिद्ध 10. D. एनैव 11. D. सूचकं 12. D. सिद्धं 13. D. कल्पितं 14. D. परं 15. D. उक्तोत्प्रे 16. A. C. एषा 17. F. repeats इति 18. A's alt. C. D. E. प्रतिप्रतिष्ठ 19. D. उक्ति 20. A. F. प्रेक्षां सन्दर्श 21. D. दर्शयति । एते भावा 22. A. C. D. दुःख 23. A. C. F. एते 24. D. कथं 25. D. रमणीतानि 26. D. परा 27. प्रेक्ष्यन्ते 28. All except E omit अ ।

अत्रापश्यन्ताविति क्रियाया अभावाभिमानः । एवं जात्यादावप्यूह्यम् । गुणस्य निमित्तत्वं यथा—"नवबिसलताकोटिकुटिलः" इत्यत्रोदाहृते कुटिलत्वस्य । क्रियाया यथा—"ईदृक्षां क्षामतां गतौ" इत्यत्र क्षामतागमनस्य । एते निमित्तोपादानस्योदाहरणे । अनुपादाने "लिम्पतीव तमोऽङ्गानि" इत्याद्युदाहरणम् । हेतूत्प्रेक्षा यथा—"विश्लेषदुःखादिव बद्धमौनम्" इत्यादौ । स्वरूपोत्प्रेक्षा यथा—

कुबेरजुष्टां दिशमुष्णरश्मौ गन्तुं प्रवृत्ते समयं विलङ्घ्य ।

श्यन्ता[1]वितीत्यादि[2] । न्या[3]यस्य सुज्ञानत्वात् । स्थालीपुलाकन्यायेनोदाहरणमात्रमिति न व्युत्क्रमदोषः शङ्क[4]नीयः । क्रमा[5]पेक्षया तु जात्या[6]द्युत्प्रेक्षापुरस्कारेणोदाह[7]र्तव्यम् । [8]तदेतदभिसन्धायाह—एवं जात्यादा[9]वप्यूह्यमिति । इत्थं जात्यादि[10]चतुष्कम् [11]अभावाभिमानरूपतयोदाहृतम् ।

अथ भेदाष्टकस्य गुणक्रियानिमित्ततोदाहर्तव्या । तत्र गुणनिमित्तकत्वेनोदाजिहीर्षुराह—नवबिसलतेत्यादि । तद्विवेचित[12]चरम्[13] । एवं गुणनिमित्तकत्वं क्रियाद्युत्प्रेक्षात्रये स्फुटतरत्वादुदाहरणनिरपेक्ष[14]मि[15]त्यभिसन्धाय क्रियानिमित्त[16]कत्वेनोदाहरति—[17]ईदृक्षामित्यादि[18] । क्षामता[19]गमनलक्षणक्रिया[20]द्य दर्शनोत्प्रेक्षाया निमित्तम्[21] । इयता षोडशकमुदाहृतं मन्तव्यम् । अथ निमित्तोपादानानुपादानाभ्यां षोडशकस्य यद्द्वैविध्यं प्रतिज्ञातं तत्र निमित्तोपादानस्य समनन्तरो[22]दाहरणान्येवोदाहरणत्वेन दर्शयति—एते निमित्तेत्यादि । कुटिलत्व[23]क्षामतागमन[24]योरुपादानादनुपादानमप्युदाहृतेष्वेव दर्शयति - लिपतीवेत्यादि । अत्र[25]लेपनादित्वेन संभावने व्या[26]पनादि निमित्तं नोपात्तम् । इयता द्वात्रिंशद्भेदा उदाहृताः ।

अथ द्वात्रिंशद्धेतु[27]फलस्वरूपात्मकतया त्रिधोदाहर्तव्या । तत्र हेतुरूप[28]तयोदाहरति—विश्लेषदुःखादिवेत्यादि । अत्र दुःखगुणो हेतुत्वेनोत्प्रेक्षितः[29] । इत्थं जातिक्रिये हेतुत्वेनावगन्तव्ये । [30]द्रव्योत्प्रेक्षायां [31]तदभावात् तन्निबन्धनम् अष्टकं पातनीयम् । अथ स्वरूपतयोदाहरति—कुबेरजुष्टामित्यादि । [32]जुष्टां सेविताम्[33] । कुबेरजुष्टा दि[34]गुदीची,

---

1. C. न्तावित्यादि 2. D. E. आदिना 3. E. नाय 4. D. षः कनीयं 5. D. क्रमो 6. All except E जात्युत्प्रे 7. A. C. F. हर्तव्यः, 8. A. C. यदे 9. A. C. आदावूह्य D. आदावभ्यू 10. D. आदि तद्विवेचित 11. Except F. all omit अ । 12. D. परं 13. E. इति । ए 14. D. पेक्षत्व मि 15. E. omits इति 16. All except D. omit क 17. A. द्रक्षा 18. D. आदि द्वैविध्यं 19. A's alt. C. भजन 20. A. क्रियास्य 21. C. त्तये ता 22. Except E all read. रोदाहरणत्वेन द 23. D. omits त्व 24. A's alt. C. गमनादानादनु 25. A's alt. C. व्यपना 26. A's alt. C. लेपनादि 27. A. हेतु [व]—त्व (स्व) रूप फलात्म C. हेतुं……पफल 28. D. तदोदा 29. D. प्रेक्षितं 30. D. तद्द्रव्यो E. अत्र 31. A. C. नाभावात् A's alt. D. F. तदन्तर्भावात् 32. D. E. जुष्टा 33. D. E. सेविता । 34.A. C. F. omit दिक् ।

दिग्दक्षिणा गन्धवहं मुखेन व्यलीकनिःश्वासमिवोत्ससर्ज ॥

फलोत्प्रेक्षा यथा—

चोलस्य यद्भीतिपलायितस्य भालत्वचं कण्टकिनो वनान्ताः ।
अद्यापि किं वानुभविष्यतीति व्यपाटयन्द्रष्टुमिवाक्षराणि ॥

एवं वाच्योत्प्रेक्षाया उदाहरणदिग्दत्ता । प्रतीयमानोत्प्रेक्षा यथा—

महिलासहस्सभरिए तुह हिअए सुहअ ! सा अमाअन्ती ।
दिअहं अणण्णअम्मा अङ्गं तणुअंपि तणुएइ ॥ इति ।

'अमा अन्ती' इत्यत्रावर्तमानेवेति तनूकरणहेतुत्वेनोत्प्रेक्षितम् । एवं भेदान्तरेष्वपि ज्ञेयम् । श्लिष्टशब्दहेतुका यथा—

सा प्रतिनायिकात्वेनानुसन्धीयते । समय एक[1]दर्तुविशेषः । अन्यदा[2]त्वनन्यत्र गमनलक्षणः संकेतः । दक्षिणस्यां दिशि[3] नायिकात्वमनुसन्धीयते । व्यलीकम् अपराधः[4] । अत्र[5] निश्वासस्य स्वरूपमेवोत्प्रेक्ष्यं, न तु हेतुः फलं वा । इत्थं गुणोत्प्रेक्षादित्रये स्वरूपात्मकत्वं ज्ञेयम् ।

अथ फलोत्प्रेक्षा—**चोलस्येत्यादि** । अत्र दर्शनक्रिया[6] विपाटनफलत्वेनोत्प्रेक्ष्यते । इत्थं जातिगुणयोरपि फलत्वमनुसन्धेयम् । द्रव्योत्प्रेक्षा[7]यां हेतुफलासंभवात् तन्निबन्धनं षोडशकं पातनीयम् । इत्थ[8]मशीतिविधाऽपि वाच्योत्प्रेक्षा साकल्येनो[9]दाहृतकल्पैव[10] । तदेतन्निगमयन्नाह—**एवं वाच्योत्प्रेक्षाया[11] इत्यादि[12]** ।

अथ प्रतीयमाना परिपाट्योदाह्रियते—**महिलासह[13]स्सेत्या[14]दिना** ।

महिलासहस्रभरिते[15] तव[16]हृदये[17]सुभग ! सा अमान्ती ।
[18]दिव[19]समनन्यकर्मा[20] अङ्गं[21] तन्वपि[22] तनयति[23] ॥

दिवसमित्य[24]त्यन्तसंयोगे द्वितीया । प्रतीयमानामुत्प्रेक्षामुद्घाटयति—**अमा (अ[25]) न्तीत्यत्रेत्यादिना** । न्याय[26]स्य [27]सु[28]ज्ञानत्वात् विस्तर[29]भीरु[30]राह—**एवं भेदान्तरेष्विति** । अर्थाश्रयाऽपि धर्मविषये श्लिष्ट[31]शब्दहेतुका संभवतीति योद्दिष्टा तामुदाहरति—

---

1. C. एकः दर्त्तु D. दत्तु E. दत्व 2. A. C. F. अन्यत्र 3. C. दिशिः, 4. C. रागं 5. D. E. हि 6. D. क्रियापि पाट A. C. F. या हि पाट 7. D. प्रेक्षाया 8. A. C. F. आकूतं वा वाच्यो D. अशीति वाच्यो 9. C. नोत्प्रेक्षादा 10. A. C. F. कल्पा भवति । 11. All except E omit या 12. Omitted in D. E. 13. सहंस्से 14. D. इत्यादि । 15. A. भरितेति च हृ 16. Omitted in C. 17. C. ते सु A's alt. हृदयेन्त 18. A's alt. दिश्यमन 19. C. दिवसन्न न्यकम्मा 20. D. कर्म 21. C. अङ्ग 22. Omitted in A's alt. C. 23.. A's alt. हान C. हन 24. D. omits इति । 25. All mss. omit अ. 26. C. न्याय्यस्य 27. D. E. इह 28. C. संज्ञानत्वा वि 29. D. विस्तार 30. A. C. भीरुत्वाद्रुरु 31. D श्लिष्टहेतु ।

अनन्यसामान्यतया प्रसिद्धस्त्यागीति गीतो जगतीतले यः ।
अभूदहंपूर्विकया गतानामतीव भूमिः स्मरमार्गणानाम् ॥

अत्र धर्मविषये मार्गणशब्दः श्लिष्टः । उपमोपक्रमोत्प्रेक्षा यथा—

कस्तूरीतिलकन्ति भालफलके देव्या मुखाम्भोरुहे
रोलम्बन्ति तमालबालमुकुलोत्तंसन्ति मौलावपि ।
याः कर्णे विकचोत्पलन्ति कुचयोरङ्के च कालागुरु-
स्थासन्ति प्रथयन्तु तास्तव शिवं श्रीकण्ठकण्ठत्विषः ॥

अत्र यद्यपि "सर्वप्रातिपदिकेभ्यः क्विबित्येके" इत्युपमानात् क्विब्विधावामुखे उपमा प्रतीतिः, तथाप्युपमानस्य प्रकृते संभवौचित्यात्संभावनोत्थाने उत्प्रेक्षायां पर्यवसानम् । यथा वा विरहवर्णने "केयूरायितमङ्गदैः" इत्यादौ ।

श्लिष्टशब्देत्यादि[1] । अनन्येति । प्रसिद्ध[2]स्त्यागीति [3]गानप्रकारः । मार्गणाश्शराः याचकाश्च । लक्ष्ययोजनायाह—अत्र धर्म[4]विषय इति । मार्गणविषयीभावो धर्मः संभावनांश एव प्रतीतिवि[5]श्रान्तेः श्लेषो[6] नोत्प्रेक्षाबाधकः[7] । कस्तूरीति । रोलम्बा[8] भृङ्गाः । अङ्कः[9] पर्यन्तः[10] । स्थासक[11]श्चर्चिका[12] । उपमोपक्रमतामुपपादयति—अत्र[13] यद्यपीत्यादि । "सर्वप्रातिपदिकेभ्य उपमानार्थे[14] क्विप् इत्येके आचार्या" इति सूत्रार्थः[15] । अत्र क्विपो माहात्म्या[16]दुपमा प्रतीताऽपि[17] संभावनायां पर्यवस्यतीति । कण्ठत्विषां तिलकादिरूपत्वनियमासिद्धेः तिलकादिरूपताऽपि[18] कदाचित्स्यादुपमानांशे संभावनाप्राणत्वमेव नतु वास्तवत्वम् । अत उत्प्रेक्षायां पर्यवसानम् । तदिदमभिसन्धायाह—तथाऽप्युपमानस्येत्यादि[19] । उपमानस्य तिलकादेः प्रकृते कण्ठत्विड्रूपे[20] संभवौचित्यात् संभावनमात्रस्योचितत्वात् । संभावनस्योत्थाने उत्प्रेक्षणस्योदयात्[21] । अथोपमार्थकप्रत्ययान्तरप्रयोगेऽपि उपमोपक्रमत्वं[22] दर्शयितुमाह—यथा वेत्यादि[23] ।

केयूरायितमित्यत्रापि हि[24].क्यङो[25] माहात्म्यादुपमा प्रतीतिरङ्गदादेः[26] । केयूरादिवदाचरणे[27] नियमाभावात् तथात्वसंभावनायाम् उत्प्रेक्षैव पर्यवस्यति । अथोपमानांशस्य वस्तुतोऽसिद्धस्य कविकल्पनायातत्वे सर्वैवोपमा (प्रतिपादक[28])शब्दमाहात्म्यादामुखे प्रतीताऽप्युत्प्रेक्षात्वेन पर्यवस्यतीत्यभिसन्धायाह—एषा [29]चेत्यादि । अप्रपञ्चने हेतुमाह—इह त्विति ।

---

1. A. C. D. F. H. I. आदि । प्र 2. D. सिद्धस्था 3. A. F. ति गीतिः गान 4. A. C. F. धनुर्वि 5. C. अन्तः । 6. D. श्लेषा 7. A. C. साधकः, 8. A. C. रोलम्बो 9. D. अंक 10. D. पर्युतः । 11. C. स्थासच्च E omits क 12. C. चर्चाकाः 13. Omitted in A. C. F. 14. E. F. अर्थेभ्यः 15. E. अर्थाः । 16. A. F माहात्म्यं 17. A, C. प्रतीतावपि 18. A. C. omit. अपि 19. F. इति 20. A. C. F. रूप 21. D. E. उदये 22. C. क्रमं द 23. C. चेत्यादि D. त्वेत्या 24. C. पि कर्म हि··· हात्म्य D. एक्यन्दो 25. A. क्यन्दो 26. A. C. अङ्गादेः A's alt. F. अङ्गलीयकादेः 27. A. C. आभरणे । 28. All mss. read प्रातिपदिक 29. A. F. एष

एषा च समस्तोपमाप्रतिपादकविषयेऽपि हर्षचरितवार्तिके साहित्यमीमांसायां च तेषु तेषु प्रदेशेषूदाहृता इह तु ग्रन्थविस्तरभयान्न प्रपञ्चिता। सापह्नवोत्प्रेक्षा यथा—

गतासु तीरं तिमिघट्टनेन ससंभ्रमं पौरविलासिनीषु।
यत्रोल्लसत्फेनततिच्छलेन मुक्ताट्टहासेव विभाति सिप्रा॥

अत्रेवशब्दमाहात्म्यात्संभावनं छलशब्दप्रयोगाच्चापह्नवोऽवगम्यते। एवं छद्मादिशब्दप्रयोगेऽपि ज्ञेयम्। "अपर इव पाकशासनः" इत्यादावपरशब्दाप्रयोगे तूपमैवेयम्। तत्प्रयोगे तु प्रकृतस्य राज्ञः पाकशासनत्वप्रतीतावध्यवसायसंभवादिवशब्देन च तस्य साध्यत्वप्रतीतेरुत्प्रेक्षैवेयम्। इव शब्दाप्रयोगे सिद्धत्वादध्यवसायस्यातिशयोक्तिः। इवापरशब्दयोरप्रयोगे तु रूपकम्। तदेवं प्रकारवैचित्र्येणावस्थितायामुत्प्रेक्षायां हेतूत्प्रेक्षायां यस्य प्रकृतसंबन्धिनो

गतासु तीरमिति। [1]ससंभ्रमा[2] गतिः फेनोल्लासहेतुः। अत्रेवशब्दादट्टहासस्य संभाव्यता। यत्तु **व्यक्तिविवेककृदीदृशि** विषये मन्यते—"इवादिशब्दैरेव प्रकृता[3]र्थस्यासत्त्वप्रतीतेः छलादिशब्दाः पुनरुक्ता" इति तत्[4] मन्दम्। न खल्वीदृशि विषये छलादिशब्दा[5]प्रयोगेऽपि प्रकृतार्थस्यासत्यता गम्यते। अपि तु उत्प्रेक्षां[6] प्रति हेतुभाव एव। यथा अत्रैव[7] "फेनपरंपराभि"रिति पाठे। अतस्सापह्नव[8]त्वलक्षणमुत्प्रेक्षावैचित्र्यं[9] छलादिप्रयोगैकशरणम्[10]। तदेतदभिसन्धायाह—**अत्रेवशब्देत्यादि**।

अथोत्प्रेक्षाया एव प्रपञ्चनार्थं तत्तदलङ्कारबीजभूत[11]तत्तत्पदावापोद्धा[12]राभ्याम् अलङ्कारवैचित्र्यमाविर्भवतीति व्युत्पादयति—**अपर इवेत्यादिना**। अपरशब्दाप्रयोगे[13]ऽपि पाकशासनः सिद्धतया प्रतीयत इत्युपमैव। तत्प्रयोगे तु प्रकृतो राजैव अपरपाकशासनत्वेनाध्यवसीयते। इवशब्दाच्चाध्यवसानस्य साध्यतेत्युत्प्रेक्षैव। इव[14]शब्दापोहे त्वपरपाकशासनत्वं सिद्धतया प्रतीयत इत्यतिशयोक्तिः। इवापरशब्दयोः द्वयो[15]रप्यपोहे रूपकभेदप्राधान्यप्रतीतेः। इत्थं[16] नानावैचित्र्यनिर्भरायामस्यां कुत्रचिदंशे[17] नियमेन वाच्यता, कुत्र[18]चित्तु[19] कामचारः इति व्युत्पिपादयिषुर्हेतूत्प्रेक्षां तावत् व्युत्पादयति—**तदेवंप्रकारेत्यादिना**। प्रकृतसंबन्धिनः उपमेयसंबन्धिनः। यस्य धर्मस्य हेतुरुत्प्रेक्ष्यते, स धर्मोऽध्यव[20]सायवशात् अभेदोपचरणवशात् अभिन्न उत्प्रेक्षानिमित्तमा[21]श्रीयते [22]नियमेन [23]वाच्यो

---

1 A's alt. C. D. E. F. H, I. सविभ्र 2. D. E. भ्रम 3. A. C. F. कृतस्य 4. Omitted in D. 5. E. F. शब्दस्याप्र 6. C. D. प्रेक्षायां 7. A. F. तत्रैव 8. A. C. ह्नश्च्छल पत्नमुत्प्रे 9. A. C. F. चित्र्यात् 10. C 'शरणा' 11. A's alt. C. तत्व भावा वापो 12. D. उत्तारमलं 13. D. इति E. हि 14. Omitted in A. C. F. 15. A. C. omit द्वयोः 16. A. C. F. इत्थं वैचि 17. A. C. F. चिद्भेदां 18. A's alt. क्वचित् 19. All except E. omit. तु 20. D. वासवशा 21. C. आश्रयते 22. D. E. ते उपमानधर्मेण सहभेद त्यागेनैव उत्प्रेक्षाहेतुतया आश्रीयते। नियम 23. D. E. H. I. चवाच्यो

धर्मस्य हेतुरुत्प्रेक्ष्यते, स धर्मोऽध्यवसायवशादभिन्न उत्प्रेक्षायां निमित्तत्वेनाश्रीयते। स च वाच्य एव नियमेन भवति। अन्यथा कं प्रति हेतुः स्यात्। यथा— "अपश्यन्त्याविवान्योन्यम्" इत्यादौ। अत्र कपोलयोः प्रकृतयोः संबन्धित्वेनोपात्तस्य क्षामतागमनस्य हेतुरदर्शनमुत्प्रेक्षितम्। हेतुफलं च क्षामतागमनं तत्र निमित्तम्। एवं "अदृश्यत त्वच्चरणारविन्दविश्लेषदुःखादिव बद्धमौनम्"। इत्यत्र नूपुरगतस्य मौनित्वस्य यो हेतुर्दुःखित्वं तदुत्प्रेक्षणे मौनित्वमेव निमित्तं ज्ञेयम्। एवं सर्वत्र।

स्वरूपोत्प्रेक्षायां यत्र धर्मी धर्म्यन्तरगतत्वेनोत्प्रेक्ष्यते तत्रापि निमित्त-

---

भवति। अस्योपमानधर्मेण सहाभेदाश्रयणं वाच्यत्वं वेति[1] नियमद्वयमनुसन्धेयम्। यदैवं न स्यात् तदोत्प्रेक्षमाणो हेतुरभित्तिकमेव चित्रं स्यादित्याह[2]—**अन्यथा कं प्रतीति**। तामिमां [3]व्यवस्थामुदाहरणतो हृदयं [4]गमयति—**यथा अपश्यन्त्या[5]वित्यादिना**। अत्र कपोलौ प्रकृतौ तत्संबन्धी धर्मः क्षामता [6]तद्धेतुत्वेन दर्शनमुत्प्रेक्षितम्। तदुत्प्रेक्षणे च न केवला कपोलक्षामता निमित्तम्, अपि तु लोके परस्पर[7]मद्रष्ट्रोर्या क्षामता[8] तदभिन्नत्वेनाध्यवसिता सैवं चोत्प्रेक्षिता [9]दर्शनलक्षणस्य हेतोः फलम्। तदिदमभिसन्धायाह— **अत्र कपोलयोरित्यादि**। तच्च[10] भिन्नमिति फलदशायाम् अभेदेनाध्यवसीयत[11] इत्यर्थः। अदर्शनं प्रत्य[12]प्रकृतैव हि क्षामता फलं, तत्र निमित्तं हेतूत्प्रेक्षणे प्रयोजकम्[13]। परस्परमद्र[14]ष्ट्रोर्यत्क्षाभतागमनं तेन सहाभेदेनाध्यवसितमित्यर्थः। इयमभावाभिमान[15]रूपक्रियालक्षण हेतूत्प्रेक्षा। एवं भावाभिमानरूपलक्षणहेतूत्प्रेक्षायामपि न्यायस्समान[16] इत्याह— **एवम[17]दृश्यतेत्यादिना**। अत्रापि हि नूपुरगतमौनित्वस्य हेतुत्वेन दुःखमुत्प्रेक्षितम्। तदुत्प्रेक्षणे च लौकिकदुःखमौनित्वाभेदेनाध्यवसितं[18] नूपुरमौनित्वमेव निमित्तं [19]दुःखोत्प्रेक्षणफलं च। इयं प्रक्रिया सर्वत्रैव हेतूत्प्रेक्षायामेकरूपेत्याह—**एवं सर्वत्रेति**।

अथ स्वरूपोत्प्रेक्षायां[20] क्वचिद्धर्मी धर्म्यन्तरगतत्वेनाध्यवसीयते। क्वचित्तु[21] धर्म एव धर्म्यन्तरगतत्वेन। तत्रोभयत्रापि निमित्तांशः कदाचिद्वाच्यो भवति। कदाचित्तु नेति[22] विवेचयितुमारभते—**स्वरूपोत्प्रेक्षायां यत्र धर्मीत्यादिना। स वः पायादित्यादि**। अत्रेन्दु[23]कलाकपालांकुरयोः साधर्म्यस्यासिद्धत्वात्। कुटिलत्व[24]लक्षणस्य[25] शब्देनोपादानम्,[26]

---

1. D. E चेति। 2. F इत्यत 3. C अवस्थां 4. A's alt C अङ्गीकरोति D. E गमीकरोति. 5. E ताविवे 6. C तथ्ये तु 7. C. D. E. F. H. I अदृष्टोः 8. D क्षम 9. A. C. तस्य ल 10. D. E विभिन्न 11. E ते किन्तु उपमान धर्मत्वाद्विभिन्न इ 12. A. C. F कृतैः एव नाम D कृतै ते भिक्षाम 13. A. F योजनं C. योजन परं D कम्। इयमभावा 14. D. E. H. I दृष्टो C अदृष्टच्युक्षा 15. E मानलक्ष 16. A. C. D. F सम 17. A. C मेतदित्या 18. D सित 19. C मुख 20. C. प्रेक्षायाः F प्रेक्षायां यत्र धर्मी 21. A. C omit तु 22. D. E त्तु गम्यमानेति। 23. D अत्रेषु 24. E. repeats लत्व 25. E लक्षणात्व 26. A. C दाने।

भूतो धर्मः क्वचिन्निर्दिश्यते । यथा—"स वः पायादिन्दुः" इत्यादौ । अत्र कुटिलत्वं निर्दिष्टमेव । "वेलेव रागसागरस्य" इत्यादौ तु संक्षोभकारित्वादि गम्यमानम् । यत्र च धर्म एव धर्मिगतत्वेनोत्प्रेक्ष्यते तत्रापि निमित्तस्योपादानानुपादानाभ्यां द्वैविध्यम् । उपादाने यथा—

प्राप्याभिषेकमेतस्मिन्प्रतितिष्ठासति द्विषाम् ।
चकम्पे *लोप्यमानाज्ञा भयविह्वलितेव भूः ॥

अत्र भूगतत्वेन भयविह्वलितत्वाख्यधर्मोत्प्रेक्षायां कम्पादिनिमित्तमुपात्तम् । अनुपादाने यथा—"लिम्पतीव तमोऽङ्गानि" इत्यादि । अत्र तमोगतत्वेन लेपनक्रियाकर्तृत्वोत्प्रेक्षायां व्यापनादिनिमित्तं गम्यमानम् । व्यापनादौ तूत्प्रेक्षाविषये निमित्तमन्यदन्वेष्यं स्यात् । न च विषयस्य गम्यमानत्वं युक्तम् । तस्योत्प्रेक्षिताधारत्वेन प्रस्तुतस्याभिधातुमुचितत्वात् । तस्माद्यथोक्तमेव साधु ।

"वेलेव रागसागरस्ये" त्यत्र तु संक्षोभकारितायाः प्रसिद्धत्वादनुपादानम् । अथ धर्मस्य धर्मिगतत्वेनाध्यवसाने निमित्तोपादानानुपादाने दर्शयति—**यत्र च**[1]**धर्म एवेत्यादि । प्राप्याभिषेकमिति ।** द्विषां भूरिति समन्वयः । अत्र धर्मिणि धर्म[2]संभावनं, निमित्तोपादानञ्च विवेचयति—**अत्र भूगतत्वेनेत्यादि । लिम्पतीवेति ।** निमित्तानु[3]पादानं विवेचयति—**अत्र तमोगतेत्यादि ।** ननु धर्मे धर्मो[4]त्प्रेक्षणवैचित्र्याय व्यापने लेपनमुत्प्रेक्ष्यतामित्यत आह[5]—**व्यापनादौ त्विति । निमित्तमन्यदन्वेष्यं स्यादिति ।** यथा लेपनोत्प्रेक्षणे व्यापनं निमित्तत्वेन[6] गम्यते, न हि तथा व्यापनोत्प्रेक्षणे निमित्तमन्यदवगम्यते । अतोऽनवगतस्य[7] कल्पनमवगतस्य परित्याग इति दोषद्वयमापतेदिति भावः । दोषान्तरमप्युद्भावयति—**न च विषयस्येति ।** यदि व्यापनमेव उत्प्रेक्षण[8]विषयः न हि तस्य गम्यमानता युक्ता । तत्र हेतुः—**तस्योत्प्रेक्षिताधारत्वेनेति ।** उत्प्रेक्षितम् उत्प्रेक्षिणं, तदाधारत्वेनाभिधातु[9], प्रस्तुतस्याभिधातुमेवोचितत्वात् । अतो लेपनमेवोत्प्रेक्ष्यमिति निगमयति— **तस्माद्यथोक्तमेवेति ।**

---

1. Omitted in E. 2. A. C D. F. H. I समारोपं 3. A's alt C. D. त्तोपादानं 4. F धर्मसंभावन 5 A. repeats ननु ...... अताह 6. A. F. त्वेऽनुगम्य 7. C. D गतस्य परित्याग 8. C. प्रेक्षा D प्रेक्ष 9. C धानं ।

* The reading लोप्यमानाज्ञा adopted here is according to the T. S. S. edition, though unwarranted by the Sañjīvanī. The N.S. edition reads लोक्यमानास्ताः which conveys no sense in the context. Appayya Dīkṣita quotes the same verse in his Citramīmaṃsā (p. 92) with the reading लोक्यमानार्थे । The manuscript of the Sarvasva in Telugu (D. 12797) in the Government Oriental manuscripts library, Madras has लोड्यमानार्था while that in Malayalam in the Adyar Library (68530) has लोक्यमानाज्ञा.

फलोत्प्रेक्षायां यदेव तस्य कारणं तदेव निमित्तम्। तस्यानुपादाने कस्य तत्फलत्वेनोक्तं स्यात्। तस्मात्तत्र निमित्तस्योपादानमेव न प्रकारान्तरम्। यथा—

रथस्थितानां परिवर्तनाय पुरातनानामिव वाहनानाम्।
उत्पत्तिभूमौ तुरगोत्तमानां दिशि प्रतस्थे रविरुत्तरस्याम्॥

अत्र परिवर्तनस्य फलस्योत्तरदिग्गमनं कारणमेव निमित्तमुपात्तम्। तदसावुत्प्रेक्षायाः कक्ष्याविभागः प्रचुरस्थितोऽपि लक्ष्ये दुरवधारत्वादिह न प्रपञ्चितः। अस्याश्चेवादिशब्दवन्मन्येशब्दोऽपि प्रतिपादकः। किन्तूत्प्रेक्षा-

---

अथ फलोत्प्रेक्षायां[1] निमित्ता[2]नुपादानम् असंभवमित्यारभते—**फलोत्प्रेक्षायामित्यादि**। तस्य फलस्य [3]यदेव लोकस्थित्या कारणं, तदेवोत्प्रेक्षणनिमित्तम्। तच्चेन्नो[4]पादीयेत, तदेवोत्प्रेक्ष्यमाणं फलं कस्य [5]फलतयोक्तं स्यात्। अतः फलोत्प्रेक्षायां निमित्तोपादान[6] नियम एव। तदिदमुदाहृत्य दर्शयति—**रथस्थितानामिति**। अत्रोत्तरदिशस्तुरगो[7]त्पत्तिभूमित्वात् तद्गमनं[8] पुरातनतुरङ्गपरिव[9]र्तने हेतुः। तदेवोत्प्रेक्षणनिमित्तम्। तदनुपादाने परिवर्तमानं उत्प्रेक्ष्यमाणं कस्य फलं स्यात्। तदिदमभिप्रेत्याह—**अत्र परिवर्तनस्येत्यादि**[10]। अनेना[11]शीतिविधत्वेन दृष्टेषु प्रभेदेषु पुनः केषांचित् पातो[12] दर्शितः। तथाहि—उपात्तनिमित्ता[13] ये षोडशभेदास्तेषां प्रतिस्वं हेतुस्वरूप[14]फलोत्प्रेक्षणरूपत्वे अष्टचत्वारिंशत्। द्रव्ये[15] हेतुफलोत्प्रेक्षा[16]पातेऽष्ट[17]कहानिरिति चत्वारिंशत्। अनुपात्तनिमित्तत्वे तु षोडश[18]के हेतुफलरूपताभावात् स्वरूपोत्प्रे[19]क्षैकरूपतैवेति[20] षोडशैव। [21]अतः तत्षट्पञ्चाशदेव प्रभेदाः। यदित्थमियमुत्प्रेक्षा अतिसूक्ष्मेक्षिकया प्रपञ्चिता। तत्रहेतुमाह—**तदसावित्यादि**। कक्ष्याविभागो जातिगुणादि[22]रूपतया स्थितः[23]। प्रचुरस्थितोऽपि[24] अनाकुलन्याय[25]तया प्रभूतवृत्तिरपि। लक्ष्ये[26] दुःरव[27]धारत्वात् उत्तान[28]धियां[29] लक्ष्ययोजनान्तम[30]शक्या[31]धिगमत्वात् (न) प्रपञ्चित[32] इत्यर्थः।

अथ मन्येप्रमुखस्य शब्दस्य संभावनाद्योतकत्वेऽपि तत्प्रयोग[33]मात्रेणोत्प्रेक्षाभ्रमो[34] न कार्य इति व्युत्पादयति—**अस्या[35]श्चेत्यादि**। **उत्प्रेक्षासामग्र्यभाव इति**।

---

1. D 'प्रेक्षया' 2. A. C. D. F. H. I 'त्तोपादा' 3. C. omits य 4. A. C उपदी 5. A's alt C फलस्य तथोक्तं 6. A. C. D. F. H. I. अनियम 7. D. E गोत्तमोत्प 8. D. omits तत 9. D. F वर्तनस्येग्यादि। 10. A. C इति 11. A's alt C अशादि 12. A. C. F पाठभेदो 13. D निमित्तो 14. C स्वरूपं 15. D द्रव्य 16. A's alt प्रेक्षाय 17. A. C. omit अष्टक 18. D षोड्शक 19. A. F प्रेक्षा रूपतै D प्रेक्षक 20. D इतीति 21. A. omits अतः 22. D गुणरूप 23. D. स्थितं 24. F. अपि योगमात्रेण 25. A's alt. C. व्यायतव्या 26. A. C अल 27. C. इन्दुरवधारणत्वा 28. A उक्ता 29. C नायिकां 30. Except D all mss अन्तशक्या 31. A's alt C शक्त्या विगम 32. A. प्रपञ्चितां न is wanted but is missing from all mss. 33. E. omits प्र 34. D. अमापमान कार्य 35. A. C. F अस्यां चे

सामग्र्यभावे मन्येशब्दप्रयोगो वितर्कमेव प्रतिपादयति । यथोदाहृतं प्राक्—"अहं त्विन्दुं मन्ये" इत्यादि ।

एवमध्यवसायस्य साध्यतायामुत्प्रेक्षां निर्णीय सिद्धत्वेऽतिशयोक्तिं लक्षयति—

अध्यवसितप्राधान्ये त्वतिशयोक्तिः ॥२२॥

अध्यवसाये त्रयं भवति—स्वरूपं विषयो विषयी च । विषयस्य हि

अप्रकृतगतगुणक्रियाभि[1]सम्बन्धात् अप्रकृतत्वेन प्रकृत[2]संभावनमुत्प्रेक्षासामग्री । तदभावे[3] वितर्को नूनमित्यभ्यूहमात्रम् । तदिदमनुस्मारयति—[4]**यथोदाहृतं प्रागित्यादि ।**

अत्र संग्रहश्लोकाः—

गुणक्रिया[5]भिसम्बन्धात्प्रकृते[6]ऽप्रकृतात्मना ।
संभावनं स्यादुत्प्रेक्षा [7]वाच्येवाद्यैः परान्यथा ॥
जातिक्रियागुणद्रव्योत्प्रेक्षणा सा चतुर्विधा ।
भावाभावाभिमानत्वे[8] जात्यादेस्साष्टधा पुनः ॥
गुणक्रियानिमित्तत्वे ज्ञेया षोडशधा[9] तथा ।
द्वात्रिंशच्च निमित्तस्योपादानादन्यथा स्थितेः ॥
हेतौ स्वरूपे चोत्प्रेक्ष्ये फले[10] षण्णवतिः पुनः ।
द्रव्यहेतुफलात्मत्वासंभवात्तद्भिदा[11]च्युतिः[12] ॥
तथा प्रतीय[13]मानायां निमित्तस्यानुपग्रहः[14] ।
नापि स्वरूपं तैर्भेदैः तस्मा[15]न्न्यूना भवेदियम् ॥
क्वचिच्छ्लेषेण धर्मांश[16]गतेनैषा न[17] [18]बाध्यते ।
उपमोपक्रमाऽप्येषा भवेत्सापह्नवाऽपि च ॥

अथोत्प्रेक्षां निगमयन् अतिशयोक्तिं सङ्गतिपुरस्कारेण प्रस्तौति—**एवमध्यवसायस्येति । सिद्धत्व इति ।** अध्यवसितस्य विषयिणः प्राधान्ये अध्यवसायस्य सिद्धत्वम् । अथ सूत्रम्—**अध्यवसितप्राधान्ये**[19] **त्वतिशयोक्तिः** । उत्प्रेक्षाऽतिशयोक्त्योः विषयं[20] विभ-[21]क्तुमाह—**अध्यवसाये त्रयमित्यादि** । [22]स्वरूपमध्यवसानं[23] व्यापारात्मकम् । विषयः[24] प्रकृतोऽर्थः[25] विषयी[26] त्वप्रकृतः[27] । तत्राध्यवसायस्वरूपम् उत्प्रेक्षाप्रस्तावे विवेचितम् ।

---

1. C क्रियाभिरभि 2. D कृतस्य 3. A. C. F भावेऽपि तर्कों 4. A's alt. C तथो 5. D क्रियादि 6. C. प्रकृते प्रकृ 7. A वाच्योवान्यैः C. D वाच्यवाद्यैः, 8. D. मानत्वात् 9. A. षोडशथा 10. A. C ज्ञेया 11. A. C. E. F. H. I द्विधा 12. D च्युतिँ 13. E. मानाया F. मानत्वात् 14. F. ग्रहात् 15. A. C. F तस्यां 16. All except E. read 'धर्माङ्गगते' 17. All except D. न च 18. 'बोध्य' 19. A. C न्येऽति 20. D विषयः 21. F. भङ्क्तुं 22. A. F. विषयिणः स्वरू 23. Except D. all read अवसायात्मकं 24. D विषयं 25. D अर्थं 26. C विषयि 27. C. कृताः

विषयिणाऽन्तर्नीतत्वेऽध्यवसायस्य स्वरूपोत्थानम्। तत्र साध्यत्वे स्वरूपप्राधान्यम्। सिद्धत्वे अध्यवसितप्राधान्यम्। विषयप्राधान्यमध्यवसायेनैव संभवति। अध्यवसितप्राधान्ये चातिशयोक्तिः। तस्याश्च पञ्च प्रकाराः—भेदेऽभेदः, अभेदे भेदः, सम्बन्धेऽसम्बन्धः, असम्बन्धे सम्बन्धः, कार्यकारणपौर्वापर्यविध्वंसश्च। तत्र भेदेऽभेदो यथा—

कमलमनम्भसि कमले च कुवलये तानि कनकलतिकायाम्।
सा च सुकुमारसुभगेत्युत्पातपरम्परा केयम्॥

अत्र मुखादीनां कमलाद्यैर्भेदेऽभेदः। अभेदे भेदो यथा—

अण्णं लडहत्तणअं अण्णावि अ कावि वत्तणच्छाआ।
सामा सामण्णपआवइणो रेहच्चिअ ण होइ॥

अत्र लडहत्वादीनामभेदेऽप्यन्यत्वेन भेदः। यथा वा—

णाराअणो त्ति परिणअवआहिँ सिरिवल्लहो त्ति तरुणीहिँ।
बालाहिँ उण कोदूहलेणं एमे अ सच्चविओ॥

प्रतीतिवैशद्याय स्मारयति—**विषयस्य हीत्यादि**। अन्तर्नीतत्वे निगीर्णत्वे। तत्रोत्प्रेक्षाविषयं विभजति—**साध्यत्वे**[1] **स्वरूपप्राधान्यमिति**। अतिशयोक्ति[2]विषयं विभजति—**सिद्धत्वे अध्यवसितप्राधान्यमिति**। अध्यवसितो गुणीकृताध्यवसानो विषयी। विषयस्तु प्राधान्यं नार्हतीत्याह—**विषयप्राधान्यमिति**। **नैव संभवतीति** विषयस्य। विषयिणा[3] निगीर्णस्वरूपप्रतीति[4]रेव तिरोधीयते। प्राधान्यसंभवः कुत इति भावः। अतिशयोक्तिलक्षणं निगमयति—**अध्यवसितप्राधान्ये चेति**। तद्भेदानुद्दिशति—**तस्या**[5]**श्चेत्यादि**।

क्रमेणोदाहरणानि - **कमलमनम्भसीति**। अत्र मुखनयन[6]गात्र[7]लक्षणान्विषयान् निगीर्य कमलकुवलयकनकलतालक्षणा[8] विषयिणः तद[9]भेदेनाध्यवसिताः। भेदेऽभेदं[10] विवृणोति—**अत्र मुखादीनामित्यादि**। **अण्णं**[11] **लडहेति**।

अन्यत्सौन्दर्यमन्यापि च कापि वर्तनच्छाया।
श्यामा सामान्यप्रजापते रेखैव न भवति॥

लडहत्वं[12] प्रौढत्वम्। अभेदे भेदं दर्शयति—**अत्र लडहेत्यादि**। अत्रा[13]भेदे भेदो[14] धर्मनिष्ठ[15] एकविषयो दर्शितः। धर्मिनिष्ठतया विभिन्नविषयतया च दर्शयितुमाह—**यथा**[16]**वेति**। **णाराअणोत्तीति**[17]।

"नारायण इति परिणतवयोभिः श्रीवल्लभ इति तरुणीभिः।
बालाभिः पुनः कौतुकेन एवमेव दृष्टः॥"

---

1. C. त्वेऽस्य रूप 2. E. उक्तविष 3. A. C. F. विषयिणो 4. D. ति इति भेदानुद्दिशति रधीयते प्रा. 5. A. C. F स्य त्विव्या 6. A. C लोचन 7. Except D. all read. न देहयष्टिल 8. C. लता 9. A. C तद्भेदे 10. D omits वि 11. A's alt. C. अन्य 12. A's alt. C. D. त्वं अभे 13. A. C. F अत्र 14. A. C. F अभेदो 15. A's alt. C. निष्कण्डक वि 16. F. चेति। 17. A. C उक्तीति।

अत्राभिन्नस्यापि विषयविभागेन भेदेनोपनिबन्धः । संबन्धेऽसंबन्धो यथा—

लावण्यद्रविणव्ययो न गणितः क्लेशो महान्स्वीकृतः
स्वच्छन्दं चरतो जनस्य हृदये चिन्ताज्वरो निर्मितः ।
एषापि स्वगुणानुरूपरमणाभावाद्वराकी हता
कोऽर्थश्चेतसि वेधसा विनिहितस्तन्व्यास्तनुं तन्वता ॥

अत्र लावण्यद्रविणस्य व्ययसंबन्धेऽप्यसंबन्धस्तन्वीलावण्यप्रकर्षप्रतिपादनार्थं निबद्धः । यथा वा—

अस्याः सर्गविधौ प्रजापतिरभूच्चन्द्रो नु कान्तिप्रदः
शृङ्गारैकरसः स्वयं नु मदनो मासो नु पुष्पाकरः ।
वेदाभ्यासजडः कथं नु विषयव्यावृत्तकौतूहलो
निर्मातुं प्रभवेन्मनोहरमिदं रूपं पुराणो मुनिः ॥

अत्र पुराणप्रजापतिनिर्माणसंबन्धेऽप्यसंबन्ध उक्तः । असंबन्धे संबन्धो यथा—

पुष्पं प्रवालोपहितं यदि स्यान्मुक्ताफलं वा स्फुटविद्रुमस्थम् ।
ततोऽनुकुर्याद्विशदस्य तस्यास्ताम्रोष्ठपर्यस्तरुचः स्मितस्य ॥

इत्यत्र परिणतवयस्कानां[1] श्रीवल्लभत्वा[2]भेदेऽपि नारायण इति (भे[3])देन दृष्ट[4]स्तथैवाभिरुचेः[5] । तरुणीनां नारायणत्वाभेदेऽपि श्रीवल्लभ इत्येव, तथैवार्थित्वात् । बालानां तु य[6]त्किञ्चिदिति नूतनं[7] वस्तु द्रष्टव्यमित्येव[8], तथा व्युत्पत्तेः । यद्वा प्रत्येकं समस्ता रुच्यर्थित्वव्युत्पत्त[9]यो भेद[10]दृष्टौ निमित्तं प्रपञ्चितम् [11]उल्लेखप्रस्तावे । तदिदमभिसन्धायाह—**अत्राभिन्नस्यापीति** । अभिन्नस्य[12] धर्मिण इति शेषः । विषयविभागेन । परिणतवयस्कादि[13] (ना) । **लावण्येत्यत्र** सम्बन्धेऽसम्बन्धः[14] । अत्रैक[15]निर्मातृ[16] निष्ठतया धर्मसम्बन्धेऽसम्बन्धः । अथ[17] भिन्ननिर्मातृनिष्ठतयाऽपि दर्शयितुमाह—**यथा वेति** । **अस्यास्सर्गेति** । शृङ्गारैकरस इति प्रत्येकमभिसंबध्यते[18] । **पुष्पं प्रवालेति** । अत्र पुष्पप्रवालादिकयोः साक्षादसम्बन्धेऽपि[19] यदीति संभावनया सम्बन्धः । पुष्पकाले प्रवालत्वा[20]पगमात् । न च मन्तव्यं संभावनायां व्यापारप्राधान्यात्[21] अत्रोत्प्रेक्षैवेयमिति ।

---

1. D. कायानां 2. C. त्वाद्भेदे 3. All mss अभेदेन 4. C. दृष्टं 5. A's alt. C. रुचिः 6. All except. E. यः कश्चिदिति । 7. D. नूनं द्रष्ट 8. Except E all read इत्येतावद्य 9. D. omits त्त 10. A. C. योचित द 11. All mss. भेदं उल्ले 12. D. omits स्य 13. All mss. आदिरूप लाव । 14. F. धः अवभिन्न 15. D. omits क 16. C. निर्मात 17. D. अभि 18. E. ते पुराणो मुनिर्नरसखः । पुष्पं 19. D. बन्धो 20. C. अव 21. D. धान्यादिदं अभि E. धान्यादुत्प्रे ।

अत्र संभावनया संबन्धः । यथा वा—

दाहोऽम्भः प्रसृतिपचः प्रचयवान्बाष्पः प्रणालोचितः
श्वासाः प्रेङ्खितदीप्रदीपकलिकाः पाण्डिम्नि मग्नं वपुः ।
किं चान्यत्कथयामि रात्रिमखिलां त्वन्मार्गवातायने
हस्तच्छत्रनिरुद्धचन्द्रमहसस्तस्याः स्थितिर्वर्तते ॥

अत्र दाहादीनामम्भः प्रसृत्याद्यैरसंबन्धेऽपि संबन्धः सिद्धत्वेनोक्तः । कार्यकारणपौर्वापर्यविध्वंसः पौर्वापर्यविपर्ययात्तुल्यकालत्वाद्वा । पौर्वापर्यविपर्ययो यथा—

हृदयमधिष्ठितमादौ मालत्याः कुसुमचापबाणेन ।
चरमं रमणीवल्लभ ! लोचनविषयं त्वया भजता ॥

तुल्यकालत्वं यथा—

अविरलविलोलजलदः कुटजार्जुननीपसुरभिवनवातः ।
अयमायातः कालो हन्त ! मृताः पथिकगेहिन्यः ॥

एषु पञ्चसु भेदेषु भेदेऽभेदादिकथनं लोकातिक्रान्तगोचरम् । अत्र

ततोऽनुकुर्यादिति समन्वयवाक्ये अध्यवसितप्राधान्यात् । अत उत्प्रेक्षा[1]नुगृहीतेयमतिशयोक्तिः । तदिदमभिसन्धायाह—**अत्र संभावनया संबन्ध इति** । अथोत्प्रेक्षाग्रहणमन्तरेणापि असंबन्धे संबन्धमुदाहरति—**दाहोऽम्भः प्रसृतिमिति**[2] । अत्र दाह[3]बाष्पश्वासवपुषामम्भःप्रसृति[4]पच[5]त्वप्रणा[6]लोचितत्वदीपकलिकाप्रेङ्खोलनपाण्डिममज्जनेषु संबन्धाभावे अपि सिद्धत्वेनोक्तिः । तदेतदाह—**अत्र दाहादीनामित्यादि** ।

कार्यकारणपौर्वापर्यविध्वंसे द्वैविध्यमाह —**कार्यकारणेत्यादि** । विपर्ययः कार्यस्य पूर्वकालभाविता । **हृदयमिति**[7] । अत्र हृदयस्य दयिताधि[8]ष्ठानं कुसुमचाप[9]बाणा[10]धिष्ठानस्य कारणम्[11] । कारणञ्च नियतपूर्वकालभावि । तदिहान्यथोपन्यस्तमिति पौर्वापर्यविपर्ययः । **अविरलेति**[12] । नीपः कदम्बः । प्रावृडयनं[13] पथिकगेहिनीमृतिकारणम् । अत्र[14]त्वायातो[15] मृता इति निष्ठाभ्यां तयोस्समकालता ।

ननु भेदेऽभेदादिकथ[16]नमसङ्गतम् इत्यत आह—**एषु[17] पञ्चस्विति**[18] । लोकातिक्रान्तगोचरं लोकातिशा[19]यित्वलक्षणं गोचर[20]यतीत्यर्थः । अतो भेदेऽभेदरूपो[21] मुख्यार्थो[22] न विवक्षित इति यावत् ।

---

1. A. F. omit अनु 2. A. C. मति 3. C. दाहं 4. A. C. F. प्रसृतौ 5. A. C. F. पञ्च 6. A. प्रणालयो C. प्राणालयो 7. C. हृदयति 8. C. निष्ठा 9. D. चापं 10. A. C. E. F. H. I. बाणस्याधि 11. Omitted in C. 12. A's alt C. तु 13. E. आयानं 14. A. C. त्रबाणतो 15. D repeats यातो 16. A. C. F. कथम 17. All except C read एष 18. D. स्थिति 19. Except E all read शय 20. Except C all चरती 21. A. C. रूपा 22. C. अर्था ।

चातिशयाख्यं यत्फलं प्रयोजकत्वान्निमित्तं तत्राभेदाध्यवसायः। तथा हि—"कमलमनम्भसि" इत्यादौ वदनादीनां वास्तवं सौन्दर्यं कविसमर्पितेन सौन्दर्येणाभेदेनाध्यवसितं भेदेऽभेदवचनस्य निमित्तम्। तत्र च सिद्धोऽध्यवसाय इत्यध्यवसितप्राधान्यम्। न तु वदनादीनां कमलादिभिरभेदाध्यवसायो योजनीयः। अभेदे भेद इत्यादिप्रकारेष्वव्याप्तेः। तत्र हि "अण्णं लडहत्तणअं" इत्यादौ सातिशयं लडहत्वं निमित्तभूतमभेदेनाध्यवसितम्। एवमन्यत्रापि ज्ञेयम्। तदभिप्रायेणैवाध्यवसितप्राधान्यम्।

प्रकारपञ्चकमध्यात्कार्यकारणभावेन यः प्रकारः स कार्यकारणता-

ननु[1]भेदेऽभेदाध्यवसायो लक्षणमतिशयोक्तेः। तदभेदे भेद इत्यादावव्यापक[2]मित्यत आह—**अत्र चाति[3]शयाख्यमित्यादिना**। यदिह भेदे[4]ऽभेदादिरूपाया अतिशयोक्ति[5]निमित्तभूतं प्रयोजकमतिशयाख्यं फलं तत्राभेदाध्यवसायो, न तु फलिनोः[6]। तदिदमुपदर्शयति—**तथा हीत्यादि**। वदनादीनां[7] यद्वस्तुवृत्त[8]सिद्धं[9] सौन्दर्यं तत्कवि[10]समर्पितेन[11] कमलादिसौन्दर्येण सहाभेदेनाध्यवसितं [12]सद्भेदेऽभेदादिवचनस्य निमित्तं कमलमुखादिकयोरभेदाध्यवसायो योजयितुं शक्यः। तथा[13]सति अव्याप्तिदोषः स्यादित्यत आह—**अभेदे भेद इत्यादि**[14]। [15]आदिशब्दात्[16] सम्बन्धेऽसम्बन्धपरिग्रहः। **प्रकारेष्विति**। बहुवचनं तदवान्तर[17]भेद[18]परम्। अभेदे[19] वास्तवे यदा[20] भेदकथनं न[21]हि तदा फलिनोरभेदाध्यवसायः। फलं तु[22] तत्राप्यभेदेनैवाध्यवसीयत इत्यत[23] आह—**अण्णं लडहत्तणअं इत्यादा[24]विति**। अण्णं लडहत्तणअमित्यादौ हि यत् वस्तु[25]तस्सिद्धं लडहत्वं यच्चान्यत्वेन कविसमर्पितं सातिशयं,[26] न खलु तयोर्भेदः कश्चित्। किन्तु सामान्यप्रजापतिनिर्माणकविसमर्पितनिर्माणयोरेव फलिनोर्भेदः। अयं न्यायस्सम्बन्धे[27]ऽसम्बन्धः इत्यत्रापि सम इत्याह—**एवमन्यत्रेति**। तत्रापि खलु "लावण्यद्रविणे"त्यादौ वेधसो लावण्यद्रविणसम्बन्धेऽप्यसंबन्धः केवलं न पुनस्तन्व्या[28] नैसर्गिकलावण्यकविसमर्पितवेधस्सम्बन्धिलावण्ययोरसंबन्धः। एव"मस्याः सर्गविधा" वित्यत्रापि ज्ञेयम्[29]। नियमतो लक्षणभूतमध्यवसितप्राधान्यं[30] फलाभिप्रायेणैवेत्याह—**तदभिप्रायेणैवेत्यादि**। अथ कार्यकारण[31]लक्षण[32]प्रकारे पुनर्विवेचयिष्यमाणे पौनरुक्त्यशङ्कां शमयितुमाह—**प्रकारपञ्चकेत्यादि**।

---

1. A. C. भेदाध्य 2. A. पक इ 3. E omits च 4. A. अभेदेऽभे 5. C. उक्ति 6. A. C. F. फलिनः 7. A. C. वदनं य 8. D. वृत्ति 9. A omits सिद्धं C. सिद्ध 10. A's alt. कपि 11. D. E अर्पितं 12. D. omits सत् 13. D. E तथात्वे स 14. D. दि इति। 15. A. आदि शब्देन आ 16. All except D. शब्दपरिग्रहात् 17. A. C. F. तरमेव वास्त 18. D. omits भेद 19. D. अभेद 20. A's alt. यदतित्वक C. यदि कथं एतद्विच्छिन्नोरभेदा 21. A. F. omit न हि A's alt. omits न 22. A. C. F omit तु 23. E. F. इत्याह 24. A. C. D. F. H. I आदौ हि 25. A. C. वस्तुवृत्तसि 26. A. C. शयश्च 27. A. C. धेऽप्यसंबन्धः केवलं न 28. D. E. तस्याः 29. Omitted in A. C. 30. D. धान्या 31. E. ण भावलक्ष 32. All except D लक्षणे।

श्रयालंकारप्रस्तावे प्रपञ्चार्थं लक्षयिष्यते ।

एवमध्यवसायाश्रयेणालङ्कारद्वयमुक्त्वा गम्यमानौपम्याश्रया अलङ्कारा इदानीमुच्यन्ते । तत्रापि पदार्थवाक्यार्थगतत्वेन तेषां द्वैविध्ये पदार्थगतमलङ्कारद्वयमुच्यते—

औपम्यस्य गम्यत्वे पदार्थगतत्वेन प्रस्तुतानामप्रस्तुतानां वा समानधर्माभिसंबन्धे तुल्ययोगिता ॥२३॥

इवाद्यप्रयोगे औपम्यस्य गम्यत्वम् । तत्र प्राकरणिकानामप्राकरणिकानां वार्थानां समानगुणक्रियाभिसंबन्धे अन्वितार्था तुल्ययोगिता । यथा—

सञ्जातपत्रप्रकराञ्चितानि समुद्वहन्ति स्फुटपाटलत्वम् ।
विकस्वराण्यर्ककरप्रभावाद्दिनानि पद्मानि च वृद्धिमीयुः ॥

कार्य[1]ताश्रयत्वात् तत्रापि सङ्गतिः[2] प्रपञ्चार्थत्वात् नानर्थक्य[3]मिति सर्वम[4]वदातम् ।

अभेदाध्यवसायो[5] हि फलेऽतिशय[6]नामनि ।
न पुनः फलिनोस्तत्राभेदे भेदो न सिध्यति ॥

अथाध्यवसायमूलम[7]लङ्कारद्वयं निगमयन्[8] धर्मान्तरमधिचिकीर्षुराह—**एवमध्यवसायाश्रयेणे[9]त्यादि** । गम्यमानौपम्याश्रयेष्वपि[10] यन्न्यायात्प्राधान्यमर्हति तद्द्वयमधिकरोति—**तत्रापि पदार्थेत्यादिना** ।

तत्र तुल्ययोगितार्थं[11] सूत्रम् । **औपम्यस्य[12] गम्यत्वे [13]पदार्थगतत्वेन प्रस्तुतानामप्रस्तुतानां वा[14] समानधर्माभिसम्बन्धे[15] तुल्ययोगिता** ।

औपम्यस्य गम्यत्वे पदार्थगतत्वेनेत्यधिकारद्वयम्, अन्यत्तु लक्षणं व्याचष्टे—**इवाद्यप्रयोग इत्यादि** । **प्राकरणिकानामप्राकरणिकानां वेति** विषयद्वयम् । गुण[16]क्रिया चेति धर्मद्वयम् । अत[17]श्चातुर्विध्यमनुसन्धेयम् । प्राकरणिकेषु गुणाभिसंबन्धः, क्रियाभिसम्बन्धश्च । अप्राकरणिकेषु तथेति । समान[18]गुण[19]क्रियासंबन्धो हि तुल्ययोगि (ता[20]) । तामिमां निरुक्तिमाविष्करोति—**अन्वितार्थेति** । अन्वितार्था अन्वर्था[21] । **सञ्जेति[22]** । दिनानि[23] सज्जाना[24]मातपत्राणां प्रक[25]रैरञ्चितानि[26] । पद्मानि तु सज्जातानां[27] सुजा[28]-

---

1. D. त्वाश्र 2. C. गता 3. C. त्वं 4. A's alt. C. अपवादं 5. A. C. F योऽपि क 6. A. C. शयनमिति A's alt. शयिनीमतिः 7. D. omits मूल 8. Omitted in A. C. D. 9. D. श्रयण 10. All except E. अप्ययं न्या 11. A's alt. गिचेत्थं 12. F. पम्येत्यादि 13. H. यथार्थं 14. Omitted in A. C. F 15. A. बन्धस्तु 16. C. F गुणः 17. A's alt. अथ C. अचातु 18. A. C. F. H. I omit समान 19. F गुणाभिसं 20. All mss. omit ता 21. C. अन्यार्था 22. A. संज्ञेति । 23. D. भिदानि 24. A's alt संज्ञानां 25. A. C. D. H. प्रकारैः 26. H. तानि च 27. Omitted in E 28. A. D. संजा ।

अत्र ऋतुवर्णनस्य प्रक्रान्तत्वाद्दिनानां पद्मानां च प्रकृतत्वम् । वृद्धिगमनं क्रिया । एवं गुणोऽपि ।

योगपट्टो जटाजालं तारवी त्वङ्मृगाजिनम् ।
उचितानि तवाङ्गस्य यद्यमूनि तदुच्यताम् ॥

अत्रोचितत्वं गुणः । अप्राकरणिकानां यथा—

धावत्त्वदश्वपृतनापतितं मुखेऽस्य
निर्निद्रनीलनलिनच्छदकोमलाङ्ग्या ।
भग्नस्य गूर्जरनृपस्य रजः कयापि
तन्व्या तवासिलतया च यशः प्रमृष्टम् ॥

अत्र गूर्जरनृपं प्रति नायिकासिलतयोरप्राकरणिकत्वम् । प्रमार्जनं क्रिया । गुणो यथा—

त्वदङ्गमार्दवं द्रष्टुः कस्य चित्ते न भासते ।
मालतीशशभृल्लेखाकदलीनां कठोरता ॥

अत्र कठोरत्वं गुणः । एवमेषा चतुर्विधा व्याख्याता ॥

तानां पत्राणाम् । [1]पाटलेत्येकत्र वर्णः, अन्यत्र तु[2] पुष्पम् । प्राकरणिकार्थविषयतां[3] क्रियाभिसंबन्धं च दर्शयति—**अत्र[4] ऋतुवर्णनेत्यादि** । ऋतुर्ग्रीष्मः[5] । प्राकरणिकेषु[6] गुणाभिसन्धायाह—**एवं गुणेऽपीति** । **योगपट्ट इति** । अत्र तपः प्रस्तावाद्योगपट्टादीनां प्रकृत[7]त्वम् । उचितत्वं[8] गुणस्वभावाभिमानरूपतयाभिसंबध्यते, यद्यु[9]चितानि तदुच्यतामित्याक्षेपात् । अनेन गुणक्रिययोर्भावा[10]भावाभिमानरूपं[11] वैचित्र्यमप्या[12]सूत्रितम् ।

धाव[13]त्त्वदश्वेति । अश्व[14]पृतनायास्सकाशात् [15]गूर्जरनृपस्य भग्नस्य[16] मुखे पतितं रजः[17] । कयाऽपि सानुकम्पया[18] तन्व्या प्रमृष्टम् । यश[19]स्तु तवा[20]सिलतया । अप्राकर-[21]णिकविषयं क्रियाभिसंबधं दर्शयति—**अत्र गूर्जरं[22] [23]प्रतीत्यादि[24]** । [25]गूर्जरापेक्षया[26]हि[27] कयाऽपीति निर्देशात् तन्व्या[28] अप्राकरणिकत्वम् । असिलतायास्तु वर्ण्यनायकविषयतया । **त्वदङ्गेति** । त्वदङ्गमार्दवं पश्यतः सर्वस्यैव चित्ते[29] माल[30]त्यादीनां कठोरताऽवभासत

---

1. F. आपा 2. Omitted in D. E. 3. C. ता 4. A. C. त्र वर्णने ऋतुश्शरत प्राक 5. F. H. शरत् 6. A. C. H. णिकी गु 7. A. C. H. अप्र 8. A. C. उचित गुण D. तस्तु ग 9. D. यदुचि 10. A. C. H. वाभिमा 11. D. रूपा 12. C. असू 13. A. अथवा कचित् भेदश्वेति C. अर्थ वाक्यचिद् भेदश्वेति । अथवा केचित् भेदश्वेति 14. A. C. H. अस्पष्टतायास्स 15. A. घूर्जर 16. C. भगस्य D. अनघ्न 17. C. F. H. रजकया 18. A. C. H. पतया 19. A. अयश H. इतस्तु 20. A's alt C. तथाऽपि अतया । अ 21. D. करिक 22. A. घूर्ज 23. H. omits प्रति 24. F अ।दिना 25. E. गु 26. C. क्षयाऽपि 27. Omitted in F. 28. A's alt दन्वेया C. ध्न्वेया 29. Omitted in A. C. H. 30. A. लतादी ।

प्रस्तुताप्रस्तुतयोर्व्यस्तत्वे तुल्ययोगितां प्रतिपाद्य समस्तत्वे दीपकमुच्यते—

प्रस्तुतानाप्रस्तुतानां च दीपकम् ॥२४॥

औपम्यस्य गम्यत्व इत्याद्यनुवर्तते । प्राकरणिकाप्राकरणिकवर्गस्य मध्यादेकत्र निविष्टस्समानो धर्मः प्रसङ्गेनान्यत्रोपकाराद्दीपनाख्याद्दीपसादृश्येन दीपकाख्यालङ्कारोत्थापकः । तत्रेवाद्यप्रयोगादुपमानोपमेयभावो गम्यमानः । स च वास्तव एव । पूर्वत्र शुद्धप्राकरणिकत्वे शुद्धाप्राकरणिकत्वे वा वैवक्षिकः । प्राकरणिकत्वाप्राकरणिकत्वप्रभावितत्वादुपमानोपमेयभावस्य । अनैकस्यैकक्रियाभिसंबन्धादौचित्यात्पदार्थगतत्वोक्तिः । वस्तुतस्तु वाक्यार्थत्वे आदिम-

---

इत्यर्थः । अत्र माल[1]त्यादिषु अप्राकरणिकेषु कठोरत्वगुणाभिसंबन्धः । तुल्ययोगितां[2] निगमयति—**एवमेषेति**[3] ।

प्रकृतेष्वथवान्येषु ज्ञातव्या तुल्ययोगिता ।
गुणक्रियाऽभिसम्बन्धात् समानादन्विता[4]र्थिका ॥

अथ सङ्गतिपुरस्कारेण दीपकं प्रस्तौति—**प्रस्तुता[5]प्रस्तुतयोः इत्यादि** । अथ सूत्रम्—**प्रस्तुता[6]प्रस्तुतानां तु दीपकम्** । समानधर्माभिसंबन्ध इत्य[7]नुषज्यते । अधिकारमनुस्मारयन् व्याचष्टे—**औपम्यस्येत्यादिना** । इह प्राकरणिकाः अप्राकरणिकाश्चोपादीयन्ते । तेष्वे[8]कतरत्रोपात्तस्साधारणो धर्मोऽन्यत्रोपकरोति[9] । अतो दीपनरूपादुपकारात् दीपसदृशोऽयमिति कृत्वा दीपक[10]मिदम् ।

तदिदमुक्तम्—**प्राकरणिकाप्राकरणिकेत्यादिना** । औपम्यस्य[11] गम्यत्वं प्रागवदेवेत्याह—**तत्रेवाद्य[12]प्रयोगादित्यादि** । यश्चात्रोपमानोपमेयभावः स तुल्ययोगितातो विलक्षण इत्या[13]ह—**स चेत्या[14]दि** । वास्तवः[15] प्राकरणिकाप्राकरणिकनिम्नत्वात् । पूर्वत्र तुल्ययोगितायाम् । वैवक्षिकः[16] विवक्षया क्लृप्तः[17] । वैवक्षिक[18]त्वे हेतुः—**शुद्ध[19]प्राकरणिकेत्यादि** । शुद्धप्राकरणिकत्वे हि उपमानत्वं वा[20]स्तवम् । शुद्धा[21]प्राकरणिकत्वे तूपमेयत्वम् । तदिदं विशदीकरोति—**प्राकरणिकत्वे[22]त्यादिना** । ननु[23] प्रतिस्वं क्रियासम्बन्धे कथं पदार्थगतं इत्यत आह—**अनेक[24]स्यैकक्रियेत्यादि**[25] । सम्ब[26]ध्यमान[27]धर्मस्यैकत्वा-

---

1. A. C. H. माल्यादि 2. D. ता 3. H. एवेति 4. A. अर्थका C. आत्मिका E. अर्थिता H. अर्थता 5. A. C. H. प्रकृताप्रकृत 6. F. स्तुतेत्ति । समा 7. C. इत्यत्रानु E. इत्याद्यनु 8. A. C. एकत्रो 9. A. C. H. करोतीति । 10. E. कालंकारं 11. D. म्यगम्य 12. A's alt. अन्य 13. D. इत्यत आह 14. F. आदि शुद्ध 15. A. F. H. वप्रा 16. A. C. F. H. कावि 17. A. C. F. H. सयवे 18. A. C. F. H. कतैव 19. All except E शुद्धः 20. D. अवा 21. C. F. द्धप्रा 22. D. E. केत्या 23. Omitted in C. 24. A's alt. C अत्रैकस्य D. अहेतुकस्य 25. A's alt. येति आदि 26. A's alt बन्ध्य 27. F. H. मानस्य ।

ध्यान्तवाक्यगतत्वेन धर्मस्य वृत्तावादिमध्यान्तदीपकाख्यास्त्रयोऽस्य भेदाः। क्रमेणोदाहरणम्—

रेहइ मिहिरेण णहं रसेण कव्वं सरेण जोव्वणअम्।
अमएण धुणीधवओ तुम ए णरणाह भुवणमिणं॥

यथा वा—

सञ्चारपूतानि दिगन्तराणि कृत्वा दिनान्ते निलयाय गन्तुम्।
प्रचक्रमे पल्लवरागताम्रा प्रभा पतङ्गस्य मुनेश्च धेनुः॥
विसमअओ च्चिअ काणवि काणवि बोलेइ अमअणिम्माओ।
काणवि विसामअमओ काणवि अविसामअमओ कालो॥

त्पदार्थत्वोपचरण[1]मित्यर्थः। अतो[2] वाक्यार्थगतत्वे[3] वास्तवे त्रैविध्यमुपपद्यत इत्या[4]ह—**वस्तुतस्त्वित्यादि। रेहइ इति**[5]।

राजते मिहिरेण नभो रसेन काव्यं स्मरेण यौवनम्।
अमृतेन धु[6]नीधव[7]स्त्वया नरनाथ भुवन[8]मिदम्॥

धुनी[9] सरिद्धवः[10] पतिः, सागर इत्यर्थः। इदं क्रियायाः आदिवाक्यगतत्वादादादिदीप[11]कम्।

संचारेति। निलयो [12]गृहम्[13] अस्तमयश्च। पल्लवरागो माणिक्यविशेषः योगाढरागः[14](?)¶। इदमप्यादिदीपकम्[15]। क्रियायाः प्रथम[16]पदत्वम[17]तन्त्रमिति द्योतयितुम्—**(*यथा वेति)। (‡विसमअओ) इति**। एतन्मध्यदीपकम्। (बोले[18]इ) इति मध्ये[19] वाक्ये क्रिया[20]विनिवेशात्। **किवणाणेति**।

1. D. चार 2. A's alt. अधो C. अथ 3. C त्वे नरनाथ 4. H. इत्यत आह 5. Omitted in D. 6. E. धुनी सुधी ध 7. D. I. धवलस्त्व 8. C. भुवनादीं 9. C. धनी 10. A. द्ववश्च C. द्धश्च D. E. I धवल इह पतिः 11. H कं घोग्रहः 12. A. C. ति। लंघो 13. A. C ग्रहं D. गृहः 14. A. C. H. I यागधरा इ 15. C. दीपक 16. A. C. H. ममुपात्त त्वादत 17. A's alt. अतीन्द्र C. अतीन्द्रं 18. All mss. वक्रेन्दुष्विति 19. All except E मध्य 20. A. D. F. H. क्रियानि।

¶ This perhaps is a mistake of the copyist for योगरूढ which fits in the context.

* All the mss. give wrong readings.—A. C. H. read as यत इति while D. E. F. have ज्याघात इति। The reading यथा वेति is restored here since the verse संचारपूतानि etc. is an alternate illustration for the first variety of Dīpaka.

‡ The pratika of the illustrative verse विसमअओ has strayed after एतन्मध्यदीपकम् and is found corrupt in all mss. as विद्विषतां (given in A. D. E. F. H. I.) and विषयतां (in C). Usually our author gives the chāyā of the prākrit verses which too is missing ere.

किवणाण धणं णाग्राण फणमणी केसराइ सीहाणं ।
कुलवालिग्राण ग्र थणा कुत्तो छेप्पंति ग्रमुग्राणं ।।

एवमेकक्रियं दीपकं निर्णीतम् । ग्रत्र च यथानेककारकगतत्वेनैकक्रिया-दीपकं तथानेकक्रियागतत्वेनैककारकमपि दीपकम् । यथा—

साधूनामुपकर्तुं लक्ष्मीं द्रष्टुं विहायसा गन्तुम् ।
न कुतूहलि कस्य मनश्चरितं च महात्मनां श्रोतुम् ।।

ग्रत्रोपकरणाद्यनेकक्रियाकर्तृत्वेन कुतूहलविशिष्टं मनो निर्दिष्टम् । छायान्तरेण तु मालादीपकं प्रस्तावान्तरे लक्षयिष्यते ।

वाक्यार्थगतत्वेन सामान्यस्य वाक्यद्वये पृथङ्निर्देशे प्रतिवस्तूपमा ।।२७।।

पदार्थारब्धो वाक्यार्थ इति पदार्थालङ्कारानन्तरं वाक्यार्थगतालङ्कार-प्रस्तावः । तत्र सामान्यधर्मस्येवाद्युपादाने सकृन्निर्देशे उपमा । वस्तुप्रतिवस्तु-

---

कृपणानां धनं नागानां फणामणिः केसराणि सिंहानाम् ।
कुलपालिकानां च स्तनौ कुतस्स्पृश्यन्ते[1]ऽमृतानाम् ।।

जीवितान्न (जीवितां न ?) स्पृश्यन्ते इत्यर्थः । क्रियादीपकत्रयं निगमयति—**एव-मेकेति** । ग्रनयैव[2]नीत्या कारकदीपकं उदाहर्तुमाह—**ग्रत्र च यथेत्यादि** । **साधूनामिति** । कारकदीपकत्वं विवृणोति—**ग्रत्रोपकरणा**[3]**दिति** । मालादीपकं तु प्रस्तावान्तरे भवि-ष्यतीत्याह—**छायान्तरेण त्विति**[4] ।

दीपकं वास्त[5]वौपम्यं प्रकृताप्रकृताश्रयम् ।
ग्रादिमध्यान्तवाक्येषु क्रियाकारकभेदतः ।।

ग्रथ वाक्यार्थगतत्वेन प्रतिवस्तूपमां सूत्रयति—**वाक्यार्थ**[6]**गतत्वेन सामान्यस्य वाक्यद्वये पृथङ्नि**[7]**र्देशे प्रतिवस्तूपमा** ।। सङ्गतिमाह—**पदार्थार**[8]**ब्धेति** । इह नानालङ्कार शङ्कापनेतुं विषयं विभजति—**तत्र सामान्यधर्म**[9]**स्येत्यादि** । इत्या (इवा ?) दिकमुपादाय सामान्यधर्मस्य सकृन्निर्देश उपमा[10]यामेवो[11]दाहृतं[12] 'प्रभामहत्या शिखयेव दीप' इति । इवादिकमुपादाय वस्तुप्रतिवस्तुभावेनासकृन्निर्देशेऽपि सैव 'यान्त्या मुहुर्वलितकन्धर-माननं तदावृत्त[13]वृन्तशतपत्रनिभ'मिति । इवादिकमनुपादाय यथा सकृन्निर्देशस्तदा प्रस्तुताप्रस्तुतानां समस्तत्वे दीपकं, तथैव व्यस्तत्वे[14] तुल्ययोगिता । तदुभयमपि सम-नन्तरमेव दर्शितम् ।

---

1. A. C. H न्ते इत्यर्थः । 2. A. C. F. H एव च 3. A. C इत्यादि । 4. A. C. F. H इति । अथ वाक्या 5. D वस्तुवद्वाक्यं 6. F. अर्थेति । संगति 7. D निर्दे 8. A. C. H अर्थान्तरस्ये 9. A. C. H omit धर्म 10. E. उपमां 11. E. यथोदा 12. A. C. हृतः । 13. A. वृक्ष C. वृत्तं 14. D. तु तुल्य ।

भावेनासकृन्निर्देशेऽपि सैव । इवाद्यनुपादाने सकृन्निर्देशे दीपकतुल्ययोगिते । असकृन्निदशे तु शुद्धसामान्यरूपत्वं बिम्बप्रतिबिम्बभावो वा । आद्यः प्रकारः प्रतिवस्तूपमा, वस्तुशब्दस्य वाक्यार्थवाचित्वे प्रतिवाक्यार्थमुपमा साम्यमित्यन्वर्थाश्रयणात् । केवलं काव्यसमयात्पर्यायान्तरेण पृथङ्निर्देशः । द्वितीयप्रकाराश्रयेण दृष्टान्तो वक्ष्यते । तदेवमौपम्याश्रयेणैव प्रतिवस्तूपमा । यथा—

चकोर्य एव चतुराश्चन्द्रिकाचामकर्मणि ।
आवन्त्य एव निपुणाः सुदृशो रतकर्मणि ।।

अत्र चतुरत्वं साधारणो धर्म उपमानवाक्ये, उपमेयवाक्ये तु निपुणपदेन निर्दिष्टः । न केवलमियं साधर्म्येण, यावद्वैधर्म्येणापि । यथात्रैवोत्तरस्थाने—

विनावन्तीर्न निपुणाः सुदृशो रतनर्मणि ।

इति पाठे ।

असकृन्निर्देशे[1]तु द्वयी गतिः—शुद्धसामान्यरूपत्वं, बिम्बप्रतिबिम्बो वा । शुद्धसामान्य[2]त्वं नाम सम्बन्धिभेदमात्रा[3]द्धर्मस्य पृथङ्निर्देशः । तथा[4] इवाद्यनुपादाने प्रतिवस्तूपमा । प्रतिवस्तूपमां[5]निर्वक्ति—**वस्तुशब्दस्येत्यादि** । वस्तुशब्द इह वाक्यार्थपरः । उपमा तु साम्यम् । प्रतिवाक्यार्थं भवतीत्यन्वर्थाश्रयणा[6] ।

ननु यदि धर्मस्यासकृन्निर्देशरूपं शुद्धसामान्यरूपत्वं तदा किं पर्यायान्तरेणे[7]त्यत आह—**केवलं काव्येत्यादि** । उद्देशप्रतिनिर्देशभावाभावे यदा तस्यैव पुनरुपादानं, तदा पर्यायान्तरा[8]भावे [9]अनवीकृतदोषः स्यात् । अतः पर्यायान्तरेण पृथङ्निर्देशः[10] इति काव्यसमयः । सोऽयं प्रतिवस्तूपमाविषयः । अथ धर्म्यपेक्षो[11] बिम्बप्रतिबिम्बभावो यदा, तदा दृष्टान्तो वक्ष्यत[12] इत्याह—**द्वितीयप्रकारेत्यादि** । सादृश्या[13]धिकारमनुस्मारयति—**तदेवमौपम्येत्यादि** । **चकोर्य**[14]**इति** । आवन्त्यः अवन्तीप्रभवाः ।

धर्मस्य[15] शुद्धसामान्यरूपतां पर्याया[16]न्तरत्वं च दर्शयति—**अत्र चतुरत्व**[17]**-मित्यादि** । विच्छित्त्यन्तरायाह—**न केवलमित्यादि** । लाघवाय प्रागुदाहरणमेव [18]वैधर्म्येण दर्शयति—**विनावन्तीरि**[19]**ति** ।

असकृद्धर्मनिर्देशादिवादेरनुपग्रहात्[20] ।
प्रतिवस्तूपमा ज्ञेया प्रतिवाक्यार्थसाम्यतः ।।

---

1. D. श 2. A. H यरूपत्वं 3. F. omits मात्र 4. D. तदेवाद्य 5. D. निर्वृत्ति 6. C. E णात् D यणामनु 7. C. अत्राह D. अर्थत 8. D. अन्तर 9. A. आन 10. D. E निर्देश इ 11. C. पेक्षा 12. F. वक्ष्यन्त 13. A. C. F. H. I दृश्यमधि 14. D. E कोर्य एवेति 15. A's alt. C स्येह 16. C. यरूपत्वं 17. A. C. D. H. I त्वामि 18. A. C. F. H. I साध 19. A. F. H इत्यादि 20. B. D. E. ग ।

तस्यापि बिम्बप्रतिबिम्बतया निर्देशे दृष्टान्तः ॥२६॥

तस्यापि, न केवलमुपमानोपमेययोः । तच्छब्देन सामान्यधर्मः प्रत्यवमृष्टः । अयमपि साधर्म्यवैधर्म्याभ्यां द्विविधः ।

आद्यो यथा—

अब्धिर्लङ्घित एव वानरभटैः किं त्वस्य गम्भीरता-
मापातालनिमग्नपीवरतनुर्जानाति मन्थाचलः ।
दैवीं वाचमुपासते हि बहवः सारं तु सारस्वतं
जानीते नितरामसौ गुरुकुलक्लिष्टो मुरारिः कविः ॥

अत्र यद्यपि ज्ञानाख्य एको धर्मो निर्दिष्टस्तथापि नैतन्निबन्धनमौपम्यं विवक्षितम् । यन्निबन्धनं च विवक्षितं तत्राब्धिलङ्घनादावस्त्येव दिव्यवागुपसनादिना प्रतिबिम्बनम् ।

द्वितीयो यथा—

कृतश्च गर्वाभिमुखं मनस्त्वया
किमन्यदेवं निहताश्च नो द्विषः ।
तमांसि तिष्ठन्ति हि तावदंशुमा-
न्न यावदायात्युदयाद्रिमौलिताम् ॥

अथ दृष्टान्तं सूत्र[1]यति—तस्यापि[2] बिम्बप्रतिबिम्बतया निर्देशे दृष्टान्तः । व्याचष्टे—तस्यापि न[3] केवलमित्यादि । प्रतिवस्तूपमान्यायेन[4] द्वैविध्यमाह[5]—अयमपीति । अब्धिर्लङ्घित इति । गुरुकुलक्लिष्टः नित्योपासनेन तदेकशरणीभूतः । अत्र[6] बहूनां वानरभटैः [7]मन्थाचलेन सह[8] धर्म्यपेक्षो बिम्बप्रतिबिम्बभावः । दिव्यवागुपासनस्य अब्धिलङ्घनेन[9] गुरुक्लिष्टत्वस्या[10] पातालनिमग्नत्वेन च धर्मा[11]पेक्षः । ननु जानाति जानीत इति [12]ज्ञानस्य पृथङ्निर्देशात् कथमिदं दृष्टान्तोदाहरणमित्यत आह—अत्र यद्यपीत्यादि । नैतन्निबन्धनमिति । न हि ज्ञाननिबन्धनं [13]औपम्यं विवक्षितं, [14]ज्ञानस्योपचारात् । यत्र तु विवक्षा[15] तत्र न[16] किञ्चि[17]न्न्यूनमित्यत[18] आह—यन्निबन्धनं चे[19]त्यादि । इदं साधर्म्ये[20] । कृतश्चेति[21] । त्वया मनसि गर्वाभिमुखे कृते तत्क्षणमेव द्विषो निहता इत्यर्थः । द्वौ चकारौ

---

1. A. F सूच 2. F. अपि इति । व्या 3. Omitted in all except E. H. 4. C. न्यायो न 5. F ध्यं दर्शयति । अ 6. A. C. H अथ 7. All except D. मुरारिकवेः स 8. A. C साधर्म्या 9. न omitted in A. C. F. H. 10. E स्यत्वापाता 11. D धर्म्यपे 12. D. E इति च 13. A. C. F. H अनौप 14. A. C. F. H अत्रत्र ज्ञा E अचले ज्ञा 15. A's alt. C ज्ञाते कि 16. Omitted in A's alt. C. D. 17. E किञ्चन 18. E. इत्याह 19. F चेति। Omitted in D. 20. All except F read धर्म्ये 21. E. इत्यादि ।

अत्र निहतत्वादेः स्थानादिना वैधर्म्येण प्रतिबिम्बनम् ।

संभवताऽसंभवता वा वस्तुसंबन्धेन गम्यमानं प्रतिबिम्बकरणं निदर्शना ॥२७॥

प्रतिबिम्बप्रस्तावेनास्या लक्षणम् । तत्र क्वचित्संभवन्नेव वस्तुसंबन्धः स्वसामर्थ्याद्बिम्बप्रतिबिम्बभावं कल्पयति । क्वचित्पुनरन्वयबाधादसंभवता वस्तुसंबन्धेन प्रतिबिम्बनमाक्षिप्यते । तत्र संभवद्वस्तुसंबन्धा यथा—

चूडामणिपदे धत्ते यो देवं रविमागतम् ।
सतां कार्यातिथेयीति बोधयन्गृहमेधिनः ॥

अत्र बोधयन्धत्त इति णिचस्तत्समर्थाचरणे प्रयोगात्संभवति वस्तुसंबन्धः । असंभवद्वस्तुसंबन्धा यथा—

अव्यात्स वो यस्य निसर्गवक्रः
स्पृशत्यधिज्यस्मरचापलीलाम् ।
जटापिनद्धोरगराजरत्न-
मरीचिलीढोभयकोटिरिन्दुः ॥

क्रिययोरेक[1]रूपकालतामाहतुर्यतः । वैधर्म्येण प्रतिबिम्बनं[2] निद[3]र्शयति—**अत्र निहतत्वादेरित्यादि** । निहतत्वं गर्वाभिमुखीकरणं[4] च अन्वयमुखेन उक्तम् । तमःस्थानं उदयाद्रि[5]मौलित्वं च व्यतिरेकमुखेन । न[6] यावदित्युपन्यासात् । अतो वैधर्म्येण प्रतिबिम्बनम् ।

बिम्बानुबिम्बन्यायेन निर्देशे[7] धर्मधर्मिणोः[8] ।
दृष्टान्तालंकृतिर्ज्ञेया भिन्नवाक्यार्थसंश्रया ॥

निदर्शनां सूत्र[9]यति—**संभवताऽसंभवता वा[10] वस्तुसम्बन्धेन गम्यमानं प्रतिबिम्बकरणं निदर्शना।** सङ्गतिमाह—**प्रतिबिम्बेति[11]** । व्याचष्टे—**तत्र क्वचिदित्यादि** । वस्तुसम्बन्धो वाक्यार्थसम्बन्धः । इत्थमियं[12] द्विधा—सम्भवद्वस्तुसम्बन्धा, असम्भवद्वस्तुसम्बन्धा चेति—**चूडामणीति।** यो गिरिरागतं अभ्यागतं रविं सतां[13] आतिथेयी अतिथिसत्कृतिः कार्येति[14] बोधयन्[15] धत्ते[16] । योजयति—**अत्र [17]बोधयन्धत्त इति।** बो[18]धनसमर्थस्य आचारो गिरौ प्रयुक्तः[19] तस्याचेतनत्वेऽपि कारीषोऽग्निरध्यापयतीतिवत् गिरिः गृहमेधिनो बोधनक्रियासमर्थान् करोतीति तत्सामर्थ्याचरणे णिचः प्रयोगात् सम्भवति वस्तुसम्बन्धः ।

अ[20]व्यात्स इति । स शिवोऽव्यादित्यर्थः[21] । [22]यस्येन्दुः स्मरचापलीलां स्पृशति ।

---

1. A's alt. C. एषुकान्तामा H एककान्तामा 2. A C. नम् । बिम्बानु 3. D. निर्देशयति E निर्दर्शयति 4. H णं व्यति 5. E अद्रिः 6. Omitted in all except E 7. A. C. F. H. I देंशो 8. E धर्मिणां 9. D सूच 10. Omitted in A. C. F. H 11. D बति 12. D. E. H. I चेयं 13. D. साता 14. A's alt बोद्धगन्धत्त इति 15. D. omits य 16. A. C. D. F. H. I त्ते । अत्र 17. A. C. H चोद 18. A. C. H चोद 19. A. C. D. F. I प्रयुक्तः इति संभवति 20. D. व्यासव इ 21. H. अर्थः । संभवद्वस्तु (P. 96) 22. A. C. F. H अस्य D. यत्र ।

अत्र च स्मरचापसंबन्धिन्या लीलाया वस्त्वन्तरभूतेनेन्दुना स्पर्शनमसंभवल्लीलासदृशीं लीलामवगमयतीत्यदूरविप्रकर्षात्प्रतिबिम्बकल्पनमुक्तम्। एषापि पदार्थवाक्यार्थवृत्तिभेदाद्द्विधा। पदार्थवृत्तिः समनन्तरमुदाहृता। वाक्यार्थवृत्तिर्यथा—

त्वत्पादनखरत्नानां यदलक्तकमार्जनम्।
इदं श्रीखण्डलेपेन पाण्डुरीकरणं विधोः॥

केचित्तु दृष्टान्तालंकारोऽयमित्याहुस्तदसत्। निरपेक्षयोर्वाक्यार्थयोर्हि बिम्बप्रतिबिम्बभावे दृष्टान्तः। यत्र तु प्रकृतवाक्यार्थे वाक्यार्थान्तरमध्यारोप्यते सामानाधिकरण्येन तत्र संबन्धानुपपत्तिमूला निदर्शनैव युक्ता, न दृष्टान्तः। एवं च—

शुद्धान्तदुर्लभमिदं वपुराश्रमवासिनो यदि जनस्य।
दूरीकृताः खलु गुणैरुद्यानलता वनलताभिः॥

अत्रान्य[1]सम्बन्धिन्या लीलाया अन्येन स्पर्शासंभवात् इयमसंभवद्वस्तुसम्बन्धा। ननु तर्हि असङ्गतिरेव स्यादित्यत आह—**लीलासदृशीं लीलामित्यादि**। लक्षणा[2]श्रयणाद[3]दूरविप्रकर्षम्। वैचित्र्यान्तरायाह—**एषापी[4]त्यादि**। समनन्तरोदाहृतायामेकक्रिया[5]भिसम्बन्धात् पदार्थवृत्तिता[6]। **त्वत्पादेति**। नखरत्नानां निसर्गशोणत्वात् अलक्त(क[7])मार्जनं विधोः पाण्डुरीकरण[8]वत् अप्रयोजकमित्यर्थः। इयमसम्भवद्वस्तुसम्बन्धा वाक्यार्थ[9]वृत्तिः। मार्जनमेव पाण्डुरीकरणं न[10] भवति[11] यतः[12] अत्र येषां दृष्टान्तधीः[13] ते मन्दा इत्याह—**केचिदित्यादि**। वाक्यार्थनैरपेक्ष्ये[14] दृष्टान्तः। सापेक्षत्वे तु निदर्शनेत्याह—**यत्र तु प्रकृत इत्यादि**। सामानाधिकरण्ये[15]नाध्यारोप्यत इति वाक्यैकताश्रयणेन एकक्रिया[16]न्वयात् प्रकृतान्तःपातित्वं[17] नीयत इत्यर्थः। तत्र[18] वाक्ये प्रकृताप्रकृतवाक्ययोः सम्बन्धानुपपत्तिमूला[19] निदर्शनै[20]वेत्यर्थः। यत्राप्यनतिस्फुटं[21] सापेक्षत्वं दृष्टान्तधीर्माभूदिति उदाहरणेन दर्शयति—**एवं च[22] शुद्धान्तेत्यादि**। आश्रमवासिनो जनस्य शुद्धान्तदुर्लभं वपु[23]र्यदीति[24] यच्छब्द[25] उत्तरवाक्ये तर्हि दूरीकृता इति तच्छब्द[26]मुत्थापयति इति[27] वाक्यार्थयोः[28] सापेक्ष-

---

1. D. अनुसं 2. A. C. F. H णा समाश्रय D. क्षणाद 3. A. F. H णाद्दूर 4. A. C. H चेत्या 5. A. C. D. H क्रियासं 6. A. C. H त्तित्वात्पादे 7. All mss. omit क 8. D रणं भवति। इदं प्र. 9. All except E वाक्य वृ 10. A संभवति। 11. E ति। अत्र 12. A. C. F. H यतः एषां 13. A's alt धीतेः मायित्या C. धीते मावित्या D. धीः करणये 14. E. क्ष्यह दृष्टा 15. A's alt C करणयं वै नाध्या नारोप्यत 16. E या समन्व 17. D पातत्वं 18. A. C. F. H तत्र तु वा 19. C मूलं 20. A's alt नैरवेत्य 21. F स्फुटं द 22. Omitted in A. C. H. 23. D omits वपुः 24 इति omitted in A. C. F. H 25. A's alt. C यच्चोत्तर 26. A.C. H तच्चेदमु 27. Omitted in C. D. 28. A. H अर्थः। सापे C. अर्थसापे।

इत्यत्र दृष्टान्तबुद्धिर्न कार्या । उक्तन्यायेन निदर्शनाप्राप्तेः । इयं च सामान्येनैवोपमानवृत्तस्योपमेयेऽसंभवात्प्रतिपादिता पूर्वैः । वस्तुतस्तूपमेयवृत्तस्योपमानेऽसंभवादपि संभवति । उभयत्रापि संबन्धविघटनस्य विद्यमानत्वात् । तद्यथा—

> वियोगे गौडनारीणां यो गण्डतलपाण्डिमा ।
> अलक्ष्यत स खर्जूरीमञ्जरीगर्भरेणुषु ॥

अत्र गण्डतलं प्रकृतम् । तद्धर्मस्य पाण्डिम्नः खर्जूरीरेणुष्वसंभवादौपम्यप्रतीतिः । एष च प्रकारः शृङ्खलान्यायेनापि संभवति । यथा—

> मुण्डसिरे बोरफलं बोरोवरि बोरअं थिरं धरसि ।
> विग्गुच्छाअइ अप्पा णालिअछेआ छलिज्जन्ति ॥

त्वान्निदर्शनैव इयम् । तदेतदाह—**उक्त**[1]**न्यायेनेति** । अथ वैचित्र्या[2]न्तरायाह—**इयं च सामान्येनैवेत्यादि** । सामान्येन[3] वाक्यार्थयोरसंबन्धात् प्रतिपादनं वैचित्र्यान्त[4]रोपोद्घातः[5] । [6]वैचित्र्यान्तरं विवेचयति—उप[7]मेयवृत्तस्येत्यादि । शुद्धान्तदुर्लभमित्यादौ हि[8] उपमेय[9]-वृत्तेऽध्या[10]रोपितस्य उपमानवृत्तस्यासम्भवः । अथैतद्विपर्ययोऽपि—**वियोग**[11] **इति**[12] । वियोगेन[13] निमित्तेन[14] [15]पाण्डरीभूतानां नारीणां गण्डतले[16]यः[17] पाण्डिमा स[18]खर्जूरी[19]मञ्जरी[20]-गर्भरेणु[21]ष्वलक्ष्यतेत्यत्र उपमेयवृत्त[22]स्य गण्ड[23]पाण्डिम्नो मञ्जरीगर्भरेणुरूप[24]उपमानवृत्तेर्लक्ष्यत्वासंभवात् उपमा प्रतीयते । तदेतदाह— **अत्र गण्डतलमि**[25]**त्यादि** । अस्यैव च प्रकारस्य वैचित्र्यान्तरायाह—**एष चेति** । एष प्रकार उपमेयवृत्तस्य उपमानवृत्ते[26]ऽन्वयासंभवलक्षणम् । **मुण्डसिरेति** ।

> मुण्डशिरसि बदरफलं बदरो[27]परि बदरं स्थिरं धारयसि ।
> [28]द्विगुच्छ्रायसे* आत्मा मूढः छेकाश्छल्यन्ते ॥

---

1. A's alt उत्तरन्या 2. A. C. H चित्र्यावान्त 3. A's alt C मान्ये यो वा 4. A's alt. अन्तरो हि इधा C. तरोहि······घातः । 5. F द्धातं विवे 6. A. C तः दृष्टान्तवैलक्षण्य न्याय अवान्तर वैचि 7. A's alt C एषमेधवृत्त 8. Omitted in D. 9. A. C. F. H मेयाद्यारोपि 10. D वृत्तेरध्या 11. A. C. योगः स्मृति 12. Omitted in F. 13. A. C. F. H omit न. 14. A. C. F. H omit न 15. A. C. F. H नारीणां पाण्ड D. E. I गौरीणामापा 16. A ताले 17. Omitted in A. C. H. 18. Omitted in D. 19. C खञ्जरी 20. D. E. मञ्जरीणां 21. A's alt. omits णु 22. A. C. H निमित्त 23. D. गण्डा 24. A's alt C. रूपवनवृत्ते D. F रूपे 25. C इत्यसंभवो माल (P. 95) A. F इत्यादि । असंभवो माल (P. 95) 26. D वृत्त 27. D दरफलोपरि 28. D दिगु ।

* The meaning of द्विग् or दिग् in the Chaya is obscure. The chaya of the whole expression विग्गुच्छाअइ given by Jayaratha and Samudrabandha is विडम्ब्यते । These two commentators give the chaya of the last quarter as धूर्तच्छेकाः छल्यन्ते ।

इयमपि क्वचिन्मालयापि भवन्ती दृश्यते । यथा—

अरण्यरुदितं कृतं शवशरीरमुद्वर्तितं
स्थलेऽब्जमवरोपितं सुचिरमूषरे वर्षितम् ।
श्वपुच्छमवनामितं बधिरकर्णजापः कृतः
कृतान्धमुखमण्डना यदबुधो जनः सेवितः ॥

क्वचित्पुनर्निषेधसामर्थ्यादाक्षिप्तायाः प्राप्तेः संबन्धानुपपत्त्यापि भवति । यथा—

उत्कोपे त्वयि किञ्चिदेव चलति द्राग्गूर्जरक्ष्माभृता
मुक्ता भूर्न परं भयान्मरुजुषां यावत्तदेणीदृशाम् ।
पङ्क्त्या हंसगतिर्मुखेन शशिनः कान्तिः कुचाभ्यामपि
क्षामाभ्यां सहसैव वन्यकरिणां गण्डस्थलीविभ्रमः ॥

छेका विदग्धाः । छल्य[1]न्ते छलं नीयन्ते । अत्र छेकछलनहेतोर्निष्फलदुस्सङ्कट-[2] मूढकार्यपरम्परालक्षणस्य प्रतीयमानस्य उपमेयवृत्तस्य बदरधारणादावुपमानवृत्ते[3]ऽन्वयासंभवः । स च परस्पर[4]सव्यपेक्षत(या[5]) पङ्क्त्यवस्थानात् शृङ्खलान्यायेन स्थितः ।

मिथो[6]ऽनपेक्षपङ्क्त्यवस्थानलक्षणाया माला[7]रूपेणापि संभवतीत्याह—**इयमपीति** । अपिशब्दो भिन्नक्रमः । मालयापि भवन्तीत्यर्थः । **अरण्येति**[8] अरण्यरुदितं कृतं तादृशो दुःखाति[9]भारस्य दुःख[10]भागिजनमन्तरेण अनुभूतत्वात् । शवशरीरमुद्वर्तितं अगरुचन्दना[11]दिनाऽनुलिप्तम्[12] । तथाविधस्य संस्कारस्य तस्य वा स्वस्य वा अन्येषां वा भोगायोगात् । स्थलेऽब्जमवरोपितं[13] भुवनलालनीयस्य वस्तुनोऽपात्र[14]पतितत्वात् । सुचिरमिति प्रतिवाक्यमन्वीयते । ऊषरे वर्षितं नैरर्थक्यनैष्फल्ययोरुद्वेलत्वात् । श्वपुच्छमवनामितं चिरसंस्काराधानेऽप्य[15]नाहितसंस्कारत्वात् । बधिरकर्णजापः कृतः । जापः[16] उपांशुरहस्योक्तिः । अपात्रमिति ज्ञात्वैव दुरुत्कण्ठया समारम्भात्[17] । अन्धमुखमण्डना कृता तस्य अनुपयोगादन्येषां विडम्बनास्पदत्वात् । अबुधो जनः सेवितो यदिति वाक्यार्थेन विशेषितो यच्छब्दः प्रधान[18]वाक्यार्थभूता(म्[19]) क्रिया(मु[20])पगृह्णाति । यदबुधजनसेवनं तदरण्यरुदितादिकरणमित्युपमेयवृत्तस्य उपमानवृत्तेऽध्यारोपितस्य अन्वयासंभवो मालया[21]वतिष्ठते ।

अथ शब्दोपादानं विनापि अर्थाक्षेपादेव निदर्शना[22]वैचित्र्यं भवतीत्याह—**क्वचित्पुनरित्यादि** । निषेधो हि प्राप्तिपूर्वक एवेति प्राप्तिमाक्षिपति । निषेधा[23]क्षिप्तायाः

1. Omitted in D. 2. E सङ्कट 3. D. वृत्तेरन्व 4. A. C. D. F. H. सापेक्षतया 5. All mss. योप D. E. I पक्त्य 6. D अथ अन 7. D मायातद्रूपे E. I मालातद्रूपे 8. D omits इति 9. D. दुःखीति भूभार 10. D. E. I दुःखि 11. D. दनानुलि 12. D. लिप्तं भुवनलाल 13. E. I पितं उप्तं भु 14. D वात्र 15. D नेह्मना 16. Omitted in D. 17. D. आरम्भात् । अबुधोजनः । 18. D प्रसौ वा 19. All mss. भूतान् । 20. All mss. क्रियानुपगृ 21. A. C मालयव 22. D. नां 23. A's alt. C. षेधौ प्राप्तौ याः प्राप्तेः ।

अत्र मुक्तेति निषेधपदं तदन्यथानुपपत्त्या पादयोर्हंसगतिप्राप्तिराक्षिप्यते। सा च तयोरनुपपन्ना सादृश्यमवगमयतीत्संभवद्वस्तुसंबन्धनिबन्धना निदर्शना।

भेदप्राधान्ये उपमानादुपमेयस्याधिक्ये विपर्यये वा व्यतिरेकः ॥२८॥

अधुना भेदप्राधान्येनालङ्कारकथनम्। भेदो वैलक्षण्यम्। सा च द्विधा भवति। उपमानादुपमेयस्याधिकगुणत्वे न्यूनगुणत्वे वा भावात्। विपर्ययो न्यूनगुणत्वम्। क्रमेणोदाहरणम्—

दिदृक्षवः पक्ष्मलताविलासमक्ष्णां सहस्रस्य मनोहरं ते।
वापीषु नोलोत्पलिनीविकासरम्यासु नन्दन्ति न षट्पदौघाः॥

प्राप्तेः सम्बन्धानुपपत्तिरपि क्वचिन्निदर्शना[1]बीजमित्यर्थः। [2]तदा(नी मिय[3])मार्थीति[4] भावः। **उत्कोप इति**। अत्र[5] पङ्क्त्यां हंसगतिर्मुक्तेति त्यागरूपनिषेधबलात् पादयोर्हंसगतिप्राप्तिराक्षिप्ता[6]। सा साक्षात्सम्बद्धु[7]मशक्ता सादृश्यमवगमयति। तदेतदाह— **अत्र मुक्तेतीत्यादि**।

सम्भव[8]द्वस्तुसम्बन्धोऽसम्भव[9]द्वावबोधयेत्।
प्रतिबिम्बं यदि[10] तदा [11]निर्ज्ञातव्या निदर्शना॥
बिम्बानुबिम्बार्थतया वाक्ययोः प्रकृतान्वयोः।
स्यान्नैरपेक्ष्ये[12] दृष्टान्तः सापेक्षत्वे निदर्शना॥

इत्थमभेदप्राधान्याधिकारनिपातिनोऽलङ्काराः विवेचिताः।

अथ भेदप्राधान्येन[13] व्यतिरेकं सूत्रयति—**भेदप्राधान्ये उपमानादुपमेयस्याधिक्ये विपर्यये वा व्यतिरेकः**[14]। भेदप्राधान्ये साधर्म्ये[15] इत्यनुषज्यते[16]। भेदप्राधान्यं व्यतिरेकस्योक्तचरमनुस्मारयन् अधिकरोति—**अधुनेत्यादि**[17]। भेदसम्भववैचित्र्यद्वयं प्रभेदबीजत्वेन उद्घाटयति—**भेदो**[18] **वैलक्षण्यमित्यादि**[19]। विपर्यय[20]शब्दात् मिथ्याज्ञान[21]भ्रमो मा भूदित्याह—**विपर्ययो न्यूनगुणत्वमिति**[22]।

दिदृक्षव इति। अत्र नीलोत्प[23]लिनी विकासापेक्षयाक्षिसहस्रपक्ष्मलताया अधिकगुणत्वम्।

---

1. A's alt C. नाद्बीजं 2. A's alt. तदश्मी 3. All mss. नीयमियं 4. D. अर्थी 5. C. अथ 6. C. प्तार्थ साक्षा 7. C संबन्धम E. F बन्धु। 8. H पश्चमं वस्तु 9. D. भवन्वा बो 10. Omitted in A. C. D. F. H. 11. A. निर्णीतव्या C नि……नि D. निज्ञात 12. D पेक्ष्य 13. D. E. F तत्र व्य 14. H कः सोऽत्र चरमनु 15. A's alt C धर्म्ययने 16. All mss. ते याचिख्यासुः भेद 17. D. आदि। विपर्ययः। 18. H. भेद 19. H. आदि। विपर्ययो न्यून 20. D. पर्ययः A's alt. यः सुमित्या (थ्या)[ज्ञान] भ्रमो C. यः स मित्याज्ञानं भ्रमो 21. Omitted in D. F. 22. इति omitted in H. 23. A. C. D, H पलानि।

क्षीणः क्षीणोऽपि शशी भूयो भूयो विवर्धते सत्यम् ।
विरम प्रसीद सुन्दरि ! यौवनमनिर्वर्ति यातं तु ।।

अत्र विकस्वरनीलोत्पलिन्यपेक्षयाक्षिसहस्रस्य पक्ष्मलताया वैलक्षण्यमधिकगुणत्वम् । चन्द्रापेक्षया च यौवनस्य न्यूनगुणत्वम् । शशिवैलक्षण्येन गतस्यापुनरागमात् ।

उपमानोपमेययोरेकस्य प्राधान्यनिर्देशेऽपरस्य सहार्थसंबन्धे सहोक्तिः ॥२९॥

भेदप्राधान्य इत्येव । गुणप्रधानभावनिमित्तकमत्र भेदप्राधान्यम् । सहार्थप्रयुक्तश्च गुणप्रधानभावः । उपमानोपमेयत्वं चात्र वैवक्षिकम् । द्वयोरपि प्राकरणिकत्वादप्राकरणिकत्वाद्वा सहार्थसामर्थ्याद्धि तयोस्तुल्यकक्षत्वम् । तत्र

क्षीणः क्षीणो[1]**ऽपीति** । अत्र अनिवर्तिनो यौवनस्य क्षयिणो[2]ऽपि भूयोऽभि[3]-[4]वर्धितशशिव्यपेक्षया न्यूनगुणत्वम् । तदेतदुभयं योजयति—**अत्र विकस्वरेत्यादिना**[5] ।

भेदप्रधाने साधर्म्ये व्यतिरेको विधीयते ।
आधिक्यादुपमेयस्य न्यूनत्वा[6]द्वोपमानतः ।।

सहोक्तिं सूत्रयति—**उपमानो**[7]**पमेययोरेकस्य प्राधान्यनिर्देशे**[8]**ऽपरस्य सहार्थ**[9]**-सम्बन्धे सहोक्तिः** । अधिकारमनुस्मारयन्[10] [11]सामग्रीमस्या विविनक्ति—**भेदप्राधान्य इत्येवेत्यादिना** । ननु सहार्थ[12]तया[13] तुल्यकक्ष्ययोः[14] कथं भेदप्रधानतेत्यत आह—**गुणप्रधानभावेत्यादि** । सत्यम् । सहार्थ[15]सामर्थ्यात् साधर्म्यमेवात्र । भेदप्राधान्यं तु व्यतिरेक[16]नयेन साधर्म्यभित्ति[17]कमिह न भवति अपि तु गुण[18]प्रधानभावभित्तिकमिति यावत् । ननु समानयोगत्वे गुणप्रधानभावोऽपि[19] कीदृगि[20]त्यत आह—**सहार्थप्रयुक्तेति** । सहार्थो हि तृतीया तं गुणत्वेन प्रयोजयति । ननु सहार्थत्वे क[21] उपमानोपमेयभाव इत्यत आह—**उपमानोपमेयत्वं चेत्यादि**[22] । [23]तद्धि तृतीयान्तस्य[24] विशेषणत्वादुपमानत्वं विवक्ष्यते । इतरस्य तु विशेष्यत्वादुपमेयत्वम् । अतो वैवक्षिकमेव न तु[25] वास्तवमिति भावः । अवास्तवत्वे हेतुमाह—**द्वयोरपीत्यादि** । ननु[26] द्वयोः प्राकरणिकत्वमेवाप्राकरणिकत्वमेव वेति[27] किं नियामकमित्यत आह—**सहार्थसामर्थ्यादिति** । ननु तर्हि

---

1. A. C. F. H. क्षीणाद्गिति 2. D. G. त्तयिणयोऽपि E. ययेऽपि 3. C. भूयाभि 4. A's alt. C. वद्धित F. H. अभिवृद्ध श 5. A. C. F. H. आदिना सहोक्ति 6. C. वाद्योप 7. F. उपमानेति 8. A. शे पर 9. E. अर्थाभिसं 10. D. य साम 11. A. C. F. H. सामान्यस्य वि 12. H. अर्थं येन साधर्म्य 13. D. स्या 14. A. C. D. H. कत्तयोः 15. C. अर्थं 16. A. C. D. F. H. I. न्यायेन 17. C. omits भित्ति 18. A. C. गुणप्रगुण प्र 19. D. अपीति की 20. A. F. H. कीदृशः इत्यतः 21. A's alt. C. तु 22. A's alt. C. नेत्या 23. A's alt. C. त तृतीय 24. A. C. F. H. अन्तं तस्य 25. Omitted in A. C. H. 26. A. C. F. H. न तु 27. All mss इति वा किं

तृतीयान्तस्य नियमेन गुणत्वादुपमानत्वम् । अर्थाच्च परिशिष्टस्य प्रधानत्वादुपमेयत्वम् । शाब्दश्चात्र गुणप्रधानभावः । वस्तुतस्तु विपर्ययोऽपि स्यात् । तत्रापि नियमेनातिशयोक्तिमूलत्वमस्याः । सा तु कार्यकारणप्रतिनियमविपर्ययरूपा अभेदाध्यवसायरूपा च । अभेदाध्यवसायश्च श्लेषभित्तिकोऽन्यथा वा । साहित्यं चात्र कर्त्रादीनां भेदाद् ज्ञेयम् । तत्र कार्यकारणप्रतिनियमविपर्ययरूपा यथा—

भवदपराधैः सार्धं सन्तापो वर्धतेतरां तस्याः ।

वैवक्षिकत्वे कतरत्[1] केन रूपेण विवक्ष्यतामित्यत आह—**तृतीयान्तस्येत्यादि**[2] । ननु[3] प्रधानमपि तृतीयान्तेन[4] निर्देशमर्हतीत्यत आह—**शाब्दश्चेति**[5] । सहशब्दो हि नियमेन तृतीयान्तस्य शाब्द[6]गुणत्वं कल्पयति । इतरस्य तु प्राधान्यम् । तर्हि अर्थापेक्षया का स्थितिरित्यत आह—**वस्तुतस्त्विति** । गुणस्यापि प्राधान्यं, [7]प्रधानस्यापि गुणत्वं विपर्ययः । अपिशब्दाद[8]नवस्थितिरपि । एवं न्यायक्रमे स्थिते[9]ऽपि विशेषोऽन्योऽस्याः प्रयोजक इत्याह—**तत्रापीत्यादि** । अतिशयोक्तिरपि[10] न[11] साकल्येन अस्या मूलमित्यत आह—**सा चेत्यादि** । कार्यकारण[12]प्रतिनियमविपर्ययोऽत्र तुल्यकालता न तु कार्यस्य पूर्वकालता[13] सहार्थत्वात् । अभेदाध्यवसायस्तु[14] द्विधा भवतीत्याह—**अभेदाध्यवसायश्चेत्यादि** । [15]तेनेयं त्रिविधोपक्षिप्ता । वैचित्र्यान्तरमुपक्षिपति—**साहित्यं**[16] [17]**चात्रेत्यादि** । कर्तृकर्मादि साहित्यनिबन्धनेनापि प्रभेदेन प्रथत[18] इति यावत् ।

क्रमेणोदाहरणानि । भवदपराधैरिति—अत्रापराधानां तृतीयान्तत्वाद्गु[19]णता । सन्तापस्य[20] प्रथमान्तत्वात्प्रधानता । अतो गुणप्रधानभाव[21] निबन्ध[22]नैवात्र भेदप्रधानता, न[23] पुनर्द्विक्रियानिबन्धना । स च गुणप्रधानभावः[24] सहार्थ[25]प्रयुक्तः । द्वयोश्च प्राकरणिकत्वादुपमानोपमेयभावो वैवक्षिकः । अपराधानां च तृतीयान्त[26]त्वात् विशेषणानामुपमान[27]त्वं नियतमपराधा यथा वर्धन्त[28] इति । सन्तापस्य तु प्रधानत्वादुपमेयत्वं सन्तापस्तथा वर्धत[29] इति । स चायं गुणप्रधानभावः शाब्दः । अर्थं व्यपेक्ष्य तु[30] सन्ताप एव (इव) अपराधा वर्धन्त इत्यपि[31] प्राप्तेः । न्याय[32]क्रमोऽयं उदाहरणान्तरेष्वपि योजनीयः ।

---

1. A. omits क A's alt. C. कत्वे तरात्तेन 2. A. F. H. आदिना 3. C. omits नु 4. F. H. अन्तत्वेन 5. A's alt. शब्दांशेति 6. D. शाब्दः E. शाब्दं 7. D. प्राधान्यस्या 8. E. दाद्यथाव 9. A. C. F. H. स्थितिविशेषोऽन्यस्याः 10. H. अपि प्रभेदेन 11. Omitted in A. C. F. 12. A's alt. C. ण विप्रति 13. A's alt. तात्पर्यस्य पूर्वकालस C. तात्वय्यस्य पूर्वकाल स 14. D. सायो द्वि 15. All excpet E. omit ते 16. C. हित्य 17. A's alt. C. इत्यत्रे 18. C. प्रधत 19. C. अगुणता E. गुणत्वम् 20. A. E. H. स्य प्रधानत्वात् प्रथ A's alt. C. स्य अप्रधानत्वात् प्रथमान्तं । अतो 21. D. भावि 22. D. बन्धेनैव C. बन्धनेनैव 23. Omitted in D. 24. D. भावप्रयुक्ताहार्थ 25. A. C. अर्थ युक्तत्व इ 26. D. तरत्वा 27. A's alt. C. उपमेयत्वं 28. A. C. वतन्त 29. D. वर्धन्त 30. Omitted in C. 31. A. C. F. इति प्रा 32. D. न्यायः

अत्र अपराधानां सन्तापं प्रति हेतुत्वेऽपि तुल्यकालत्वेनोपनिबन्धः। श्लेषभित्तिकाभेदाध्यवसायरूपा यथा—

अस्तं भास्वान्प्रयातः सह रिपुभिरयं संह्रियन्तां बलानि।

अत्रास्तंगमनं श्लिष्टम्, अस्तमित्यस्योभयार्थत्वात्। तदन्यथारूपा यथा—

कुमुददलैः सह संप्रति विघटन्ते चक्रवाकमिथुनानि।

अत्र विघटनं संबन्धिभेदाद्भिन्नं न तु श्लिष्टम्। एतद्विशेषपरिहारेण सहोक्तिमात्रं नालङ्कारः। यथा—

अनेन सार्धं विहराम्बुराशेस्तीरेषु तालीवनमर्मरेषु।
द्वीपान्तरानीतलवङ्गपुष्पैरपाकृतस्वेदलवा मरुद्भिः॥

इत्यादौ। एतान्येव कर्तृसाहित्ये उदाहरणानि। कर्मसाहित्ये यथा—

द्युजनो मृत्युना सार्धं यस्याजौ तारकामये।
चक्रे चक्राभिधानेन प्रेष्येणाप्तमनोरथः॥

अत्र करोतिक्रियापेक्षया द्युजनस्य मृत्योश्च कर्मत्वम्। इयं च मालयापि भवन्ती दृश्यते। यथा—

अत्र कार्यकारणसमकालत्व[1]लक्षणातिशयोक्तिर्मूलमिति दर्शयति—अत्रापराधानामित्यादि।

अस्तं भास्वानिति—संह्रियन्तां[2] विप्रकीर्णा[3]नि एकीक्रियन्तामित्यर्थः अत्र श्लेषभित्तिकाभेदाध्यवसायरूपा[4] मूलमिति दर्श[5]यति—अत्रास्तंगमनमित्यादि। अस्तम्[6] एकदा गिरिः[7] अन्यदात्ववसाद इत्युभयार्थत्वम्।

कुमुददलैरिति—अत्र पुनः अ[8]श्लेषभित्तिकाभेदाध्यवसायरूप[9]मूलमिति दर्शयति—अत्र विघटनमित्यादि। एवमतिशयोक्तिमूलत्वादिलक्षणो यो विशेषः तदभावे सहोक्तिमात्रं नालङ्कार इति व्युत्पादयति—एतद्विशेषेति। [10]प्रत्युदाहरति—अनेन सार्धमिति। कर्तृसाहित्यलक्षणं वैचित्र्यमप्ये[11]ष्वेव दर्शितमित्याह—एतान्येवेति। एषु हि सन्तापापराधादि [12]कर्तृसाहित्य[13]म्—द्युजन इति। द्युजना देवाः। द्युजनस्य मृत्युना सह मनोरथावाप्तिः दैत्यबलक्षयः। अत्र कर्मसाहित्यं दर्शयति—अत्र करोतिक्रियेत्यादि। द्युजन[14]मृत्योः आप्तिक्रियापेक्षया कर्तृत्वेऽपि तस्योपसर्जनत्वात् नेह कर्तृसाहित्यम्। या तु (चक्र[15]

---

1. A. C. omit. त्व 2. E. इति वि 3. C. कीर्णानेन सिद्धान्तमनाकृष्ट (P. 100) 4. A. F. रूप 5. A. ति। अत्र विघटन 6. D. E. अस्त 7. D. गिरिं 8. D. omits अ 9. A. E. F. H. I. रूपा 10. D. तत्र प्र E. अत्र प्रत्यु 11. E. omits अपि 12. A. F. कर्म 13. Except F. all read यमद्युज 14. A. मृत्व्योः 15. A. C. F. H. I. चकर्तृता प्र D. चात्र कर्तृका प्र E. चक्र कर्तृताप्र

उत्क्षिप्तं सह कौशिकस्य पुलकैः सार्धं मुखैर्नमितं
भूपानां जनकस्य संशयधिया साकं समास्फालितम् ।
वैदेह्या मनसा समं च सहसाकृष्टं ततो भार्गव-
प्रौढाहंकृतिकन्दलेन च समं भग्नं तदैशं धनुः ॥

सहोक्तिप्रतिभटभूतां विनोक्तिं लक्षयति—

विना कश्चिदन्यस्य सदसत्त्वाभावो विनोक्तिः ॥३०॥

सत्त्वस्य शोभनत्वस्याभावोऽशोभनत्वम् । एवमसत्त्वस्याशोभनत्व-

इति) प्रधानभूता करोतिक्रिया तदपेक्षया कर्मत्वा[1]त्कर्मसाहित्यमेतदिति यावत् । एवं करणादिसाहित्य[2]वैचित्र्यमुन्नेयम्[3] ।

अथ पुनर्वैचित्र्यायाह—**इयं चेति** । [4]**उत्क्षिप्तमिति** । [5]धनुष उत्क्षेपः [6]ज्याबन्ध-सङ्घट्ट[7]नम् । आस्फालनमाकर्षः[8] । शिलीमुखमोक्ष इत्यादि क्रमिकाणि धा[9]नुष्ककर्माणि । तत्रा[10]कर्षण[11]मात्रान्तं परिपण[12]नात्तावन्त्येवोपवर्णितानि । तत्रातिवत्सलस्य कौशिकस्य पुलकानां धनुरुत्क्षेपसम[13]समयमुत्क्षेपः, मत्सरग्रस्तत्वात् उत्क्षेपमात्रा[14]परितोषितानां भूपानां धनुर्नति(सम)समयं मुखनतिः[15] । परिपणिताकर्षणस्य जनकस्य [16]नत्यन्तं संशयानु-वृत्तेः । ज्यास्फालनसमसमयं संशयबुद्ध्यास्फालनम् । वैदेह्याः पुनः परिपणनसिद्ध्यन्त-[17] मनाकृष्टमन[18]स्समाकर्ष[19]सम[20]सम(यं[21]) म(नः[22])समाकर्षः[23] । भार्गवाहङ्कृति-कन्दलस्य तु धनुर्भङ्गान्तमभग्न[24]स्य भङ्गसमसमयं भङ्गः[25]श्रीमता रामचन्द्रेणाकारीति समन्वयात् कर्मसाहित्यमिह मालात्वेनावतिष्ठते । एवमन्यदपि मालात्वेन ज्ञेयम् ।

गुणप्रधानभावो यः[26] शाब्दस्तेन भिदोत्कटा ।
संश्रितातिशयोक्तिं च[27] सहोक्तिस्समयोर्मता ॥

अथ विनोक्त्यै[28] सङ्गतिमाह—[29]**सहोक्तिप्रतिभटेत्यादि**—प्रतिभटभूतां प्रतियोगि-भूताम् । तत्र सूत्रम्—**विना[30] [31]कश्चिदन्यस्य [32]सदसत्त्वाभावो विनोक्तिः** । व्याचष्टे—**सत्त्वस्येत्या(दि[33])** । (व्य[34]त्ययेनाभावशब्दार्थौ) प्रत्येकमभिसम्ब[35]ध्येते । शोभनत्वा-

---

1. A. D. कर्मसाहित्यात्कर्म 2. A. F. त्यमुन्ने 3. A. F. उन्नेयम् । इयं 4. A. C. D. F. H. I. उपक्षिप्तं 5. D. उद्धनु 6. E. पः प्रेक्षाज्या 7. A. F. घट 8. A. F. आक-र्षणम् 9. A. धनु 10. D. अत्र 11. D. omits ण 12. A. पणात्ता 13. D. समयस 14. D. मात्रप 15. E. नति 16. D. सत्य 17. A. F. सिद्ध्यर्थ A's alt. C. पणनेन सिद्धान्त 18. A. C. E. F. H. I. मनसस्स 19. A. C. F. कर्षणस 20. D. समन्ध-नुस्समा 21. All mss. समयमन 22. All mss. मनसस्सदा 23. A. C. कर्षण भा 24. C. अनग्न D. अनुभग्न 25. C. भङ्ग विमता 26. A. C. F. यस्यस्तेन 27. Omitted in A. C. D. F. H. I. 28. A. C. F. त्त्यैव 29. F. सहेति 30. F. विनेति 31. A. D. F. H. किञ्चि 32. A. C. F. H. सद्दशत्वाभा 33. All mss. दित्वप्रत्य 34. A. C. D. H. I. प्रत्ययाभाव शब्दा अष्टौ B. E. F. प्रत्ययभावशब्दा अष्टौ 35. A. C. F. H. बध्यते

स्याभावः शोभनत्वम् । ते द्वे सत्वासत्वे यत्र कस्यचिदसंनिधानान्निबध्येते सा द्विधा विनोक्तिः । अत्र च शोभनत्वाशोभनत्वसत्तायामेव वक्तव्यायामसत्ता-मुखेनाभिधानमन्यनिवृत्तिप्रयुक्ता तन्निवृत्तिरिति ख्यापनार्थम् । एवं चान्य-निवृत्तावपि विधिरेव प्रकाशितो भवति । आद्या यथा—

विनयेन विना का श्रीः का निशा शशिना विना ।
रहिता सत्कवित्वेन कीदृशी वाग्विदग्धता ॥

अत्र विनयाद्यसंनिधिप्रयुक्तश्रीविरहाद्यभिधानमुखेनाशोभनत्वमुक्तम् । अत्र विनाशब्दमन्तरेणापि विनार्थविवक्षा यथाकथंचिन्निमित्तीभवति । यथा सहोक्तौ सहार्थविवक्षा । एवं च

निरर्थकं जन्म गतं नलिन्या यया न दृष्टं तुहिनांशुबिम्बम् ।
उत्पत्तिरिन्दोरपि निष्फलैव न येन दृष्टा नलिनी प्रबुद्धा ॥

भावोऽशोभनत्वं तत्त्वाभावः शोभनत्वमिति । कश्चिदर्थं[1] विना यत्र शोभनत्वं नास्ति सैका विनोक्तिः । यत्र[2] त्वशोभनत्वं नास्ति[3] सान्येति द्विरूपेयमित्यर्थः ।

ननु [4]कस्मिंश्चित् सत्त्वासत्त्वे इत्येतावतैव [5]पर्याप्तौ (किं ?)[6]निषेध[7]द्वयाश्रयणगौरवे-णेत्यत आह—**अत्र चेत्यादि । अन्यनिवृत्तिप्रयुक्तेति**[8] । अन्यनिवृत्तिश्चेत् सदसत्त्व-निवृत्तिं न प्रयोजयति । तदा न विनोक्त्यलङ्कारः । न[9]ह्यस्मिन् सति सत्त्वमसत्त्वं वेत्यु[10]क्तौ[11] विच्छित्तिः [12]काचित् । अतोऽन्यनिवृत्तिप्रयुक्ता सदसत्त्वनिवृत्तिरेव विनो-क्त्यलङ्कारः इति भावः । अस्मिन्सति[13] सत्त्वमसत्त्वं[14] चेति [15]वस्तुविधिः, सत्त्वलङ्कार[16]-फलत्वेन प्राप्ते प्रकाश्यत इत्याह—**एवं चान्य[17]निवृत्तावपि इत्यादि** । द्विरूपाया अपि परिपाट्योदाहरणं—**विनयेति**[18] । अत्र [19]विनयशशिसत्कवित्वनिवृत्त्या श्रीनिशाविदग्धा (धता) नि[20]वृत्तिरिति सत्त्वाभावोदाहरणम् । विनयादिषु च सत्सु श्रीप्रभृतिसद्भावः[21] फलत्वेन प्रकाश्यते । तदिदमभिसन्धायाह—**अत्र विनयादीत्यादि**[22] । विनादि[23] [24]शब्दाभावे[25] तदर्थं[26]सद्भावे[27] विनोक्तिरेवेति व्युत्पादयितुमाह—**अत्र विना[28]शब्द इत्यादि । यथा सहोक्ता[29]विति** । सहोक्तावप्ययं न्याय इति यावत् । अत्रोदाहरति—**निरर्थकं[30] जन्मेति** ।

---

1. D. दित्थं 2. A. C. D. H. यत्रांशो F. यत्वत्र शो 3. D. नास्तीति 4. A's alt. C. कश्चित् 5. A. C. F. H. पर्यायोक्तौ 6. E. G. I. निषेधः 7. F. धः यद्वाश्र किं is necessary here 8. A. C. F. H. omit इति 9. A. F. अन्यस्मि 10. A's alt. H. वेति काचि C. वेति वस्तुविधिः 11. A's alt. D. F. वा वि 12. D. का भावः अस्मिन् 13. सति omitted in A C. F. 14. A. C. वेति 15. D. F. यस्तु 16. C. रत्वेन 17. A. चान्यानि C. च निवृत्तपीत्या D. E. F. च निवृत्ता H. च निवृत्तावित्या 18. A. C. H. विनेति 19. H. विनाशशीतिस 20. A. C. F. H. निष्पत्ति 21. C. भावफ 22. A. C. D. F. H. नयादित्या 23. A. C. E. F. H. I. विनयादि 24. Except E all read संबन्धाभा 25. F. भावे वि 26. A. C. H. अर्थं D. अर्थः स्वभा 27. Except C. all read सदभावे 28. A. नाश इत्या 29. A's alt. होव-पर्यन्त्या C. होक्तावप्ययं 30. D अर्थं ज

इत्यादौ विनोक्तिरेव। तुहिनांशुदर्शनं विना नलिनीजन्मनोऽशोभनत्वप्रतीतेः। इयं च परस्परविनोक्तिभङ्ग्या चमत्कारातिशयकृत्। यथोदाहृते विषये। द्वितीया यथा—

मृगलोचनया विना विचित्रव्यवहारप्रतिभाप्रभाप्रगल्भः।
अमृतद्युतिसुन्दराशयोऽयं सुहृदा तेन विना नरेन्द्रसूनुः॥

अत्राशोभनत्वाभावः शोभनपदार्थप्रक्षेपभङ्ग्योक्तः। सैषा द्विधा विनोक्तिः।

अधुना विशेषणविच्छित्त्याश्रयेणालङ्कारद्वयमुच्यते। तत्रादौ विशेषण-साम्यावष्टम्भेन समासोक्तिमाह—

---

*अत्र[1] तुहिनां[2]शुदर्शनं विना नलिनीजन्म न शोभनमिति प्रतीयते। अतो विनोक्तिः इयम्। विनाशब्दा[3]नुपादाने त्वार्थीति विशेषः[4]। तदिदमभिसन्धायाह—**इत्यादौ विनोक्तिरेवेत्यादि**[5]। अत्र च[6] हेतुहेतुमद्भावव्यक्तयो विनोक्ते[7]रेव विच्छित्तिविशेषाधायकः[8] न पुनरलङ्कारान्तरमित्याह—**इयं च परस्परेत्यादि**। **उदाहृतविषय इति**। निरर्थकं[9] जन्मेत्ययमुदाहृतो विषयः। **मृगलोचनयेति**। लोके हि मृगलोचनां[10] विना [11]विचित्रव्यवहारप्रतिभाप्रागल्भ्यं नास्ति सुहृदा विना च[12] सुन्दराशयत्वम्। अस्य तु नरेन्द्रसूनोर्न तथेति श्लोकार्थः। असत्त्वा[13]भावं दर्शयति—[14]**अत्राशोभन**[15]**त्वाभावादित्यादि**। [16]प्रतिभा-प्रागल्भ्यं सुन्दराशयत्वं[17] च[18] शोभनपदार्थौ। निगमयति—**सैषा द्विधेति**।

सदसत्त्वनिवृत्ति[19]श्चेन्निवृत्त्या[20]ऽन्यस्य वर्ण्यते।
तदा द्विधा विनोक्ति[21]स्स्याद्वि[22]धिरत्र फलं भवेत्॥

अथ[23] विशेषणविच्छित्तिमूलौ[24] समासोक्तिपरिकरौ प्रस्तौति—**अधुना**

---

1. H. अत्र किं क्रियतामित्यर्थः। अथ पुनर्वैचित्र्यायाह—इयं चेत् किमिन्द्रमिति। अप्रस्तुतस्य गम्यत्वे (समासोक्ति P. 103) 2. All except E. हिनरश्मिद 3. C. शब्दा-पादा D. ब्दोपा 4. A. C. H. शेष दिदम 5. H. आदि। सदसत्त्व 6. Omitted in A. and C. 7. A. C. नोक्तिरेव 8. A. धायक न 9. A. कमनुजन्मे 10. C. लोचना 11. A. C. E. F. omit वि 12. Omitted in A. C. F. 13. C. सत्या 14. A. C. F. अत्र शो 15. Except E. all read नताभाव 16. A. C. F. प्रतीता प्रा 17. A. C. E रावयवत्वं 18. A. C. F. अशोभ 19. H. त्तिश्चे 20. E. वृत्तान्य 21. A. F. I. क्तिश्च 22. Except H. all read द्विधात्र 23. A. स एवोक्तिविच्छि C. अथ अधुना 24. A. मूलो अधुना।

* After अत्र A. C. repeat the passage क्रियन्तामित्यर्थः। ......upto वैदेह्याः पुनः under सहोक्ति (pp. 99-100), then jumps to 'गम्यत्वे यदि विशेष्यस्यापि' etc.......upto रहस्यविदामित्यलम्, a discussion occurring under Samāsokti (pp. 103—104) and after this इत्यलम् comes back to Vinokti as इत्यलम्। अथ समासोक्तिः। तुहिनांशु

विशेषणसाम्यादप्रस्तुतस्य गम्यत्वे समासोक्तिः ॥३१॥

इह प्रस्तुताप्रस्तुतानां क्वचिद्वाच्यत्वं क्वचिद्गम्यत्वमिति द्वैविध्यम्। वाच्यत्वं च श्लेषनिर्देशभङ्ग्या पृथगुपादानेन वेत्यपि द्वैविध्यम्। एतद्द्विभेदमपि श्लेषालङ्कारस्य विषयः। गम्यत्वं तु प्रस्तुतनिष्ठमप्रस्तुतप्रशंसाविषयः, अप्रस्तुतनिष्ठं तु समासोक्तिविषयः। तत्र च निमित्तं विशेषणसाम्यम्।

विशेषेणेति[1]। विशेषेण विच्छित्तिश्च[2] द्विरूपा[3] साम्यं साभिप्रायता च। साम्ये समासोक्तिमधिकरोति—**तत्रादावित्यादि**। तत्र सूत्रम्। **विशेषेणसाम्यादप्रस्तुतस्य गम्यत्वे समासोक्तिः**। यत्र[4] विशेष्यांशे प्रकृतमात्रपरता विशेषणसाम्यात् पुनरप्रकृतो[5]ऽवगम्यते सा[6] समासेन संक्षेपेण अभिधानात् समासोक्तिः। तदेतद्व्याचिख्यासुर्विषयविभागायाह—**इह प्रस्तुतेत्यादि**। **क्वचिद्वाच्यत्वम्**[7]। उभयेषामिति शेषः। **क्वचिद्गम्यत्वं**, [8]एकतरेषामिति शेषः। [9]**श्लेषनिर्देशभङ्ग्येति**। विशेषणविशेष्यांशयोः श्लेषोपनिबन्धने[10]नेत्यर्थः[11]। **पृथगुपादानेन वेति**। विशेषणांशे श्लेषमुपनिबद्ध्य विशेष्यांशे पृथक् शब्दोपादानेनेत्यर्थः। एतद्द्विभेदमपि वाच्यत्वं[12] श्लेषालङ्कारस्य विषयः। यदा पुनर्गम्यत्वं प्रस्तुतविषयं[13] विशेषणसाम्यात् तदानीम[14]प्रस्तुतप्रशंसा, यदा[15]त्वप्रस्तुतविषयं तदा समासोक्तिरिति[16] विवेकः। अप्रस्तुतस्य गम्यत्वे यदि विशेष्यस्यापि साम्यं तदा[17]किं स्यादित्यत आह—**विशेष्यस्यापि साम्ये श्लेषप्राप्तेरिति**। श्लेषमूलध्वनिप्राप्तेरिति यावत्। ननु श्लेषालङ्कारत्व[18]प्राप्तिः किं न स्यात्। उच्यते। अत्रेयं[19] चर्चा। समासोक्त्यलङ्कारः श्लेषालङ्कारः शब्दशक्तिमूलध्वनिश्चेति त्रिषु विषयेष्व[20]प्यस्ति श्लिष्टपदो[21]पनिबन्धः। तत्र यदा[22] श्लेषः तदार्थ[23]-द्वयस्य नियमेन वाच्यता। वाच्यत्वं चैवं संभवति—यदार्थौ द्वावपि प्राकरणिकौ स्तः[24] अप्राकरणिकौ वा तदा विशेषणविशेष्यांशयोर्द्वयोरपि [25]श्लिष्टपदोपनिबन्धात् श्लेषालङ्कारः। [26]अभिधाया अनियन्त्रणात्[27] द्वावप्यर्थौ वाच्यौ। अथ यदैकस्य[28] प्राकरणिकत्वमितरस्य अप्राकरणिकत्वं तदा विशेष्यांशे पृथक् शब्दोपादानबलादेव श्लेषालङ्कारः। यदि विशेष्यांशेऽपि श्लिष्टपदोपनिबन्धः तदा प्रकरण[29]नियन्त्रितायाः[30] अभिधायाः प्राकरणिकार्थं एवोपक्षयाद[31]प्राकरणिकार्थावगतिर्व्यञ्जनस्यैव विषयस्स्यात्। [32]यद

---

1. F. विशेषेति 2. C. त्ति द्विरू 3. D. रूप 4. Omitted in A. C. F. H. 5. A. C. H. तो गम्य 6. A. C. H. स 7. D. तम् एकतरेषा 8. A. C. F. H. एकत्र तेषा F. एकत्र गतमिति 9. A. E. F. H. शेष 10. A. C. D. F. H. I. बन्धनेत्य 11. F. अर्थः। एतद्द्विभे 12. A. C. F. H. यत्वे 13. A. F. H. विषय 14. D. मपि प्राकृतप्रशं 15. A. D. H. यदा प्र 16. A. C. H. इति। समासोक्तिरूप (P. 104.) 17. D. किं किं 18. H. omits त्व 19. D. E. F. H. अयं चर्चः 20. अपि omitted in D. E. 21. A. पद्योप 22. A. C. D. यदा तावत् श्ले 23. D. अर्थलयनि 24. A. C. स्तः तदा 25. A. C. F. अश्लि 26. H. अथ अभि 27. D. णादावष्य 28. A. C. D. F. H. I. एकदेशस्य 29. F. प्राकरणिकनि 30. A's alt. C. यन्त्रिकाया 31. A. D F. त्वया अप्रा 32. D. E. अथ य

विशेष्यस्यापि साम्ये श्लेषप्राप्तेः । विशेषणसाम्यवशाद्धि प्रतीयमानमप्रस्तुत प्रस्तुतावच्छेदकत्वेन प्रतीयते । अवच्छेदकत्वाच्च व्यवहारसमारोपो न तु रूपसमारोपः । रूपसमारोपे त्ववच्छादितत्वेन प्रकृतस्य तद्रूपरूपित्वाद्रूपकमेव ।

समासोक्तिस्तदा विशेषणांशे अर्थद्वयप्रतिपादकशब्दोपनिबन्धः विशेष्यांशे तु [1]प्राक-
रणिकार्थमात्रपरता । तदा विशेषण[2]साम्या दप्रस्तुतस्य गम्यत्वादुक्तलक्षणा[3] समासोक्तिः ।
यदा पुनः प्राकरणिकाप्राकरणिकयोः विशेषणविशेष्यांशे[4]ऽपि श्लिष्टता तदा तावन्न
समासोक्तिः विशेषणमात्रसाम्यलक्षणा[5] यतः श्लेषालङ्कारत्व[6]प्राप्तिरपि । कथम् ?
तत्रार्थद्वयस्य वाच्यतैव लक्षणं यतः, न ह्यत्र[7] द्वयोर्वाच्यतोपपत्तिः[8] प्रकरणपक्षपातिन्या
अभिधाया अप्राकरणिकेऽर्थे स्पर्शाभावात् अप्राकरणिकस्य[9] समन्वयसमनन्तर[10]प्रतीति-
कत्वात् शब्दशक्तिमूलस्य ध्वनेः श्लेषेण विषयग्रासप्रसङ्गाच्च । विविक्तोऽयं[11] घण्टापथः
ध्वनिनिदर्शनरहस्यविदामित्यलम् ।

अथ समासोक्तिरूपकयोः वैधर्म्यं विवेचयति—**विशेषणसाम्य[12]वशादित्या-
दिना[13]** । हिर्हेतौ । यतो विशेषणसाम्यादप्रस्तुतोऽर्थः प्रतीयते, अतो विशेष्यांशे[14] संस्पर्शा-
भावाद्विशेष्यं प्रकृतार्थं[15] न[16] स्वेन रूपेण [17]रूपवन्तं कर्तुमीष्टे किन्तु विशेषणांशप्रतीतं
[18]स्वव्यवहारं विशेषणांशप्रतीते प्रकृतार्थव्यवहारे[19]ऽवच्छेदक[20]त्वेन समारोपयति । तदिद-
माह—**प्रस्तुता[21]वच्छेदकत्वेन प्रतीयत इति[22]** । अवच्छेदकत्वेन[23] विशेषकत्वेन । यत इत्थ-
मवच्छेदकत्वमतोऽस्ति रूपकाद्वैधर्म्यमित्याह—**अवच्छेदकत्वाच्चेत्यादि** । व्यवहारसमा-
रोपः न तु[24] रूपसमारोपः[25] । ननु[26] यदा रूपसमारोपः तदा किं स्यादित्यत आह—
रूपसमारोपे[27]त्यादि । अवच्छा[28]दितत्वेन[29] क्रोडीकृतत्वेन । [30]प्रकृतरूपरूपितत्वात् [31]अप्र-
कृतरूपेण उपरञ्जितत्वात् रूपकमेव । विवेचितं चैतद्यथायोगं परिणामालङ्कृतौ । अत्रा-
वान्तरश्लोकाः— अप्रस्तुतं प्रतीतं[32] चेद्भेदकांशैकसा[33]म्यतः[34] ।
व्यवहारं[35] समा[36]रोप्य[37] प्र[38]स्तुते न्यग्भवत्यथ[39] ॥

---

1. A. C. F. H. अप्राक 2. D. repeats विशेषण 3. C. लक्षण 4. A. C. F. अंशे श्लि 5. A. C. F. H. क्षणायाः श्ले 6. A. C. H. omit त्व 7. A. C. F. H. अन्यत्र 8. C. पत्ति प्रक 9. E. कस्य च 10. A. F. प्रातीति 11. A's alt. विच्छित्तितोऽयं पु......पणात्व निदर्शन C. विच्छित्तितोऽयं......निदर्श 12. A. C. F. H बलादि 13. A. ना । त्याहितौ यदा यतो C. आदि इत्याहितौ यतो F. आदिना । यतो H. आदिना अभिहितौ अतो विशेषण 14. C. अंशेष्वप्रकृ 15. A. C. F. G. H. अर्थः 16. Omitted in C. 17. C. न रूप 18. C. सन्य 19. E. H. परिच्छेद 20. C. कत्वं समा 21. D. प्रकृता 22. A. C. D. F. repeat अवच्छेदकत्वेन प्रतीयत इति 23. C. त्वेन यत 24. A. C. F. H. न स्वरूप 25. H. रोपः विशेषणांश See below, the Karika under Samāsokti. 26. A. नन्वदयारूपः तदा C. नन्व......या रूपस्यादि 27. F. रोपेत्वित्या 28. C. अवस्थादित्त 29. D. त्वेन प्रकृत 30. A. C. प्राकृत 31. A. C. F. प्रकृत 32. D. प्रतीतः 33. C. सामान्यं तद्व्यव 34. D. यत्वं 35. C. हारः 36. F. स्वमा 37. C. आरोपः 38. D. प्रकृतेऽन्यभव 39. A. C. F. अपि

तच्च विशेषणसाम्यं श्लिष्टतया साधारण्येनौपम्यगर्भत्वेन च त्रिधा भवति । तत्र श्लिष्टतया यथा—

उपोढरागेण विलोलतारकं तथा गृहीतं शशिना निशामुखम् ।
यथा समस्तं तिमिरांशुकं तया पुरोऽपि रागाद्गलितं न लक्षितम् ॥

अत्र निशाशशिनोः श्लिष्टविशेषणमहिम्ना नायकव्यवहारप्रतीतिः । अपरित्यक्तस्वरूपयोर्निशाशशिनोर्नायकताख्यधर्मविशिष्टयोः प्रतीतेः । साधारण्येन यथा—

तेना[1]प्रस्तुतवृत्तान्तारोपेण प्रस्तुतं स्वयम् ।
संक्षेपेणोच्यते तस्मात्समासोक्तिरियं मता[2] ॥
स्याद्विशेष्यांश[3]साम्यं चेत्प्रस्तुताकाररूपितम् ।
भवेदप्रस्तुतं भेद्यं रूपकालङ्कृतिस्तदा ॥ इति ॥

अस्या विशेषप्रपञ्चनार्थमाह—**तच्च विशेषणसाम्यमित्यादि** । साधारण्यमुभयत्र प्रवृत्तिनिमित्तसंभवः । औपम्यगर्भत्वं[4] तद्गर्भसमासा[5]श्रयणात् । इत्थं तद्वि[6]शेषणसाम्यं त्रिधा भवतीत्यर्थः । अतस्समासोक्तिरपि त्रिधा ।

क्रमेणोदाहरणानि—**उपोढरागेणेति** । रागः सन्ध्यारुणिमा कामश्च । तारके[7]त्यतो नक्षत्र[8]दृगन्तर्मण्डलयोः प्रति[9]पत्तिः । मुखं प्रारम्भो वक्त्रं च । तिमिरमंशुकमिव तिमिरसदृश[10]मंशुकं च । लक्षणं योजयितुमाह—**अत्र निशाशशिनोरित्यादि** । नायकश्च नायिका च नायकौ । "पुमांस्त्रिये"त्येकशेषः । उपोढरागत्वादिश्लिष्ट[11]विशेषणमहिम्ना खल्वत्र निशाशशिनौ नायकव्यवहार[12]विशिष्टौ प्रती[13]येते । ननु[14] कथम् अत्र [15]निर्ज्ञायते व्यवहारसमारोपो न रूपसमारोप इत्यत आह—**अप[16]रित्यक्तेत्यादि** । यदि[17] रूपसमारोपस्तदा प्रकृ[18]तौ रूपकन्यायेन स्वं स्वं रूप[19]मव[20]च्छादित[21]त्वेन परित्यज्य यद[22]वच्छादकमुपमान[23]रूपं तादूप्य[24]मुपगृह्णाति । इह पुनर्विशेष्यांशे निष्प्रतियोगिकतया[25] ज्ञातयोरत एवा[26]परित्यक्त स्व[27]रूपयोः निशाशशिनोर्विशेषणसाम्यावगमितेन नायकत्वधर्मेण विशिष्टतया प्रतीतेः । अतो व्यवहारसमारोप एव[28] ।

---

1. A. C. अनेना 2. A. C. ततः 3. A. C. F. तद्विशेषणांश 4. A. C. F. त्वं चेद्गर्भ 5. A. C. F. omit सा 6. D. E. भवद्वि 7. A. C. F. इत्याद्यो 8. D. दृतेमण्ड 9. C. त्रिधा प्रति 10. A. C. F. सदृशत्वं च 11. D. श्लिष्टं C. श्लिष्टमहि 12. D. हारशिष्टे 13. D. प्रतीयते । 14. A's alt. न इत्थं 15. A. C. F. विज्ञा 16. C. omits अ. 17. Omitted in A. C. F. 18. A's alt. प्रकृतं D. प्रकृते 19. Except E all read रूपकं 20. A's alt. उत्पादकत्वेन C. उत्पादकं त्व न परि 21. D. आदिकत्वेन 22. A's alt. C. अवस्थादित 23. C. omits न 24. A. C. तद्रूपमुपमानीकृत इह 25. C. omits त 26. D. एव परि 27. All except C. read स्वस्वरूप 28. A. एवं

तन्वी मनोरमा बाला लोलाक्षी पुष्पहासिनी ।
विकासमेति सुभग ! भवद्दर्शनमात्रतः ॥

अत्र तनुत्वेत्यादिविशेषणसाम्याल्लोलाक्ष्या लताव्यवहारप्रतीतिः । तत्र च लतैकगामिविकासाख्यधर्मसमारोपः कारणम् । अन्यथा विशेषणसाम्यमात्रेण नियतस्य लताव्यवहारस्याप्रतीतेः । विकासस्तु प्रकृते उपचरितो ज्ञेयः । एवं च कार्यसमारोपेऽपि ज्ञेयम् । इयं च समासोक्तिः पूर्वापेक्षया अस्फुटा । औपम्यगर्भत्वेन यथा—

दन्तप्रभापुष्पचिता पाणिपल्लवशोभिनी ।
केशपाशालिवृन्देन सुवेषा हरिणेक्षणा ॥

तन्वीति । पुष्पम् आर्त्तवं रजः, प्रसूनं च । इह तनुत्वादीनां विशेषणानामुभयत्रै-
कार्थतासाम्यं न तु [1]श्लिष्टता । तदेतदाह—**अत्र तनुत्वेत्यादि** । ननु तनुत्वादिधर्म-
साम्यात् कथं लता[2]व्यवहारप्रतीतिरित्यत आह—**तत्र च लतै[3]केत्यादि** । विका[4]सो हि
लताया एव तत्समारोपो लोलाक्ष्या[5] लताव्यवहारप्रतीतेः [6]कारणम् । ननु विकासस्य
लतैकगामित्वात्कथं साधारण्यमित्यत आह—**विकासस्त्वित्यादि** । यथैवं विशेषणसाधा-
रण्यं धर्मसमारोपश्च व्यवहारसमारोपस्य कारणं[7] तथा कार्यसमारो[8]पोऽपीति
व्युत्पादयितुमाह—**एवं च कार्येत्यादि** । कार्यसमारोपनिबन्धनो हि[9] भेद इह धर्मसमा-
रोपनीत्या[10] सुज्ञानः[11] उपरि च शुद्धत्वेन [12]पृथग्राशीकरिष्यति । अत इह नोदाहृतः ।
एवमादौ [13]धर्मकार्ययोरन्य[14]तरारोपमन्तरेण अप्रकृतार्थो नावगम्यते । प्रकरणनियन्त्रि-
ताया अभिधायाः[15] प्राकरणिकार्थ एवो[16]पक्षयात् । अतो धर्मकार्ययोरन्यतरारोप एव
व्यञ्जनव्यापारोत्था[17]पनेनाप्रकृतार्थावगति[18]हेतुः । इतो[19] विशेषणसाधारण्यनिबन्धना
समासोक्तिर्न्याय[20]विदामेव विभक्तविषया । अस्फुटत्वात्तदिदमभिसन्धायाह—**इयञ्चे-
त्यादि** । पूर्वापेक्षया श्लिष्टविशेषणनिबन्धना[21] समासोक्तिः पूर्वा [22]तदपेक्षयेत्यर्थः ।

दन्तप्रभा पुष्पचिते[23]ति । अत्रा[24]नपेक्षिताख्याने[25] वाक्ये श्रवण[26] समनन्तरमेव
दन्तप्रभापुष्पचितत्वादिना हेतुना हरिणेक्षणायाः सुवेषता प्रतीयते । [27]अतस्तदा सुवेषत्व-
लक्षण[28]कार्यवशाद्विशेषणानां[29] दन्तप्रभाः[30] पुष्पाणी[31]वेत्युपमासमासपरत्वम् । अथ दन्त-

---

1. A. विश्लिष्ट C. विशिष्ट D. शिष्ट 2. D. लता प्रती 3. F. लतेत्यादि 4. A. C. F. एका हि 5. D. लक्ष्यात् 6. A's alt. C. कारणेन विका 7. A. C. F. कारणतया कार्य 8. E. omits पो 9. C. हि इह 10. C. नित्या 11. A's alt. सुज्ञातः C. संज्ञातः 12. A's alt. प्रकाशीक 13. D. E. आदौ हि 14. D. अन्यसमारोप 15. A's alt. omits या 16. A's alt. एवकोप क्षयापेक्षया C. एकोपक्ष्या पक्षया 17. C. omits प 18. C. D. गतिः 19. C. अतो 20. A's alt. C. सिद्धावेव 21. D. E. ना पूर्वा 22. A. C. F. पूर्वमुत्प्रेक्षितेत्य 23. A. पस्फुरिते 24. A. C. omit अ 25. C. ख्या.ते 26. D. श्रवणानन्त 27. A. C. omit अतः 28. A. C. F. लक्षणे D. लक्षणः 29. A. C. F. विशेषणं 30. A. F. प्रभा पु 31. C. पुष्पाणि चेत्यु

अत्र दन्तप्रभा पुष्पाणीवेति सुवेषत्ववशादुपमागर्भत्वेन कृते समासे पश्चाद्दन्तप्रभासदृशैः पुष्पैश्चितेति समासान्तराश्रयणेन समानविशेषणमाहात्म्याल्लताव्यवहारप्रतीतिः । अत्रैव "परीता हरिणेक्षणा" इति पाठे उपमारूपकसाधकबाधकाभावात्सङ्करसमाश्रयेण कृते योजने पश्चात्पूर्ववत्समासान्तरमहिम्ना लताप्रतीतिर्ज्ञेया। रूपकगर्भत्वेन तु समासान्तराश्रयणात्समानविशेषणत्वं भवदपि न समासोक्तेः प्रयोजकम् । एकदेशविवर्तिरूपकमुखेनैवार्थान्तरप्रतीतेस्तस्या वैयर्थ्यात् । न च प्राङ्निर्दशितोपमासङ्करविषय एष

प्रभासदृशैः पुष्पैरिति मध्यमपदलोपि[1]समासान्तरप्रत्यायितैः पुष्पपल्लवादिभिः विशेषणसाम्यदशायां लताव्यवहारप्रतीतिः । तदेतदवबोधयति—**अत्र दन्तप्रभा इत्यादिना ।** लताव्यवहारप्रतीतिरिति वदता रूपकसमासस्या[2]प्राप्तिरासूचिता । व्यवहारसमारोपे समासोक्तिः । रूपसमारोपे तु रूपकमिति प्रतिपादितम् यतः अतः प्रतीतोऽपि रूपकसमास इह न्यायतो न प्राप्नोति । नन्वेवमादौ प्रागुपमासमाससमाश्रयणनिमित्तं यदि सुवेषत्वादिना[3] नोपात्तं तदा किं स्यादित्यत आह—**अत्रैव [4]परीतेत्यादिना ।** परीता केश[5]पाशालिवृन्देन परिगता । इह[6] दन्तप्रभा[7]पुष्पाणी[8]वेत्यादिना किमुपमा[9]समासः, उत[10] दन्तप्रभा एव पुष्पाणी[11]त्यादिको रूपकसमास इति सन्देहः, उपमारूपकयोः साधकबाधकाभावात् । अतः सन्देहरूप[12]सङ्करसमाश्रयेण पूर्वं योजना । न[13] च[14] मन्तव्यं[15] समासः[16] सन्देहो[17]पपन्न इति, सन्देहस्य कविप्रतिभोत्था[18]पितस्य विच्छित्तिरूपत्वात् । अतस्सङ्करसमाश्रयेणादौ[19] योजना । अथ सन्देहोपशमकाले[20] दन्तप्रभासदृशैः पुष्पैरित्यादि[21] पूर्ववदेव[22] मध्यमपदलोप[23]समासः[24] लताव्यवहारप्रतीतौ[25] समासोक्तावेव विश्रान्तिः । इत्थं च सति उपमा[26]समासगर्भतया सङ्करसमासगर्भतया च समासोक्तिभेदोऽयं द्विधा दर्शितो मन्तव्यः। ननु केवलरूपक[27]समासाश्रये[28]णापि समासोक्तिभेदोऽयं किं नेष्यत इत्यत आह—**रूपकगर्भत्वेन त्विति ।** प्राक्[29] रूपकसमासे अथ [30]तद्गर्भतयोपमासमासाश्रये यद्यपि विशेषणसाम्यं भवत्येव[31], [32]तथापि न तत् समासोक्तेः[33] प्रयोजकम्[34] । कुतः ? एकदेशविवर्ति[35]मुखेनैव लताव्यवहारप्रतीतौ समासोक्तेः वैयर्थ्यात् । ननु[36] उपमासमासे सङ्करसमासे च समासोक्तिवैयर्थ्यं किं न स्यादित्याह—**न च प्राङ्निर्दशितेत्यादि ।**

---

1. A. C. लोप 2. D. स्याप्तिकासू 3. D. E. आदिना उपात्तं 4. A. परिते 5. A. C. D. पाश्यो वृ 6. Omitted in A. C. F. 7. D. प्रभाः 8. इव omitted in A. C. D. F. 9. A. C. उपमा उत 10. C. उदन्त 11. D. पुष्पाणिको 12. F. पूर्व 13. Omitted in D. 14. Omitted in C. 15. C. तव्या 16. C. समासा 17. All except C. read सन्देहादुपप्लव 18. C. प्रतिभोऽर्थापि 19. A. F. श्रयणादा 20. D. E. समये 21. D. आदिना 22. All except D. एवास्य म 23. D. E. लोपि 24. All except C. समासा 25. A. C. F. प्रतीतेः 26. A. C. F. उपमासन्देहगर्भतया च समा 27. C. omits क. 28. A. C. D. E श्रयणोऽपि 29. Omitted in C. 30. A's alt. C. तत्तयोपमा 31. C. एव च 32. E. G. अथा 33. A. C. F. समासोक्तिः 34. A. C. कंतु कुतः 35. A. C. वर्तिनोरभावाद् 36. D. न तु

न्यायः । उपमासङ्करयोरेकदेशविवर्तिनोरभावात् । तच्चैकदेशविवर्तिरूपकमश्लेषेण श्लेषेण च भवतीति द्विविधम् । अश्लिष्टं यथा—

निरीक्ष्य विद्युन्नयनैः पयोदो मुखं निशायामभिसारिकायाः ।
धारानिपातैः सह किं नु वान्तश्चन्द्रो मयेत्यार्ततरं ररास ॥

अत्र निरीक्षणानुगुण्याद्विद्युन्नयनैरिति रूपके पयोदस्य द्रष्टृपुरुषनिरूपणमार्ततरं ररासेत्यत्र प्रतीयमानोत्प्रेक्षाया निमित्तत्वं भजते । श्लिष्टं यथा—

मदनगणनास्थाने लेख्यप्रपञ्चमुदश्चय-
न्निव किल बृहत्पत्रन्यस्तद्विरेफमषीलवैः ।
कुटिललिपिभिः कं कायस्थं न नाम विसूत्रय-
न्व्यधित विरहिप्राणेष्वायव्ययावधिकं मधुः ॥

एष[1] न्यायः समासोक्तिवैयर्थ्यापत्तिलक्षणः । तत्र हेतुमाह—[2]**उपमासङ्करयोरेकदेश-[3]विवर्तिनोरभावात्** । न[4] ह्युपमालङ्कारः सङ्करालङ्कारश्च एकदेशविवर्तित्वेन केनचिदनुशिष्टौ । अतः स्वतन्त्रालङ्कारत्वसंशयान्नान्य[5]बाध[6]क्षमौ[7] । रूपकं तु [8]एकदेशविवर्तिततयाऽनुशिष्टमन्यबाध[9]क्षममेव ।

अत एवंविधे विषये रूपक[10]प्राप्तौ[11] समासोक्ते प्राप्तिरिति सोदाहरणं दर्शयितुमाह—**तच्चैकदेशविवर्तीत्यादि । निरीक्ष्य विद्युन्नयनैरि[12]ति** । पयोदो विद्युन्नयनैर्निशायामभिसारिका[13]याः मुखं निरीक्ष्य धारानिपा[14]तैः सह चन्द्रो मया वान्त इति धियेवार्ततरं ररासेत्यर्थः । अत्राश्लिष्टम् एकदेशविवर्तिरूपकं समासोक्तेर्नावकाशं ददा[15]तीति दर्शयति—**अत्र निरीक्षणेत्यादि** । निरीक्षणं हि पुरुषधर्मो न पयोदधर्मः । अतः पुरुषा[16]नुसा[17]रेण योजने विद्युत एव नयनानीति[18] रूपकमेव न पुनरुपमा सङ्करो वा । अतः पयोदे द्रष्टृ-[19]पुरुषरूपणम[20]र्थादिति एकदेशविव[21]र्तिता । तच्चे[22]दमार्ततरं ररासेति प्रतीयमानोत्प्रेक्षाया[23] एव निमित्तं समासोक्ते[24]रप्राप्तिरेवेति भावः ।

मदन[25]गणनेति—पत्राणि[26] दलानि तान्येव पत्राणि तालदलानि । [27]लिपयो रूपरीतयः ता एव लिपयोऽक्षर [28]सन्निवेशाः । कायस्थो देही गणकः । एषु[29] रूप-

---

1. D. एतन्न्यायः 2. D. E. उपमालङ्कार 3. A's alt. वर्तिरूपभा 4. A. C. F. omit हि 5. D. तान्यबा 6. C. बाधक 7. A. C. क्षमा 8. D. एकविव 9. D. बाधकक्षम 10. A. C. F. रूपकप्राप्तिरिति 11. D. E. व्याप्तौ 12. E. रित्यादीति 13. A. C. सारिकामुखं 14. E. संपातैः 15. A. C. ददाती इति E's alt. दिरातीति 16. A. C. पुरुषरूपेण 17. A's alt. F. सरण 18. नी omitted in D. 19. C. द्रष्ट 20. C. मध्यादि 21. C. विवक्षिता 22. A's alt. C. यच्चेद 23. A. C. F. प्रेक्षायां 24. D. E. उक्तेस्त्वप्रा 25. A. C. F. गणनेनेति E. गणेति 26. णि omitted in D. 27. A. C. निवलयोरित इभाः एव A's alt. वलीपन्था रीतयः 28. A. C. E. H. विनिवेशाः D. विनिवेशः 29. D. एषु सा (p. 109)

अत्र हि पत्रलिपिकायस्थशब्देषु श्लेषगर्भं रूपकं द्विरेफमषीलवैरित्येतद्रूपकनिमित्तम् । अस्य च प्रचुरः प्रयोगविषय इति न समासोक्तिबुद्धिः कार्या । तदेवं श्लिष्टविशेषणसमुत्थापितैका । साधारणविशेषणसमुत्थापिता तु धर्मकार्यसमारोपाभ्यां द्विभेदा । औपम्यगर्भविशेषणसमुत्थापितोपमा संकरसमासाभ्यां द्विभेदा रूपकसमाश्रयेण तु भेदद्वयमस्या न विषयः । तदेवं पञ्चप्रकारा समासोक्तिः । इत्थं शुद्धकार्यसमारोपेण विशेषणसाम्येनोभयमयत्वेन

णसा[1]मर्थ्यान्म[2]दनो महाराजतया मधु[3]श्च श्री[4]करणा[5]ग्रणी[6]त्वेन रूपितः प्रतीयते । तदेत[7]दुपदर्शयति—**अत्र हि पत्रलिपीत्यादि** । ननु[8]पत्राणी[9]वे[10]त्यादिरुपमा किं न स्यादित्यत आह—**द्विरेफमषीत्यादि** । मषी[11]योगो हि मधा[12]वसंभव[13]न्नुपमा[14]समासं बाधित्वा गण[15]कवृत्ते[16]स्संभवस्तदनुसारेण रूपकसमासं साधयतीति यावत् । ननु[17] समासोक्तिप्रस्तावे किं सोदाहरणं[18] रूपक[19]भेदप्रदर्शनेनेत्यत आह—**अस्य च प्रचुर इत्यादि** । अस्य एकदेशविवर्तिरूपकस्य । अत्रावान्तरश्लोकौ—

स्या[20]दौपम्यसमासेन[21] समासोक्ति[22]विनिश्चये[23] । स्यात्सङ्करसमासेन समासस्य तु संशये ॥
न रूपकसमासस्य प्राप्तावस्याः प्रवर्तनम् । रूपकादर्थसंसिद्धेरेकदेशविवर्तिनः ॥

अतः प्रभेदा[24]न्तरप्र[25]थनाय उक्तभेदान्[26]संचष्टे—**तदेवमित्यादि** । इयं [27]खलु श्लिष्टात्साधारणादौपम्यगर्भाच्चेति विशेषणवैचित्र्यात्[28] त्रिधोद्दिष्टा । तत्र श्लिष्टाद्विशेषणादेक[29]विधा । साधारणात्पुनर्धर्मसमारोप[30]कार्यसमारोपाभ्यां द्विधा । औपम्यगर्भादपि उपमासमासेन सङ्करसमासेन चेति द्विधा । श्लिष्टाश्लिष्टतया तु रूपकसमासद्वय-[31]मस्या न विषयः । अतः पञ्च प्रकाराः । इत्थं विशेषणसाम्यात्पञ्चप्रकारत्वसिद्धा[32]वान्तर[33] विशेषसहितामिमां पुनस्त्रिराशिकतया[34]संचष्टे—**इत्थं शुद्धकार्येत्यादिना** । कार्यस्य शुद्धत्वं नाम [35]निरूपित[36] विशेषणसाम्या[37]संकीर्णता । प्रथमं विशेषणसाम्यनिबन्धनभेदोदयादर्वागित्यर्थः । अत्रैतदा[38]कूतम्—विशेषण [39]साम्यादप्रस्तुतस्य गम्यत्वे हि समासोक्तिः ।

---

1. A. C. समर्थात् 2. A. C. E. र्थ्यात् अतो महा 3. D. मधुत्व 4. C. श्रीकर 5. D. E. F. H. I. कराग्र 6. A. गृहीत्वेन (ग्रणित्वेन) 7. A's alt. C. एतद्रूपदर्श 8. Except C. all read. पत्राणि पत्रा 9. A. पत्राणिवे 10. A's alt. वेत्युपमादि किं 11. A's alt. मधुश्रीयोगो C. मधुश्रियो सो 12. C. मयाव 13. D. भवस्वमासं 14. C. उपमासं बा 15. C. गुणवदुक्तेस्संभ 16. A's alt. E. वृत्ते संभ 17. D. न तु 18. A. C. हरण E. हरणं किं रूप 19. F. प्रभेद 20. C. स्यादावौप 21. C. समासेकंसमा 22. A. उक्ति विनि 23. C. निश्चया 24. C. भेदनान्तर 25. C. प्राथना 26. D. भेदात् E. भेदा 27. E. F. च खलु 28. D. चित्र्यत्तया E. F. चित्र्यत्रयात् 29. E. देवकवि 30, D. आरोपाभ्यां द्वि A. आरोपककार्य 31. A. C. द्वयस्य न D. द्वयस्या न 32. C. omits व 33. D. अन्तरसहि 34. E. च संच 35. C. omits नि 36. All mss. पितचरवि. But चर seems told superfluous. 37. B. E. F. साम्यात्सं D. साम्यादप्रस्तुत 38. A's alt. C. आवृत्त 39. A's alt. C. वशात् ।

प्रथमं त्रिधा समासोक्तिः। विशेषणसाम्यं च पञ्चप्रकारं निर्णीतम्। सर्वत्र चात्र व्यवहारसमारोप एव जीवितम्। स च लौकिके वस्तुनि लौकिकवस्तुव्यवहार-समारोपः, शास्त्रीये वस्तुनि शास्त्रीयवस्तुव्यवहारसमारोपः, लौकिके वा शास्त्रीयवस्तुव्यवहारसमारोपः, शास्त्रीये वा लौकिकवस्तुव्यवहारसमारोप इति चतुर्धा भवति। तदेवं बहुप्रपञ्चा समासोक्तिः। तत्र शुद्धकार्यसमारोपेण यथा—

विलिखति कुचावुच्चैर्गाढं करोति कचग्रहं
लिखति ललिते वक्त्रे पत्रावलीमसमञ्जसाम्।
क्षितिप ! खदिरः श्रोणीबिम्बाद्विकर्षति चांशुकं
मरुभुवि हठात्त्रस्यन्तीनां तवारिमृगीदृशाम् ॥

तच्च विशेषणसाम्यं शुद्धकार्यसमारोपे सत्युपचरितं, यथा विलिखतीत्यादावुदाहरिष्यमाणे[1] पद्ये स[2] एको राशिः, यदा पुनरिदमनु[3]पचरितं तदा पञ्चधोदाहृतम् प्राक् स द्वितीयः। उभयमयत्वे[4] तु तृतीयो राशिः। अनुपचरितविशेषणसाम्यनिबन्धनस्य न्याय[5]निर्भरत्वेन प्राक् प्रदर्शनं पञ्चविधत्वेन[6] कृतमिति। अथ तदेव प्राक् प्रदर्शनमनुस्मारयति—[7]**विशेषणसाम्यं चेति**। ननु शुद्धकार्यसमारोपे विशेषणसान्यमुपचरितम्,[8] अन्यदात्व-नुपचरितं अनुगतमेकरूपं[9] तु प्रयोजनं[10] नानुपश्याम इत्यत आह—**सर्वत्र चात्रेत्यादि**। एवकारेण तदेकप्राणतां समासोक्ते[11]रभिप्रैति[12]। तस्य चातुर्विध्यं दर्शयति—**स च लौकिक इत्यादि**। वस्तुजातिगुणादि। अनेन च व्यवहारसमारोपचातुर्विध्येन[13] राशित्रय-मपि प्रत्येकं चतुर्धा[14] प्रथते[15]। अतस्समासोक्तिः प्रपञ्चव[16]तीत्याह—**तदेवं[17] बहुप्रपञ्चेति**। तत्रा[18]द्यं[19] राशिमुदाजिहीर्षराह—**तत्र शुद्धकार्येति**। **विलिखतीति**[20]। उच्चैर्विलेख[21] (न) (?[22]) गाढं कच[23]ग्रहः[24]पत्रावल्यामसामञ्जस्यमंशुकविकर्षश्चे[25] चेति [26]हठका[27](मु)कका-र्यम्। हठा[28]दिति विकर्षण[29]क्रियाविशेषणम्। अत्रोपचरितत्वादप्रस्तुता[30]वगतौ विशेषण-साम्यं[31] नातिबद्ध[32]भरम् अपि तु शुद्धकार्यसमारोप एव इत्याह—**अत्र[33] पत्रावलीत्यादि**।

---

1. D. E. माणे स 2. Omitted in A. C. F. 3. C. इदमुप 4. E. मयत्वेन 5. A. C. नाय……निर्भत्वेमप्राक्……प्रद 6. A. C. त्वेम तदिति 7. D. विशेषणास्येति। विशे 8. D. चरितं अनुग 9. F. रूपं चिन्तप्रयो 10. E. F. प्रयोजकं 11. A. C. उक्तिः 12. A. C. प्रेतेति 13. A. C. D. विध्ये च 14. A's alt. C. चतुर्विधा 15. A's alt. C. प्रदेशे 16. E. G. प्रपञ्चयति C. पञ्चती 17. C. एव 18. A. C. F. तत्राप्या 19. A. C. D. आद्य 20. A. C. omit इति 21. All mss. लेखन 22. A gap of about two letters in all mss. Probably the missing word is कुचयोः 23. C. कुच 24. A. C. ग्रहणं 25. A. C. D. विकर्ष इत्थं ह E. G. विकर्षे 26. A. C. हरकार्मुकं हठा D. हं कार्मुककार्यं A's alt. F. हठकार्यं 27. All mss. कार्मुक 28. A's alt. C. हरा 29. C. omits ण. 30. C. स्तुता। विशे 31. A's alt. C. साम्यान्नात्र 32. C. पर F. चरं 33. Omitted in A. C. F.

अत्र पत्रावलीविलेखनादिशुद्धकार्यसमारोपात्खदिरस्य हठकामुकव्यवहारप्रतीतिः। विशेषणसाम्येनोदाहृता। उभयमयत्वेन यथा—

निर्लूनान्यलकानि पाटितमुरः कृत्स्नोऽधरः खण्डितः
कर्णे रुग्जनिता कृतं च नयने नीलाब्जकान्ते क्षतम्।
यान्तीनामतिसंभ्रमाकुलपदन्यासं मरौ नीरसैः
किं किं कण्टकिभिः कृतं न तरुभिस्त्वद्वैरिवामभ्रुवाम्॥

अत्र कण्टकिभिरिति विशेषणसाम्यम्। निर्लूनान्यलकानीत्यादिषु कार्यसमारोपः। व्यवहारसमारोपप्रकारचतुष्टये क्रमेणोदाहरणम्। यथा—

द्यामालिलिङ्ग मुखमाशु दिशां चुचुम्ब
रुद्धाम्बरां शशिकलामलिखत्कराग्रैः।

खदिरेऽत्यसंभवात् पत्रावलीग्रहः*। व्युत्क्रमोक्तानां[1] [2]क्रमस्वारस्यायानुस्मारयति—**विशेषणसाम्येनेति**। विशेषणसाम्यं हि यदा श्लिष्टता[3] तदोभयार्थता। यदा [4]साधारण्यं तदोभयत्र[5] प्रवृत्ति[6]निमित्तसंभवः। [7]यदौपम्यगर्भविशेषणता तदा[8] समासभेद इति। विशेषणसाम्य[9]वशादेव[10] [11]अप्रस्तुतावगतिरिति ज्ञेयम्[12]। अथोभयमयत्वेनोदाहरति—**निर्लूना[13]नीति**। नीरसैः[14] शुष्कै[15]रहृदयैश्च। कण्टकिभिः [16]क्षुद्रशंकुमद्भिः घातकजनयोगिभिश्च। उभय[17]मयतां योजयति—**अत्र [18]कण्टकिभिरिति[19]**।

एषु[20] त्रिषु[21] राशिषु व्यवहारसमारोप[22]वैचित्र्यनिबन्ध[23]नात् भेदानुपदर्शयितुकाम आह—**व्यवहारसमारोपेत्यादि**। [24]**द्यामालिलिङ्गेति**। [25]अम्बरं नभो वासश्च। [26]निमग्नचरपुष्प[27]शरत्वं दाहेन। तरुणः प्रबलो युवा च। अत्र [28]अम्बरकरतरुणेषु विशेषण-

---

1. A. C. F. उक्तं क्रम 2. D. E. क्रममावस्वार 3. A. C. श्लिष्टं त 4. E. यदाऽसाधा 5. D. यत्र निमि 6. A. C. F. प्रवृत्त इति नि 7. E. यवदौप 8. D. E. तदाऽपि 9. F. साम्यादेव 10. A. C. एवं 11. A. omits अ 12. F. ज्ञेया 13. E. लूनादिति 14. A's alt. C. नीरस इ सहृद 15. A. शुष्कैश्चाहृद 16. A's alt. कृदिष्वा तु जनयोगि C. कृतिर्वा कृतजन 17. E. उभयत्वं यो 18. F. कण्टकादिभि 19. D. E. इतीति 20. A. येषु 21. A. C त्रिराशि 22. F. आरोपनिब 23. A. D. E. बन्धात् 24. A's alt. C. आलिङ्गनेति 25. A. C. आंबरं 26. A's alt. C. निरुग्नश्च पुष्यशरद्वन्दाहेन 27. E. चरत्वरं दा 28. A's alt. असुरपरत C. असुरवरतल

* This is an explanation to justify the vṛtti singling out पत्रावली from among the common acts. While scratching on limbs and tucking at hair and garment are quite understandable in a tree, the drawing of a patrāvalī design is quite out of the way and least to be expected in a tree (खदिरे अत्यसंभवात्). The Sambhava, of course, is wrought by śleṣa.

अन्तर्निमग्नचरपुष्पशरोऽतितापा-
त्किं किं चकार तरुणो न यदीक्षणाग्निः ॥

लौकिकं च वस्तु रसादिभेदान्नानाभेदं स्वयमुत्प्रेक्ष्यम् ।

यैरेकरूपमखिलास्वपि वृत्तिषु त्वां
पश्यद्भिरव्ययमसङ्ख्यतया प्रवृत्तम् ।
लोपः कृतः खलु परत्वजुषो विभक्ते-
स्तैर्लक्षणं तव कृतं ध्रुवमेव मन्ये ॥

अत्र आगमशास्त्रप्रसिद्धे वस्तुनि व्याकरणप्रसिद्धवस्तुसमारोपः ।

साम्यम्[1] । अन्यत्र[2] कार्यसमारोपः । अत्र [3]लौकिकवस्तुनि[4] लौकिकव्यवहारसमारोपः । प्रदर्शितोदाहरणेषु च[5] ।

तत्र[6] लौकिकं[7] वस्तु विविध[8]मित्याह—**लौकिकं[9] चेति** । **यैरिति** । [10]एकरूपं[11]मविकृतं । वृत्तिषु जागरिता[12]दिषु । अव्ययं[13] सौषु (प्त्या[14]) दिषु [15]स्थगितम् । अत एवा[16]सङ्ख्यतया प्रवृत्तम्[17] । जाग[18]रे विश्वः प्रथमः, स्वप्ने[19] तैजसो[20] द्वितीयः, [21]सौषुप्ते प्राज्ञ[22]स्तृतीय[23] इति । सङ्ख्यया[24] वस्तुतो रहितं [25]तुरीयस्य[26] [27]सर्वानुस्यूतत्वात् ।

उक्तं हि[28] श्रीमद्गौडपादैः—"माया सङ्ख्या तुरीय[29]मि"ति । [30]यैरीदृशं त्वां पश्यद्भिः [31]परत्वजुषो विभक्तेर्लोपः कृतः । अस्मात्परमस्तीति विभागो[32] लुप्तः । तैस्तव लक्षणं कृतं ([33]मन्ये) परमेश्वरस्य हि सर्ववृत्तिष्वेकत्व[34]रूपमव्य[35]यत्वं असंख्यता न कुतश्चि[36]दपि देशकालादेर्भेद इति इदमेव लक्षणम् । इदमागमशास्त्र[37]प्रसिद्धं वस्तु[38] । अथ सर्वासु कारिकादिवृत्तिष्वेकत्वादिसंख्यारहितमव्यये हि [39]स्यादिति प्रतियोग्येकत्वं नास्ति किं [40]त्वभेदैकत्वमेव । ईदृशमव्ययं [41]पश्यद्भिः परत्वजुषः प्रकृतेः[42] परत्वलक्षणायाः[43] विभक्तेः प्रथमा[44]देर्लोपः कृतः[45] ।

---

1. D. साप्य 2. C. अत्र 3. A's alt. C. एकवस्तुनि एकवस्तु व्य 4. F. omits नि 5. Omitted in all except E. 6. F. अत्र 7. A. C. एकं 8. A's alt. C. निधिगं 9. A's alt. C. एकेवेति 10. A. C. एकं 11. C. F. रूपं विकृ 12. C. जागरिका 13. C. व्यय 14. All mss. सौषुप्तादि 15. A's alt. C. स्वधित 16. D. एक 17. A. C. वृत्ति 18. A's alt. C. जाते 19. A's alt. C. रवपेतत्यञ्जसा 20. A. C. जसो जागरितो द्वि 21. A. C. तृतीये सौ 22. C. प्राज 23. C. तृतीयं 24. D. संख्याय 25. C. तृतीय 26. F. यस्यलुप्तः 27. D. सर्वोऽनु 28. A. C. च 29. D. तुरीयां 30. A's alt. C. यैरेकशेषत्वान्यत्……सुत्व……जुषोति 31. A. पशुत्व 32. D. भालो 33. All mss read. अन्ये 34. त्व omitted in E. 35. D. रूपत्वं संख्याता न अव्ययत्वं कुत 36. अपि omitted in E. 37. E. omits प्र 38. Omitted in A. C. F. 39. D. E. A. द्वयादि 40. A. च भेदैः तत्त्वमेवमीदृ 41. A. C. अप 42. C. कृते पर 43. C. क्षणायापि प्र 44. A. मायाः दलोकृत C. प्रथमा दलोकृत 45. A's alt. C. कृतं

सीमानं न जगाम यन्नयनयोर्नान्येन यत्सङ्गतं
न स्पृष्टं वचसा कदाचिदपि यद्दृष्टोपमानं न यत् ।
अर्थादापतितं न यन्न च न यत्तर्त्किचिदेणीदृशां
लावण्यं जयति प्रमाणरहितं चेतश्चमत्कारकम् ।।

अत्र लावण्ये लौकिके वस्तुनि मीमांसाशास्त्रप्रसिद्धवस्तुसमारोपः । एवं तर्कायुर्वेदज्योतिःशास्त्रप्रसिद्धवस्तुसमारोपो बोद्धव्यः ।

स्वपक्षलीलाललितैरुपोढहेतौ स्मरे दर्शयतो विशेषम् ।
मानं निराकर्तुमशेषयूनां पिकस्य पाण्डित्यमखण्डमासीत् ॥

अत्र तर्कशास्त्रप्रसिद्धवस्तुसमारोपः । पाण्डित्यशब्दः प्रकृते लक्षणया व्याख्येयः ।

मन्दमग्निमधुरर्यमोपला दर्शितश्वयथु चाभवत्तमः ।
दृष्टयस्तिमिरजं सिषेविरे दोषमोषधिपतेरसंनिधौ ॥

अत्र आयुर्वेदप्रसिद्धवस्तुसमारोपः ।

इदमव्ययलक्षणं "सदृशं त्रिषु लिङ्गे ष्वि" त्यादिना प्रतिपादितम् । [1]इदं व्याकरणप्रसिद्धं वस्तु । अत्र विशेषणसाम्यमेव ।

सीमानमिति । अत्र नयनसीमालङ्घनेन प्रत्यक्षप्रमाणस्याविषयता । अन्येनासङ्गत्या [2]नियतसम्बन्धाभावात्[3] अनुमानस्य, वचस्स्पर्शाभावाच्छब्दस्य लौकिकस्य अदृष्टो[4]पमानतयोपमानस्य, अर्थादना[5]पातादर्थापत्तेर्न च न यदिति प्रमाणानु[6]क्तावपि वस्तुत ईदृशि[7] लावण्ये[8] मीमांसादिसिद्धादृष्टादिवस्तुसमारोपः । [9]चोदनैकलक्षणस्य[10] प्रमाणान्तरासन्निकर्षादत्र विशेषण[11]साधारण्यम् । शास्त्रीय[12]वस्तुनो वै[13]विध्यं प्रदर्शयति — **एवं तर्के[14]त्यादि** । **स्वपक्षेति** । पक्षो गरुत् [15]साध्यधर्मविशिष्टो धर्मी च । हेतिरायुधं[16] हेतुर्लिङ्गं च । विशेषोऽतिशयः पदार्थविशेषश्च । मानः[17] रोषः प्रमाणं च ।

मन्दमग्निमिति[18] । अत्र मन्दाग्नि[19]श्वयथुतिमिरदोषा[20]विर्भावः [21]ओषधिपतेर्भिषजोऽसन्निधाविति । अत्र विशेष्यांशेऽपि साम्यमित्युदाहरणान्तरं मृग्यम् । यद्वा चन्द्रमस इति[22] विशेष्याध्याहारादोष[23]धिपतेरित्येतत् विशेषणतया विवक्षणीयम्[24] ।

---

1. Omitted in A. C. 2. C. नियति 3. E. I. भावात् अनास्मद मनुमा 4. A. C. दृष्टौ समान A's alt. दृष्टो मान 5. A. C. D. G. अनापा 6. D. E. H. अतिवृत्तावपि 7. C. दृशी 8. D. वर्णं 9. A's alt. C. शोधनै 10. F. I. तस्य प्र 11. D. शेषेषां 12. E. I. स्त्रीयस्य 13. A's alt. C. द्वैविध्यं 14. A's alt. तर्प्यैत्या 15. A. असाध्य 16. A. आयुधः 17. E. F. G. H. I. मानं 18. A. C. इति विशेषाध्या 19. E. F. I. अग्निश्वयथा 20. D. E. H. I. शेषा 21. E. औषधि 22. A. C. D. H. विशेषाध्या 23. A. C. H. ओषं पत्यैरिति तद्विशेषतया विष धियं प्रसर्प 24. H. वं सन्निधो प्रस E's alt. विवक्षणीयान्तर प्र

प्रसर्पत्तात्पर्यैरपि सदनुमानैकरसिकै-
रपि ज्ञेयो नो यः परिमितगतित्वं परिजहत् ।
अपूर्वव्यापारो गुरुवर ! बुधैरित्यवसितो
न वाच्यो नो लक्ष्यस्तव सहृदयस्थो गुणगणः ॥

अत्र भरतादिशास्त्रप्रसिद्धवस्तुसमारोपः । तथा ह्यत्र गुणगणगतत्वेन शृङ्गारादिरसव्यवहारः प्रतीयते । यतो रसो न तात्पर्यशक्तिज्ञेयः, नाप्यनुमानविषयः, न शब्दैरभिधाव्यापारेण वाच्यीकृतः, न लक्षणागोचरः किन्तु विगलितवेद्यान्तरत्वेन परिहितपारिमित्यो व्यञ्जनलक्षणापूर्वव्यापारविषयीकृतोऽनुकार्यानुकर्तृगतत्वपरिहारेण सहृदयगत इति प्रसर्पत्तात्पर्यैरित्यादिपदै रस एव प्रतीयते । एवमन्यदपि ज्ञेयम् ।

प्रसर्पत्तात्पर्यैरिति । ये तात्पर्यविदः ये चानुमानरसिकाः [1]तैरपि (अवि)ज्ञेयश्चासौ [2]पारिमित्यं जहाति न[3] वक्तुं[4] शक्यः न च लक्षयितुं किन्तु गुरुवर ! तव सहृदयस्थो गुणगणो [5]बुधैरपूर्वव्यापारगुणगणान्तर[6]व्यापारातिशायि व्यापार इत्यवसितः[7] । अत्र गुणगणे शृङ्गारादिरस[8] व्यवहारः समारोपित इत्याह—**अत्र भरतेत्यादि** । रसं हि भरतोपज्ञम्[9] आमनन्ति । विभावानुभाव[10]व्यभिचारिसंयोगाद्रसनिष्पत्ति[11]रित्याम्नानात्[12] । तद्व्यवहारमुपपादयति—**तथा ह्यत्रेत्यादिना** । **न तात्पर्य[13]शक्तिज्ञेय [14]इति** । तात्पर्यं हि नाम [15]अभिहितान्वयमते समन्वयशक्तिः अभिधोत्तीर्णा समन्वय[16]मात्र[17]विश्रान्तयानया समन्वय[18]समनन्तर[19]प्रतीतिको रसो न ज्ञायते । विभावानुभावव्यभिचारिभिस्सह नियतसम्बन्धाभावादनुमानस्यापि न विषयः[20] । साक्षात्सङ्केता[21]विषयत्वात् न वाच्यः । मुख्यार्थ[22]बा[23]धाद्यभावान्नापि लक्ष्यः अपि तु वेद्यान्तरविगलनादपरिमितस्सन् अभिधालक्षणातात्पर्योत्तीर्णेन व्यञ्जनाख्येन काव्यैकगामिना शास्त्रान्तरापूर्वेण[24] व्यापारेण विषयीक्रियमाणो लौकिकत्वात् अनुकार्य[25]मभिनयप्रयासनिघ्नत्वात् [26]अनुकर्तारं च[27] परिहृत्य सहृदयैकगत इति बुधै[28]रवसीयते । दिङ्मात्रमिदं, **रसमीमांसायां**[29] विस्तरः । प्रकृतानुपयोगीति न क्रियते । **संप्रदायप्रकाशिन्यां काव्यप्रकाशटीकायां** वितत्य कृत इति तत[30] एवावधार्य इत्यलम् ।

---

1. A. C. H. वैरविज्ञे 2. A. C. H. परिमितं 3. Omitted in A. C. H. 4. A. C. H. वक्त्रं शक्यं वचः लक्ष 5. A. C. H. बुद्धैः 6. A. C. D. H. गणातद्व्या 7. F. अध्यवसितं 8. D. रसस्य 9. A's alt. C. D. आव······वन्ति 10. D. भावसंयो 11. D. इति न्यायात् 12. A. C. H. आम्नातात् 13. C. शक्तिः 14. D. ज्ञेया 15. A's alt. C. अभिधाशक्तिः' 16. A's alt. वयमारश्रा D. वयमश्रा 17. E. F. omit वि 18. C. वयः, 19. A. C. अन्तरो—रसप्रतीतितो रसः प्रतीतितो रसो न 20. D. विषयं 21. A. सङ्केतो 22. C. भावाद्यभा 23. D. भावः 24. A's alt. C. पूर्वशो 25. A's alt. C. अनृतार्थ 26. A's alt. C. अनृतार्थारम्भं 27. Omitted in C. 28. A's alt. C. इव 29. D. E. मीमांसाया 30. A. C. E. अत

पश्यन्ती त्रपयेव यत्र तिरयत्यात्मानमाभ्यन्तरी
यत्र त्रुस्यति मध्यमापि मधुरध्वन्युज्झिहासारसात् ।
चाटूच्चारणचापलं वितनुतां वाक्तत्र बाह्या कथं
देव्या ते परया प्रभो ! सह रहःक्रीडादृढालिङ्गने ॥

---

*ज्योतिश्शास्त्रादिवस्तुसमारोपोऽनया रीत्या ज्ञेय इत्याह—एवमन्यदिति । पश्यन्तीति । [1]अत्रेदुप[2]ह्वरम्—[3]वाग्देवता हि परा पश्यन्ती मध्यमा[4]वैखरी चेति[7] चतुष्पद-परिमिता । तत्र [5]नामरूपात्मकं प्रपञ्चं स्वात्मन्युपसंहृत्य [6]स्वरूपज्योती[7]रूपिणी जागरि-तादि[8]धामत्रयोल्लङ्घिनी परा । नाम[9]रूपप्रपञ्चोल्लासनाय प्राथमिकप्राणपरिस्पन्दाभि-[10]मानिनी [11]कन्दमन्दिरा[12] मणिपूरकावधिप्रसरन्ती बीजभावापन्ननिर्विभागवर्णमयी विश्वाभिमुखी भवन्ती[13] [14]सौषुत[14]वृत्तिः पश्यन्ती । परायाः[15] सकाशादुदिता[16] मणिपूरकात् अनाहतावधि[17] प्राणपरिस्पन्दो[18]त्क्षुभितबुद्धिवृत्त्यभिमानिनी वर्णपदादिपरिग्रहान्त[19]स्संज-लपात्मिका[20] पश्यन्तीप्रभवा स्वप्नवृत्तिर्मध्यमा । अनाहतान्मुखकन्दरावधि प्रसृता बहिस्संजल्पात्मिका स्थूला मध्यमोद्भवा जागरितवृत्तिर्वैखरी । आसां[21] नाम[22]निरुक्त्यादि-विशेषः प्रथमश्लोक[23]विवरणे प्रपञ्चितः । अथ संहारावसरे जागरितलयपुरस्कारेण वैखरी मध्यमायां [24]लीयते । मध्यमा स्वप्नलयपुरस्कारेण पश्यन्त्याम्, सा च सौषुप्त[25]लय-पुरस्कारेण परायाम्, परा तुरीयपर्वा[26]त्मिका समाधिवृत्तिरुच्यते । इत्थं च सति शक्ति-मानात्मा परायां[27] तुरीयं[28], पश्यन्त्यां[29] प्राज्ञः, मध्यमायां तैजसः[30], वैखर्यां विश्व[31] इत्या[32]-गमार्थदिक् । अथ[33] शब्दसङ्गत्या[34] व्याकुर्मः । प्रभो[35] ! वश्येन्द्रियतया[36] प्रभवनशील !

---

1. C. अपुत्रे 2. A's alt. C. रूपं परं 3. C. वाभेदे 4. E. रीति चतु 5. A's alt. C. नामानुरूप प्रप 6. D. स्वात्मज्यो 7. A. and C. ज्योति C. ज्याति 8. A's alt. नाम 9. C. प्ररूप 10. D. मानी 11. A. H. कुन्द 12. E. रात्मन्निपू 13. C. भवन्तः 14. A. C. सुषुप्त 15. D. परनियाः 16. A's alt. C. D. उदितात् 17. D. अवधि परि 18. C. स्पन्दोत्क्षु D. स्पन्दात् 19. F. ग्रहात् 20. D. आत्मिका स्थूला 21. A's alt. एषां 22. A's alt. निरु 23. F. श्लोक प्र 24. E. प्रलीय 25. A. C. सुषु 26. A. C. सर्वा 27. A. C. वरीयान् E. परायाः 28. D. E. तुरीयः 29. F. यद्दक् पश्य 30. C. तैः सह 31. A. E. विश्वं 32. F. आगमदिक् 33. A's alt. C. अपशब्द 34. A's alt. सङ्गतात् 35. A's alt. C. प्रबोधस्येन्द्रि 36. C. तया प्रष्ठ पुटव्या

* The explanation of Vidyācakravartin of अन्यत् as referring to ज्योतिश्शास्त्रादि (Jayaratha explains अन्यत् as अन्यशास्त्र) and his omission of the explanation of the verse 'गण्डान्ते मददन्तिनाम्' etc. (which is given as an illustration of ज्योतिश्शास्त्रप्रसिद्धवस्तु-समारोप in the N. S. and T. S. S. editions), while he has commented on all the oub-varieties of Samāsokti, shows that according to our author, Ruyyaka did not give an illustration for ज्योतिश्शास्त्र-वस्तुसमारोपः

अत्रागमप्रसिद्धे वस्तुनि लौकिकवस्तुव्यवहारसमारोपः । लौकिक-

तव परया देव्या सह क्रीडादृढालिङ्गने अप्रयासेन तादृशी समाधिसामरस्ये प्रवृत्ते बाह्या[1] वाक् कथं चाटूच्चारणचापलं स्फुटताल्वोष्ठ[2]पुटव्यापारमुखरतां कथं[3] नाम वितनुतां चापलक[4]थैव नास्तीत्यर्थः। कुतो नास्तीत्यत आह—आभ्यन्तरी पश्यन्ती त्रपयेवात्मानं यत्र तिरयति[5], मध्यमापेक्षयाऽभ्यन्तरतमा स्वात्मानं न प्रकाशयतुमीष्टे । तुरीयपर्वणि प्राणानुदया[6]द्यत्र मध्यमाऽपि मधुर[7]ध्वन्युज्जिहासारसात् त्रुटयति । अन्तस्सञ्जल्परूपं [8]मधुरमपि ध्वनिं[9] नोन्मूलयतीत्यर्थः । यत्र[10] परा समाधौ पश्यन्तीमध्यमयोरनुदयः, तत्र[11] वैखरी कथं नाम प्रवर्तताम् इति तात्पर्यार्थः । अत्रागमसिद्धे वस्तुनि लौकिकवस्तुव्यवहारः[12] शृङ्गारात्मकस्समारोपितः । यथा परया[13] देव्या पट्टमहिष्या सह तव [14]क्रीडादृढालिङ्गने प्रवर्तमाने अन्या काचिदाभ्यन्तरी [15]आभ्यन्तरत्वादेव युवयोरालिङ्गनं पश्यन्ती त्रपयेवात्मानं यत्र तिरयति [16]गोपयति । मध्यमाऽपि नाभ्यन्तरी न च बाह्या[17] । [18]मध्यमावृत्तिर्मधुरध्वनिः[19] यथा भवति तथा उज्जिहासारसात् त्रुटयति । [20]उद्गातुकामा कौतुकादुपरमति । तत्र[21] बाह्या[22] [23]परिग्रह[24]वेश्या चाटू[25]च्चारणचापलं कथं वितनुतामिति । अत्र लक्षणयोजना[26]याह—**अत्राग[27]मेति** । लौकिक[28]वस्तुनि काव्योपयोगिवै[29]विध्यं उक्तचरम्[30] अनु[31]स्मारयति—[32]**लौकिक[33]वस्त्विति** ।

ननु विशेषणसाम्यं समासोक्तिलक्षणमुक्तम् । शुद्धकार्यसमारोपे तु तदव्यापक-

1. A. C. बाह्य 2. D. पुटगत्या पा 3. A's alt. कथा 4. A's alt. C. लतयैव 5. C. निर 6. A's alt. C. उदयात् D. उदयाकत्र 7. D. मधुध्व 8. C. मधीर 9. C. ध्वनिः 10. A. C. अत्र 11. A. C. ततो 12. F. हारात्मक 13. E. परा. 14. All except E. क्रीडालिङ्ग C. क्रीडावने 15. C. D. E. अभ्य 16. All except E. गोपा 17. A. H. बाह्य F. बाह्या । वस्तुपर्यालोचनया (P. 118) 18. C. मध्यम 19. C. ध्वनी 20. F. उद्गतातु गमिता कौ 21. F. ततः 22. A C. F. H. बाह्य 23. A's alt. पर 24. C. ग्रहश्यो······च्चारण 25. A's alt. चागू E. चारू 26. A. C. नायाः मिति अत्र D. E. नायाः अ. 27. A. C. H. आगमे च 28. A. C. च वस्तु 29. A. C. F. द्वैवि 30. A's alt. D. भरं 31. Omitted in all except E. 32. A. C. K. यति एकमिति । लौ D. F. यति उक्तं इति लौ 33. All except E. लौकिकं

* From the word बाह्या the mss. F. jumps to वस्तुपर्यालोचनया (p. 118) which occurs in the middle of the explanation of the meaning enjoined in the rule दध्ना जुहोति । But the omitted portion (i. e. from मध्यमवृत्तिः......to अत एव सिद्ध) is found in the end of the commentary, where the author enumerates the figures of speech dealt with by him as असङ्गति विषममध्यमवृत्तिः......अत एव सिद्ध and after this सिद्ध, the ms. ends abruptly.

वस्तुव्यवहारश्च रसादिभेदाद्बहुभेद इत्युक्तं प्राक् । तत्र शुद्धकार्यसमारोपे कार्यस्य विशेषणत्वमौपचारिकमाश्रित्य विशेषणसाम्यादिति लक्षणं पूर्वशास्त्रानुसारेण विहितं यथाकथंचिद्योज्यम् । इह तु—

ऐन्द्रं धनुः पाण्डुपयोधरेण शरद्दधानार्द्रनखक्षताभम् ।
प्रसादयन्ती सकलङ्कमिन्दुं तापं रवेरभ्यधिकं चकार ॥

अस्ति तावद्रविशशिनोर्नायकत्वप्रतीतिः । न चात्र विशेषणसाम्यमिति सा कुतस्त्या । प्रसादयन्ती सकलङ्कमिन्दुमिति विशेषणसाम्याच्छरदो नायिकात्वप्रतीतौ तदानुगुण्यात्तयोः समासोक्त्या नायकत्वप्रतीतिरिति चेत् आर्द्रनखक्षताभमैन्द्रं धनुर्दधानेत्येतद्विशेषणं कथं साम्येन निर्दिष्टम् ? न चैकदेशविवर्तिन्युपमोक्ता, यत्सामर्थ्यान्नायकत्वप्रतीतिः स्यात् । तत्कथमत्र व्यवस्था ?

मित्यत आह—**तत्र शुद्धकार्येत्यादि** । शुद्धकार्यसमारोपे हि [1]विलिखति कुचावित्यादौ [2]यत् कुचविलेखनादि ह(ठ[3])का(मु[4])ककार्यं[5] तस्य यद्यपि न[6] मुख्य[7]तया [8]खदिरादिविशेषणत्वं, अथाप्युपचारेण विशेष[9]णीकरणं, तत् (तत्र ?) यथाकथंचिल्लक्षणयोजना कार्या । ननु किं उपचाराश्रयणेनेत्यत आह—**पूर्वशास्त्रानुसारेणेत्यादि** ।

अथ[10] यत्र समासोक्तेरसामञ्जस्यं तत्र न्यायसञ्चारेण समञ्जसीकर्तुमाह—**इह त्वित्यादिना** । **ऐन्द्रं धनुरिति** । आ[11]र्द्रनखक्षताभम्[12] ऐन्द्रं धनुः पाण्डुपयोधरेण दधाना सकलङ्कमिन्दुं प्रसा[13]दयन्ती शरद्रवेस्तापमभ्यधिकं चकार । पयोधरो मेघः कुचश्च । प्रसा[14]दाति[15]शये कलङ्को[16]द्धुरीभावात् सकलङ्कत्वोक्तिः जारत्वाविष्करणाय । प्रावृडपेक्षया शरदि रवेः तापाधिक्यम् । अत्र [17]चर्चा—**अस्ति[18]तावदित्यादि[19]** । नायकत्वप्रतीतिरस्तीति[20] प्रतिज्ञाय तदाक्षिपति—**न चात्रेति** । सा[21]कुतस्त्या नायकत्वप्रतीतौ नास्तिहेतुरित्यर्थः । हेतुसद्भा[22]वमाशङ्क्य निराचष्टे—**प्रसाद[23]यन्तीत्यादि** । सकलङ्कप्रसा[24]दलक्षणविशेषणसाम्यात् शरदस्तावदस्ति नायिकात्वप्रतीतिः, तदनुगुणत्वेने[25]न्दुररयोर्नायकत्वप्रतीतिरिति चेत् मन्यसे, [26]नैतद्घटते । कुतः आर्द्रनखक्षताभं ऐन्द्रं धनुरिति विशेषण[27]स्यासाम्यात् । ऐन्द्रं[28] धनुः शरद[29] एव विशेषणं

---

1. A. C. omit वि 2. Omitted in A. C. D. 3. All mss. हर 4. All mss. कार्मुक 5. A. C. H. कार्यान्तरस्य 6. Omitted in D. 7. A's alt. C. मुख्यस्य तथा रव 8. D. न खदि 9. A. D. H. विशेषकार C. विशेषणकार 10. A. C. अत्र 11. C. आद्र 12. C. क्षतातं 13. A. C. प्रसार 14. D. प्रासाद 15. F. शये कलङ्कत्वोक्ति 16. A. C. कलङ्क E. कलङ्कोद्धरी D. G. H. दूरी 17. Except A. all mss चर्चः 18. C. अस्मि 19. A. D. F. आदिना 20. C. इति रप्रस्तुति प्रति 21. A. C. F. कूतसत्यां 22. D. स्वभावमा 23. A. C. प्रसादयती 24. E. F. प्रसादनल 25. ने Omitted in D. 26. C. तदाप्यतर्के । कु 27. A. C. F. षणासाम्य 28. All mss. हि धनु 29. A's alt. C. शरदि

उच्यते—एकदेशविवर्तिन्युपमा यदि प्रतिपदं नोक्ता, तत्सा केन प्रतिषिद्धा ? सामान्यलक्षणद्वारेणायातायास्तस्या अत्रापि संभवात्। अथात्र नोपमानत्वेन नायकत्वं प्रतीयते, अपि तु रविशशिनोरेव नायकत्वव्यवहारप्रतीतिः। तयोरत्र नायकत्वात्। तदत्रार्द्रनखक्षताभमित्यत्र स्थितमपि श्रुत्योपमानत्वं वस्तुपर्यालोचनया ऐन्द्रे धनुषि संचारणीयम्। इन्द्रचापाभमार्द्रनखक्षतं दधानेति प्रतीतेः। यथा 'दध्ना जुहोति' इत्यादौ दध्नि संचार्यते विधिः। एवमुपमानुप्राणिता समासोक्तिरेव। इह पुनः—

न[1] नायि[2]कायाः। नन्वा[3]र्द्रनखक्षताभमिति[4] विशेषणौ[5]पम्यादेकदेशविवर्तिन्युपमा शरदि तत्सा[6]मर्थ्यादिन्दुरव्योः नायकत्वप्रतीतिरस्त्वित्यत आह—**न चैकदेशेति**। यद्येकदेशवर्तिन्युपमा[7] केनचिदुक्ता तदा तत्सामर्थ्यादनयोर्नायकत्वप्र[8]तीतिस्स्यात्। न चेयमुक्ता केनचित्। अत[9]स्तत्सामर्थ्यात् कथ[10]मनयोर्नायकत्वव्यव[11]स्थितिः। अत्र समा[12]धित्सुराह— **उच्यत इति**। **एकदेशविवर्तिनीत्यादि**। यद्यपि साक्षान्नोक्ता अथापि नास्याः[13] प्रतिषेधोऽस्ति। ननूक्तिप्रतिषेधयोर्द्वयोरप्यभावे कथं संभव इत्यत[14] आह—**सामान्यलक्षणेति**। ननु यद्येकदेशविव[15]र्तिन्युपमाया इह संभवः तर्ह्युपमालङ्कारस्यैव प्राप्तिर्न स[16]मासोक्तेरित्यत आह—**अथात्रेत्यादि**। अथेत्यधिकारे। यद्युपमानत्वेन नायकोऽधिकारी कश्चित्प्रती[17]यते, [18]भ[19]वेत्प्राप्तिरुपमालङ्कारस्य। [20]न हि प्रतीयते नायकोऽत्र कश्चिदधिकारी। अपि तु रविशशि[21]नोरेव नायकत्वव्यवहारे प्रतीतिः, तयोरेवा[22]स्यां[23] शरदि नायकत्वोपचारात्। इत्थं समासोक्तिप्राप्तौ, तदनुसारेण शब्दन्यासो[24] न्याय्य इत्यत आह— **तद[25]त्रेत्यादि**। [26]आर्द्रन[27]खक्षते श्रुत्या[28] स्थितमप्युपमानत्वमिन्द्रधनु[29]षि संचारणीयम्। कुतः ? वस्तुपर्यालोचनया। तामेव वस्तुपर्यालोचनां स्फुटयति— **इन्द्र[30]चा (पाभं[31]) इत्यादि**। प्रतीतिः पदा[32]र्थान्तर[33]समभिव्यवहारादित्थम् एव[34] यतः[35]। अन्यनिष्ठस्य धर्मस्यान्यत्र संचारणं कुत्र दृष्टमित्यत आह—**यथा दध्नेत्यादि**। दध्ना जुहोतीत्यत्र हि हवनगत[36]त्वेन विधिः[37] प्रतीतः[38] स त्वग्निहोत्रं जुहोतीत्य[39](त) एव सिद्ध

1. Omitted in C. 2. C. यिका नायकत्वादार्द्र 3. All except. E. नत्वार्द्र 4. A. C. इति। ननु प्रसादयन्तीति वि 5. A. C. F. H. शेषणेन साम्या 6. A. F. H. साम्यादि 7. E. न केन 8. A. C. F. व्यवस्थितिः 9. D. अतत्सा 10. Omitted in D. 11. D. F. H. व्यवस्थेति 12. C. समाधि साराभड 13. A. C. E. नासां 14. C. अतस्सामा 15. C. D. E. विवर्त्यु 16. E. न तु 17. D. H. प्रतीयेत 18. A. C. इति भवे 19. A's alt इवेति प्राप्ति 20. omitted in C. 21. After. नो D. repeats the portion from उपमालंकारस्य to शशि 22. A. एव गस्यां 23. D. अस्या 24. D. न्यासौ E. H. न्यासोऽसौ 25. A's alt. C. काऽत्रेत्या 26. A. C. E. F. अत्र 27. C. न लक्ष्यते 28. A. त्तते भूत्यस्थ A's alt. क्षतु श्रुत्यातम C. भूत्यवस्थम 29. A. C. D. F. धनुषः 30. D. तद्रूपचापं 31. All mss. चाप इ 32. F. पदान्तर 33. A's alt. C. समुचितव्य 34. A. C. F. H. एवं 35. A. C. F. H. कुतः 36. C. गतार्थेन 37. A. D. विधि 38. A. C. प्रतीतिः 39. All mss. अतः

नेत्रैरिवोत्पलैः पद्मैर्मुखैरिव सरःश्रियः ।
पदे पदे विभान्ति स्म चक्रवाकैः स्तनैरिव ॥

सरःश्रियामिति नायिकात्वप्रतीतिर्न समासोक्त्या, विशेषणसाम्याभावात् । तस्मान्नायिकात्रोपमानत्वेन प्रतीयते, न तु सरःश्रीधर्मत्वेन नायिकात्वप्रतीतिरित्येकदेशविवर्तिन्युपमैवोपास्या, गत्यन्तराभावात् । यैस्तु नोक्ता तेषामप्युपसङ्ख्येयैव । यत्र तु "केशपाशालिवृन्देन" इत्यादौ समासोक्तायामुपमायां समासान्तरेण विशेषणसाम्यं योजयितुं शक्यं तत्रौपम्यगर्भविशेषणप्रभाविता समासोक्तिरेव युक्तेति न विरोधः कश्चित् ।

सा च समासोक्तिरर्थान्तरन्यासेन क्वचित्समर्थ्यगतेन क्वचित्समर्थकगतत्वेन

इति । वस्तुपर्यालोचनया यथा[1]दध्नि संचा[2]य्येते तथे[3]हाप्यनुसन्धेयमिति यावत् । अतः समासोक्तिरेवेयमिति निगमयति—**एवमुपमानुप्राणितेति** । ऐन्द्रधनुष[4] उपमेय[5]स्योपमानत्व[6]क्लृप्तेः[7] वैवक्षिकोपमानुप्राणितत्वम् । अथ यत्र[8] न्या[9]य्यतः समासोक्तिमपोह्य एकदेशविवर्तिन्युपमैव प्रथते तं विषयं दर्शयितुमाह—**इह पुनरिति** ।

नेत्रैरिवेति अत्र सरःश्रियां नायिकात्वप्रतीतौ[10] निमित्तं विवेचयति—**सरःश्रियामिति**[11] । विशेष[12]णसाम्यान्नायिका[13]त्वप्रतीतिर्न समासोक्त्या । अत एव व्यवहार[14]-समारो[15]पोऽपि न भवतीत्याह—**तस्मान्नायिकेति** । नायिकाऽप्यत्र सरःश्रियामुपमानतया, न तु व्यवहारससारोपेण सरःश्रीधर्मतया अत[16] एवंविधे विषये गत्यन्तराभावादेकदेशविवर्तिनी उपमै[17]वोपास्या । अनुक्ता कथमुपास्येत्यत आह—**यैस्त्विति** । अस्माभि[18]-स्तावदुपप[19]त्तिभिरुक्ता । यैस्तु नोक्ता तैरपि गत्यन्तराभावा[20]दुपसंख्यात[21]व्यैवेत्यर्थः ।

ननु पूर्वमेकदेशविवर्तिन्युपमा निराकृता, सम्प्रति साधितेति व्याघात इत्यत आह—**यत्र तु केशपाशेत्यादि** । दन्तप्रभाः पुष्पाणीवेत्यादि समासेनोक्तायामुपमायां सत्यामपि दन्तप्रभासदृशैः पुष्पैरिवेत्यादि समासान्तरमहिम्ना विशेषणसाम्यमुपपद्यते । तत्रौपम्य[22]गर्भविशेषणोत्थापिता समासोक्तिरेव [23]युक्ता । सम्प्रति तु नेत्रैरिवेत्यत्र गत्यन्तराभावादेकदेशविवर्तिन्युपमैव[24] व्य[25]वस्थापितेति व्याघाताभावात् सर्वमवदातम् ।

अथार्थान्तरन्यास[26]प्रभावितायामस्यां वैचित्र्यान्तरं अस्तीत्याह—**सा चेत्यादि** ।

---

1. Omitted in A. C. 2. C. चाय्यते 3. D. तथेत्याप्य 4. A. C. D. F. धनुरूप 5. C. मेयं शोप 6. D. मानत्वं 7. A. C. D. क्लृप्ति वै 8. A's alt. C. वात्र 9. A's alt. C. स्थाप्यायतः 10. A. C. F. प्रतीतिः 11. All except. C. इत्यादि 12. D. विशेषणात 13. A. C. D. F. नायक 14. D. हारः 15. A. C. E. आरोपापि D. आरोपो न 16. D. यत 17. D. मैवास्या 18. भिः Omitted in C. 19. A's alt. C. वर्तिभिः 20. All mss. भावा-दुपमा संख्याया उप 21. A's alt. तस्यै F. omits एव 22. D. म्य विशे 23. Except A. all read. उक्ता 24. After उपमैव A. repeats the portion from उपास्या । अनुक्ता etc. to एकदेशविवर्तिन्युपमैव 25. A's alt. C. व्युत्थापि 26. न्यास omitted in E. F.

च भवति । क्रमेण यथा—

अथोपगूढे शरदा शशाङ्के प्रावृड्ययौ शान्ततडित्कटाक्षा ।
कासां न सौभाग्यगुणोऽङ्गनानां नष्टः परिभ्रष्टपयोधराणाम् ॥
असमाप्तजिगीषस्य स्त्रीचिन्ता का मनस्विनः ।
अनाक्रम्य जगत्सर्वं नो सन्ध्यां भजते रविः ॥

अत्रोपगूढत्वेन शान्ततडित्कटाक्षत्वेन च शशाङ्कशरदोर्नायकव्यवहारप्रतीतौ समासोक्त्यालिङ्गित एवार्थो विशेषरूपः सामान्याश्रयेणार्थान्तरन्यासेन समर्थ्यते । सामान्यस्य चात्र श्लेषवशादुत्थानम् । शान्ततडित्कटाक्षेत्यौपम्यगर्भं विशेषणं समासान्तराश्रयेणात्र समानम् । "असमाप्तेत्यादौ" तु स्त्रीशब्दस्य सामान्येन स्त्रीत्वमात्राभिधानात्सामान्यरूपोऽर्थो लिङ्गविशेषनिर्देशगर्भेण कार्योत्थापितया समासोक्त्या समारोपितनायकव्यवहारेण रविसंध्यावृत्तान्तेन विशेषरूपेण समर्थ्यते ।

आकृष्टिवेगविगलद्भुजगेन्द्रभोग-
निर्मोकपट्टपरिवेषतयाम्बुराशेः ।

सम[1]र्थ्यः प्रकृतोऽर्थः समर्थकस्त्वप्रकृतः । **अथोप[2]गूढ इति** । उप[3]गूढे आलिङ्गिते । ययौ अपगता । अत्र समर्थ्यगता[4] । **असमाप्ते[5]ति** । अत्र तु समर्थकगता । उभयत्र योजनायाह—**अत्रोपगूढ[6]त्वेनेत्यादि** । उपगूढत्वं शान्ततटित्कटाक्षत्वं च[7] विशेषणसाम्यं तदुत्थापितया[8] समासोक्त्या नायकव्यवहारप्रतीतिः । तथा सति समासोक्त्यालिङ्गितो[9] योऽयं विशेषात्मा[10] स सामान्यात्मना अर्थान्तरन्यासेन समर्थ्यते । सामान्यरूपस्य च समर्थकस्योत्थानम् । परिभ्रष्टपयोधराणामिति श्लेषवशादुपगूढ[11] इति विशेषणं साधारणतया[12] स्फुटम् । शान्ततटिदित्येतत्तु प्रागुपमागर्भम् । तटितः कटाक्षा इवास्या (व यस्या ?) इति । अथ तटित्सदृश[13]कटाक्षेति समा[14]सान्तराश्रयात् साम्यमालम्बते[15] । [16]"असमाप्ते"त्यत्र स्त्रीसामान्यग्रहणात् सामान्यरूपसम[17]र्थोऽर्थः स्त्रीलिङ्गपुल्लिङ्ग[18]निर्देशगर्भेण भजनरूपेण[19] कार्येणोत्थापितया [20]समासोक्त्या समारोपितनायकव्यवहारेण विशेषात्मना रविसन्ध्यावृत्तान्तेन समर्थ्यते ।

उत्प्रेक्षावशात् वैचित्र्या[21]याह—**आकृष्टि[22]वेगेति** । वेष्टना वेष्टनं यस्य मन्दरगिरेः,

---

1. A. C. E. समर्थः 2. A. अथेति । उप 3. A. C. उपश्रेष्ठे A's alt. उपश्लिष्टे 4. C. गणना अ 5. आप्तेरिति 6. A's alt. C. गूढा चेत्या 7. Omitted in A. C. F. H. 8. C. ताया 9. D. लिङ्गिता 10. A. C. F. H. I. आत्मा समर्थ्योऽर्थः स 11. D. E. गूढं 12. D. रणातश्चा स्फु 13. A. C. F. G. H. सदृशे 14. C. समासाश्र 15. C. लम्ब्यते 16. A. C. H. omit अ 17. G. समर्थ्यो 18. A's alt. C. लिङ्गनेर्थेग 19. A. C. F. K. रुपेणोत्था 20. A. C. D. समारोपितया समासोक्त्या समा 21. A's alt. चित्र्यमाह 22. A. C. G. K. कृष्ट

मन्थव्यथाव्युपशमार्थमिवाशु यस्य
मन्दाकिनी चिरमवेष्टत पादमूले ॥

अत्र निर्मोकपट्टापह्नवेन समारोपिताया मन्दाकिन्या यद्वस्तुवृत्तेन पादमूले वेष्टनं तच्चरणमूले वेष्टनत्वेन श्लेषमूलयातिशयोक्त्याध्यवसीयते। तत्तथाध्यवसितं मन्थव्यथाव्युपशमार्थमिवेत्युत्प्रेक्षामुत्थापयति। सोत्थाप्यमानैवाम्बुराशिमन्दाकिन्योर्भर्तृपत्नीव्यवहाराश्रयां समासोक्तिं गर्भीकरोति। एवञ्चोत्प्रेक्षासमासोक्त्योरेकः कालः। एवं "नखक्षतानीव वनस्थलीनाम्" इत्यत्रापि वनस्थलीनां नायिकाव्यवहार उत्प्रेक्षान्तरानुप्रविष्टसमासोक्तिमूल एव। एवमियं समासोक्तिरनन्तप्रपञ्चेत्यनया दिशा स्वयमुत्प्रेक्ष्या ॥

पादः पर्यन्त[1]पर्वतः चरणश्च। अत्र समासोक्तेरुत्प्रेक्षा[2]याश्च समकालतां दर्शयितुमाह—**अत्र[3] निर्मोकेत्यादि**। निर्मोक[4]पट्टपरिवेष्टनया[5] मन्दाकिनीति कथनात् तदपह्नवेन मन्दाकिनीसमारोपः, तस्याश्च यत्प्रान्तपर्वतवेष्टनं[6] तच्चरणमूलवेष्टनमेवेति, पादशब्दश्लेषोत्थया[7] भेदेऽभेदः इत्येवंरूपया अतिशयोक्त्या[8]ऽध्यवसीयते। तथाऽध्यवसितं च मन्थ[9]व्यथेत्यादि फलोत्प्रेक्षामुत्थापयति। सा च अम्बुराशिमन्दाकिन्योर्भर्तृपत्नीव्यवहारसमा[10]श्रयां समासोक्तिं स्वसमकालमुत्थापयतीति अनयोरेककालता। इत्थमन्यत्रापि दर्शयति—**एवं नखक्षतेति**[11]। उत्प्रेक्षान्तरमनुप्रविष्टेति समकालता सूचिता। इत्थं वैचित्र्यम्[12] अनुसन्धेयमिति निगमयति—**एवमियमित्यादि**।

विशेषणांशसाम्येनाप्रस्तुतार्थस्य गम्यता।
[13]समासोक्तिर्मता येन संक्षिप्या[14]र्थोऽभिधीयते ॥
शुद्धकार्यसमारोपे साम्यं[15] स्यादौपचारिकम्[16]।
व्यवहारसमारोपः साक्षादस्यां प्रयोजकः[17] ॥
स्याद्विशेषणसाम्यं चेत्[18] समासान्तर[19]संश्रयात्।
उपमा बाधते नैना[20]मेकदेशविवर्तिनी ॥
दृश्यतेऽर्थान्तरन्यासे[21] सम[22]र्थ्ये च समर्थके।
उत्प्रेक्षायोगिनी चैषा क्वचित्स्यादेककालगा[23] ॥

---

1. A's alt. अन्तवेष्टनं च C. पर्यन्तवेष्टनं तच्चरणमूल 2. E. प्रेक्षा स 3. Omitted in A. F. K. 4. D. E. G. मोकपरि 5. A. F. H. वेषतया 6. D. वेष्टन 7. C. उत्थाया 8. A. C. H. उक्त्याऽर्थोवसी 9. H. मन्द C. मन्त 10. C. समाग्रश्र 11. E. क्षतानी 12.E. चित्र्यान्तरमनु 13. C. repeats समासोक्तिः to येन 14. A. C. F. H. क्षिप्ता 15. A's alt. E. कार्यं 16. G. चारितं 17. C. जकं 18. A's alt. च इत्थया 19. E. अन्ते सं 20. A. C. F. H एनं 21. A. C. D. E. F. न्यासः 22. C. समर्थे 23. A's alt. कालता

विशेषणसाभिप्रायत्वं परिकरः ॥३२॥

विशेषणवैचित्र्यप्रस्तावादस्येह निर्देशः। विशेषणानां साभिप्रायत्वं प्रतीयमानार्थगर्भीकारः। अत एव प्रसन्नगंभीरपदार्थत्वान्नायं ध्वनेर्विषयः। एवं च प्रतीयमानांशस्य वाच्योन्मुखत्वात्परिकर इति सार्थकं नाम। यथा—

राज्ञो मानधनस्य कार्मुकभृतो दुर्योधनस्याग्रतः
प्रत्यक्षं कुरुबान्धवस्य मिषतः कर्णस्य शल्यस्य च।
पीतं तस्य मयाद्य पाण्डववधूकेशाम्बराकर्षिणः
कोष्णं जीवत एव तीक्ष्णकरजक्षुण्णादसृग्वक्षसः॥

अत्र राज्ञ इत्यादौ सोत्प्रासपरत्वं प्रसन्नगंभीरपदत्वम्। एवम् "अङ्गराज! सेनापते! राजवल्लभ! द्रोणापहासिन्! कर्ण! रक्षैनं भीमाद्दुश्शासनम्" इत्यादौ ज्ञेयम्।

परिकरं लक्षयति—**विशेषणसाभिप्रायत्वं परिकरः**[1]। सङ्गतिमाह—**विशेषणवैचित्र्येति**। व्याचष्टे—**विशेषणानामित्यादि**। प्रसन्नगंभीरत्वं नाम पदानां व्याङ्ग्यार्थगर्भी[2]कार[3] एव न तु व्यङ्ग्यस्य वाच्यातिशायिता। निर्व[4]क्तुमाह—**एवं चेति**। वाच्योन्मुख[5]त्वं वाच्याङ्गता[6]॥

राज्ञः इति[7]। राज्ञो न तु यादृशतादृशस्य। तत्रापि मानधनस्य[8] न त्वव[9]मानसहस्य। कार्मुकभृतो न निरायुधस्य। दुर्योधनस्य न तु शक्ययोधनस्य। अग्रतो न त्वसमक्षम्। कुरुबा[10]न्धवस्य मिषतः कर्णस्य शल्यस्य च न निस्सहायस्य। [11]सर्वैवेयन "मना[12]दरे षष्ठी"। इत्थं मिषतो[13] दुर्योधनकर्णशल्याननादृत्येत्यर्थः। दुश्शासनस्येत्यनुक्त्वा[14] तस्य पाण्डवधूकेशाम्बराक[15]र्षिण इत्युक्तिः[16] [17]हन्तव्यत्वप्रसिद्ध्यै। जीवत एव न तु मूर्च्छितस्य मृतस्य वा[18]। तीक्ष्णकरजक्षुण्णाद[19]सृग्वक्षसः न त्वा[20]युधविदारितात्। कोष्णं न तु पर्युषितम्। मयाद्य पीतमिति भीमसेनोक्तिः। साभिप्रायतां दर्शयति—**अत्रेत्यादि**। वाक्येऽपि दर्शयति—**एवमङ्गराजेत्यादि**।

---

1. D. करं 2. C. गर्भ 3. A's alt. करण 4. D. निर्वर्तयितुं 5. A. C. F. G. H. मुखं वा 6. C. अङ्गतां 7. A. C. H. इति व 8. D. स्य अग्रतो 9. A's alt. तु मान F. तु अमान 10. A. C. D. G. H. पाण्डव 11. C. सर्वैर्वैधमना D. सर्वै वे षष्ठी 12. E. अना। याचक सार्थैः (P. 124 under श्लेष) The omitted portion दरे षष्ठी…… to मार्गणशतैः is later found in the same figure Śleṣa while explaining तत्क्रियायोग in the verse त्रयीमयोऽपि etc. as तत्क्रियायोगः तदरे षष्ठी…… मार्गशतैः द्वेतुका (p. 128.) 13. A's alt. C. द्विषतो 14. C. उक्तवादस्य तस्य 15. Except E. all read कर्षण 16. A's alt. उक्ति C. उक्तं H. उक्तः 17. A's alt. C. मन्त 18. H. वा विशेषणा 19. D. E. क्षुण्णात न तु A. F. G. H. क्षुण्णादस्य व C. अस्र व 20. A's alt. आरथवि

विशेष्यस्यापि साम्ये द्वयोर्वोपादाने श्लेषः ॥३३॥

केवलविशेषणसाम्यं समासोक्तावुक्तम् । विशेष्ययुक्तविशेषणसाम्यं त्वधिकृत्येदमुच्यते । तत्र द्वयोः प्राकरणिकयोरप्राकरणिकयोः प्राकरणिकाप्राकरणिकयोर्वा श्लिष्टपदोपनिबन्धे श्लेषः । तत्राद्यं प्रकारद्वयं विशेषणविशेष्यसाम्य एव भवति । तृतीयस्तु प्रकारो विशेषणसाम्य एव भवति । विशेष्यसाम्ये त्वर्थप्रकरणादिना वाच्यार्थनियमेऽर्थान्तरावगतिर्ध्वनेर्विषयः स्यात् । आद्ये तु प्रकारद्वये द्वयोरप्यर्थयोर्वाच्यत्वम् । अत एव द्वयोर्वोपादान इति तृतीयप्रकारविषयत्वेनोक्तम् । विशेष्यस्यापि साम्य इति तु श्लिष्टप्रकारद्वयविषयम् । क्रमेण यथा—

येन ध्वस्तमनोभवेन बलिजित्कायः पुरास्त्रीकृतो
यश्चोद्वृत्तभुजङ्गहारवलयो गङ्गां च योऽधारयत् ।
यस्याहुः शशिमच्छिरोहर इति स्तुत्यं च नामामराः
पायात्स स्वयमन्धकक्षयकरस्त्वां सर्वदोमाधवः ॥

विशेषणानां व्यङ्ग्यार्थग[1]र्भीकरणलक्षणा[2] ।
सोत्प्रासता[3] परिकरो[4] व्यङ्ग्यः परिकरो यतः ॥

श्लेषं लक्षयति—**विशेष्यस्यापि[5] साम्ये द्वयोर्वोपादाने श्लेषः ।** अर्थद्वयस्य यदा[6] प्राकरणिकत्वमप्राकरणिकत्वमेव वा तदा विशेषण[7]विशेष्ययोः शब्दसाम्ये श्लेषः । यदा तूभयमयत्वं अर्थद्वयस्य तदा[8] विशेष्यां[9]शे पृथगुपादाने श्लेष इति सूत्रार्थः । सङ्गतिमाह—**केवलविशेषणेति** । इदमिति वचनविशेषणम् । व्याचष्टे—**तत्र द्वयोरित्यादि । विशेषणविशेष्यसाम्य एवेति** । उभयत्र शब्दसाम्ये सत्येवेत्यर्थः । **विशेष्यसाम्ये त्विति** । तृतीयप्रका[10]रे यदि विशेष्यांशेऽपि शब्दसाम्यं तदा [11]अर्थप्रकरणादिना[12] अभिधानियामकेन प्राकरणिक एव वाच्या[13]र्थ इति नियमे अप्राकरणिकार्थप्रतीतिर्ध्वनेरेव विषयस्स्यात् न तु श्लेषस्य । अनेकार्थो हि शब्दः[14] प्रकरणादिना प्राकरणिक एवार्थे नियम्यते । आद्ये तु प्रकारद्वये नियमहेत्वभावात् द्वा[15]वपि वाच्यौ[16] । इत्थं सति विकल्पो व्यवति[17]ष्ठत इत्याह—**अत एवेति । श्लिष्टप्रकारद्वयेति** । आद्यं प्रकारद्वयं श्लिष्टं विशेष्यांशेऽपि श्लेषार्थ[18]त्वात् ।

येन ध्वस्तेति । अनश्शकटम्[19] । अभवेन असंसारेण बलिदैत्यजित्कायः पुराऽमृत-

---

1. H. नभः कर 2. A's alt. C. लक्षणात् E. लक्षणं 3. K. प्राशता 4. A. C. E. F. H. परिकरे 5. F. विशेष्येति । अर्थ 6. A. C. G. H. यथा 7. D. विशेषणांशे पृ 8. A. C. तथा 9. D. विशेषणांशे 10. A. E. H. प्रकारेति य 11. A. C. F. H. तदर्थ 12. A. C. F. आदिना प्राकरणिक एवार्थे 13. F. G. वाच्योऽर्थ 14. D. E. F. शब्दं 15. A's alt. आद्यावपि 16. A. सिद्धौ 17. D. तिष्ठति 18. A. C. F. H. अर्हत्वा 19. Except E. all read शकटः

नीतानामाकुलीभावं लुब्धैर्भूरिशिलीमुखैः ।
सदृशे वनवृद्धानां कमलानां तदीक्षणे ॥

स्वेच्छोपजातविषयोऽपि न याति वक्तुं
देहीति मार्गणशतैश्च ददाति दुःखम् ।
मोहात्समाक्षिपति जीवितमप्यकाण्डे
कष्टो मनोभव इवेश्वरदुर्विदग्धः ॥

---

[1]संविभागकाले स्त्रीकृतः स्त्रीभावं नीतः । यश्च उद्धृतका[2]लियादिभुजङ्गघा[3]तीति । अर-वलयवान् अरवलयं चक्रम् । अगं गोवर्धनं गां महीं च यः कृष्णः वराहावतारे [4]अधारयत् । यस्य च स्तुत्यं नाम अमराः शशिमच्छिरोहर इत्याहुः[5] । शशिमद्राहुः[6] शशिनं मथ्नातीति । अन्धकानां [7]वृष्णिसहचराणां[8] क्षयकृत् आवासकरः । [9]स माधवस्त्वां सर्वदा पायात्[10] । अथ येन ध्वस्तमनोभवेन[11] नाशितमन्मथेन बलिजित्कायः विष्णोर्वपुः पुराणां संहरणे अस्त्रीकृतः । य[12]श्चोद्धृत्तैर्भुजगवलयैः हारवान् वलयवांश्च गङ्गां च योऽधारयत् अमरा यस्य[13] शिरः शशिमच्चन्द्रकलावत् स्तु[14]त्यं च नाम हर इत्याहुः । अन्धकासुर-[15]क्षयकरः उमाधवो गौरीपतिस्सर्वदा त्वां पायात् । अत्र हरिहरयोर्द्वयोरपि प्राकरणिकता ।

नीताना[16]मिति । लुब्धैर्मधुलंपटैः व्याधैश्च [17]भूरीति[18] क्रियाविशेषणम् एकदा शिलीमुखै[19]र्भ्रमरैः अन्यदा भूरिबाणैः । वनं जलं विपिनं च । कमलानां [20]पद्मानां मृगाणां च । अत्र पद्ममृगयोरप्राकरणिकता ।

स्वे[21]च्छेति । विषयो[22] देशकोशादिस्त्र्यादिश्च । देहीति वितरेति देहवानिति च । वक्तुं[23] न यातीत्येकदा मार्गण[24]शतैः प्रयोगभेदान् (त्) [25]शत-मार्गणशतैर्याचकसार्थैः । सङ्ख्यैर्बाणैः[26] दुःखं ददातीत्यन्यदा । जी[27]वितं जीविका[28] जीवश्च[29] । ईश्वरः [30]दुर्विदग्धः[31] । [32]प्रभुरत्र प्राकरणिकः, अप्राकरणिको मनोभवः, अत्र विशेष्ययोर्द्वयोरुपादानम् ।

---

1. सं omitted in D. 2. A. C. वृत्त भुजंगहारवलयः का 3. A. C. हति भिन्दहार वलयपुल्ल आरवलयमकुर्वन् अगं 4. अ Omitted in D. and E. G. अधारयन् 5. A. D. F. G. H. आह 6. A. मथराहुः A's alt. मथ राम्भश C. मथीरा 7. C. वृष्णीनां 8. D. E. G. णां आवासः 9. Omitted in A. C. F. G. 10. G. यात अव्यात् । अथ 11. D. भवेन बलि 12. A. उद्व्रत्त C. उद्युत्तैः 13. F. स्य नाम शशि 14. A. सत्यं 15. A's alt. भवकरः C. व्ययकरः 16. E. repeats नीतानामिति 17. A. पञ्जरी 18. D. omits ति 19. D. मुखैः भ्र. 20. A. C. F. G. H. लानां मृ 21. A. स्वेति C. स्येति 22. A. योपदेश 23. A. C. F. G. K. वृत्तं 24. C. गतैः 25. D. बहु 26. A. C. D. मार्गणैः 27. A's alt. C. जोविनं D. E. G. K. जीवनं F. जीवनं जीवश्च 28. C. का च ई 29. E. G. जीवञ्च 30. A's alt. दृग्विद 31. A's alt. G. धः प्रभुश्च प्र 32. D. प्रभुः प्रा

अत्र हरिहरयोर्द्वयोरपि प्राकरणिकत्वम् । पद्मानां मृगाणां चोपमानत्वादप्राकरणिकत्वम् । ईश्वरमनोभवयोः प्राकरणिकाप्राकरणिकत्वम् । एष च शब्दार्थोभयगतत्वेन वर्तमानत्वात्त्रिविधः । तत्रोदात्तादिस्वरभेदात्प्रयत्नभेदाच्च शब्दान्यत्वे शब्दश्लेषः । यत्र प्रायेण पदभङ्गो भवति । अर्थश्लेषस्तु यत्र स्वरादिभेदो नास्ति अत एव न तत्र सभङ्गपदत्वम् । सङ्कलनया तूभयश्लेषः । यथा—

रक्तच्छदत्वं विकचा वहन्तो नालं जलैः सङ्गतमादधानाः ।
निरस्य पुष्पेषु रुचिं समग्रां पद्मा विरेजुः श्रमणा यथैव ॥

अत्र रक्तच्छदत्वमित्यादावर्थश्लेषः नालमित्यादौ शब्दश्लेषः । उभयघटनायामुभयश्लेषः । ग्रन्थगौरवभयात्तु पृथङ्नोदाहृतम् ।

एष च नाप्राप्तेष्वलंकारान्तरेष्वारभ्यमाणस्तद्बाधकत्वात्तत्प्रतिभोत्पत्तिहेतुरिति केचित् । "येन ध्वस्तमनोभवेने"त्यादिर्विविक्तोऽस्य विषय

उदाहरणत्रयेऽपि योजनायाह—**अत्र हरिहरेत्यादि** । पुनस्त्रैविध्यायाह—**एष च शब्दा**[1]**र्थेति**[2] । **उदा**[3]**त्तादीति** । लौकिकशब्देष्वपि स्वरभेदादेवार्थविगतिः । ताल्वोष्ठा[4] दिव्यापारः[5] प्रयत्नः अयं[6] शब्दा[7]न्यत्वे हेतुः । शब्दश्लेषे लिङ्गान्तरमाह[8]—**यत्र प्रायेणेति** । अर्थश्लेषस्तु अन्यथेत्याह[9]—**अत एवेति** । उभयश्लेष[10]माह—**सङ्कलनयेति** ।

उभ[11]यश्लेषमुदाहरति—**रक्त**[12]**च्छ**[13]**दत्वमिति** । [14]छदो दलं[15] वासश्च । विकचाः विकस्वराः,[16] कच[17]रहिताश्च । जलैस्सङ्गतं नालमादधानाः जडजनैस्[18]सख्यमलं [19]नादधानाः । [20]पुष्पेषु कुसुमान्तरेषु [21]रुचिं शोभां पुष्पबाणप्रियतां[22] च । उभयश्लेषतां दर्शयति—**अत्र रक्तेत्यादि** । पृथगनुदाह[23]रणे हेतुमाह— **ग्रन्थगौरवेति** ।

अथास्य सावकाशनिरवकाशादिचर्चाम् आरभते—**एष चेत्यादिना** । अलङ्कारान्तरेष्वप्राप्तेषु अनारभ्यमाणोऽयं[24] निरवकाशत्वात्[25] [26]बलीयानिति बाधित्वा तत्प्रतिभामात्र[27]मुत्पादयतीति केचित् । **येन**[28] **ध्वस्तेति** । अन्ये पुनः "येन ध्वस्तमनोभवेने"ति

---

1. H. शब्दे उदात्तेति 2. A. C. F. अर्थोदात्रेति 3. D. उदात्यादी 4. C. ताल्वोष्मादि 5. D. E. G. व्यापारः आयामो[I] रौक्ष्यं संवृतो[II] खस्येति उच्चैः करणानि[III] शब्दस्य । अन्ववसर्गो [IV]मार्दवमुरुतारवस्येति नीचैः करणानि शब्दस्येति । अनुशिष्टो गात्रायामादिः प्रयत्नः । (I. D. E. G. आयामौ II D. वृत्तताल्वस्यैव III D. करणादि E. G. कराणि IV D. मर्गवमरु) 6. Omitted in C. 7. Except E. all read अन्यत्व 8. D. आह अत एवेति उभ 9. A's alt. C. H. अन्यश्चे 10. A. G. H. श्लेषमुदाहरति संक 11. D. सकलनश्लै 12. A's alt. रत्न 13. D. पदत्वं 14. C. छदा 15. A. C. D. F. H. दलानि 16. D. विकचस्व 17. A's alt. कृप 18. A. C. शाख्य 19. A. C. H. न दधा E. F. अलं दधा C. पुष्पैः पु 20. Omitted in A. C. D. F. H. I. 21. A. C. H. श्रियं 22 A. C. D. G. H. I. प्रियं च 23. C. हरण 24. C. यत् 25. A. त्वादेव 26. A's alt. बलितानि ब D. E. F. G. बलीतानि ब 27. F. आवहती 28. A. C. येन त्विति A's alt. येनेति H. येन त्विति

इति निरवकाशत्वाभावान्नान्यबाधकत्वमित्यन्यः सह संकरः। दुर्बलत्वाद्वा बाध्यत्वमित्यन्ये। तत्र पूर्वेषामभिप्रायोऽयम्—इह प्राकरणिकाप्राकरणिकोभयरूपानेकार्थगोचरत्वेन तावत्प्रतिष्ठितोऽयमलङ्कारः। तत्राद्यं प्रकारद्वयं तुल्ययोगिताया विषयः। तृतीये तु प्रकारे दीपकं प्रभवतीति तावदलंकारद्वयमिदं श्लेषविषयं व्याप्यावतिष्ठते। तत्पृष्ठे चालंकारान्तराणामुत्थानमिति नास्ति विविक्तोऽस्य विषयः। अत एव चालङ्कारान्तराणां बाधितत्वात्प्रतिभामात्रेणावस्थानम्। "येन ध्वस्तमनोभवेन" इत्यादौ च प्राकरणिकत्वादर्थद्वयस्य तुल्ययोगितायाः प्रतिभानम्।

अलङ्कार्यालङ्करणभावस्य लोकवदाश्रयाश्रयिभावेनोपपत्तेः। "रक्तच्छदत्वम्" इत्यादावर्थद्वयाश्रितत्वादयमर्थालङ्कारः "नालम्" इत्यादौ तु शब्दद्वयाश्रितत्वाच्छब्दालङ्कारोऽयम्। यद्यपि "अर्थभेदे शब्दभेद" इति दर्शने

अलङ्कारान्तरविविक्तोऽस्य विषयः इति सावकाशत्वान्नान्य[1]बाधकः। अतोऽन्यसम्पाते सङ्करः न्यायतो वा[2] दौर्बल्ये बाध्यत्व[3]मित्याहुः। तत्र स्वमतनिरवकाशत्व[4]माविश्चिकीर्षुराह—**तत्र पूर्वेषामित्यादि**। अनेकार्थगोचरत्वेनेति प्रत्येकमभिसम्बन्धः। आद्यं[5] प्रकारद्वयं प्राकरणिकानेकार्थगोचरत्वं अप्राकरणिकानेकार्थगोचरत्वं[6] च। तदुभयमपि हि तुल्ययोगिताया विषयः। तस्याः प्रस्तुतानां वा समानधर्माभिसम्बन्धो लक्षणम्[7]। [8]यत्रोभयरूपानेकार्थगोचरत्वं तृतीयः प्रकारः तत्र तु दीपकं प्रभवति। तस्य प्रस्तुताप्रस्तुतानां समानधर्माभिसम्बन्धो[9] लक्षणं यतः। अतः श्लेषविषयोऽनेना[10]लङ्कारद्वयेन व्याप्तः। अलङ्कारान्त[11]रेणापि व्याप्यत इत्यत[12] आह—**तत्पृष्ठे[13] चेति**। यत इत्थं नास्य [14]विविक्तविषयता अतोऽलङ्कारान्तराणि [15]श्लेषबाधितानि प्रतिभा[16]मात्रावशेषाणि भवन्ति। इत्थं सति विविक्तो[17] यश्शङ्कितो विषयः सोऽपि अविविक्त एवेत्याह—**येन ध्वस्तेत्यादि**। इत्थं निरवकाशत्वादन्यबाधकत्वमुपपाद्य शब्दार्थोभयविषयता[18]मस्य उपस्था[19]पयितुमाह—**अलङ्कार्येत्यादि**। अलङ्कार्यालङ्करणभावो हि आश्रयाश्रयिभावेनोपपन्नो[20] लोके [21]कर्णा[22]श्रितः [23]कर्णालङ्कार इति। अतो रक्तच्छ[24]देत्यादावर्थाश्रयणादर्थालङ्कारोऽयं, नालमित्यादौ[25] तु स्फुटश्शब्दभेद इति शब्दालङ्कारः। ननु अर्थभेदे[26] शब्दभेदोऽपि भिन्न एवेति[27] रक्तच्छदमित्यादावपि न शब्दैक्यमित्यत आह—

---

1. A's alt. अस्य 2. C. पादौ 3. D. omits त्व 4. D. त्व बलीतानि बाधित्वा आवि C. त्वमाह 5. D. आद्यं प्राक 6. A. D. चरत्वात्तदु C. गोचरं 7. D. क्षणं अश्लेषविषयो 8. E. F. यतः 9. E. बन्धे 10. A. अलङ्कारान्तराणि श्लेष 11. D. अन्तरोऽपि 12. D. इत्याह 13. F. प्रतिष्ठे H. तत्पद्ये 14. C. विभक्त 15. C. श्लेषां च तानि, 16. A. C. K. मात्रेवशे 17. D. विविक्ततायाः विष F. विविक्ततया विष 18. A. C. F. H. विषयत्वं 19. H. उपपादयि 20. A. C. H. उपपत्ते 21. A. कण्ठाश्रितः कण्ठालंङ्कारः कर्णा 22. D. F. कण्ठा 23. D. F. कण्ठा 24. C. रक्तदैत्ये 25. F. इत्यादौ तु शब्दभेदः प्रतीत्य 26. A. H. भेदोऽपि भि 27. C. वावेति

"रक्तच्छदत्वम्" इत्यादावपि शब्दाश्रितोऽयं तथाप्यौपपत्तिकत्वादत्र शब्दभेदस्य प्रतीतावेकतावसायान्नास्ति शब्दभेदः। "नालम्" इत्यादौ तु प्रयत्नादिभेदात्प्रातीतिक एव शब्दभेदः। अतश्च पूर्वत्रैकवृन्तगतफलद्वयन्यायेनार्थद्वयस्य शब्दश्लिष्टत्वम्। अपरत्र तु जन्तुकाष्ठन्यायेन स्वयमेव शब्दयोः श्लिष्टत्वम्। पूर्वत्रान्वयव्यतिरेकाभ्यां शब्दहेतुत्वाच्छब्दालंकारत्वमिति चेत्, न। आश्रयाश्रयिभावेनालंकारत्वस्य लोकवद् व्यवस्थानात्। एवञ्च,

"सकलकलं पुरमेतज्जातं संप्रति सुधांशुबिम्बमिव" इत्यादौ न गुणक्रियासाम्यवच्छब्दसाम्यमुपमाप्रयोजकमपि तूपमाप्रतिभोत्पत्तिहेतुः श्लेष एवावसेयः। श्लेषगर्भे तु रूपके रूपकहेतुकस्य श्लेषस्य तृतीयकक्ष्यायां रूपक एव

यद्यपीत्यादि। औपपत्तिकत्वादिति[1]। प्रत्यर्थं शब्दभेद इत्युपपत्त्या हि शब्दभेदोपपादनम्[2]। प्रतीतौ पुनरैक्यमेवावसीयते। अतः साहित्यसरणेः प्रतीत्यैक[3]सारत्वात् शब्दैक्यप्रतिपादकदर्शनावष्टम्भाच्च नास्ति[4] शब्दभेदः[5]। नालमित्यादौ तु शब्दभेदः प्रतीत्यनुरोधी। अतो रक्तच्छदमित्यादौ शब्दैक्यादेकवृन्त[6]गतफलद्वयन्यायेन[7] अर्थयोः श्लिष्टता, नालमित्यादौ तु जतुकाष्ठन्यायेन शब्दयोरेव। रक्तच्छदमित्यादौ पुनश्शब्दालङ्कारतामाशङ्कते[8]—**पूर्वात्रान्वयेति**। परिहरति—**न**। **आश्रयेत्यादि**। अलङ्कारत्वं हि लोके[9] नान्वयव्यतिरेकाभ्यां[10] व्यवतिष्ठते, अपि त्वाश्रयाश्रयिभावेनैव, इहापि तद्वदित्यर्थः। एवमुभयालङ्कारतां प्रसाध्य[11] बाध्यबाधकभाव[12]विवेचनमुपक्रमते—**एवं च**[13] **सकलेत्यादि**। इत्थं[14] निरवकाशत्वोभयालङ्कारत्व[15]सिद्धौ सकल[16]कलमित्यादौ श्लेष एव नोपमा। तत्र हेतुः[17]—गुणक्रियासाम्यवत् शब्दसाम्यं नोपमाप्रयोजकमिति। सुधांशुबिम्बं कलाभिरुपेतं[18] पुरं[19] तु [20]कलकलसहितमिति शब्दसाम्यमेवेह। अत उपमाप्रतिभोत्पत्तिहेतुः श्लेष एवावसीयते। ननु निरवकाशत्वाच्छ्लेषश्चेद्बाधकः, तर्हि[21] रूपकसमासोक्त्योः कुतो[22] न बाध इत्यत आह—**श्लेषगर्भे**[23]**त्वित्यादि**। रूपकं हि [24]सिद्धश्लेषमु[25]त्थाप्य [26]स्वस्वरूप एव विश्राम्यतीति श्लेष[27]बाधकः। तत्रापि यदि श्लेषः[28] पूर्वसिद्धो[29] रूपकमुत्थाप्य

---

1. D. इत्यर्थः 2. C. पादनप्र 3. D. प्रतीत्येक 4. E. अस्ति 5. D. भेदा 6. C. वृत्तान्त 7. A. C. न्यायेन शब्दयो 8. F. आलंबते 9. A. C. H. लौकिके F. लौकिको 10. A. C. काभा व्यवति H. रेका भाव्यनुति 11. C. साद्य 12. Except C. E. others read भावमुप 13. Omitted in all except E. G. 14. A. C. H. च निर 15. C. कारत 16. A. C. H. सकलमि 17. A. F. हेतु गु 18. A's alt. उपेतः 19. C. परं 20. E. सकल 21. C. तन्निरू 22. A. C. H. कुतोवबोध A's alt. कोनबोधः 22. A. E. F. गर्भेष्वि 23. G. स्वसिद्धये श्लेष 24. C. श्लेषमर्थ...... स्व 25. स्व omitted in D 26. A. C. D. E. श्लेषाबाधकं 27. D. श्लेषा 28. Except E. G others read. सिद्धरू 29. D. रूपमु

विश्रान्तिरिति रूपकेण श्लेषो बाध्यते। श्लिष्टविशेषणनिबन्धनायां च समासोक्तौ विशेष्यांशस्य गम्यत्वाच्छ्लेषस्य बाधिका समासोक्तिः। इह तु

त्रयीमयोऽपि प्रथितो जगत्सु यद्वारुणीं प्रत्यगमद्विवस्वान्।
मन्येऽस्तशैलात्पतितोऽत एव विवेश शुद्ध्यै बडवाग्निमध्यम्॥

अत्र श्लोके विवस्वतो वस्तुवृत्तसंभवि अधःप्रदेशसंयोगलक्षणं यत्पतितत्वं यच्च बडवाग्निमध्यप्रवेशस्ते द्वे अपि त्रयीमयसंबन्धिवारुणीगमनरूपविरुद्धाचरणहेतुकाभ्यां पतितत्वाग्निप्रवेशाभ्यामतिशयोक्त्या श्लेषमूलया अभेदेनाध्यवसिते। सोऽयमेकक्रियायोगः। तद्धेतुका च मन्येऽत एव शुद्ध्यै

यदि स्वरूपे विश्राम्यति, तदा रूपकं[1] बाध्यमेव, यथा भ्रमिमरतिमित्यादौ। चर्चितं चैतत् रूपकप्रस्तावे।

रूपकं पूर्वसंसिद्धं[2] श्लेषमुत्थापयेद्यदि।
तदा[3] रूपकमेव स्यादन्यथा श्लेष इष्यते॥ इति

श्लिष्टविशेषणेति। समासोक्तौ तु श्लिष्टविशेषणनिबन्धनायां विशेष्यांशस्य[4] गम्यत्वात् समासोक्तिरेव बाधिका[5]। श्लेषे[6] हि वाच्यत्वमेव लक्षणम्। अतो लक्षणविकलत्वात् विशेषणे[7]ष्वाभातो[8]ऽपि बाध्य एव।

विशेषणान्तरेऽपि श्लेषस्य बाधकतां दर्शयितुमाह—**इह त्वित्यादि।** जगत्सु[9] त्रयीमयत्वेन प्रथितोऽपि[10] विवस्वान् वारुणीं प्रति यद[11]गमत्[12]। वारुणी प्रतीची दिक् सुरा च। अत [13]एवास्तशैला(त्पतितः[14])। पातित्यं अधः प्रदेशसंयोगः उपहतिश्च[15] पतित[16]त्वादेव शुद्ध्यै बडवाग्निमध्यं विवेशेत्यर्थः[17]। व्याचष्टे—**विवस्वतो वस्तुवृत्तेत्यादि।** लोके[18] त्रयीमयस्य सतो वारुणी[19]स्पर्शतो[20] यौ पति[21]तत्वाग्निप्रवेशौ, ताभ्यां श्लेषमूलया[22]ऽतिशयोक्त्या द्वे[23] अपि विवस्व[24]त्क्रियेऽध्यसिते[25]। सोऽयं[26] तत्क्रिया ([27]एकक्रिया)योगो नाम अतिशयः[28]। [29]यद्यप्येकैव क्रिया कर्तृभेदभिन्ना सत्य[30]भेदेनाध्यवसिता[31] स तु तत्क्रिया ([32]एकक्रिया) योगः[33], तद्धेतुकातिशयोक्तिहेतुका। अत्र[34] (उत्प्रे[35])क्षायाम्[36]। अत

---

1. A. C. रूपकमेव 2. D. पूर्वसिद्धान्तं 3. A. D. F. G. H. तथा 4. D. अंशस्व ग 5. C. बाधिकं 6. A. F. H. श्लेष वा C. श्लेषे वा 7. A. C. H. षणेष्वाह बाध्य F. षणत्वात् भातो 8. D. आदातो विषा 9. C. जगत्संश्रयी 10. D. थितो वि 11. A. H. अगात् 12. H. अगात् अर्थं व्याचष्टे 13 Except D. F. others read अतोऽस्त 14. All read पतितः 15. D. हतीतिश्च 16. त omitted in D. 17. A. अर्थं 18. C. लोक 19. C. वारुणीषु दर्श 20. E. स्पर्शः 21. त omitted in D. 22. D. मूलाया 23. Omitted in A. C. H. 24. A. C. H. स्वतः त्रये 25. C. सितो 26. C. सायं 27. All mss. तत्क्रिया 28. H. शयः अप्रस्तुतप्रशंसां 29. A. अद्यैकैकक्रि C. असैकैकक्रि 30. A. D. F. सती अ 31. D. सितां। तत्क्रिया 32. A. C. योगःस्त 33. All mss. तत्क्रिया 34. A. E. F. G. यत्र 35. All mss. चोत्प्रेक्षा 36. A. C. D. F. H. प्रेक्षायां एव (P. 128)

इत्युत्प्रेक्षा । अत्रात एवेति परामृष्टो विरोधालंकृतोऽर्थो हेतुत्वेनोत्प्रेक्ष्यते । शुद्ध्यै इति च फलत्वेन । ततश्च हेतुफलयोर्द्वयोरप्युत्प्रेक्षा । विरोधालङ्कारस्य च विरुद्धाभासत्वं लक्षणम् । अतो विरोधाभासनसमय एव हेतुफलोत्प्रेक्षयोरुत्थानम् । उत्तरकालं तु विरोधसमाधिः । श्लेषस्य सर्वालङ्कारापवादत्वाद्विरोधप्रतिभोत्पत्तिहेतुरयं श्लेषः ।

यत्र तु प्रस्तुताभिधेयपरत्वेऽपि वाक्यस्य श्लिष्टपदमहिम्ना वक्ष्यमाणार्थनिष्ठमुपक्षेपापराभिधानं सूचकत्वं तत्र किं श्लेष उत शब्दशक्तिमूलध्वनिरिति विचार्यते। तत्र न तावच्छ्लेषः अर्थद्वयस्यानन्वितत्वेनाभिधेयतया वक्तुमनिष्टेः। नापि ध्वनिः । उपक्षेप्यस्यार्थस्य संबन्धाभावात्तेन सहोपमानोपमेयत्वस्याविवक्षणात् । न चान्या गतिरस्ति । तदत्र किं कर्तव्यम् ? उच्यते श्लेषस्योक्त-

---

एवेति सर्वनाम्ना परामृष्टो[1] यो विरोधालङ्कारः विरुद्धचरणाभासरूपः[2] तेनालंकृतोऽर्थः पातित्यरूप [3] हेतु[4]त्वेनोत्प्रेक्ष्यते । शुद्ध्यै इति च फलत्वेन । अतो हेतूत्प्रेक्षा फलोत्प्रेक्षा च[5] । विरोधालङ्कारोऽपि सम्पन्नलक्षण इत्याह—**विरोधालङ्कारस्य चेति**[6] । अतो विरोधोत्प्रेक्षालङ्कारयोस्तुल्यकालता[7] एकवृत्तान्तःपा(ति[8])ता, उत्तरकालं तु विरोधोपशम[9] इति प्रतीतिक्रमः । इत्थं[10] च सति श्लेषः सर्वबाधकस्सन् विरोधालङ्कारं बाधित्वा प्रतिभामात्रेणाव[11]स्थापयति । विरोधबाधे[12] च तद्धेतुकोत्प्रेक्षाबाधः सिद्ध एवेत्याशयः । अतः[13] श्लेष एवायम् ।

यत्र तु[14] नाटकादौ भा[15]व्यर्थोपक्षेपात्मकं बीजन्यासलक्षणं सूचकत्वं तत्र मीमांसार्थमाह —**यत्र त्वित्यादि** । [16]प्रस्तुताभिधेयपरत्वेऽपि वर्तमाना[17]र्थनिष्ठत्वेऽपि । **उपक्षेपापराभिधानमिति** । उपक्षेप इति तस्य संज्ञा । यदाह—"बीजन्यासः उपक्षेप" इति । **अर्थद्वयस्येति** । तत्रार्थ[18]द्वयमभिधागोचरत्वेनान्वितं वक्तुं नेष्यते । किं तर्हि ? एकोऽर्थोऽभिधेयः प्रस्तुतः । वक्ष्यमाणस्तु सूच्यः । अतो न श्लेषः । श्लेषे[19] द्वयोरभिधेयत्वनियमात् नापि ध्वनिः । कुतः ? उपक्षेप्यस्य[20] भाव्यर्थस्य असम्बन्धेनौपम्या[21]विवक्षणात् । श्लेष[22]ध्वनिव्यतिरेकिणी गतिरपि नास्ति, तत्र किं कर्तव्यमित्याक्षेपः । समाधत्ते—**उच्यत इत्यादि**[23] । श्लेषस्तु द्वयोर्वाच्यत्वाभावात् सर्वथा[24] न प्रवर्तत इति ध्वनेः[25] एव विषयोऽयम् ।

---

1. A. F. मृष्टोक्त वि 2. C. रूपाः 3. A. C. D. F. G. रूपस्सहे E. रूपं च हे 4. A. F. G. हेतुकत्वेन 5. Omitted in C. 6. F. इति श्लेषः । अ 7. A. कालतान्दन कालेत्व विरो 8. All mss. पाता 9. C. उपक्रम 10. C. एवं 11. D. उपस्थाप 12. A. C. F. बाधैवत 13. D. अन्तरः 14. Omitted in A. C. D. 15. A's alt. चाव्यर्थ 16. E. प्रस्तुताप्रस्तु 17. A. C. D. मानिनि 18. D.E. तत्र हि अर्थ 19. D. E. श्लेषद्व 20. A. C. अस्य सम्ब F. अस्य अर्थस्य 21. A. C. F. पम्यस्य वि 22. A. F. G. श्लेषश्चाव्यति C. श्लेषश्च न व्य 23. C. आदि द्वयो 24. A. C. सर्वधा 25. A's alt. C. पुनः

नयेनाप्रवृत्तेर्ध्वनेरेवायं विषय इति निश्चिनुमः। तथा हि—शब्दशक्तिमूले हि ध्वनावर्थान्तरस्यासंबद्धत्वात्संबन्धार्थमौपम्यं कल्प्यते। स च संबन्धः प्रकारान्तरेणौपम्यपरिहारेण यद्यप्युपपादयितुं शक्यः स्यात् तत्कोऽभिनिवेशस्तत्र ? उपमाध्वनौ वस्तुध्वनिरपि संबन्धान्तरेण समीचीनः स्यात्। अत एव—

अलङ्कारोऽथ वस्त्वेव शब्दाद्यत्रावभासते।
प्रधानत्वेन स ज्ञेयः शब्दशक्त्युद्भवो द्विधा॥

इति न्यायभरनिबन्धेन द्विधा शब्दशक्त्युद्भव उक्तः। एवं प्रकृतेऽपि यत्र सूचनाव्यापारोऽस्ति तत्र शब्दशक्तिमूलो वस्तुध्वनिरवसेयः। यथा—

सद्यः कौशिकदिग्विजृम्भणवशादाकाशराष्ट्रं जवा-
त्त्यक्त्वा धूसरकान्तिवल्कलधरो राजास्तशैलं ययौ।
तत्कान्ताप्यथ सान्त्वयन्त्यलिकुलध्वानैः समुल्लासिभिः
क्रन्दन्तं कुमुदाकरं सुतमिव क्षिप्रं प्रतस्थे निशा॥

एतदुपपादयति—तथा[1]हीति। शब्दशक्तिमूले हि ध्वनौ वाच्यप्रतीयमानयोः सम्बन्धाभावात् सम्बन्धायौपम्यक्लृप्तिः। स (च[2]) सम्बन्धः औपम्यानपेक्षया प्रकारान्तरेण यदि सूपपादः[3] तर्हि [4]उपमाध्वनौ [5]कोऽभिनिवेशः ? न कार्य एव, यतो वस्तुध्वनिरपि तत्र विषये सम्बन्धान्तरेणोपपन्नः। अत एव[6] ध्वनिकृता शब्दशक्तिमूलो[7] ध्वनिः अलङ्काररूपो वस्तुरूपश्चेति द्विधा न्यायत उक्तः—

अलङ्कारोऽथ वस्त्वेव शब्दाद्यत्रावभासते।
प्रधानत्वेन [8]स ज्ञेयः शब्दशक्त्युद्भवो द्विधा॥ [9]इति॥

इत्थं च सति प्रकृतेऽपि सूचकत्व[10]सम्बन्धात् शब्दशक्तिमूलो वस्तुध्वनिरवसेयः[11]।

अत्र[12] उदाहरणम्—सद्यः कौशिकेति। हरिश्चन्द्रचरिते नाटके। कौ[13]शिकदिक् उलूकदिशा[14] हर्षात्मिका ते हि प्रभाते हर्षेण कूजन्ति। यद्वा कौशिक इन्द्रः, तस्य दिक् प्राची[15] तद्विजृम्भणवशात्। प्रभाते हि प्राची प्रतायते। आकाशं राष्ट्रसमं[16] इच्छया[17] त्य[18]क्त्वा वल्कलसदृशधूसरकान्तिधरश्चन्द्रः अस्तशैलं ययौ। अथ तत्कान्तापि[19] निशा समुल्लासिभिरलि[20]कुलैः क्रन्दन्तं सुतमिव कुमुदाकरं सान्त्वयन्ती[21] तेन सह क्षिप्रं प्रतस्थे।

---

1. A. C. D. F. G. H. I. तथापीति 2. All read. चेत्संब 3. A. C. F. उपपादितः 4. A's alt. C. तर्हि ध्वनतोः अभि 5. G. को नि 6. D. E. G. एव हि 7. D. मूलो अलं 8. C. D. संज्ञेय 9. Omitted in C. 10. A. C. कत्वे 11. E. अवसेयं 12. Omitted in A. C. F. 13. A's alt. एशिक 14. All except. C. दशा 15. C. प्राचीकशत् वि 16. C. सम्मं 17. A. C. अंशुकचयांस्त्य 18. D. श्यक्त्वा 19. D. विनिशा 20. C. रवि 21. A's alt. C. त्वयेति

इति हरिश्चन्द्रचरिते । अत्र प्रभातवर्णनानुगुण्येन राजशब्दाभिधेयेऽस्तमुपेयुषि चन्द्रे रोहिताश्वाख्यतनयसहितया औशीनर्या वध्वा युक्तस्य हरिश्चन्द्रस्य राज्ञो विश्वामित्रसंपादितोपद्रववशात्प्रातः स्वराष्ट्रं त्यक्त्वा वाराणसीं प्रति प्रस्थानं सूचितम् । तथा च कौशिकशब्दः प्रकृते इन्द्रोलूकयोर्वर्तते । सूचनीयार्थविषयत्वेन तु विश्वामित्रवृत्तिः । वल्कलसुताभ्यां त्वौपम्यं सूचनीयार्थनैरपेक्ष्येण सादृश्यसंभवमात्रेण विश्रमणीयम् । अतः प्रकृतेन सूचनीयस्य संबन्धाच्छब्दशक्तिमूलो वस्तुध्वनिरयम् । इह च—

आकृष्यादावमन्दग्रहमलकचयं वक्रमासज्य वक्त्रे
कण्ठे लग्नः सुकण्ठः प्रभवति कुचयोर्दत्तगाढाङ्गसङ्गः ।
बद्धासक्तिर्नितम्बे पतति चरणयोर्यः स तादृक्प्रियो मे
बाले ! लज्जा निरस्ता नहि नहि सरले ! चोलकः किं त्रपाकृत् ॥

इत्यलङ्कारान्तरविविक्तोऽयं श्लेषस्य विषय इति नाशङ्कनीयम् । अपह्नुतेर्विद्यमानत्वात् । वस्तुतोऽपह्नवस्य सादृश्यार्थप्रवृत्तेर्नायमपह्नुत्यलंकार

सूचनीये त्वर्थे विश्वामित्रक्रोधवशात् इच्छया[1] [2]राष्ट्रं त्यक्त्वा वाराणसीं प्रस्थितः[3] । तत्कान्ताप्यौशीनरी[4] क्रन्दन्तं रोहिता[5]श्वं सुतं[6] सान्त्वयन्ती तेनैव सह [7]प्रस्थितेति । इह वस्तुध्वनिरेवेति दर्शयितुमाह—**अत्र प्रभा[8]तेत्यादि** । ननु धूसरकान्तिवलकलेति सुतमिवेति च औपम्य[9]सम्बन्धस[10]द्भावात्[11] कथमयं[12] वस्तुध्वनिरित्यत आह—**वल्कलसुताभ्यां त्विति** । सूचनीयार्थनैरपेक्ष्येण सादृश्यं हि संभवति । प्रकृतार्थविषयत्वेन तावन्मात्रेण विश्रमणीयं सूचनीयेऽर्थे[13] अनुपयोगात् । अतः प्रकृतेन सह[14] सूचनीयस्य सूचनसम्बन्धाच्च शब्दशक्तिमूलो वस्तुध्वनिरेव । इत्थं सर्वत्र नाटकादौ ज्ञेयम् ।

अथ[15] यत्र न तुल्ययोगिता नापि दीपकं तत्रापि नास्त्यलङ्कारान्तरविविक्तोऽस्य विषय इति दर्शयितुं आह—**इहेति** । अत्र[16] विशेषणानां अलका[17]कर्षवक्त्रा[18]सञ्जनादीनां वल्लभपरतया प्रथमं प्रतीतिः । अथ इत्थं वदन्त्यास्ते लज्जा[19] प्रलीनेति सखीव्य[20]वहारे नहि नहीति वल्लभस्य[21] निह्नवपुरस्सरं कूर्पासकव्यपदेशः क्रियते । अत्र हि[22] न तुल्ययोगिता [23]दीपकं वा अतो विविक्तोऽयं श्लेषविषय इति न शङ्कनीयम् । तत्र हेतुः—**अपह्नुतेर्विद्यमानत्वादिति** । चोदयति—**वस्तुत इति** । अपह्नवो हि वस्तुतस्सादृश्यार्थं

---

1. A. C. F. G. ईदृशं 2. All except E. राज्यं 3. C. स्थित इति 4. C. औशीनरीं 5. C. रोहितं सुतं 6. A. D. सुसान्त्व 7. प्र Omitted in C. 8. A. प्रभाहे A's alt. प्रवाहे C. प्रभावे 9. A. C. D. G. आचित्य 10. A. C. D. F. सभव 11. D. भवात् वस्तु 12. A. C. कथमत्र प्रकृतार्थं 13. A. C. अर्थे तु प्रकृतलाभात अप्रकृतेन 14. A. C. सह सूचनसंब 15. A. अतोऽत्र 16. D. अत्राविशे 17. E. repeats अलका 18. D. वक्त्राञ्ज 19. C. जलजा 20. D. व्याहारे 21. Omitted in D. E. 22. A. C. D. नहि तु 23. D. न दीपकं

इति चेत्, न। उभयथाऽप्यपह्नुतेः संभवात्। सादृश्यपर्यवसायिना वापह्नवेनापह्नवपर्यवसायिना वा सादृश्येन भूतार्थापह्नवस्योभयत्र विद्यमानत्वात्।

सादृश्यव्यक्तये यत्रापह्नवोऽसावपह्नुतिः।
अपह्नवाय सादृश्यं यत्राप्येषाप्यपह्नुतिः॥

इति संक्षेपः। आद्या स्वप्रस्ताव एवोदाहृता। द्वितीया तु संप्रति दर्शिता। तेनालंकारान्तरविविक्तो नास्य विषयोऽस्तीति सर्वालङ्कारापवादोऽयमिति स्थितम्।

प्रस्तुतादप्रस्तुतावगतौ समासोक्तिरुक्ता। अधुना तद्वैपरीत्येनाप्रस्तुतात्प्रस्तुतप्रतीतावप्रस्तुतप्रशंसोच्यते—

अप्रस्तुतात्सामान्यविशेषभावे कार्यकारणभावे सारूप्ये च प्रस्तुतप्रतीतावप्रस्तुतप्रशंसा ॥३४॥

प्रवर्त्तते इह तु[1] सादृश्यं अपह्नवाय प्रवृत्तमिति नायमपह्नव इति चोद्यम्। परिहरति—**न उभयथाऽपीति**। भूतार्थस्य प्रकृतार्थस्य। प्रकृता[2]पह्नवो[3]ह्यपह्नुतिलक्षणम्। स चोभयथाऽपि संभवतीति अपह्नुतिः। अत्र संग्रहश्लोकमाह—**सादृश्यव्यक्त इति**। आद्या[4] सादृश्यपर्यवसाय्य[5]पह्नवरू(पा[6]) स्वप्रस्तावे अपह्नुतिप्रस्तावे। द्वितीयापह्नव[7]पर्यवसायिसादृश्यात्मिका। निगमयति—**तेनालङ्कारान्तरेति**।

शब्दसाम्यं[8] भवेच्छ्लेषो विशेषणविशेष्ययोः।
यद्येकोऽप्रकृतार्थश्चेत् भेद्यांशे[9] भिन्नशब्दता[10]॥
शब्दार्थोभयनिष्ठोऽयं सर्वालंकारबाधकः[11]।
[12]पूर्वसिद्धस्य[13] चेदङ्गं तदा न्यायेन बाध्यते॥

इत्थं न्यायनिर्भरतया [14]अनेन प्रपञ्चितोऽपि **काव्यप्रकाशकृता** प्रतिपदं खण्डितोऽयं श्लेषोऽ[15]लङ्कारः[16]। खण्डनयुक्[17]यस्तु अनौचित्या[18]न्नेह लिख्यन्ते[19]। **संप्रदायप्रका**[20]**शिन्यां तु काव्यप्रकाशटीकायां** वितत्य दर्शिता इति तत [21]एवावधार्याः।

अप्रस्तुतप्रशसां[22] लिलक्षयिषुः विशेषणविच्छित्तिसङ्गतिसमाप्तेः[23] सङ्गत्यन्तरं दर्शयति—**प्रस्तुतादप्रस्तुतेत्यादि**। तत्र सूत्रम्[24]—**अप्रस्तुतात् सा**[25]**मान्यविशेषभावे कार्यकारणभावे सारूप्ये च प्रस्तुतप्रतीता**[26]**वप्रस्तुतप्रशंसा**[27]। सामान्यविशेषभावादि

---

1. Omitted in A. C. 2. A. C. प्रकृतो E. प्रकृतार्थाप 3. A's alt. C. ह्नवोस्या पनयति ल 4. A. C. F. अन्यसा D. आद्यापर्य 5. A. C. F. सायै 6. All mss. except C. रूपं C. रूपस्य प्र 7. D. ह्नव एव प 8. A. साम्ये 9. A. G. गम्यांशे 10. D. शब्दतः 11. D. बाधकं 12. E. सर्व 13. D. स्य अङ्गं 14. A. C. G. तेन. 15. D. श्लेषालं 16. C. कारस्व 17. C. वस्तु 18. D. चित्यं 19. C. लिख्यते 20. A. D. F. प्रदर्शिन्यां 21. D. F. एव दर्शिताव 22. D. प्रशंसा 23. Except E. all read समाप्तौ 24. F. सूत्रं प्रस्तुतादित्यादि। सामा 25. D. repeats सामान्यविशेष 26. D. तावस्तु प्रस्तु 27. D. प्रशंसा व्या (P. 133)

इहाप्रस्तुतस्य वर्णनमेवायुक्तमप्रस्तुतत्वात्। प्रस्तुतपरत्वे तु कदाचित्तद्युक्तं स्यात्। न चाप्रस्तुतादसंबन्धे प्रस्तुतप्रतीतिः अतिप्रसङ्गात्। संबन्धे तु भवन्ती न त्रिविधं संबन्धमतिवर्तते। तस्यैवार्थान्तरप्रतीतिहेतुत्वोपपत्तेः। त्रिविधश्च संबन्धः—सामान्यविशेषभावः कार्यकारणभावः सारूप्यं चेति। सामान्यविशेषभावे सामान्याद्विशेषस्य विशेषाद्वा सामान्यस्य प्रतीतौ द्वैविध्यम्। कार्यकारणभावेऽप्यनयैव भङ्ग्या द्विधात्वम्। सारूप्ये त्वेको भेद इत्यस्याः पञ्च प्रकाराः, तथापि सारूप्यहेतुके भेदे साधर्म्यवैधर्म्याभ्यां द्वैविध्यम्। वाच्यस्य संभवासंभवोभयरूपताभिश्च त्रयः प्रकाराः। श्लिष्टशब्दप्रयोगे त्वर्थान्तरस्यावाच्यत्वाच्छ्लेषाद्विशेषः श्लेषे ह्यनेकस्यार्थस्य वाच्यत्वमित्युक्तम्। तत्र सामान्याद्विशेषप्रतीतौ यथा—

तण्णत्थि किंपि पइणो पकप्पिग्रं जंण णिग्रइधरणीए।
अणवरअगमणसीलस्स कालपहिअस्स पाहिज्जम्॥

अत्र प्रहस्तवधे विशेषे प्रस्तुते सामान्यमभिहितम्। विशेषात्सामान्यप्रतीतौ यथा—

संबन्धावलम्बेनाप्रस्तुतात् प्रस्तुतावगतौ अप्रस्तुतप्रशंसा। व्याचष्टे—**इहाप्रस्तुतस्येति**। नह्यप्रस्तुतं प्रस्तुतपरत्वाभावे वर्णनीयम्[1], [2]अप्रस्तु[3]तत्वात्। प्रस्तुतप्रत्यायकं च सम्बन्धाभावे न घटते अतिप्रसक्तेः। प्रतीतिहेतुश्च सम्बन्धः त्रिधैव[4] सामान्यविशेष्य[5]भावः कार्यकारणभावः सारूप्यं चेति। तत्र सामान्याद्वि[6]शेषस्य विशेषाद्वा[7] सामान्यस्य प्रतीतिरिति द्वैविध्यम्[8]। एवं कार्यकारणभावेऽपि। सारूप्ये तु यद्यपि नैवम्, अतः पञ्चप्रकाराः। तथापि साधर्म्य[9]वैधर्म्याभ्यां द्वैविध्यं [10]भेदान्तर[11]वत्सारूप्येऽपि। अथ सर्वैवेयं वाच्यस्य[12] संभवेन[13] उभयरूपतया चेति त्रिधा। [14]श्लिष्टशब्दप्रयोगे तु श्लेषेण न बाध्यते प्रस्तुतस्या[15]वाच्यत्वात्। **तण्ण[16]त्थीत्यादि**।

तन्नास्ति किमपि (पत्युः[17]प्र) कल्पितं(यन्न[18]नियति)गृहिण्या[19]।
अनवरतगमनशीलस्य कालपथिकस्य पाथेयम्[20]॥

व्याख्यातं प्राक्। सामान्याद्विशेषप्रतीतिं दर्शयति—**अत्र प्रह[21]स्तेत्यादि**।

---

1. D. नीयः 2. F. omits अ. 3. A. C. D. G. स्तुतपरत्वात् 4. A. D. F. तथैव 5. D. विशेष 6. A. E. H. याद्वा विशे 7. D. Omits वा 8. D. विध्यं साधर्म्य 9. C. धर्म्याभ्यां 10. A. E. G. अभेदा 11. C. वत्वाद्रूप्ये 12. A. D. E. F. वाच्यसं 13. D. भवेन रूप 14. C. श्लेष 15. H. त्वात्। तन्ना 16. D. तणन्थीति E. तणहहीत्या 17. All mss. पत्युरिव 18. All read. यन्निजगृ 19. A. C. F. G. H. गृहेस्योनव 20. A's alt. C. पाथेयस्याख्या 21. D. प्रशस्ये

एतत्तस्य मुखात्कियत्कमलिनीपत्रे कणं पाथसः
यन्मुक्तामणिरित्यमंस्त स जडः शृण्वन्यदस्मादपि ।
अङ्गुल्यग्रलघुक्रियाप्रविलयिन्यादीयमाने शनै—
स्तत्रोड्डीय गतो ममेत्यनुदिनं निद्राति नान्तःशुचा ॥

अत्र जडानामस्थान एव अभिनिवेश इति सामान्ये प्रस्तुते विशेषोऽभिहितः । कारणात्कार्यप्रतीतौ यथा—

पश्यामः किमियं प्रपद्यत इति स्थैर्यं मयालम्बितं
किं मां नालपतीत्ययं खलु शठः कोपस्तयाप्याश्रितः ।
इत्यन्योन्यविलक्षदृष्टिचतुरे नास्मिन्नवस्थान्तरे
सव्याजं हसितं मया धृतिहरो बाष्पस्तु मुक्तस्तया ॥

अत्र तथा धाराधिरूढो मानः कथं निवृत्त इति कार्ये प्रस्तुते निवृत्तिकारणमभिहितम् । कार्यात्कारणप्रतीतौ यथा—

एतत्तस्येति । तस्य मुखात् एतत् कियत् । वक्ष्यमाणस्य जाड्या[1]पेक्षया जाड्यमस्य अल्पकमित्यर्थः । एतदित्युक्तम् । किं तत् ? कमलिनीपत्रे पाथसः कणं मुक्तामणिरित्यमंस्तेति यत् । एवं मन्ता[2] नातिजड[3] इत्यर्थः । स एवातिजडः यस्तु मुक्तामणिधिया[4]ऽऽदीयमाने तत्र पाथःकणे अङ्गुल्यग्रक्रियाप्रविल[5]यिनि सति मम[6] मणिरुड्डीय गत इति अन्तश्शुचा न निद्राति । अत्र विशेषात्सामान्यप्रतीतिं दर्शयति[7]—**अत्र जडानामिति** ।

पश्याम इति—सुहृदा[8] सह नायिकावृत्तान्तोपवर्णनरूपा नायकोक्तिरियम् । किमियं प्रपद्यत [9]इति पश्याम इति धिया संलापपरि[10]हारादिरूपं स्थैर्यं मया[11]लम्बितम् । तया तु "अयं खलु शठः [12]मां न किमप्यालपतीति" कोप आश्रितः । इत्यन्योन्यवैलक्ष[13]ण्येन दर्शनचतुरे [14]तस्मिन्नवस्थान्तरे मया व्याजेन हसितं, [15]तयाऽपि धैर्यहरो बाष्पो मुक्तः[16] । उद्बाष्पायां तस्यां धैर्यमेव[17] मुक्तमित्यर्थः । अत्र कारणात्कार्यप्रतीतिं दर्शयति—**अत्र तथा[18] धाराधिरूढे[19]ति** । माननिवृत्तिकार्ये प्रस्तुते बाष्पमभिहितम्[20] अप्रस्तु[21]तत्वेन विवक्ष[22]णीयम् ।

---

1. C. जा आवेक्ष 2. A's alt. मर्थी ? C. H. मत्वा 3. H. जनः स्व इ 4. A. C. D. F. G. H. I. धिया दीय 5. C. विलयादि 6. E. G. मन्मणि 7. D. यतीति 8. C. संहृदा 9. A. C. इति धिया 10. E. F. परित्यागादि 11. A. E. F. G. H. मलावलं 12. A. C. F. मामद्य किमपि नाल H. मानिनं कि 13. A. D, E. येण 14. H. तत्राव 15. D. E. F. G. तया च मम तथाविध धै 16. H. मुक्तः विभक्ताविष (P. 137) 17. E. F. G. धैर्यं धौर्त्यं मु D. धैर्यं वयमु 18. A. C. कदाधारेऽपि D. तथा धारेति 19. A's alt. omits इति 20. C. हितत्वमप्र 21. D. स्तुतेन 22. C. वक्षयन्

इन्दुर्लिप्त इवाञ्जनेन जडिता दृष्टिर्मृगीणामिव
प्रम्लानारुणिमेव विद्रुमदलं श्यामेव हेमप्रभा ।
कार्कश्यं कलयापि कोकिलवधूकण्ठेष्विव प्रस्तुतं
सीतायाः पुरतश्च हन्त ! शिखिनां बर्हाः सगर्हा इव ॥

अत्र संभाव्यमानैरिन्द्वादिगतैरञ्जनलिप्तत्वादिभिः कार्यरूपैरप्रस्तुतैर्लोकोत्तरवदनादिगतः सौन्दर्यातिशयः कारणरूपः प्रस्तुतः प्रतीयते । तेनेयमप्रस्तुतप्रशंसा । ननु कार्यात्कारणे गम्यमानेऽप्रस्तुतप्रशंसायामिष्यमाणायाम्—

येन लम्बालकः सास्रः कराघातारुणस्तनः ।
अकारि भग्नवलयो गजासुरवधूजनः ॥

इति । तथा—

चक्राभिघातप्रसभाज्ञयैव चकार यो राहुवधूजनस्य ।
आलिङ्गनोद्दामविलासवन्ध्यं रतोत्सवं चुम्बनमात्रशेषम् ॥

इत्यादौ सुप्रसिद्धे पर्यायोक्तविषयेऽप्रस्तुतप्रशंसाप्रसङ्गः । अत्र हि गजासुरवधूगतेन लम्बालकत्वादिना कार्येण कारणभूतो गजासुरवधः प्रतीयते । तथा राहुवधूगतेन विशिष्टेन रतोत्सवेन राहुशिरश्छेदः कारणरूपो गम्यते । एवमन्यत्रापि पर्यायोक्तविषये ज्ञेयम् । तस्मादप्रस्तुतप्रशंसाविषयत्वात्पर्यायोक्तस्य निर्विषयत्वप्रसङ्गः । नैष दोषः । इह यत्र कार्यात्कारणं प्रतीयते

इन्दु[1]रिति—इन्दुरञ्जनेन[2] लिप्त इवे[3]त्यनेन मुखस्य सौन्दर्यं, मृगीणां दृष्टिर्जडि[4]तैवेति दृक्चाञ्चल्यं, विद्रुमदलं प्रम्ला[5]नारुणिमेवेति अधरप्रभा, कोकिलवधूकण्ठेषु कार्क[6]श्यं प्रस्तुतमेवेति स्निग्धकण्ठता, बर्हास्सगर्हा इवेति च[7] केशभारवैपुल्यं प्रतीयते । [8]कार्यात्कारणप्रतीतिं दर्शयति—**अत्र संभाव्यमानैरित्यादि** । संभाव्यमानैरुत्प्रेक्ष्यमाणैः । अत्रातिव्याप्तिमाश[9]ङ्कते—**ननु कार्यादित्यादि** ।

येन लम्बालक इति—अत्र लम्बालकत्वादिना कार्येण गजासुरवधरूपकारणप्रतीतिः ।

चक्राभिघातेति—अत्र[10] रतस्यालिङ्गनवन्ध्यत्व[11]चुम्बनमात्रशेषत्वरूप[12]कार्यभेदाद्राहुशिरश्छेदः कारणम् । अत्रातिव्याप्तिं दर्शयति—**अत्र हीत्यादि** । परिहरति—**नैष दोष इति** । द्वयो[13]रपि प्रस्तुतत्वे कारणापेक्षया कार्योपवर्णनस्य सचमत्कारत्वे तद्द्वारा[14] कारणप्रत्यायनं पर्यायोक्तविषयः । कार्यस्या[15]प्रस्तुतत्वे त्वप्रस्तुतप्रशंसाया इति

---

1. Omitted in A. C. D. E. 2. E. विलिप्त 3. C. इत्य 4. A. C. चकितेवे F. जनितमेवे 5. A. प्रम्नाना D. प्रमला लारु 6. C. कार्श्यं 7. Omitted in A. C. E. F. 8. C. कार्यकार 9. A. C. F. G. omit आ 10. A's alt. अतारत 11. A. C. F. G. omit त्व 12. E. कार्यं 13. A. C. F. द्वयोरप्र 14. रा omitted in D. 15. D. प्रथत्वे प्र

तत्र कार्यं प्रस्तुतमप्रस्तुतं चेति द्वयी गतिः। एवं यत्र प्रस्तुतत्वं कार्यस्य कारणवत्तस्यापि वर्णनीयत्वात्तत्र कार्यमुखेन कारणं पर्यायेणोक्तमिति पर्यायोक्तालङ्कारः। तत्र हि कारणापेक्षया कार्यस्यातिशयेन सौन्दर्यमिति तदेव वर्णितं यथोक्तोदाहरणद्वये। अत्र हि गजासुरवधूवद्बजासुरवधूवृत्तान्तोऽपि भगवत्प्रभावजन्यत्वात्प्रस्तुत एव। एवं राहुवधूवृत्तान्तोऽपि ज्ञेयम्। ततश्च नायमप्रस्तुतप्रशंसाविषयः। यत्र पुनः कारणस्य प्रस्तुतत्वे कार्यमप्रस्तुतं वर्ण्यते तत्र स्पष्टैवाप्रस्तुतप्रशंसा। यथा "इन्दुर्लिप्त इव" इत्यादौ। अत्र हीन्द्वादयः स्फुटमेवाप्राकरणिकाः। तत्प्रतिच्छन्दभूतानां मुखादीनां प्राकरणिकत्वात्। तेनात्रेन्द्वादिगतेनाञ्जनलिप्तत्वादिनाप्रस्तुतेन प्रस्तुतं मुखादिगतं सौन्दर्यं सहृदयहृदयाह्लादि गम्यत इत्यप्रस्तुतप्रशंसैवासौ। एवञ्च यत्र वाच्योऽर्थो अर्थान्तरं तादृशमेव स्वोपस्कारकत्वेनागूरयति, तत्र पर्यायोक्तम्। यत्र पुनः स्वात्मानमेवाप्रस्तुतत्वात्प्रस्तुतमर्थान्तरं प्रति समर्पयति, तत्राप्रस्तुतप्रशंसेति निर्णयः। ततश्चानया प्रक्रियया,

राजन्राजसुता न पाठयति मां देव्योऽपि तूष्णीं स्थिताः
कुब्जे ! भोजय मां कुमार ! सचिवैर्नाद्यापि किं भुज्यते।
इत्थं राजशुकस्तवारिभवने मुक्तोऽध्वगैः पञ्जरा-
च्चित्रस्थानवलोक्य शून्यवलभावेकैकमाभाषते॥

इत्यत्र पर्यायोक्तमेव बोद्धव्यम्। अन्ये तु दण्डयात्रोद्यतं त्वां बुद्ध्वा त्वदरयः पलाय्य गता इति कारणरूपस्यैवार्थस्य प्रस्तुतत्वात्कार्यरूपोऽर्थोऽप्रस्तुत एव, राजशुकवृत्तान्तस्याप्रस्तुतत्वात्प्रस्तुतार्थं प्रति स्वात्मानमर्पयतीत्यप्रस्तुतप्रशंसै-

---

विभागः। विभक्त[1]विषयतया निगमयति—**एवं यत्रेत्यादि**। तादृशमेवं,[2] प्रकृतमेव। आ[3]गूरयति सामर्थ्यादानयति।

इत्थं च सति प्रकृ[4]त[5]स्य सतोऽर्थस्य[6] स्वोपस्काराय प्रकृतान्तरा[7]गूरणे पर्यायोक्तमेवेति प्रथनाय[8] पुनराह—**ततश्च अनयेत्यादि**। **राजन्निति**। कुब्जा शुक[9]भोजननियुक्ता। कुमारेति[10] संबोधनम्[11]। तत्स[12]चिवास्सजग्ध्याधिकारिणः। राजशुकः श्रेष्ठशुकः[13]। अत्र[14] राजशुकवृत्तस्यापि नायकप्रतापाङ्गतया प्रकृतत्वात् पर्यायोक्तमेव बोद्धव्यम्। अन्येषां हृदयमाह—**अन्ये त्विति**। कारणरू[15]पस्य अरिपलायनलक्षणस्य। ईदृशि विषये अन्येषामप्रस्तुतप्रशंसासात्व[16]बुद्धावपि न विरोधः कश्चित्। द्वयोः प्रस्तुतत्वे पर्यायोक्तम्[17]।

---

1. As' alt. विभात 2. D. G. एव आगू 3. A. C. F. आनयति सा 4. E. प्रस्तुत 5. C. कृतस्थितार्थस्य 6. A. omits स्व E. सोप 7. A. C. तरारणे A's alt. तराश्रयणे 8. H. नायं राजशुकः 9. D. शुकवृत्तान्तस्यापि भो 10. C. इति राज 11. A. F. धनं-राज 12. D. सदिवा ससजः 13. A. C. D. E. शुकस्यावृत्तस्य च ना 14. G. तत्र 15. A. रूपदृशि 16. C. सात्वं 17. A. योक्तः

वात्र न्याय्येति वर्णयन्ति। सर्वथा पर्यायोक्ताप्रस्तुतप्रशंसयोर्विषयविभागः सुनिरूपित एवेति स्थितम्। सारूप्ये यथा। *एतानि साधर्म्योदाहरणानि। वैधर्म्येण यथा—

धन्याः खलु वने वाताः कल्हारस्पर्शशीतलाः।
राममिन्दीवरश्यामं ये स्पृशन्त्यनिवारिताः॥

अत्र वाता धन्या इत्यप्रस्तुतादर्थादहमधन्येति वैधर्म्येण प्रस्तुतोऽर्थः प्रतीयते। वाच्यसंभवे उक्तान्येवोदाहरणानि। असंभवे यथा—

कस्त्वं भोः कथयामि दैवहतकं मां विद्धि शाकोटकं
वैराग्यादिव वक्षि साधु विदितं कस्मादिदं कथ्यते।
वामेनात्र वटस्तमध्वगजनः सर्वात्मना सेवते
न च्छायापि परोपकारकृतये मार्गस्थितस्यापि मे॥

अत्राचेतनेन सह प्रश्नोत्तरिका नोपपन्नेति वाच्यस्यासंभव एव। प्रस्तुतं प्रति तात्पर्यात्प्रमुख एव तदध्यारोपितत्वप्रतीतेर्युज्यत एवैतत्। उभयरूपत्वे यथा—

कार्यस्याप्रस्तुतत्वे[1] तु अप्रस्तुतप्रशंसेति विभागस्याना[2]कूलत्वात् इत्यभिप्रायेणाह—[3]**सर्वथेति**। अथ एतानि साधर्म्योदाहरणत्वेन[4] विज्ञेयानीत्याह—**एतानि साधर्म्य इति**।

वैधर्म्ये[5] तु उन्नेयानि। सारूप्यहेतुकं तु भेदम् अनया नीत्या साधर्म्येण सुज्ञान[6]त्वात्[ ] वैधर्म्येणोदाहरति—**धन्या इति**। [7]वैधर्म्यं दर्शयति—**अत्र वाता इति**। वाच्यसंभवे[8] पृथङ्नोदाहर्तव्यानी[9]त्याह—**वाच्येति**। **कस्त्वं भो इति**। कस्त्वमिति पृष्ट[10]शाकोटकतरु[11]र्वक्ति—**भोः कथयामीत्यादि**। [12]तत्र पुनः प्रश्नः—**वैराग्यादिव**[13] **वक्षीति**। तत्रोत्तरं— **साधु विदितमिति**[14]। अथ कस्मादिदमिति [15]प्रश्नेऽवशिष्टम् उत्तरम्[16]। असंभवं दर्शयति—**अत्रा**[17]**चेतने**[18]**नेति**। नन्वेवमसंभ[19]वत्वं प्राप्तमित्यत आह—[20]**प्रस्तुतं प्रतीति**। [21]प्रमुख एव [22]शाकोटकवृत्तस्य आरोपितत्व[23]प्रतीतेर्युज्यत एवासम्भवः वाच्यस्य जहत्स्वार्थलक्षणामूलत्वेन अत्यन्ततिरस्कारात्[24]।

---

1. D. त्वेऽतः अप्र 2. A. E. अनुकू D. अनाकलनत्वात् 3. A's alt. C. सर्वदा 4. A. C. D. त्वेनापि ज्ञे 5. A. C. F. G. धर्म्य उ 6. A. C. F. G. ज्ञात 7. E. अत्र वै 8. E. संभवः 9. D. इत्यत आह 10. A. C. F. G. प्रष्टव्यस्य शा 11. F. तरुः व्यक्तिविशेषः भोः 12. A. C. अत्र 13. A. इव वक्षति A's alt. दि विवक्षति C. इव वक्ष्यति 14. D. इति प्रमुख 15. E. प्रश्नो। 16. F. त्तरं प्रमुख 17. A's alt. अत्वचे 18. A. F. चेतनेति नेति 19. C. संगतित्वं 20. A. C. D. F. अप्रस्तुत 21. A. C. omit प्र 22. A. C. E. एवास्याहो ईदग्वृत्तस्य H. एवास्याहो ईदग्वृक्षस्य 23. E. omits त्व 24. A. C. काराद्वा

* Samudrabandha has this bit and having attested to the fact of the loss of Ruyyaka's illustrations, adds his own. But see Jayaratha who says this is an interpolation.

* This line in the Sañjīvanī is incomplete; a word like 'अनुदाहृत्य' is required here.

अन्तश्छिद्राणि भूयांसि कण्टका बहवो बहिः ।
कथं कमलनालस्य मा भूवन्भङ्गुरा गुणाः ॥

अत्र वाच्येऽर्थे कण्टकानां गुणभङ्गुरीकरणे* हेतुत्वमसंभवि छिद्राणां तु संभवि इत्युभयरूपत्वम् । प्रस्तुततात्पर्येण प्रतीतेस्तदध्यारोपात्तत्र संगतमेवैतदिति नासमीचीनं किञ्चित् । एतदेव च श्लेषगर्भायामस्यामुदाहरणम् । तदत्र सामान्यविशेषत्वेन कार्यकारणत्वेन सारूप्येण च यद्भेदपञ्चकमुद्दिष्टं, तत्र द्वयोः सामान्यविशेषयोः कार्यकारणयोश्च यदा वाच्यत्वं भवति, तदार्थान्तरन्यासाविर्भावः । सरूपयोस्तु वाच्यत्वे दृष्टान्तः । अप्रस्तुतस्य वाच्यत्वे प्रस्तुतस्य गम्यत्वे सर्वत्राप्रस्तुतप्रशंसेति निर्णयः ।

अन्तश्छिद्राणीति—छिद्राणि रन्ध्राणि अन[1]र्थद्वाराणि च । कण्टकाः पुलकाः[2] विघा[3]तकाश्च । अत्र वाच्येऽर्थे छिद्राणि[4] गुणभङ्गु[5]रीभावे हेतुरित्युभयरूपता । प्रस्तुत[6]-तात्पर्येण प्रतीतेः तदध्यारोपात् सङ्ग ([7]त) मेव । तदिदमाह—**अत्र वाच्य इत्यादि** । श्लेषगर्भत्वे चैतदेव द्रष्टव्यम् [8]छिद्रकण्टकगुणानां श्लिष्टत्वादित्याह—**एतदेव चेति** । [9]अस्यार्थान्तरन्यासदृष्टान्ताभ्यां विषयविवेकं दर्शयति—**त[10]दत्रेति** । अर्थान्तरन्यासे[11] हि सामान्यविशेष्ययोः कार्यकारणयोश्च[12] वाच्यत्वं (दृष्टा[13]न्ते तु) सरू[14]पयोः[15]वाच्यत्वम् । सर्व[16]त्रैव प्रस्तुतस्य गम्यत्वे अप्रस्तुताभिधाना[17]दप्रस्तुतप्रशंसैव ।

अप्रस्तुतप्रशंसा तु प्रस्तुतावगमोऽन्यतः ।
सा[18] सामान्यविशेषादिविच्छित्त्या पञ्चधा मता[19] ॥

भवेत्साधर्म्यवैधर्म्ययोगतस्सा[20] पुनर्द्विधा ।
संभवे[21]ऽसंभवे[22]द्वैधे वाच्यस्याथ पुनस्त्रिधा[23] ॥

प्रस्तुत[24]स्यावगम्यत्वात्पर्यायोक्ताद्विभिद्यते ।
इयमर्थान्तरन्यासाद्[25] दृष्टान्ता[26]लङ्कृतेरपि ॥

---

1. A. C. अर्थाद्वा 2. C. कादि धातुका 3. A. C. F. धातुका 4. E. न गुण 5. A. भङ्गुरि 6. A. C. F. स्तुतत्वात् पर्यायेण 7. All mss. सङ्गतत्वमेव 8. C. छुद्र 9. Omitted in A. C. F. G. 10. A. C. D. तदर्थेति 11. D. न्यासेन हि 12. C. Omits च 13. All mss. दृष्टान्तयति स्वरू 14. All except. D. स्वरूप 15. सर्वस्यैव 16. C. धानाद् पद् प्र 17. and 18. omitted in D. 19. D. साधु पुनः 20. A's alt. F. भवासं······21. A's alt. C. भवेत्वेतद्वाच्यः 22. A. F. त्रिधा अर्थान्तर 23. A. स्तुताव 24. C. Omits त 25. D. E. न्यास द 26. A. C. F. अन्तकृताऽपि

*. The reading adopted in the N. S. ed. as हेतुत्वं संभवि छिद्राणां त्वसंभवीति is evidently wrong.

उक्तनयेन प्राप्तावसरमर्थान्तरन्यासमाह—

सामान्यविशेषकार्यकारणभावाभ्यां निर्दिष्टप्रकृतसमर्थनमर्थान्तरन्यासः ॥३७॥

निर्दिष्टस्याभिहितस्य समर्थनार्हस्य प्रकृतस्य समर्थकात्पूर्वं पश्चाद्वा निर्दिष्टस्य यत्समर्थनमुपपादनं, न त्वपूर्वत्वेन प्रतीतिरनुमानरूपा सोऽर्थान्तरन्यासः। तत्र सामान्यं विशेषस्य विशेषो वा सामान्यस्य समर्थक इति द्वौ भेदौ। तथा कार्यं कारणस्य, कारणं वा कार्यस्य समर्थकमित्यपि द्वौ भेदौ। तत्र भेदचतुष्टय प्रत्येकं साधर्म्यवैधर्म्याभ्यां भेदद्वयेऽष्टौ भेदाः। हिशब्दाभिधानानभिधानाभ्यां समर्थकपूर्वोपन्यासोत्तरोपन्यासाभ्यां च भेदान्तरसंभवेऽपि न तद्गणना सहृदयहृदयहारिणी वैचित्र्यस्याभावात्। तस्माद्भेदाष्टकमेवेहोट्टङ्कितम्। क्रमेण यथा—

अनन्तरत्नप्रभवस्य यस्य हिमं न सौभाग्यविलोपि जातम्।
एको हि दोषो गुणसन्निपाते निमज्जतीन्दोः किरणेष्विवाङ्कः॥

लोकोत्तरं चरितमर्पयति प्रतिष्ठां
पुंसां कुलं न हि निमित्तमुदात्तातायाः।
वातापितापनमुनेः कलशात्प्रसूति-
र्लीलायितं पुनरमुष्य समुद्रपानम्॥

अ[1]र्थान्तरन्यासार्थं[2] सङ्गतिमाह—**उक्तनयेनेति**। सामान्यविशेषा[3]दिसम्बन्धयोग उक्तो[4] नयः। तत्र सूत्रम्—**सामान्य[5]विशेषकार्यकारणभावाभ्यां निर्दिष्टप्रकृतसमर्थनमर्थान्तरन्यासः**। आभ्यां सम्बन्धाभ्यां समर्थ्यत्वेन निर्दिष्टस्य प्रकृतस्य समर्थनमर्थान्तरन्यास इत्यर्थः। व्याचष्टे—**निर्दिष्ट[6]स्येत्यादि**। समर्थना[7]र्हस्य न[8] तु समर्थननिर[9]पेक्षस्य। समर्थकात्पूर्वं पश्चाद्वेति पूर्वपश्चाद्भावे कामचार उक्तः। **न त्वपूर्वत्वेनेति**। निर्दिष्टत्वेनैव प्रतीतिर्नत्वपूर्वत्वेन। अपूर्वत्वे को दोष इत्यत आह—**अनुमानरू[10]पेति**। तथा प्रतीतावनुमानरूपत्वमेव प्रसजेदित्यर्थः[11]। भेदान् संचष्टे—**तत्र सामान्यमित्यादि**। संभवतोऽपि वैचित्र्यविरहिणो [12]भेदानपोहति—**हिशब्देत्यादि**। उट्टङ्कितं निष्टङ्कितम्।

अनन्त[13]रत्नेति—सन्नि[14]पातो बहूनां सङ्घातः। अत्र गुणसन्निपाते दोषनिमज्जनलक्षणं सामान्यं साधर्म्येण विशेषसमर्थकम्। **लोकोत्तरमिति**। पुंसां लोकोत्तरं चरितमेव

---

1. A. C. F. read अर्थान्तर… to निर्दिष्टप्रकृत after पुनस्त्रिधा (p. 138.) and then read the कारिका प्रस्तुतस्याव… etc. (ibid) 2. A. C. F. G. अर्थ 3. F. शेषसं 4. A. C. D. E. उक्तोऽयम् 5. F. सामान्येति आभ्यां 6. E. दिष्टेत्यादि 7. C. अर्थस्य 8. Omitted in A. C. G. 9. C. निर्वपे 10. A. C. रूपत्वेति F. रूपतेति 11. A. C. अर्थः तत्र 12. A's alt. C. अभिधानमयो 13. A's alt. C. अन्यतरतेति। 14. A. Omits सन्

सहसा विदधीत न क्रियामविवेकः परमापदां पदम् ।
वृणते हि विमृश्यकारिणं गुणलुब्धाः स्वयमेव संपदः ॥

अत्र सहसाविधानाभावस्य विमृश्यकारित्वरूपस्य संपद्वरणं कार्यं साधर्म्येण समर्थकम् । तस्यैवैतत्कार्यविरुद्धत्वमापत्पदत्वं सहसाविधानाभावविरुद्धाविवेककार्यं वैधर्म्येण समर्थकम् ।

पृथ्वि ! स्थिरीभव ! भुजङ्गम ! धारयैनां
त्वं कूर्मराज ! तदिदं द्वितयं दधीथाः ।
दिक्कुञ्जराः ! कुरुत तत्त्रितये दिधीर्षां
देवः करोति हरकार्मुकमाततज्यम् ॥

अत्र हरकार्मुकाततज्यीकरणं पृथ्वीस्थैर्यादिप्रवर्तकत्वे कारणं समर्थकत्वेनोक्तम् । वैधर्म्येण सामान्यविशेषभावो यथा—

अहो हि मे बह्वपराद्धमायुषा यदप्रियं वाच्यमिदं मयेदृशम् ।
त एव धन्याः सुहृदां पराभवं जगत्यदृष्ट्वैव हि ये क्षयं गताः ॥

प्रतिष्ठाम् अर्पयति औदा[1]र्यं प्रतिष्ठापयतीत्यर्थः । [2]न तु कुलमिह निमित्तम्[3] । वातापितापनोऽगस्त्यः । कलशः कुलस्थानीयस्तस्य समुद्रपाने कोऽधिकारः । लीलायितं चरितस्थानीयम् । अत्र अगस्त्यवृत्त[4]लक्षणो विशेषः[5] साधर्म्येण सामान्यसमर्थकः ।

सहसेति—क्रिया[6]व्यवसायः सहसाविधानरूपो ह्यविवेकः आपदां पदम् अनेनापत्पदत्वरूपं [7]कार्यं सहसा विधानाभावरूपस्य कारणस्य वैधर्म्येण समर्थकम् । विमृश्यकारिणं सम्पदो (वृणत) इति । सहसाविधाना[9]भावात्मनो विमृश्यकारित्वस्य[10] कारणस्य सम्पद्वरणं कार्यं साधर्म्येण । अत्र साधर्म्यस्य प्राथमिक[11]त्वात् उत्तरार्धार्थपुरस्कारेण योज[12]यति—**अत्र सहसाविधानेत्यादि**[13] । विमृश्यकारित्वरूपस्य कारणस्येति शेषः । तस्यैव[14] कारणस्येत्यर्थः ।

पृथ्वी[15]ति—द्वितयं पृथ्वी[16] भुजङ्गरूपं तत् त्रितये कूर्मराज[17]युक्तद्वितयात्मनि । दिधी[18]र्षा धारयितुमिच्छा । अत्राततं[19]ज्यीकरणं[20] कारणं[21] स्थिरीभावादिकार्ये साधर्म्येण[22] समर्थकम् । [23]तदिदं योजयति—**अत्र हरकार्मुकेति** ।

अहो हीति—आयुषा बह्वपराद्धं हि सुहृ[24]दः पराभवं[25] दृष्ट्वा[26] ईदृशम[27]प्रियं

---

1. A. C. प्राधान्यं 2. A. C. न तूक्तमिह 3. A. निमित्तः 4. A. C. व्रत F. omits वृत्त 5. A. C. F. विशेषण 6. A's alt. F. व्यवसा 7. A. F. कार्यरूपं स C. कदर्यरूपं स 8. All mss. वृणुत 9. A. C. F. G. धानादिभाव 10. A. C. G. त्वस्य कार्यं 11. A. C. F. G. मिकात् 12. D. योजयत 13. A. C. D. Omit आदि 14. A. C. तस्मै कारणाये D. तत्रैव 15. A. C. पृथिवी 16. A. C. पृथिवी 17. A. C. राजद्वि 18. C. दिधीषा 19. A. E. F. G. अतन्द्रीकर C. अत्राततस्वीकर 20. A. C. F. करण 21. A. C. F. कारण 22. D. Omits ण 23. A. F. G. तदेवेदं 24. D. E. G. हृद्परा 25. C. भव 26. A. द्रष्टारं ह 27. D. अपि इयं

अत्रायुःकर्तृकापराधाक्षिप्तस्याधन्यत्वस्यायुर्विरुद्धक्षयगतिप्रयुक्तं धन्यत्वं विरुद्धं सामान्यरूपतया समर्थकत्वेनोक्तम्। कार्यकारणतायां वैधर्म्येणोदाहृतम्। हिशब्दाभिहितत्वानभिहितत्वादिभेदाः स्वयमेव बोद्धव्याः। चारुत्वातिशयाभावान्नेह प्रदर्शिताः॥

एवमप्रस्तुतप्रशंसानुषङ्गायातमर्थान्तरन्यासमुक्त्वा गम्यप्रस्तावागतं पर्यायोक्तमुच्यते—

गम्यस्यापि भङ्ग्यन्तरेणाभिधानं पर्यायोक्तम् ॥३६॥

यदेव गम्यत्वं तस्यैवाभिधानं पर्यायोक्तम्। गम्यस्यैव सतः कथमभिधानमिति चेत्, न। गम्यापेक्षया प्रकारान्तरेणाभिधानस्य संभवात्। न हि तस्यैव तदैव तयैव विच्छित्त्या गम्यत्वं वाच्यत्वं च संभवति। अतः कार्यमुखद्वारेणाभिधानम्। कार्यादेरपि तत्र प्रस्तुतत्वेन वर्णनार्हत्वात्। अत एवाप्रस्तुतप्रशंसातो भेदः। एतच्च वितत्याप्रस्तुतप्रशंसाप्रस्तावे निर्णीतमिति तत एवावधार्यम्। उदाहरणम्—

वक्त[1]व्यत्वेना[2]पतितं[3] यतः। त एव हि[4]धन्या, सुहृत्पराभवमदृष्ट्वा[5] ये क्षयं गताः[6]। अत्र सामान्यस्य वैधर्म्येण समर्थकत्वम्[7]। योजयति **अत्रायुः [8]कर्तृकेति**। आयुः[9] कर्तृकेण हि अपराधेनाधन्यत्वं आक्षिप्तम्। आयुर्विरुद्धक्षय[10]गमनप्रयुक्तं यद्धन्यत्वं तद्वैधर्म्येण समर्थकं[11]सामान्यमुक्तम्। अनुस्मारयति—**कार्यका[12]रणतायामिति**। अपोढेष्वौदासीन्यमाविष्करोति—**हिशब्देत्यादि**।

[13]समर्थ्यत्वे[14]न निर्दिष्टः प्रकृतो यः[15] समर्थ्यने।
सोऽयमर्थान्तरन्यासः सामान्यादिभिरष्टधा[16]॥

पर्यायोक्तार्थसङ्गतिं शोधयति—**एवं अ[17]प्रस्तुतेति**। **गम्यप्रस्तावेति**। प्रतीयमानार्थप्रस्तावो[13] हि वर्तते। तत्र सूत्रन्—**गम्यस्यापि भङ्ग्यन्तरेणाभिधानं पर्यायोक्तम्**॥ प्रतीयमानस्यापि कार्यादिमुखेन प्रकारा[19]न्तरेणाभिधानं पर्यायोक्तम्। व्याचष्टे—**यदेवेत्यादि**। गम्यस्य सतोऽभिधानमाक्षिप्योपपादयति—**गम्यस्यैवेति**। भङ्ग्यन्तरेणेत्येतद्विवृणोति—**न हीत्यादि**। ननु कार्याद्यभिधाने गम्यस्य कथमभिधानमित्यत आह—**कार्यादेरपीति**[20]। अप्रस्तुतप्रशंसातो भेदं[21] निरूपितचरमनुस्मारयति—**एतच्चेति**।

---

1 C. वक्तार्थनाय 2. A. C. D. E. त्वेनेनापति 3. A. C. F. पतितत्वं 4. Omitted in C. 5. D. E. F. G. K. I. भवं दृष्ट्वा 6. A. D. omit ग C. गच्छन्ति ताः 7. E. तदिदं यो 8. C. कर्तेति 9. D. E. G. आयुष्कर्तृ 10. A. प्रक्षय 11. D. अर्थकः, 12. D. repeats कार्यकारण 13. A. साम C. समर्थ 14. A's alt. द्वेन 15. C. यत् 16. A. C. F. G. अष्टधाः 17. D. omits अ. 18. A. स्तावे 19. A. C. G. करणान्त 20. A. इत्यादि 21. C. भेद

स्पृष्टास्ता नन्दने शच्याः केशसंभोगलालिताः ।
सावज्ञं पारिजातस्य मञ्जर्यो यस्य सैनिकैः ॥

अत्र हयग्रीवस्य कार्यमुखेन स्वर्गविजयो वर्णितः । प्रभावातिशयप्रतिपादनं च कारणादिव कार्यादपि भवतीति कार्यमपि वर्णनीयमेवेति पर्यायोक्तस्यायं विषयः । गम्यत्वविच्छित्तिप्रस्तावाद्व्याजस्तुतिमाह—

स्तुतिनिन्दाभ्यां निन्दास्तुत्योर्गम्यत्वे व्याजस्तुतिः ॥३७॥

यत्र स्तुतिरभिधीयमानापि प्रमाणान्तराद्बाधितस्वरूपा निन्दायां पर्यवस्यति, तत्रासत्यत्वाद्व्याजरूपा स्तुतिरित्यर्थानुगमेन तावदेका व्याजस्तुतिः । यत्रापि निन्दाशब्देन प्रतिपाद्यमाना पूर्ववद्बाधितरूपा स्तुतिः पर्यवसिता भवति सा द्वितीया व्याजस्तुतिः । व्याजेन निन्दारूपेण स्तुतिरिति कृत्वा । स्तुतिनिन्दारूपस्य विच्छित्तिविशेषस्य भावादप्रस्तुतप्रशंसातो भेदः । क्रमेण यथा—

हे हेलाजितबोधिसत्त्व ! वचसां किं विस्तरैस्तोयधे !
नास्ति त्वत्सदृशः परः परहिताधाने गृहीतव्रतः ।
तृष्यत्पान्थजनोपकारघटनावैमुख्यलब्धायशो-

स्पृष्टास्ता[1]इति । व्याख्यातं प्राक्[2] । यो[3]जयति—अत्र हयग्रीवस्येति । कार्यं मञ्जरीस्पर्शः ।

पर्यायोक्तं तु कार्यादिद्वारा गम्यस्य वर्णनम् ।
अप्रस्तुतप्रशंसातो वाच्यस्य प्रस्तुते[4] भिदा ॥

व्याजस्तुतेस्सङ्गतिमाह—गम्यत्वेति । सूत्रम्—स्तुतिनिन्दाभ्यां निन्दास्तुत्योर्गम्यत्वे व्याजस्तुतिः । स्तुत्या[5] निन्दाया[6] गम्यत्वे एका निन्दया[7] स्तुतेस्त्वन्या । अतो व्याज[8]रूपा स्तुतिः व्याजेन स्तुतिरिति च विग्रहः । व्याचष्टे—यत्र[9] स्तुतिरित्यादि । प्रमाणान्तरात् आभासीकरणक्षमात् । अनुगमेन अर्थान्वयेन द्वितीया तु निन्दाव्याजेन स्तुतिरिति आह—[10]यत्रापीति । अतो योगविभागात् व्याजस्तुतिद्वयम् ।

ननु स्तुतिनिन्दयोर्गम्यांशस्य प्रस्तुतत्वाद[11]प्रस्तुतप्रशंसातः को भेद इत्यत आह—स्तुतिनिन्देति । हे [12]हेलेति । बोधिसत्त्वो[13] जीमूतवाहनः । स हि कदाचिदेव[14] परस्य हितमाधात्[15] त्वं तु ये[16] यावन्तस्तृ[17]ष्यन्ति, तेभ्यस्सर्वेभ्य एव वैमुख्यलब्धानामयशोभाराणं[18]

---

1. D. अन्ता 2. Omitted in A. H. 3. A. H. प्रयो 4. C. स्तुतो 5. A. C. त्या निन्दायां स्तुतेस्तु 6. D. निन्दया 7. Except D all mss. निन्दाया 8. A. C. D. जस्तुतिरूपा 9. A. C. अत्र पुनरित्या 10. A. यत्तवेति 11. A. C. स्तुतस्याप्र 12. A's alt. निन्देति 13 A's alt. ससहत्वात जी 14. C. एवं 15. A's alt. तमनुदयाति 16. Omitted in A. C. D. 17. All except D. तुष्य 18. H. भाराणां तदेतदाह (P. 143)

भारप्रोद्वहने करोषि कृपया साहायकं यन्मरोः ॥

अत्र विपरीतलक्षणया वाच्यवैपरीत्यप्रतीतिः ।

इन्दोर्लक्ष्म त्रिपुरजयिनः कण्ठमूलं मुरारि-
दिङ्नागानां मदजलमषीभाञ्जि गण्डस्थलानि ।
अद्याप्युर्वीवलयतिलक ! श्यामलिम्नानुलिप्ता-
न्युद्भासन्ते वद धवलितं किं यशोभिस्त्वदीयैः ॥

अत्र धवलत्वहेतुयशोविषयानवक्लृप्तिप्रतिपादनेन "विशेषप्रतिषेधे शेषाभ्यनुज्ञानम्" इति न्यायात्कतिपयपदार्थवर्जं समस्तवस्तुधवलताकारित्वं नृपयशसः प्रतीयते ।

किं वृत्तान्तैः परगृहगतैः किन्तु नाहं समर्थ-
स्तूष्णीं स्थातुं प्रकृतिमुखरो दाक्षिणात्यस्वभावः ।
गेहे गेहे विपणिषु तथा चत्वरे पानगोष्ठ्या-
मुन्मत्तेव भ्रमति भवतो वल्लभा हन्त कीर्तिः ॥

अत्र प्रक्रान्तापि स्तुतिपर्यवसायिनी निन्दा "हन्त कीर्तिः" इति भणित्या उन्मीलितेव न प्ररोहं गमितेति क्लिष्टमेतदुदाहरणम् ॥

गम्यत्वमेव प्रकृतं विशेषविषयत्वेनोररीकृत्याक्षेपालङ्कार उच्यते—

प्रोद्वहने मरोस्साहायकं[1] करोषि । अतो हेलाजितबोधिसत्त्वे त्वयि स्तुतिवचो[2]विस्तरो[3] (न) पर्याप्नो[4]तीत्यर्थः । स्तुतेर्निन्दागमकत्वं दर्शयति—**अत्र विपरीतेति** ।

इन्दोर्लक्ष्मेति । उर्वीवलयतिलक[5] इन्दुलक्ष्मा[6]दिषु श्यामलेषु सत्सु[7] त्वद्यशोभिर्न किंचि[8]द्धवलितं इति स्तुतिर्गम्यते । तदेतदाह—**अत्र धवल[9]त्वेति**[10] । अनवक्लृप्तिः[11] [12]अपर्याप्तिः । यत्र तु गम्यांशस्य[13] न्यग्भावस्तत्र नास्यास्सामञ्जस्यमिति दर्शयितुमाह—**किं वृत्तान्तैरिति** । अत्र वल्लभा[14] भ्रमति हन्तेत्युक्त्या निन्दायास्स्तुतिपर्यवसायित्वं न स्फुटीभवति[15], अनौचित्यादिति क्लिष्टता । तदेतदाह—**अत्र [16]प्रक्रान्तापीति** ।

व्याजेन व्याजरूपा वा स्तुतिर्व्याजस्तुतिद्वयम् ।
अप्रस्तुतप्रशंसातः स्तुतिनिन्दात्मिका भिदा ॥

आक्षेपार्थं[17] [18]सङ्गतिमाह—**गम्यत्वमेवेति** । विशेषोऽतिशयः । विशेषप्रतिपत्ति[19]-

---

1. All except E. हाय्यकं 2. A. C. F. वाचो 3. D. E. स्तरा 4. D. आप्नुवती 5. D. इन्दुः 6. A. C. D. F. H. I. लक्ष्म्यादि 7. A. सत्यं 8. C. किञ्चि-र्वलितं 9. A. धवलितमिति C. धवलितेति 10. A. इति स्तुतिर्गम्यते पुनः अन 11. A. अनवज्ञप्ति 12. A. omits. अ 13. A. गम्या धीस्य न्य 14. A. C. D. F. विभ्रम G. किं भ्रम 15. A. C. F. भवतीत्यनौ D. भवतीत्यरूपा वा 16. A's alt. प्रकृतोऽपीति C. प्रक्रान्तोऽपीति 17. C. क्षेपार्था सुगम्य 18. A. H. सङ्गम्यत्व 19. C. पत्तिगम्य

उक्तवक्ष्यमाणयोः प्राकरणिकयोर्विशेषप्रतीत्यर्थं निषेधाभास आक्षेपः ॥३८॥

इह प्राकरणिकोऽर्थः प्राकरणिकत्वादेव वक्तुमिष्यते। तथाविधस्य विधानार्हस्य निषेधः कर्तुं न युज्यते। स कृतोऽपि बाधितस्वरूपत्वान्निषेधायत इति निषेधाभासः संपन्नः। तस्यैतस्य कारणं प्रकृतगतत्वेन विशेषप्रतिपत्त्यर्थम्। अन्यथा गजस्नानतुल्यता स्यात्। स चाभासमानो निषेध उक्तस्य वा स्यादासूत्रिताभिधानत्वेन वक्ष्यमाणस्य वा स्यादित्याक्षेपस्य द्वयी गतिः। उक्तविषयत्वेन कैमर्थक्यपरमालोचनमाक्षेपः। वक्ष्यमाणविषयत्वेनानयनरूपमागूरणमाक्षेपः। एवञ्चार्थभेदादाक्षेपशब्दस्य द्वावाक्षेपाविति वदन्ति। तत्रोक्तविषये यस्यैवेष्टस्य विशेषस्तस्यैवाक्षेपः। वक्ष्यमाणविषये त्विष्टस्य विशेषः इष्टसंबन्धिनोऽन्यस्य सामान्यरूपस्य निषेधः। तेनात्र लक्षणभेदः। विशेषस्य चात्र शब्दानुपात्तत्वाद्गम्यत्वम्। तत्रोक्तविषये आक्षेपे क्वचिद्वस्तु निषिध्यते क्वचिद्वस्तुकथनमिति द्वौ भेदौ। वक्ष्यमाणविषये तु कथनमेव निषि-

---

गम्यविषये[1]त्यर्थः। तत्र सूत्रम्—**उक्तवक्ष्यमाणयोः[2] प्राकरणिकयोः विशेषप्रतीत्यर्थं निषेधाभास आक्षेपः[3]**। उक्तस्य वक्ष्यमाणस्य वा प्राकरणिकस्य विशेषप्रतीत्यर्थं आभासतो निषेधनम् आक्षेपः। विजातीयमिदम् आक्षेपद्वयं ज्ञेयम्। व्याचष्टे—**इह प्राकरणिक इत्यादि**। तथाविधस्य विवक्षितस्य। अत एव विधेयस्य स कृतः अविषये प्रवर्तित[4] इत्यर्थः। अत एव[5] बाधित[6]स्वरूपः[7] आभासीभवति। ननु किमेतेन प्रयासेनेत्यत आह—[8]**तस्यैतस्येति**[9]। **अन्यथेति**। विशेषप्रतिपत्त्यर्थताभावे पुनर्विधि[10]पर्यवसानात् गजस्नानतुल्यता स्यात्। गजो हि स्नात एव सन्[11] सद्यो धूलिधूसरो भवति। तस्य द्वैरूप्या[12]याह—**स चेति**। आसूत्रिताभिधानत्वेन अभिधातुमुपक्रान्ततयेत्यिर्थः। तत्र[13] कस्य कः प्रकार इत्यत आह—**उक्तविषयत्वेनेत्यादि**। कैमर्थक्यं निर[14]र्थकता[15]। आगू[16]रणम्, सामर्थ्यात् साधनम्। अतो विजातीयत्वमित्यत आह—**एवं चेति**। उभयत्र निषेध्यांशो[17]विभिन्न इत्याह—[18]**तत्रोक्तेति**। अतो वैलक्षण्यमित्याह—**तेनात्रेति**। **शब्दानुपात्तत्वादिति**। निषेधाभासबलाय[19]त्तत्वात् [20]शब्दानुपात्तता। **उक्तविषय इति**। वस्तुनो वस्तुकथनस्य निषेधाद्द्वैविध्यम्। **वक्ष्यमाणेति**। वस्तुनोऽनुक्तत्वात् [21]कथनस्यैव निषेधः[22]।

---

1. A. C. F. षयेत्यनौचित्यात् क्लिष्टतार्थः। अत्र सूत्रं 2. C. माणयोर्विशेष 3. A. C. H. आक्षेपः। विजाती 4. D. एवं 5. A. C. F. G. प्रवृत्तिः कुत इ 6. E. K. omit स्व 7. A. C. D. रूपं 8. H. तस्यैतमिमं प्रस्तुतविरोधं (under विरोधालङ्कार) 9. A. C. F. G. इति विशे 10. D. omits धि 11. A's alt. C. घनं 12. A. रूत्याभासः चेति C. रूप्याभावश्चेति 13. A. C. तर्ह्यत्र 14. C. किमर्थता 15. E. अर्थकतां 16. A. आगूकारणं C. आग्रकारणं 17. E. F. अंशोऽपि भि 18. E. G. अत्र 19. E. आयातत्वा 20. A. C. F. G. ततः शब्दा 21. C. कथं नास्येव 22. C. षेध वस्तुता अन्य

ध्यते। तत्र सामान्यप्रतिज्ञायां क्वचिद्विशेषनिष्ठत्वेन क्वचित्पुनरंशोक्तावंशान्तरगतत्वेनेत्यत्रापि द्वौ भेदौ। तदेवमस्य चत्वारो भेदाः। शब्दसाम्यनिबन्धनं सामान्यविशेषभावमवलम्ब्य चात्र प्रकारप्रकारिभावप्रकल्पनम्। क्रमेण यथा—

बालअ ! णाहं दूई तीए पिओ सि त्ति णम्हवावारो।
सा मरइ तुज्झ अयसो एअं धम्मक्खरं भणिमो॥

प्रसीदेति ब्रूयामिदमसति कोपे न घटते
करिष्याम्येवं नो पुनरिति भवेदभ्युपगमः।
न मे दोषोऽस्तीति त्वमिदमपि हि ज्ञास्यसि मृषा
किमेतस्मिन्वक्तुं क्षममिति न वेद्मि प्रियतमे॥

सुहअ विलंबसु थोअं जाव इमं विरहकाअरं हिअअं।
संठविऊण भणिस्सं अहवा वोलेसु किं भणिमो॥

ज्योत्स्ना तमः पिकवचः क्रकचस्तुषारः
क्षारो मृणालवलयानि कृतान्तदन्ताः।

तत्रान्यथा द्वैविध्यमाह—**तत्र सामान्येति**। इत्थं चातुर्विध्यम्। अत्र च[1] [2]प्रकारप्रकारि[3]भावहेतु[4]स्सामान्यविशेषभावो अर्थानपेक्ष इत्याह—**शब्दसाम्येति**। **बालअ[5] इति**।

बालक[6] ! नाहं दूती तस्याः प्रियोऽसीति नास्माकं[7] व्यापारः।
सा म्रियते तवायश एतद्धर्मक्षरं भणामः॥

प्रसीदेति। यदि प्रसीदेति ब्रूयामसति कोप इदं [8]वचो न घटते। एवं न पुनः करिष्यामीति चेद्ब्रूयां तथा[9] विद्यमानस्याभ्युपगमः, न मे दोषोऽस्तीति चेद्ब्रूयां त्वं पुनरिदं दोषाभाववचो[10] मृषेति ज्ञास्यसि। अतः किं वक्तुं क्षममिति[11] न वेद्मि[12]। **सुहअ[13] इति**।

सुभग ! विलम्बस्व स्तोकं यावदिदं विरहकातरं हृदयम्।
संस्थाप्य भणिष्या[14]म्यथवाप(व्यति)[15]क्राम किं भणामः[16]॥

मम विरहकातरहृदयं संस्थाप्य भणिष्यामीत्यनेन जीवितसंशयहेतुरूपद्रव[17]-रुपद्रव ?) आसूत्रितः[18]। अथवा [19]व्यति[20]क्राम किं भणाम इति तु तस्यैव प्रत्यासन्नतरत्वाद्भणत्यनर्हता।

ज्योत्स्नेति। अत्र विरहवेदना[21]वशात् ज्योत्स्ना[22]पिकवचः[23]प्रभृतीनां तमः-

---

1. Omited in C. D. 2. C. प्राकरणिकप्रकार 3. A. C. प्रकारी 4. G. तु सा 5. A. C. बालते यदि 6. A. C. बाह वाह दूती 7. C. नास्थौ कुव्या 8. A. F. वचनं घ C. इदं च वचो घ 9. D. E. तथा अवि 10. A. वचनं 11. D. इति सुह 12. C. चदि 13. D. शुभयेति 14. D. णिप्यामित्यनेन 15. A. C. व्यतिकरं D. K. अपक्राम 16. A. C. D. F. भणामि 17. C. द्रप 18. A's alt. सृतितः 19. A. C. अतिक्राम 20. D. क्रम 21. A. C. दनाज्यो 22. A. पिक्रकचः C. पिकः कूचः 23. A. प्रहती

सर्वं दुरन्तमिदमद्य शिरीषमृद्वी
सा नूनमाः किमथवा हतजीवितेन ॥

ग्राद्ये उदाहरणद्वये यथाक्रमं वस्तुनिषेधेन भणितिनिषेधेन चोक्तविषय ग्राक्षेपः । तत्र चोक्तस्य दूतीत्वस्य वस्तुनो निषेधमुखेनैव सत्यवादित्वादिविशेषः तथा भण्यमानस्य प्रसादस्य निषेधमुखेनैव कोपोपरागनिवर्तनेनावश्यस्वीकार्यत्वं विशेषः । उत्तरस्मिन्पुनरुदाहरणद्वये यथाक्रमं सामान्यद्वारेणेष्टस्यांशोक्तावंशान्तरस्य स्वरूपेण च भणितिनिषेधे वक्ष्यमाणविषय ग्राक्षेपः । तत्र च वक्ष्यमाणस्येष्टस्य "भणिस्सं" इति प्रतिज्ञातस्य सातिशयकोपजनकत्वादिविशेषः । तथा च ज्योस्नेत्यादावंशोक्तावंशान्तरस्य "म्रियत" इति प्रतिपाद्यस्याशक्यवचनीयत्वादिर्विशेषः । एवञ्च ग्राक्षेपे इष्टार्थस्तस्यैव निषेधः, निषेधस्यानुपपद्यमानत्वादसत्यत्वं, विशेषप्रतिपादनं चेति चतुष्टयमुपयुज्यते । तेन न निषेधविधिः, नापि विहितनिषेधः । किन्तु निषेधेन विधेराक्षेपः । निषेधस्या-

---

ककचादिरूपापत्त्या यतो[1] दुरन्तता । ग्रतो सा न्यूनमित्यर्धो[2]क्त्या प्राणसंशयदशोप[3]क्षिप्ता । ग्राः किमथवा जीविते[4]नेत्यनेन तु तद्विपत्तेरर्वाक् प्राणोपेक्षा[5]त्वरा । एषु क्रमतो[6] योजयितुमाह—**ग्राद्य इत्यादि** । "नाहं[7] दूती"ति [8]दूतीत्वरूपवस्तुनिषेधः । किमेतस्मिन्[9] वक्तुं क्षममिति तूक्तिनिषेधः । तदुभयमपि [10]उक्तविषयम् । उभयत्र निषेधाभासद्योत्यं विशेषमुद्घाटयति—**तत्र चेति** । वस्तुवाचित्वं यथार्थवाचित्वम् । विशेषो गम्यत इति शेषः[11] । **भण्यमानस्य**[12] ([13]**प्रसादे**)ति । उदीर्यमाणस्य[14] इदं न[15] घटत इति निषेधमुखेनैव । **उत्तरस्मिन्निति** । किं भणाम इति सामान्य[16]द्वारेण वक्तुमिष्टस्य जीवितसंश[17]यादेः स्वरूपत एव भणितिनिषेध इत्यर्थवशादागू[18]रणम् इत्यर्थः । सा नूनमित्यं[19]शोक्तौ[20] जीवितुं न शक्नोमीत्यंशान्तरस्य स्वरूपतो भणितिनिषेधादागूरणम् । उभयत्र द्योत्यविशेषणोद्घाटनायाह—**तत्र चेति** । ग्रतिशयकोपजनकत्वं[21] प्रस्थाना[22]ध्यवसायात् । ग्रत्र सामग्रीं निष्कर्षति—**एवञ्चेति** । ग्रत[23] ग्राक्षेपस्वरूपमीदृगित्याह—**तेनेति**[24] । ननु निषेधेन[25] विध्याक्षेपः कथम् इत्यत ग्राह—**निषेधस्यासत्यत्वादिति** । ननु विध्या[26]भासान्निषेधाक्षेपः[27] किं[28] न स्यादित्यत ग्राह—**विधिना त्विति**। विधिना विध्याभासेनेत्यर्थः । वक्ष्यते

---

1. C. यते 2. A's alt. C. अर्थो 3. C. उपक्लृप्तो 4. A. C. D. F. वितेति नेत्य E. G. जीवितेतीति ने 5. C. पेक्षत्यरा 6. A. C. क्रमशो 7. C. नाहज्ञाती 8. A. ग्रक्त बूती ग्रनूपवस्तु C. पूतित्वरूपस्तु D. F. दूति 9. A. D. न तस्मि 10. A. 11. A. C. शेषमाभ 12. D. स्य तु 13. All mss. प्रसीदेति 14. D. मानस्य 15. Omitted in D. 16. C. यश्चारेण 17. D. संयोगादेः 18. D. ग्रागु 19. D. ग्रशोभयत्र 20. All except E. उक्तो 21. क omitted in D. 22. C. स्थानात् ग्रध्यव 23. F. अत्र 24. F. इति । ननु विध्याभासात् 25. न omitted in D. 26. C. विध्यतासां नि D. विध्याक्षेपान्नि 27. A. ग्राक्षेपं D. D. F. आक्षेपे 28. A. F. omit किं

सत्यत्वाद्विधिपर्यवसानात्। विधिना तु निषेधोऽस्य भेदत्वेन वक्ष्यते। ततश्च हर्षचरिते—"अनुरूपो देव्या इत्यात्मसंभावना" इत्यादौ, तथा "यामीति न स्नेहसदृशम्" इत्यादावुक्तविषय आक्षेपः। "केवलं बाल इति सुतरामपरित्याज्योऽस्मि। रक्षणीय इति भवद्भुजपञ्जरं रक्षास्थानम्" इत्यादावाक्षेपबुद्धिर्न कार्या। बालत्वादेरुक्तस्य निषेध्यत्वेनाविवक्षितत्वात्। प्रत्युतात्र बाल्यादिः परित्यागनिषेधकत्वेन प्रतीयते। तेन नायमाक्षेपः। कस्तर्ह्ययं विच्छित्तिप्रकारोऽलंकार इति चेद्, व्याघाताख्यस्यालंकारस्यायं द्वितीयो भेदो वक्ष्यते।

तदिष्टस्य निषेध्यत्वमाक्षेपोक्तिनिबन्धनम्।
सौकर्येणान्यकृतये न निषेधकता पुनः॥

इह तु—

साहित्यपाथोनिधिमन्थनोत्थं काव्यामृतं रक्षत हे कवीन्द्राः।
यत्तस्य दैत्या इव लुण्टनाय काव्यार्थचोराः प्रगुणीभवन्ति॥
गृह्णन्तु सर्वे यदि वा यथेच्छं नास्ति क्षतिः कापि कवीश्वराणाम्।
रत्नेषु लुप्तेषु बहुष्वमर्त्यैरद्यापि रत्नाकर एव सिन्धुः॥

इति। तथा—

सूत्रान्तरेणेति शेषः। यत इत्थं[1] निषेधेन विधेराक्षेपः अत ईदृशि[2] विषये[3] [4]नालङ्कान्तरमित्यत[5] आह—**ततश्चेति**। यस्मादात्मसंभावनमत आनुरूप्योक्तिर्न[6] युज्यत इत्युक्तिनिषेधः। इत्थं न[7] स्नेहसदृशमित्यत्रापि याननिषेधः। अतोऽयमुक्तविषय आक्षेपः। अविषयं दर्शयति—**केवलमित्यादि**। अत्र ह्यपरित्याज्यतादि बाल्यादेर्न[8] निषेधकमपि तु तस्य [9]साधकमेवेति नाक्षेपबुद्धिः कार्या। किन्तु व्याघातविशेषेत्यनुयोगपुरस्कारेण दर्शयति—**कस्तर्हीत्यादि**। अत्र निष्कर्षाय श्लोकः—[10]**तदिष्टस्येति**। तस्मात् कारणात् सौकर्येण विशेषसिद्ध्यर्थं तस्य निषेधाभास आक्षेपोक्तेः[11] निमित्तं, न तु वस्तुतो निषेध[12]कता।

अतो[13] यत्र निषेधो वास्तवो न तत्राक्षेप इति सोदाहरणं दर्शयति[14]—**इह त्वित्यादि**। अत्र पूर्व श्लोके दैत्या इव काव्यार्थचोरा[15] लुण्टनाय यत्प्रगुणीभवन्ति, अतः काव्यामृतं [16]रक्षतेति रक्षणं विहितम्। उत्तर[17]श्लोके तु सर्वे यथेच्छं गृह्णन्तु[18] लोपेऽपि न क्षतिरिति, पूर्वविहितं काव्यरक्षणं साक्षान्नि[19]षिध्यते। तथा वायोः कारागृहक्लृप्त्यै[20]

---

1. C. विशेषेण नि 2. E. ईदृग्विष 3. D. विषयेन 4. A. C. F. नो अलं 5. C. इत्याह 6. D. उक्तिर्नियु 7. A's alt C. सस्नेहः omitted in D. 8. D. omits न 9. E. साध्यम 10. A. C. यदिष्ट 11. All except E. read उक्तिः 12. D. षेधकृता 13. A. F. अतोऽयं नि C. अतो यन्नि D. अत्र यत्र 14. A. यति कस्तर्हीत्यादि। इह 15. C. चोर 16. C. शिक्ष 17. A. उत्त(क्त) श्लो 18. D. गृह्णतु 19. A. C. D. F. निषेध्य 20. A's alt. क्लृप्त्ये वुधारासु

देया शिलापट्टकवाटमुद्रा श्रीखण्डशैलस्य दरीगृहेषु ।
वियोगिनीकण्टक एष वायुः कारागृहस्यास्तु चिरादभिज्ञः ॥
बाणेन हत्वा मृगमस्य यात्रा निवार्यतां दक्षिणमारुतस्य ।
इत्यर्थनीयः शबराधिराजः श्रीखण्डपृथ्वीधरकंदरस्थः ॥
यद्वा मृषा तिष्ठतु दैन्यमेतन्नेच्छन्ति वैरं मरुता किराताः ।
केलिप्रसङ्गे शबराङ्गनानां स हि श्रमग्लानिमपाकरोति ।।

इति नाक्षेपबुद्धिः कार्या । विहितनिषेधो ह्ययम् । न चासावाक्षेपः । निषेधविधौ तस्य भावादित्युक्तत्वात् । चमत्कारोऽप्यत्र निषेधहेतुकन् एवेति न तत्सद्भावमात्रेणाक्षेपधीः कार्या । अयं चाक्षेपो ध्वन्यमानो भवति । यथा—

गणिकासु विधेयो न विश्वासो वल्लभ ! त्वया ।
किं किं न कुर्वतेऽनर्थमिमा धनपरायणाः ।।

अत्र हि गणिकाया उक्तौ तद्दोषोक्तिप्रस्तावे नाहं गणिकेति प्रतीयते । न चासौ निषेध एव, गणिकात्वेनावस्थितयैव गणिकात्वस्य निषेधनात् । सोऽयं प्रस्खलद्रूपो निषेधाभासरूपो वक्तुर्गणिकायाः शुद्धस्नेहनिबन्धनत्वेन धनविमुखत्वादौ विशेषे पर्यवस्यतीत्युक्तविषय आक्षेपध्वनिरयम् । न तु—

स वक्तुमखिलान्शक्तो हयग्रीवाश्रितान्गुणान् ।
योऽम्बुकुम्भैः परिच्छेदं ज्ञातुं शक्तो महोदधेः ॥

इत्याक्षेपध्वनावुदाहार्यम् । निषेधस्यैवात्र गम्यमानत्वात् । न निषेधाभासस्य । महोदधेरम्भः कुम्भपरिच्छेदशक्तिनिदर्शनेन हयग्रीवगुणानां वक्तु-

---

कन्दरासु शिलाकवाटदानं[1] विहितं, उत्तरश्लोके एवं[2] चिन्तारूपं दैन्यं[3] मृषा किराता मरुता सह निरोधन[4]वैरं नेच्छ[5]न्तीति कवाट[6]दानं साक्षान्निषेध्यत इति नैतद्युगलक[7]युगमाक्षेपोदाहरणम् । आक्षेपाभावे युक्त्यन्तरमाह—**चमत्कारोऽपीति** । व्यङ्ग्यत्वेनास्य[8] संभवं दर्शयति—**अयं चेत्यादि** । **गणिका[9]स्विति** । गणिका धनपरायणाः सत्यः सर्वम् [10]असाम्प्रतमाचरन्ति यतः । [11]अतस्त्वया विश्वासो न कार्य इति गणिकाया [12]एवोक्तौ विश्वासनिषेध आभासायते । धनवैमुख्येन शुद्धस्नेहभाजन[13]मियम् इति प्रतीतेः[14] । अतो उक्तविषयोऽयमाक्षेपो व्यङ्ग्यः । एतद्दर्शयति—**अत्र हि[15] गणिकाया [16]इत्यादि** । व्यङ्ग्यताया[17]मप्यविषयं दर्शयति—**न तु स वक्तुमिति** । योऽम्बुनिधेः [18]परिच्छेद-

---

1. A's alt. C. दावं 2. D. एवं च 3. C. दैत्यं 4. C. धनं F. omits न 5. all except. D. नैच्छ 6. A's alt. C. धानं 7. D. omits क 8. E. नाप्यसं 9. A. C. D. F. का स्थितिं 10. A. C. F. omit अ 11. D. अतः स्वयं 12. A. C. हावोक्तौ 13. D. जनमिति यमिति 14. All except E. प्रतीतौ 15. C. हीति गणि A. हि काच गणि 16. A. C. जात्यादि D. हुत्यादि 17. A's alt. व्यङ्ग्यमायाः C. व्हङ्गयतायाः 18. A. C. परिखेदाद A's alt. परिच्चेदा

मशक्यत्व एवात्र तात्पर्यम् । तन्निमित्तक एवात्र चमत्कारो न निषेधाभासहेतुक इति नाक्षेपध्वनिर्धीरत्र कार्या । सर्वथेष्टानिष्टस्य निषेधाभासस्य विध्युन्मुखस्याक्षेपत्वमिति स्थितम् । एवमिष्टनिषेधेनाक्षेपमुक्त्वा समानन्यायत्वादनिष्टविधिनाक्षेपमाह—

अनिष्टविध्याभासश्च ॥३९॥

यथेष्टस्येष्टत्वादेव निषेधोऽनुपपन्नः । एवमनिष्टस्यानिष्टत्वादेव विधानं

म्बुकुम्भैः[1] ज्ञातुं [2]शक्नोति, स[3] हयग्रीव[4]गुणान्साकल्येन वक्तुं [5]शक्त इति उक्तिः[6], उक्तेर्निषेध[7]मेव गमयतीति नाक्षेपो व्यङ्ग्यः । तदेतदाह—**निषेधस्यैवेत्यादि** । निगमयति—**सर्वथेति** । यो हि निषेधाभास इष्टोऽनिष्टो वा स विध्यु[8]न्मुखस्सन्नेव आक्षेपालङ्कारो नान्यः ।

निषेधाभास आक्षेपः प्रकृतस्येष्टसिद्धये ।
स उक्तविषये वस्तु [9]तदुक्त्यो[10]र्वारणात्मकः ॥

वक्ष्यमाणे[11] [12]पुनस्त्वन्यो ज्ञेय आगूरणात्मकः ।
सामान्यतो [13]विशेषांशादंशश्चेत्येष च द्विधा ॥

इष्टार्थोऽस्य निषेधो[14]ऽस्य बाधोऽथातिशयध्वनिः ।
चतुष्टयमिदं ज्ञेयं संभूया[15]क्षेपकारणम् ॥

आक्षेपान्तरमुपक्षिपति—**एवमिष्टेत्यादि** । **समानन्याय[16]त्वादिति** । अन्वयव्यतिरेकावस्थायिनो वस्तुनो[17] न्याय्यो[18]ऽपि अन्वयव्यतिरेका[19]वस्था[20]यितया समान इति भावः । तत्र सूत्रम्—**अनिष्ट[21]विध्या[22]भासश्च** । प्राकरणिकस्य विशेषप्रतीत्यर्थमिति[23] अनुवर्तते, न[24] तु प्राकरणिकयोरिति, वक्ष्यमाणैकविषयत्वात् । अस्य यथेष्टस्य निषेधाभासः आक्षेपः प्राक् । तथा विशेषप्रतीत्यर्थम् [25]अनिष्ट[26]विध्याभासोऽप्याक्षेपः[27] । व्याचष्टे—**यथेष्टस्येत्यादि** । यथेति यद्वृत्तेन समानन्याय[28]तायै निरूपित-

---

1. A. C. अम्बुरुहंवैक्षा 2. F. ज्ञातुं परिच्छेत्तुं 3. A. सा C. यः 4. C. ग्रीणात्वा कल्ये 5. D. शक्यत इति 6. A. C. F. उक्तयः D. उक्तनिषे 7. A's alt. निदेशं C. नदेश दशमेव 8. C. विध्युन्मुखेन संक्षेपा 9. Except A. B. C. all read तद्युक्त्यो 10. A. F. युक्तोच्चारणा D. युक्त्योन्मारणा 11. A. माणो 12. D. पुनर्द्वयं संभूय 13. A. D. E. G. विशेष्यांशांशश्चे C. विशेषां शश्चे 14. C. षेधो तथाति 15. C. सुम्रक्षेप 16. D. न्यायतयेति 17. D. स्तुनो हि E. स्तुनोर्हि 18. C. न्यायो 19. D. व्यतिरेको 20. Except E all mss. अवस्थो धिकया 21. A's alt. C. विद्यभ्या 22. D. omits भा 23. A. D. E. G. यदनु A's alt. C. मदनु 24. D. स तु 25. E. G. इष्टस्य 26. A's alt. C. विद्याभ्या 27. C. आक्षेपं 28. C. न्यायतयायै D. न्यायंता मये

नोपपद्यते । तत्क्रियमाणं प्रस्खलद्रूपत्वाद् विध्याभासे पर्यवस्यति । ततश्च विधेरुपकरणीभूतो निषेध इति विधिनायं निषेधोऽनिष्टविशेषपर्यवसायी निषेधागूरणादाक्षेपः । यथा—

गच्छ गच्छसि चेत्कान्त ! पन्थानः सन्तु ते शिवाः ।
ममापि जन्म तत्रैव भूयाद्यत्र गतो भवान् ॥

अत्र कयाचित्कान्तप्रस्थानमनिष्टमप्यनिराकरणमुखेन विधीयते । न चास्य विधिर्युक्तः, अनिष्टत्वात् । सोऽयं प्रस्खलद्रूपत्वेन निषेधमागूरयति । फलं चात्रानिष्टस्य प्रस्थानस्यासंविज्ञानपदनिबन्धनमत्यन्तपरिहार्यत्वप्रतिपा-

---

चरमाक्षेपमनुस्मार[1]यति । एवमित्यादि तु प्रस्तुत[2]विषयम् । प्रस्खलद्रूप[3]त्वमविषयप्रवृत्तेः । **विधिनायम् इति ।** [4]यतो विधिरयं आभासमानो निषेधे व्यज्यमान उपकरणम् अतो विध्याभासेन व्यञ्जकेनायं निरूप्यमाणो निषेध इत्यर्थः । स चानिष्टविशेषे पर्यवस्यन्[5] आक्षेपालङ्कार इति योजना । नन्वाक्षेपो द्विधा दर्शितः । उक्ते[6] विषये कैमर्थक्यपरतया लक्ष्यमाणे त्वा[7]गूरकत्वेन । इह तु कतर[8] इत्यत आह—[9]**निषेधागूरणादिति** । निषेधो ह्यनुक्त इह विध्याभासेन आगूर्यते । अतोऽयं वक्ष्यमाणैकविषय इति[10] ज्ञातव्यः । उक्तं हि "वक्ष्यमाणविषयत्वेन आनयनरूपमागूरणमाक्षेप" इति ।

गच्छेति । गच्छसि [11]चेदित्यनेन, जिगमिषास्ति चेत् [12]नाहं निराकरोमि इति गम्यते । गच्छेत्यत्र तु तेन पुरस्कृतो[13] विधिर्ममापि तत्रैव गति[14]र्भूयादिति तु प्राणनै[15]राश्याविष्कारान् निषेध[16]प्रत्या[17]यनम् । योजयति—**अत्र कयाचिदित्यादि ।** [18]अनिराकरणमुखेनेत्यनेन गच्छसि चेदित्यर्थानुगमो दर्शितः । (प्रस्खलद्[19])रूपत्वम् इह[20] साक्षात् वाक्यानुप्रवेशः । विशेषप्रतिपत्तिरूपं फलं [21]चोपदर्शयति—**फलं** [22]**चात्रेति** । गम्यस्यात्य[23]न्तपरिहार्यत्वं[24] फलम् । तत्र किं निमित्तम् इत्याह—**असंविज्ञा**[25]**नेति** । न सम्यग्विज्ञायते येनार्थः[26] तदसंविज्ञानम्[27] । पदं[28] चेदिति निपातात्मकम्[29] । [30]गच्छसि चेदित्युक्तो हि किं तत्र[31] गमनेन मम संवि[32]ज्ञानेत्यादि प्रतीयते । इदमेवार्थ[33]प्रत्यायकं [34]सत्पदमत्यन्तपरि-

---

1. D. स्मारयेति 2. D. स्तुतरूपम् 3. D. द्रवत्वं 4. A. C. अतो 5. C. पर्यवस्यं 6. C. उक्तं 7. C. आग्रारक D. E. आगुर 8. D. तु रत इ 9. A. C. विशेषाग्रहणा 10. E. विज्ञात 11. C. च इत्य 12. C. नाहा 13. C. स्तुतो 14. A's alt. C. गतिर्मा भूदिति 15. C. नैराशय्या वि 16. D. षेधभिवृत्त्या 17. A. C. F. G. प्रत्यानयनं 18. A's alt. अतिरा 19. C. प्ररूढरूप D. प्रमुखद्रूप A. G. H. I. प्रलुठद्रूप 20. F. इत्याह 21. D. चापि दर्श 22. A. C. वात्रेति 23. A's alt. अज्ञान्त 24. F. इतीह G. इह 25. E. ज्ञानेनेति 26. C. अर्थ F. अर्थः नन्वेतत् 27. D. ज्ञानः 28. A's alt. C. यदं 29. E. आत्मकः 30. A. गच्छ ग 31. F. G. त्वद्गम 32. Except C. all omit वि 33. A. C. धूर्तप्रत्या 34. A. C. यत्र यदमत्य

दनम् । एतच्च "ममापि जन्म तत्रैव" इत्याशीःप्रतिपादनेनानिष्टपर्यवसायिना व्यञ्जितम् । यथा वा—

नो किञ्चित्कथनीयमस्ति सुभग ! प्रौढाः परं त्वादृशाः
पन्थानः कुशला भवन्तु भवतः को मादृशामाग्रहः ।
किं त्वेतत्कथयामि संततरतिक्लान्तिच्छिदस्तास्त्वया
स्मर्तव्याः शिथिलाः सहंसरुचयो गोदावरीवीचयः ।।

अत्रानभिप्रेतमपि कान्तप्रस्थानं यदा प्रमुख एवाभ्युपगम्यमानं प्रतीयते, तदायमनिष्टविधिराभासमान आक्षेपाङ्गम् । स्मर्तव्या इत्यनेन गमननिवृत्तिरेवोपोद्बलिता । तस्मादयमपि प्रकार आक्षेपस्य समानन्यायतया अभिनवत्वेनोक्तः ।।

आक्षेप इष्टनिषेधेऽनिष्टविधौ चानुपपद्यमानत्वाद्विरुद्धत्वमनुप्रविष्टम् ।

हार्यत्वे निबन्धनम् इत्यर्थः । नन्वेत[1]दत्यन्तपरिहार्य[2]त्वं केन[3] व्यवस्थापितम् इत्यत आह—**एतच्चेति** । निषेधापगमं प्रकारान्तरेण दर्शयितुमाह—**यथा[4]वेति** ।

नो किञ्चिदिति । प्रौढाः कथनमन्तरेणापि कथनीयार्था[5]भिज्ञाः । **शिथिलेति[6]** । हंसो[7] हि [8]शिथिलांसस्सन्[9] [10]सविशेषं[11] रम्यो भवति, अन्तर्धव[12]लिमा[13]विष्कारात् । तत्सदृशरुचयो [14]वीचय इति नैर्मल्यकाष्ठा[15] । योजयति—**अत्रान[16]भिप्रेतमित्यादि** । अनभिप्रेतस्यैव सतो गमनस्य नो किञ्चित्कथनीयमस्तीति प्रमुख एवाभ्युपगमः प्रतीयते । इत्थं च सति विधिरयं [17]अनिष्टत्वेनाभासमानो निषेधागूरणात्मन आक्षेपस्याङ्गम् । स्मर्तव्या इत्यनेन [18]भूयस्तरान्निषेध एवोपोद्बलितः तथाविध[19]वीचिस्मृतौ गमनवार्ताया अप्ययोगात्[20] । निगमयति—**तस्मादिति** । अभिनवत्वेन अन्यैरप्रहतत्वेन ।

अनुक्तस्य निषेधस्य विध्याभासेन सूचनम् ।
आक्षेपो वक्ष्यमाणैकविषयस्त्वेष सम्मतः ।।

अथ विरोध[21]विच्छित्तिमधिचिकीर्षुराह—**आक्षेप[22] इष्टेत्यादि** । आक्षेपालङ्कारे हि विरुद्धत्वमनुप्रविष्टम् । इष्टनिषेधावलम्बेन अनिष्टविध्यवलम्बेन वा सूत्रद्वय[23]प्रवृत्तेऽस्मिन्न[24]नुपपत्तिसद्भावात् इत्यर्थः । तमिमं प्रस्तुतं[25] विरोधम् अधिकुर्मः इत्याह—

---

1. C. वेदमत्य 2. D. हार्यक: 3. D. तेन 4. A. C. यया 5. A. C. नीयार्थाः F. नीयाभिज्ञाः 6. A. C. शिशिरेति 7. A. हंसे 8. A. C. शीलं स 9 D. E. omit सन् 10. G. omits स 11. F. विशेषेण G. विशेष 12. C. ववलिं 13. C. पेष्का 14. A. C. हि वीच 15. A. C. काष्ठां 16. A. C. नाभिप्रे 17. D. omits अ 18. E. तु भूयः 19. A. विधि 20. A. हेतुत्वात् C. हेतुकत्वात् D. योगात 21. A's alt. C. रोधस्त्विति मधि 22. D. इत्येष्टत्या 23. D. E. G. द्वयं 24. D. स्मिन्नुप 25. A. C. F. स्तुत

एतत्प्रस्तावेन विरोधगर्भोऽलङ्कारवर्गः प्रक्रियते । तत्रापि विरोधालङ्कारस्तावल्लक्ष्यते—

विरुद्धाभासत्वं विरोधः ॥४०॥

इह जात्यादीनां चतुर्णां पदार्थानां प्रत्येकं तन्मध्य एव सजातीयविजातीयाभ्यां विरोधिभ्यां संबन्धे विरोधः । स च समाधानं विना प्ररूढो दोषः । सति तु समाधाने प्रमुख एवाभासमानत्वाद्विरोधाभासः । तत्र च जातिविरोधस्य जात्यादिभिः सह चत्वारो भेदाः । गुणस्य गुणादिभिः सह त्रयः । क्रियायाः क्रियाद्रव्याभ्यां सह द्वौ । द्रव्यस्य द्रव्येण सहैकः । तदेवं दश विरोधभेदाः । तत्र दिङ्मात्रेणोदाहरणं यथा—

परिच्छेदातीतः सकलवचनानामविषयः
पुनर्जन्मन्यस्मिन्ननुभवपथं यो न गतवान् ।
विवेकप्रध्वंसादुपचितमहामोहगहनो
विकारः कोऽप्यन्तर्जडयति च तापं च कुरुते ॥

अत्र जडीकरणतापकरणयोः क्रिययोर्विरोधो वस्तुसौन्दर्येणाप्राप्तिपर्यवसानेन परिह्रियते । तथा—

---

[1]एतत्प्रस्तावेनेति । तेष्वपि अधिष्ठा[2]नभूतं विरोधालङ्कारं[3] प्रामुख्यात् प्रथममुपगृह्णाति—**तत्रापीति**[4] । तत्र सूत्रम्—**विरुद्धा[5]भासत्वं विरोधः** । [6]विरोधस्य समाधानसद्भावात् आभासत्वं[7] विरोधालङ्कारः[8] । व्याचष्टे—**इह जात्यादीनामिति** । जातेर्जातिस्सजातीयं[9] अन्यद्विजातीयम् । एवं गुणस्य गुण इत्यादि । भेदान्[10] सञ्चष्टे—**तत्र[11] चेति**[12] । जातिविरोधस्य जातिनिबन्धनस्य विरोधालङ्कारस्य[13] । **परिच्छेदेति** । अपरिच्छेद्यः[14] सर्ववचना[15]नाम् अविषयः । अत्र[16] जन्मनि[17] पुनरित्थम् अनु[18]भूतमनस्त्वमिह न [19]प्राक्कोट्यपेक्षं [20]पूर्वमित्यर्थः । विवेकस्य विशेषतो ध्वंसादु[21]पचितेन [22]मोहान्धकारेण दुरु[23]त्तरः कोऽपि विरहविकारो अन्तर्जडयति तापयति च । योजयति[24]—**अत्र जडीकरणेति** । अप्राप्ति[25]विरहः [26]तद्धेतुकोऽयं विरुद्ध[27]क्रियोपनिपात इत्यर्थः ।

---

1. D. omits ए 2. A. ष्ठानात्तं C. ष्ठानोक 3. A. C. F. H. अलङ्कार 4. A. C. G. H. इति 5. A's alt. रुध्या 6. A. C. D. विरुद्धस्य 7. Except E. all mss. भासमानत्वं 8. D. अलङ्कारं 9. D. तीयं एवं 10. A. भेदार्थं व्याचष्टे 11. A. F. अत्र 12. H. चेति । बलविरोध सस्वातिनिबन्धः विरोधालङ्कारस्य द्वयोरपि श्लिष्टत्वे विरोधिनोः श्लिष्टत्वे कुलपतिमिति । After this unconnected passage is found एकतरस्य पृथ्वीपति etc. (P. 153.) 13. A. C. कारस्यापि अपिदृष्टतेति 14. Except E. all mss. छेद्य 15. A. C. D. E. वचनाष्टयः 16. A. C. G. तत्र 17. A. C. छद्मनि 18. A. C. D. अननुभू 19. D. प्रा-श्यवेक्षं 20. E. अपूर्वं 21. D. ध्वंसावुप 22. E. महामो 23. D. दुरुक्तः E. दुरुक्तयः 24. A. C. यति च 25. F. प्तिः पूर्वानुरागः विप्रलम्भः त 26. A. C. विरहे तु D. विरहहेतु 27. E. विरोधि

अयं वारामेको निलय इति रत्नाकर इति
श्रितोऽस्माभिस्तृष्णातरलितमनोभिर्जलनिधिः ।
क एवं जानीते निजकरपुटीकोटरगतं
क्षणादेनं ताम्यत्तिमिमकरमापास्यति मुनिः ।।

अत्र जलनिधिः पीत इति द्रव्यक्रियर्योविरोधो मुनिगतेन महाप्रभावत्वेन समाधीयते । एवमन्यदपि ज्ञेयम् ।

विविक्तविषयत्वेन चास्य दृष्टेः श्लेषगर्भत्वे विरोधप्रतिभोत्पत्तिहेतुः श्लेष , औद्भटानाम् । दर्शनान्तरे तु संकरालंकारः । यथा—"सन्निहित-बालान्धकारा भास्वन्मूर्तिश्च" इत्यादौ विरोधिनोर्द्वयोरपि श्लिष्टत्वे । एकस्य तु श्लिष्टत्वे "कुपतिमपि कलत्रवल्लभम्" इत्यादौ । एकविषयत्वे चायमिष्यते । विषयभेदे त्वसंगतिप्रभृतिर्वक्ष्यते ।।

एवं विरोधमुक्त्वा विरोधमूला अलंकाराः उच्यन्ते । तत्रापि कार्य-कारणभावमूलत्वे विभावनां तावदाह—

अयं वारामिति । तृष्णा पिपासा [1]रत्नविषया लिप्सा च[2] । क एवं जानीते ? न कस्यचिदिदं संभाव्यम् इत्यर्थः । [3]योजयति—**अत्र** [4]**जलनिधिरिति** । भेदान्तरं सुज्ञान-मित्याह—**एवमिति** ।

इह[5] श्लेषगर्भत्वे किं वृत्तमित्यत आह—**विविक्तेति** । श्लेषतो विविक्त[6]विषय-तयोक्तोदाहरणादौ दृश्यते यतः । अतः श्लेषगर्भत्वे श्लेषो [7]बाधकः [8]उद्भटमताव-लम्बिनाम् अन्येषां तु सङ्करः[9] । उदाहरणम्—**सन्निहितेति**[10] । बालान्धकारा[11] [12]केश-कालिमा नूतन[13]तिमिरं च । भास्वन्मूर्तिः[14] भास्वतो रवे[15]मूर्तिश्च । इदं द्वयोरपि विरोधिनोः श्लिष्टत्वे[16] । [17]कुपतिमिति एकतरस्य । पृथ्वीपतिः कुत्सितपतिश्च । अत्र विशेषमाह[18]—**एकविषयेति** । विरोधस्यैकविषयत्वे विरोधालङ्कारः । विषयभेदे त्वसङ्ग-त्यादिर्वक्ष्यते[19] ।

विरोधस्तु तदाभासो जात्याद्यर्थसमाश्रयः ।
तद्वैचित्र्या[20]द्दशविधो विष[21]यैक्ये व्यवस्थितः ।।

अथ[22] विरोधमूलाः[23] । तत्रापि कार्यकारणविरोधालङ्कारत्वेन विभावनोच्यते । तत्र सूत्रम्—

---

1. C. रक्तानविष्टया 2. C. एक एवं 3. A. आयोज 4. D. E. जन्मनि 5. Omitted in C. 6. D. E. विविक्त 7. D. बोध 8. D. उपभट 9. A. C. सङ्कर 10. E. हित बा G. हितबालेति 11. A. C. D. कारः 12. A's alt. C. केनकेलिमात्र 13. A. C. F. तनुस्तिमि 14. A's alt. मुक्तिः 15. A. मुक्तिश्च 16. A. अविषयत्वे 17. A. क्लसं C. कम्पायति 18. H. विरोधं 19. C. वक्ष्यन्ते 20. D. चित्र्यं 21. H. विषयं व्य A. C. विषयैकैर्व्यवच्छिता 22. A. G. विभावना विरो 23. A. C. F. H. मूलः

कारणाभावे कार्यस्योत्पत्तिर्विभावना ॥४१॥

इह कारणान्वयव्यतिरेकानुविधानात्कार्यस्य कारणमन्तरेणासंभवः । अन्यथा विरोधो दुष्परिहरः स्यात् । यदि तु कयाचिद्भङ्गया तथाभाव उपनिबध्यते, तदा विभावनाख्योऽलङ्कारः । विशिष्टतया कार्यस्य भावनात् । सा च भङ्गिर्विशिष्टकारणाभावोपनिबद्धा । अप्रसिद्धं तु कारणं वस्तुतोऽस्तीति विरोधपरिहारः । कारणाभावेन चोपक्रान्तत्वाद्बलवता कार्यमेव बाध्यमानत्वेन प्रतीयते, न तु तेनात्र कारणाभावः इत्यन्योन्यबाधकत्वानुप्राणिताद्विरोधालङ्काराद्भेदः । एवं विशेषोक्तौ कार्याभावेन कारणसत्ताया एव बाध्यमानत्वमुन्नेयम् । येन सापि विरोधाद्भिन्ना स्यात् । इह लक्षणे यद्यप्यन्यैः कारणपदस्थाने क्रियाग्रहणं कृतं, तथापीह कारणपदमेव विहितम् । न हि सर्वैः क्रिया-

---

कारणाभावे कार्यस्योत्पत्तिर्विभावना[1] ॥ [2]प्रसिद्धकारणाभावे सूक्ष्मकारणवशात् कार्योत्पत्ति[3]विशिष्टतया कार्यभावनात् विभावना । व्याचष्टे—**इह**[4] **कारणेति**[5] । कार्यं हि कारणमन्तरेण न संभवतीति तदन्वयव्यतिरेकानुविधानात् तदभावेऽपि यदि कार्यसंभवः, तदवास्त[6]वत्वात्[7] विरोधो दुष्परिहरः[8] । यदि केनचिदुक्तिवैचित्र्येण कारणाभावेऽपि कार्यसंभव[9] उपनिबद्धः[10] तदा [11]वैशिष्ट्येन कार्यभावना[12]द्विभावना । क (या[13]) चिदित्युक्तम्[14] । सा[15] केत्यत आह—**सा**[16]**चेति** । प्रसिद्ध[17]स्यैव कारणस्य अनुपनिबन्धः[18] [19]अप्रसिद्धकारण[20]संभवात्तु [21]विरोधि । विरोधाद्वैलक्षण्यायाह—**कारणाभावेनेति** । प्रामाणिकत्वात् बलिना कारणाभावेन कार्यमेव बाध्यते, न तु कारणाभावः, अत उभयविरोधानुप्राणितात् विरोधात्[22] विशेषः । एतद्व्यतिरेकरूप[23]या नीत्या[24] वक्ष्यमाणस्य विशेषोक्त्यलङ्कारस्यापि विरोधतो भेद इत्याह—**एवं विशेषोक्तावित्यादि** । तत्र हि कार्याभावः कारणसत्ताया[25]बाधकः । अतः [26]साऽपि विरोधाद्विभिन्ना[27] । लक्षणांशे विमतिमुपन्यस्य दूषयति—**इह लक्षण इति** । क्रियाग्रहणं कृतम् । क्रियाभावे कार्योत्पत्तिः विभावनेति तथाऽपि कारणपदविधानार्हत्वान्निर्देशितम्[28] । तत्र हेतुः[29]—**न हि सर्वैरिति** । क्रियाफल[30]मेव कार्यमिति न हि सर्वेषामभ्युपगमः, किन्तु वैयाकरणानामेव । अतः

---

1. D. वना व्याच 2. C. Omits प्र 3. Except C. all mss. पत्ति वि 4. Omitted in A. C. D. 5. H. इति प्रसिद्धकारणा (P. 156) 6. C. तदर्थत्वात् 7. A. C. वात् दु 8. E. हारः 9. A. C. भवो नि 10. D. E. F. निबन्धः 11. A. C. G. तद्वैशि 12. A. C. भावना क 13. All mss. कदाचित् 14. D. उक्ता 15. A. C. साङ्केत्य 16. A's alt. साद्विरोधो चेति 17. A. सिद्धविधानात्तदभावेऽपि का 18. A. C. F. G. निबद्धात् 19. C. omits अ 20. A. C. F. G. सद्भावात् 21. F. न वि 22. D. F. omit त् 23. C. रूपाया C. 24. नित्या 25. D. E. omit या 26. A's alt. C. क्वापि 27. E. भिन्नां 28. A's alt. C. शितः 29. F. हेतुः क्रिया 30. A. C. D. F. फलत्वे का

फलमेव कार्यमभ्युपगम्यते । वैयाकरणैरेव तथाभ्युपगम्यत्वात् । अतो विशेषमनपेक्ष्य सामान्येन कारणपदमेवेह निर्दिष्टम् । यथा—

असंभृतं मण्डनमङ्गयष्टेरनासवाख्यं करणं मदस्य ।
कामस्य पुष्पव्यतिरिक्तमस्त्रं बाल्यात्परं साथ वयः प्रपेदे ।।

अत्र द्वितीये पादे मदस्य प्रसिद्धं यदासवाख्यं कारणं तदभावेऽपि यौवनहेतुत्वेनोपनिबन्धः कृतः । मदस्य च द्वैविध्येऽप्यभेदाध्यवसायादेकत्वमतिशयोक्त्या । सा चास्यामव्यभिचारिणीति न तद्बाधेनास्या उत्थानम्, अपि तु तदनुप्राणितत्वेन । इयं च विशेषोक्तिवदुक्तानुक्तनिमित्तभेदाद्द्विधैव । तत्रासंभृतमिति उक्तनिमित्तोदाहृता । अनुक्तनिमित्ता यथा—

अङ्गलेखामकाश्मीरसमालम्भनपिञ्जराम् ।
अनलक्तकताम्राभामोष्ठमुद्रां च बिभ्रतीम् ।।

अत्र सहजत्वं निमित्तं गम्यमानम् । इयं च मालयापि भवन्ती दृश्यते । यथा—

अनिद्रो दुःस्वप्नः प्रपतनमनद्रिद्रुमतटं
जराहीनः कम्पस्तिमिररहितस्त्रासससमयः ।
अनाघातं दुःखं विगतनिगला बन्धनधृतिः
सजीवं जन्तूनां मरणमवनीशाश्रयरसः ।।

क्रिया[1]व्यतिरेकिणोऽपि कारणस्य संभवात् सामान्यतः कारणग्रहणमेव कृतम् ।

अत्र द्वितीयेति । मदस्या[2]सवकारणापोहेन यौवन[3]कारणोपनिबन्धो यौवनासवमदयोरभेदाध्यवसायात् । सा चातिशयोक्तिर्विभा[4]वनां न व्यभिचरतीति न बाध्यते । अपि त्वनुग्राहकत्वेनावतिष्ठते । [5]तद्द्वैविध्यमाह—**इयं चेति** । अनेन विशेषोक्तेरपि द्वैविध्यं सूचितम् । **तत्रासंभृ[6]तमिति** । इयमेवोक्तनिमित्ता वयसो निमित्तत्वात् । **अङ्गले[7]खामिति** । काश्मीरसमालम्भनं[8] कुङ्कुमालेपः[9] निमित्तानुक्तिं दर्शयति—**अत्र सहजत्वमिति** । वैचित्र्यान्तरम् आह—**इयं चेति** । **अनिद्र इति** । प्रपतनं मरणाध्यवसायेन पातः । तिमिर[10]सहितस्त्रासससमयो निशा अयं तु तद[11]भावात्मकः । [12]आघातो [13]वधस्थानं, धृतिर्धारणं अन्वयोऽनु[14]वृत्तिः ।

---

1. D. क्रियाया व्य 2. C. आसाव 3. C. कारणोप D. करण 4. D. भावना 5. त Omitted in all except D. 6. A. संभ्रममि 7. A. C. रेखा 8. A. C. भनं कालागरुकु 9. C. लेपाने 10. A. सहिग 11. A. C. तद्भावा 12. A. C. अथातो A's alt. कव्यातो F. प्राघातो 13. A's alt. पदस्थानं. C अवस्था D. E. वय 14. C. अनुत्ता आ

असंभृतं मण्डनमिति, कामस्य पुष्पव्यतिरिक्तमस्त्रमिति च। अत्र विवदन्ते—इयमेव विभावनेति केचित्। संभरणस्य पुष्पाणां च मण्डनमस्त्रं प्रत्यकारणत्वाद्वाङ्मात्रमेतत्। एकगुणहानौ विशेषोक्तिरित्यन्ये। रूपकमेवाधिरोपितवैशिष्ट्यमिति त्वपरे। आरोप्यमाणस्य प्रकृते संभवात्परिणाम इत्यद्यतनाः। विभावनां लक्षयित्वा तद्विपर्ययस्वरूपां विशेषोक्तिं लक्षयति—

कारणसामग्र्ये कार्यानुत्पत्तिर्विशेषोक्तिः ॥४२॥

आद्योदाहरणे द्वितीयतृतीयपादयोर्विमतिरित्याह—***असंभृतमि**[1]**ति** । सभरणपुष्पकारणाभावेऽपि मण्डनकामास्त्रकार्योत्पत्तेरियमेव विभावनेति केचित् । अन्ये तु संभरण[2]पुष्पयोर्मण्डनास्त्रे प्रत्यासवमदन्यायेन साक्षादकारणत्वाद्वा[3]ङ्मात्रं[4] विभावनात्ववचनम् । किञ्च[5] एकगुणहा[6]निकल्पनायां साम्यदार्ढ्यं विशेषोक्तिरित्युक्तलक्षणविशेषोक्तिरियम् । संभरणाद्येकगुणहान्या मण्डनादेः वयसा सह साम्यदा[7]र्ढ्यादित्याहुः[8] । अपरे तु वयसि मण्डन[9]त्वाद्यारोपात्[10] रूपकमेव यत्त्व[11]संभरणादि वैशिष्ट्यं तद[12]त्रैव अधिरोपितमित्याहुः । अथ सिद्धान्तः—**आरोप्यमाणस्येति** । आरोप्यमाणस्य मण्डनत्वादेर्वयोरूपे प्रकृते [13]प्रतिपत्तिरूपादुपयोगात् परिणामोऽयम् । मण्डनादिकं हि[14] वयोरूपो[15]पग्राहिप्रतिपत्तिकत्वेन उपयुज्यते । रूपकत्वे हि वयसो मण्डनं रूपोपग्राहिताया[16] मण्डनमेवेदमित्यादि प्रसजेत् । अतः परिणाम एव । अद्यतना इति आचार्यः स्वात्म[17]प्रमुखान्वक्ति ।

प्रसिद्धकारणाभावे कार्योत्पत्तिविभावना ।
कार्योत्पादनवैशिष्ट्याद्द्विधा चेयं निमित्ततः ॥

विशेषोक्त्यै सङ्गतिमाह—**विभावनामिति** । तत्र सूत्रम्—**कारण**[18]**सामग्र्ये कार्या**[19]**नुत्पत्तिर्विशेषोक्तिः ॥** विभावनावैपरीत्येन विशेषमभिव्यङ्क्तुं प्रयुज्यमाना

---

1. E. इतीति 2. D. Repeats भरण 3. A. C. F. वार्ता 4. D. E. F. मात्रकं 5. A. C. किन्तु 6. A. C. हानिः 7. A. F. दार्ढ्यं 8. A. F. आह 9. E. omits न 10. A. C. F. रोपापगमेऽवयवत्व संभ 11. D. यद्यसं 12. A. C. F. G. तत्रैव 13. E. प्रवृत्ति 14. D. हि वयसो वयो 15. A. C. E. F. G. H. रूपो वयसो 16. A. ग्राहिकतया 17. A. C. F. स्वाम्यात्म F. संवादात्म 18. F. कारणेति 19. A. कार्योत्पत्तिः

* A. The passage असंभृतमिति……परिणाम इति अद्यतनाः discussing the figure in the verse असंभृतं मण्डनमङ्गयष्टेः etc. is found in different places in the three editions of the Sarvasva. In the N. S. Ed. (p. 151) it occurs after the line अत्र सहजत्वं निमित्तं गम्यमानं explaining the verse "अङ्कलेखां" etc. In the T. S. S. Ed. (p. 154) it follows the line ending in तदनुप्राणितत्वेन which is the Vrtti explaining the verse असंभृतं etc. In the present edition, Vidyācakravartin has it after the verse "अनिद्रो दुःस्वप्नो" etc., an illustration for serial Vibhāvanā.

इह समग्राणि कारणानि नियमेन कार्यमुत्पादयन्तीति प्रसिद्धम्। अन्यथा समग्रत्वस्यैवाभावप्रसङ्गात्। या तु सत्यपि सामग्र्ये न जनयति कार्यं सा कश्चिद्विशेषमभिव्यङ्क्तुं प्रयुज्यमाना विशेषोक्तिः। सा च द्विविधा उक्तनिमित्ता अनुक्तनिमित्ता च। अचिन्त्यनिमित्ता त्वनुक्तनिमित्तैव। अनुक्तस्य चिन्त्याचिन्त्यत्वेन द्वैविध्यात्। क्रमेण यथा—

कर्पूर इव दग्धोऽपि शक्तिमान्यो जने जने।
नमोऽस्त्ववार्यवीर्याय तस्मै कुसुमधन्वने॥
आहूतोऽपि सहायैरेमीत्युक्त्वा विमुक्तनिद्रोऽपि।
गन्तुमना अपि पथिकः सङ्कोचं नैव शिथिलयति॥
स एकस्त्रीणि जयति जगन्ति कुसुमायुधः।
हरतापि तनुं यस्य शंभुना न हृतं बलम्॥

अत्र सत्यपि दाहलक्षणेऽविकले कारणेऽशक्तत्वाख्यस्य कार्यस्यानुत्पत्तिः

विशेषोक्तिः। व्याचष्टे—**इह समग्राणीत्यादि**। **अन्यथेति**। सामग्र्यं हि[1] कार्यनिष्पत्त्यवसानकम्। तदेव चेत्कार्यं न[2] जन[3]येत(त्) तदा किमेषां समग्रत्वम्। अतः [4]कारणानि चेत् समग्राणि तदा नियमेन[5] कार्योत्पत्तिरिति स्थितम्। अनेन व्याप्तिर्दर्शिता[6]। अत्राभासतो विरोधमु[7]त्थापयति[8]—**यत्त्विति**। [9]**कश्चिदिति**। यदि कारणसाम[10]ग्र्ये कार्यानुत्पत्तिस्तदा विशेषः कश्चिदभिव्यङ्ग्यस्स्यात्। इत्थं च सति विशेषमभिव्यङ्क्तुम् उक्तिरिति[11] विशेषोक्तिः। तद्भेदार्थमाह—**सा चेति**। अचिन्त्यत्वम[12]तर्किता। तद[13]नुक्तेर्निमित्तमित्यनुक्तनिमित्तैव।

कर्पूर[14]इवेति। अत्र निर्भ[15]स्मांशं दाह[16]शक्तिवैकल्ये सामग्री। अथापि जने जने शक्तिमानिति कार्यानुत्पत्तिः। **आहूतो[17]ऽपीति**। [18]आह्वानप्रत्युक्ति[19]जिगमिषा (:) [20]सङ्कोचशैथिल्य[21]कारणसामग्री। नैवेति[22] तु कार्यानुत्पत्तिः। तत्र हेतुः [23]कान्तास्वप्नादि चिन्तितुं शक्यम्।

स एक इति। [24]तनुहरणं बलहरणे[25] सामग्री। न हृतमिति तु कार्यानुत्पत्तिः। तत्र हेतुः अनुक्तश्चिन्तितुमशक्यः त्रिष्वपि योजयति—**अत्र सत्य[26]पि दाहेति**। स्वरूपेण

---

1. A. C. D. G. हि नाम 2. C. नाजन 3. D. E. G. जनयेयुः 4. D. आकार 5. A. C. न कार्य 6. H. दर्शिता लक्षणान्तर (P. 159) 7. C. उत्पादयति 8. D. यति कंचिद् 9. A. C. D. किञ्चि 10. C. सामग्र्यै 11. A. C. उक्ति तद्भेद 12. E. अतर्क्यता 13. D. E. तद्व्यनु 14. A's alt. C. रुपैति 15. A. C. भस्मकान्तदाह 16. E. दाहः 17. A. C. आवृत्तो 18. E. किम् आ 19. F. G. उक्ति निद्रा विमुक्तिजि 20. A's alt. संचोरते शै C. संरोचते शै 21. D. थिल्ये सा 22. D. इति कृता का 23. D. F. हेतुः अनुक्तः 24. C. न तु 25. A. C. हरण 26. A. यविदाहे

शक्तिस्वरूपेणाविरुद्धेन धर्मेणोपनिबद्धा । अवार्यवीर्यत्वं चात्रोक्तं निमित्तम् । तथाह्वानादयः संकोचशिथिलीकारहेतव इति तेषु सत्स्वपि तस्यानुत्पत्तौ कान्तास्वप्नसमागमाद्यनुक्तं सत् चिन्त्यं निमित्तम् । तथा तनुहरणकारणे सत्यपि बलहरणस्य कार्यस्यानुत्पत्तौ निमित्तमनुक्तमप्यचिन्त्यमेव, प्रतीत्यगोचरत्वात् । कार्यानुत्पत्तिश्चात्र क्वचित्कार्यविरुद्धोत्पत्त्या निबध्यते । एवं विभावनायामपि कारणाभावः कारणविरुद्धमुखेन क्वचित्प्रतिपाद्यते । तथा च सति,

यः कौमारहरः स एव हि वरस्ता एव चैत्रक्षपा-
स्ते चोन्मीलितमालतीसुरभयः प्रौढाः कदम्बानिलाः ।
सा चैवास्मि तथापि तत्र सुरतव्यापारलीलाविधौ
रेवारोधसि वेतसीतरुतले चेतः समुत्कण्ठते ॥

इत्यत्र विभावनाविशेषोक्त्योः सन्देहसङ्करः । तथा ह्युत्कण्ठाकारणं विरुद्धं "यः कौमारहर" इत्यादि निबद्धमिति विभावना । तथा "यः कौमारहर" इत्यादेः कारणस्य कार्यं विरुद्धं "चेतः समुत्कण्ठत" इत्युत्कण्ठाख्यं निबद्धमिति विशेषोक्तिः । विरुद्धमुखेनोपनिबन्धात्केवलमस्पष्टत्वम् । साधकबाधकप्रमाणा-

---

शक्तिमानिति स्वशब्देन[1] विरुद्धेन धर्मेण क्वचिदियं विभावनया सङ्कीर्यत इति दर्शयितुमाह—**कार्यानुत्पत्तिरित्या**[2]**दि** ।

यः कौमारेति । नायिका काचिदुद्दीपन[3]विभावना(विभावा)भिरता वक्ति । यो मे प्रथमपरिभोगेन[4] कौमारं हृतवान् अद्यापि स एव वरः[5] वसन्त[6]क्षपाः अपि ता एव । उन्मीलितमालतीवत् सुरभयः कदम्बानिलाः त एव । कदम्बोऽत्र धूलीकदम्बाख्यस्तद्विशेषः[7] यो वसन्ते विकसति । अहमपि सा चैवास्मि, पुरातनी प्रेमधारा[8] न[9] कुण्ठितेत्यर्थः । अथापि रेवानदीकूले तत्र वेतसीतरुतले सुरतव्यापारलीलाविधौ चेतस्समुत्कण्ठते । योजयति[10]—**अत्र विभावनेत्यादि** । कौमा[11]रहरादि[12]सद्भावोऽनुत्कण्ठा[13]कारणसाम[14]ग्रचम् । अथापि चेतस्समुत्कण्ठत इति विरुद्धोपनिबन्धेनानुत्कण्ठानुत्पत्तिरुक्ता । अतो विशेषोक्तिः । तथा कौमारहराद्ययोगरूपकारणाभावे तत्सद्भाव[15]रूपविरोधिमुखेनोपनिबद्धेत्युत्कण्ठाकार्योत्पत्तिर्विभावना । तयोश्च साधकबाधकाभावात्[16] सन्देहसङ्करः । कार्यकारण[17]-

---

1. D. omits न 2. D. इति 3. A's alt. C. उदयन 4. C. भोगेऽपि स एव 5. A. परः 6. All mss. वसन्ताः 7. C. शेषयां वि······सन्ते 8. A's alt. प्रमथाधारा नकु 9. Omitted in A's alt. F. G. 10. D. योजयति अत्रेति नायक······ (under सम p. 162)* 11. C. कुमार 12. D. स्वभावो 13. A. C. F. कण्ठासा 14. D. सामान्यं 15. A. C. भावं यद्रूप 16. C. भावतत्सं 17. D. कारणा

* The omitted portion is found later under अर्थापत्ति after व्याचष्टे as व्याचष्टे······(a gap) अत्र विभावनेत्यादि······to योजयति अत्रेत्यादि (under सम p. 162). After this the ms. ends abruptly.

भावाच्चात्र संदेहसंकरः । या तु "एकगुणहानिकल्पनायां साम्यदाढर्च्यं विशेषोक्तिः" इति विशेषोक्तिर्लक्षिता सा अस्मद्दर्शने रूपकभेद एवेति न पृथग् वाच्या ।

अतिशयोक्तौ लक्षितायामपि कश्चित्प्रभेदः कार्यकारणप्रस्तावेनेहोच्यते—

कार्यकारणयोः समकालत्वे पौर्वापर्यविपर्यये चातिशयोक्तिः ॥४३॥

इह नियतपूर्वकालभावि कारणं नियतपश्चात्कालभावि च कार्यमिति कार्यकारणयोर्लक्षणं प्रसिद्धम् । यदा तु विशेषप्रतिपादनाय तयोरेतद्रूपापगमः क्रियते तदातिशयोक्तिः । एतद्रूपापगमश्च कालसाम्यनिबन्धनः कालविपर्यासनिबन्धनश्चेति द्विधाभवन्नतिशयोक्तिमपि द्वैधे स्थापयति । क्रमेण यथा—

पश्यत्सूद्भुतसान्द्रविस्मयरसप्रोत्फुल्लनेत्रोत्पलं
भूपालेषु तवात्र सूक्ष्मनिशिते निस्त्रिंशधाराध्वनि ।

भावयोश्च विरोधिसद्भावायातत्वादस्फुटत्वम् । अनयोश्च न सर्वदा सङ्करः । कार्योत्पत्त्य[1]नुत्पत्त्योरन्यतर[2]विवक्षणे शुद्धत्वात् । प्रकृतोदाहरणे तु उत्कण्ठो[3]त्पत्त्यनुत्कण्ठानुत्पत्त्योर्द्वयोरपि विवक्षा[4] । अत्र श्लोकः—

कार्यांशस्य यदा भावाभावौ[5] वक्तुमपे[6]क्षितौ ।
विभावनाविशेषोक्त्योस्तदा सन्देहसङ्करः ॥

लक्षणान्तरमव्या[7]पीत्याह—**या[8]त्वेकगुणेत्यादि ।**

विशेषोक्तिर्भवेत् कार्यानुत्पत्तिस्सति कारणे ।
अत्रैक[9]गुणहान्या तु[10] साम्यदार्ढ्यमलक्षणम् ॥

प्रतिज्ञातचरायातिशयोक्त्यन्तराय सङ्गतिः—**अतिशयोक्ताविति** । तत्र सूत्रम्—[11]**कार्यकारणयोः समकालत्वे पौर्वापर्यविपर्यये चातिशयोक्तिः** । कार्यकारण[12]विरोधमूलत्वादिह[13] कथनम् । प्रपञ्चाय व्याचष्टे—**इह नियतेति** । एतद्रूपापगमः[14] पौर्वापर्ये नियमभङ्गः[15] । द्वैविध्यमाह—**एतद्रूपेति**[16] ।

पश्यत्सूद्भ[17]तेति । राजसु विस्मेरेषु पश्यत्सु तव खड्गे युगपत्कीर्त्या निर्गमेन[18] श्रिया प्रवेशेन चेन्द्र[19]जालं कृतम् । अत्र[20] श्रीप्रवेशे[21] कीर्ति[22]निर्गमहेतौ समकालोपनिबन्धः[23] ।

---

1. D. पत्त्यानु 2. A. C. D. अविव 3. C. कण्ठात् पत्यनु 4. A. विवक्षामात श्लो A's alt. विवक्षामत्र C. वक्षामात्र 5. C. भावो 6. A. F. अवेक्षते C. अपेक्षते 7. H. omits व्या 8. D. E. यत्वेक 9. A. C. H. एकहान्या 10. I. तुन्दार्ढ्या 11. F. कार्येति 12. A. C. कारणयोः E. G. कारणादि H. कारणमूल 13. G. इह पुनः 14. D. गमं 15. D. भङ्गं 16. H. रूपेति आभा 17. E. omits. द् 18. D. गमनेन 19. C. omits च A's alt. खान्द्र 20. Except G. all read तत्र 21. A. C. D. प्रवेशो 22. A. C. D. लक्ष्मीनि 23. C. निबद्धं

कीर्त्या च द्विषतः श्रिया च युगपद्राजन्यचूडामणे
हेलानिर्गमनप्रवेशविधिना पश्येन्द्रजालं कृतम् ॥

पथि पथि शुकचञ्चूचारुराभाङ्कुराणां
दिशि दिशि पवमानो वीरुधां लासकश्च ।
नरि नरि किरति द्राक्सायकान्पुष्पधन्वा
पुरि पुरि च निवृत्ता मानिनीमानचर्चा ॥

पूर्वत्र प्रोढोक्तिनिर्मितेऽर्थे शत्रुश्रीप्रवेशः कीर्तिनिर्गमनस्य हेतुरिति भिन्नकालयोस्तुल्यकालत्वं निबद्धम् । उत्तरत्र तु माननिवृत्तिः स्मरशरप्रकिरणकार्येति तयोरुपपन्नं पौर्वापर्यं व्यत्ययेन निर्दिष्टमित्यतिशयोक्तिः । कार्यस्य चाशुभावाख्यो विशेषः प्रतिपाद्यते ।

तयोर्विभिन्नदेशत्वेऽसंगतिः ॥४४॥

तयोरिति कार्यकारणयोः । यद्देशमेव कारणं, तद्देशमेवकार्यं दृष्टम् । न हि महानसस्थो वह्निः पर्वतदेशस्थं धूमं जनयति । यदा त्वन्यदेशस्थं कारणमन्यदेशस्थं च कार्यमुपनिबध्यते, तदोचितसंगतिनिवृत्तेरसंगत्याख्योऽलंकारः । स च विरोधिकार्यकारणभावप्रस्तावादिह लक्ष्यते । यथा—

प्रायः पथ्यपराङ्मुखा विषयिणो भूपा भवन्त्यात्मना
निर्दोषान्सचिवान्भजत्यतिमहांल्लोकापवादज्वरः ।
धन्याः श्लाघ्यगुणास्त एव विपिने संतोषभाजः परं
बाह्योऽयं वरमेव सेवकजनो धिक्सर्वथा मन्त्रिणः ॥

पथि पथीति । आभा प्रभा । लासको[1] नर्तकः । नरि नरि पुंसि पुंसि[2] । अत्र सायककिरणकार्यभूता मान[3]निवृत्तिः प्राक् सिद्धत्वेनोक्ता । उभयत्र योजयति[4]—**पूर्वत्रेत्यादि** । प्रौढोक्तिनिर्मित[5]मिन्द्रजालात्मकं व्यङ्ग्यम् । विशेषमाह—**कार्यस्य चेति**[6] ।

कार्यकारणयोर्यौ[7] तु कालसाम्यविपर्ययौ ।
अन्या त्वतिशयोक्तिस्सा विरोधांशोपजीवनात् ॥

असङ्गत्यै सूत्रम्—**तयोर्वि[8]भिन्नदेशत्वेऽसङ्गतिः** । व्याचष्टे—**तयोरिति** । **उचितेति**[9] । समदेशत्वमुचिता सङ्गतिः । असङ्गतिमाह—**विरोधीति** । **प्रायः पथ्येति**[10] । प्रायेण भूपाः स्वतो हितपराङ्मुखा विषयाक्रान्ता भवन्ति । लोकापवादस्तु निर्दोषान्

---

1. Omits ला D. लासकौ 2. H. पुंसि उभयत्र 3 A's alt. C. मनने नि D. मानन हि वृ 4. D repeats जयति 5. E. र्मित इ 6. A. C. F. G. त्विति 7. A. योस्तु स्तः का C. H. योस्तुकाल 8. A. C. विरुद्ध F. तयोरिति व्या 9. A. C. चिन्तेति 10. A. पत्ये

अथ पथ्यपराङ्मुखत्वमुपालम्भविषयत्वस्य भिन्नदेशहेतुरित्यसङ्गतिः।
एवं—

सा बाला वयमप्रगल्भवचसः सा स्त्री वयं कातराः
सा पीनोन्नतिमत्पयोधरभरं धत्ते सखेदा वयम्।
सा क्लान्ता जघनस्थलेन गुरुणा गन्तुं न शक्ता वयं
दोषैरन्यसमाश्रितैरपटवो जाताः स्म इत्यद्भुतम्॥

इत्यत्र ज्ञेयम्। अत्र बाल्यनिमित्तमप्रगल्भवचनत्वमन्यदन्यच्च स्मरनिमित्तकमित्यनयोरभेदाध्यवसायः। एवमन्यत्र ज्ञेयम्।

विरूपकार्यानर्थयोरुत्पत्तिर्विरूपसङ्घटना च विषमम् ॥४५॥

विरोधप्रस्तावेनेह लक्षणम्। तत्र कारणगुणप्रक्रमेण कार्यमुत्पद्यत इति प्रसिद्धौ यद्विरूपं कार्यमुत्पद्यमानं दृश्यते तदेकं विषमम्। तथा कश्चिदर्थं साधयितुमुद्यतस्य न केवलं तस्यार्थस्याप्रतिलम्भो, यावदनर्थप्राप्तिरपीति द्वितीयं विषमम्। अत्यन्ताननुरूपसङ्घटनयोर्विरूपयोश्च सङ्घटना तृतीयं विषमम्। अननुरूपसंसर्गो हि विषमम्। क्रमेण यथा—

सद्यः करस्पर्शमवाप्य चित्रं रणे रणे यस्य कृपाणलेखा।
तमालनीला शरदिन्दुपाण्डु यशस्त्रिलोकाभरणं प्रसूते॥
तीर्थान्तरेषु मलपङ्कवतीर्विहाय दिव्यास्तनूस्तनुभृतः सहसा लभन्ते।

सचिवानेति। विपिने सन्तोष[1]भाजो मुनयः[2]। यद्वा[3] बाह्यो[4] मन्त्रा[5]नधिकृतस्सेवक[6]जनो [7]वरं मन्त्रिणस्तु [8]धिक्। योजयति—**अत्रेति**। लोकापवादस्य[9] पथ्यविमुखत्वं विभिन्नाश्रयो हेतुः[10]। इत्थं वैचित्र्यान्तरेऽपि दर्शयति—**एवमिति**। **सा बालेति**। योजयति—**अत्र चेत्यादि**[11]। निगमयति—**एवमिति**[12]। अन्यत्र विच्छित्त्यन्तरे।

कार्यकारणयोर्भिन्नदेशत्वे स्यादसङ्गतिः[13]।
अभेदाध्यवसायादि विच्छित्त्या दृश्यते च सा॥

विषमार्थं सूत्रम्—**विरूप[14]कार्यानर्थयोरुत्पत्ति[15]र्विरूपसङ्घटना च विषमम्[16]**। कारणविरूप[17]कार्योत्पत्तिरेकं, अनर्थोत्पत्तिरन्यत् अननुरूपयोः संघटना तृतीयमिति त्रिधा विषमम्[18] [19]सङ्गतिः—**विरोधेति**। व्याचष्टे—**तत्र कारणेति**। निर्वक्ति—**अननुरूपेति**। **सद्य इति**। करस्पर्शः पाणिग्रहः। नीलायाः पाण्डुरूपं कार्यम्।

तीर्थेति[20]। तीर्थान्तरेषु [21]पातकपङ्किलाः[22] तनूर्विहाय दिव्यास्तनूर्लभन्ते।

---

1. D. तोऽपि 2. H. मुनयः लोकाप 3. C. यथा 4. A. C. बाह्ये 5. A. मात्रानधि C. मात्रोनधि 6. D. सेवज 7. E. G. परः 8. A's alt. C. अधिकं 9. H. वादस्तु 10. H. हेतुः त्र्यान्त 11. च omitted in A. C. 12. H. इति कार्य 13. सङ्ग्रहः 14. F. रूपेति 15. A. C. पत्तिर्वा वि 16. H. षमं विरूप 17. C. विरुद्धपकार्यो 18. D. विषमसंग 19. A. C. H. सन्तं सुतं वि 20. A. C. omit इति 21. A. C. उपपात 22. A. पङ्किलान् तु पुनर्विहा पङ्किलास्तु लभ

वाराणसि ! त्वयि तु मुक्तकलेबराणां लाभोऽस्तु मूलमपि यात्यपुनर्भवाय ।।

अरण्यानी क्वेयं धृतकनकसूत्रः क्व स मृगः
क्व मुक्ताहारोऽयं क्व च स पतगः क्वेयमबला ।
क्व तत्कन्यारत्नं ललितमहिभर्तुः क्व च वयं
स्वमाकूतं धाता किमपि निभृतं पल्लवयति ।।

अत्र कृष्णवर्णाच्छुक्लवर्णोत्पत्तिः, कलेबरात्यन्तापहारलक्षणानर्थान्तरोत्पत्तिरिति, अत्यन्ताननुरूपाणां चारण्यान्यादीनां परस्परसङ्घटनं क्रमेण मन्तव्यम् । केवलमनर्थोत्पत्तिरत्र व्याजस्तुतिपर्यवसायिनीति शुद्धोदाहरणमभ्यूह्यम् ।

तद्विपर्ययः समम् ॥४६॥

विषमवैधर्म्यादिह प्रस्तावः । यद्यपि विषमस्य भेदत्रयमुक्तं, तथापि तच्छब्देन संभवादन्त्यो भेदः परामृष्यते । पूर्वभेदद्वयविपर्ययस्यानलङ्कारत्वात् । अन्त्यभेदविपर्ययस्तु चारुत्वात्समाख्योऽलङ्कारः । स चाभिरूपानभिरूपविषयत्वेन द्विविधः । आद्यो यथा—

वाराणसि[1] ! त्वयि तु त्यक्ततनूनां दिव्यतनुलाभस्तावदास्तां मूलं[2] प्राचीना[3] तनुरप्यपुनर्लाभाय याति[4] । अत्र मूलनाशलक्षणानर्थोत्पत्तिः ।

अरण्यानीति । आकूतं हृदयम् । निभृतं [5]गूढं पल्लवयति प्रकाशयति । अत्रारण्या[6]न्यादीनां विरूपाणां असङ्घटनी[7]यानां सङ्घटना । त्रिष्वपि योजयति—**अत्र कृष्ण[8]त्यादि** । ननु मध्यमोदाहरणे व्याजस्तुतिपर्यवसानम् इत्यत आह—**केवलमिति** । स्तुतिनिन्दा[9]छायापरित्यागे शुद्धं [10]सुज्ञातत्वादभ्यूहितुं शक्यम् ।

विरूपानर्थयोर्हेतोरुत्पत्तिर्विषमं मतम् ।
तथा [11]विरूपघटना तेनेदं त्रिप्रभेदकम् ॥

[12]समार्थं सूत्रम्—**तद्विपर्यय[13]स्समम्**[14] । तृतीयभेदापेक्षया विषमविपर्ययस्समम् । सङ्गतिपुरस्कारेण व्याचष्टे—**विषमेत्यादि** । **अनलङ्कारत्वा[15]दिति** । सरूपकार्यस्यार्थस्योत्पत्तौ न हि विच्छित्तिः । [16]द्वैविध्यमाह—**स चेति**[17] । स[18]चान्त्यो भेदः ।

---

1. A. C. णासीत्यक्त D. णासि त्य 2. A. अलं 3. D. प्राचीन 4. A. C. F. G. H. भवति 5. A's alt. C. H. दृढं 6. A. C. F. G. H. I. अरण्यादी 7. C. घटनयानां 8. H. कृष्णे विरूप 9. A. C. निन्दयोश्च परि 10. D. संज्ञानत्वा A सुज्ञानपदभ्यू C. सुज्ञानादभ्यू 11. H. त्रिरूप 12. Omitted in A. C. 13. F. पर्ययेति 14. D. समं भे 15. A. C. F. G. H. omit इति 16. D. वैविध्यं 17. H. स चेति योजयति 18. D. चाभेदः

त्वमेवं सौन्दर्या स च रुचिरतायाः परिचितः
कलानां सीमानं परमिह युवामेव भजथः ।
अयि द्वन्द्वं दिष्टचा तदिह सुभगे ! संवदति वा-
मतः शेषं यत्स्याञ्जितमिह तदानीं गुणितया ॥

अत्राभिरूपस्यैव नायकयुगलस्योचितं सङ्घटनमाशंसितम् । द्वितीयो यथा—

चित्रं चित्रं बत बत महच्चित्रमेतद्विचित्रं
जातो दैवादुचितरचनासंविधाता विधाता ।
यन्निम्बानां परिणतफलस्फातिरास्वादनीया
यच्चैतस्याः कवलनकलाकोविदः काकलोकः ॥

अत्रानभिरूपाणां निम्बानां काकानां च समागमः प्रशंसितः । आनुरूप्यात्समत्वव्यपदेशः ।

विरोधमूलं विचित्रं लक्षयति—

स्वविपरीतफलनिष्पत्तये प्रयत्नो विचित्रम् ॥४७॥

यस्य हेतोर्यत्फलं, तस्य यदा तद्विपरीतं भवति, तदा तद्विपरीतफल-

---

त्वमेवमिति । त्वमेवंविधसौन्द[1]र्या[2] स च रुचिरतायाः[3] परिचितः युवां कला[4]-भिज्ञौ च । शेषं पाणिग्रहणम् । तदा गुणत्वं[5] विश्वोत्कर्षी स्यात् । योजयति—अत्रेति । नायकेत्येकशेषः नायको नायिका चेति ।

चित्रं[6] चित्रमिति । स्फा[7]तिः स्फीतता । कोविदो निपुणः । [8]योजयति—अत्रेति । द्वयोरन[9]भिरूपत्वं आनुरूप्यम् ।

सरूपयोस्संघटना समालङ्कार इष्यते ।
श्लाघ्या श्लाघ्यत्वयोगेन द्वौ[10]भेदावस्य सङ्ग[11]तौ ॥

विचित्राय[12] सङ्गतिः[13]—विरोधेति । सूत्रम्—स्वविपरीतफल[14] निष्पत्तये प्रयत्नो विचित्रम्[15] । विपरीतफलाय प्रयत्नो विचित्रम् । व्याचष्टे—[16]यस्येति[17] । तद्वि[18]परीतेति । तस्य विपरीतफलस्येत्यर्थः ।

---

1. D. सौकर्या 2. C. यदि च 3. A. C. D. F. तायां 4. D. कालाभि 5. A. C. F. वत्त्वमपि स्यात् तर्हि स्यात् यो 6. A. C. G. चित्राचि 7. A. C. स्वीति स्वातता 8. H. त्रिरूपं यो 9. A. C. अनल्परूप D. अभिरू 10. D. यौ 11. a. b. c. संमतौ 12. A. E. H. विचित्रार्थसं A's alt. C. विचित्रात्र 13. A. C. संगतिं बोधयति सूत्रं 14. F. फलाय प्र 15. A. विचित्रः व्याचष्टे 16. H. यस्त्विति 17. C. इति विषमे तु व्यत्ययः भेदा 18. A. C. भेदाद्विप G. तदा तद्विप

निष्पत्त्यर्थं कस्यचित्प्रयत्न उत्साहो विचित्रालङ्कारः । आश्चर्यप्रतीतिहेतुत्वात् । न चायं प्रथमो विषमालङ्कारप्रकारः । स्वनिषेधमुखेन वैपरीत्यप्रतीतेः । विपरीतप्रतीत्या तु स्वनिषेधस्तस्य विषयः । यथा—'तमालनीला शरदिन्दुपाण्डु' इत्यादौ । इह त्वन्यथा प्रतीतिः । यथा—

घेत्तुं मुच्चइ अहरो अण्णंतो वलइ पेक्खिउं दिट्ठी ।
घडिदुं विहडंति भुआ रआअ सुरअम्मि वीसामो ।।

अत्र मोचनवलनविघटनविश्रमाणां यथाक्रमं ग्रहणप्रेक्षणघटनरमणानि विपरीतफलानि प्रयत्नविषयत्वेन निबद्धानि । यथा वा—

उन्नत्यै नमति प्रभुं प्रभुगृहान्द्रष्टुं बहिस्तिष्ठति
स्वद्रव्यव्ययमातनोति जडधीरागामिवित्ताशया ।
प्राणान्प्राणितुमेव मुञ्चति रणे क्लिश्नाति भोगेच्छया
सर्वं तद्विपरीतमेव कुरुते तृष्णान्धदृक्सेवकः ।।

अत्र विपरीतफलनिष्पादनप्रयत्नः सुज्ञानः ।

आश्रयाश्रयिणोरनानुरूप्यमधिकम् ।।४८।।

विरोधप्रस्तावादिह निर्देशः । अनानुरूप्यस्य विरोधोत्थापकत्वात् ।

निर्वक्ति—**आश्चर्येति** । विषम[1]प्रकाराद्वैलक्षण्या[2]याह—**न चायमिति** । इह हि स्वनिषेधो वैपरीत्यं[3] गमयति । विषमे तु व्यत्ययः । उदाहरणतो [4]द्रढयति—**तमाले[5]ति** । इह[6] त्वन्यथा—[7]**घेत्तुमिति** ।

([8]ग्रहीतुं) मुच्यतेऽध[9]रोऽन्यतो वल[10]ति ([11]प्रेक्षितुं[12]) दृष्टिः ।
घटितुं विघ[13]टेते भुजौ (रताय[14]सुरतेषु) विश्रमः ।।

योजयति—**अत्रेत्यादि** । **उन्नत्या इति** । भोगेच्छया[15] भोक्तुमित्यर्थः । योजनं स्फुटमित्याह—**अत्रेति** ।

प्रयत्नस्तु विचित्रं[16] स्याद्विपरीतफलाप्तये ।
निषेधतो[17] वैपरीत्याद्विषमालङ्कृतेर्भिदा ।।

अधिकार्थं सूत्रम्—**आश्रयाश्रयिणोरना[18]नुरूप्यमधिकम्[19]** ।। आश्रयाश्रयिणोरयथात्वम् अधिकम् । [20]ससङ्गतिकं व्याचष्टे—**विरोधेत्यादि** । आश्रयाधिक्यात्[21] आश्रय्या-

---

1. H. विषय 2. A. C. H. ण्यं 3. C. रीत्यां 4. A. C. दृढय 5. H. इति प्रयत्नस्तु 6. A. अत्र अन्य F. omits इह तु 7. A. हयाघेन्तुकुमिति C. ए या घेतुकुमिति F. छेत्तुं 8. All mss. गृहीतुं 9. D. अधरं 10. A. C. य दृष्टुं ह 11. D. E. F. G. वलते: 12. All mss. दृष्टुं 13. A. C. घटयते F. घटते 14. All read रतस्य सुरते वि 15. D. भोगे यो भोक्तुं 16. A's alt. विचित्रः 17. C. D. विशेषतो 18. C. आनुरू H. अयथात्वं 19. A. C. कम् ससङ्गति 20. D. सङ्गीतकं व्या 21. C. H. क्यात् द्वैवि

तत्रानानुरूप्यमाश्रयस्य वैपुल्येऽप्याश्रितस्य परिमितत्वाद्वा, आश्रितस्य वैपुल्येऽप्याश्रयस्य परिमितत्वाद्वा स्यात् । क्रमेण यथा—

द्यौरत्र क्वचिदाश्रिता प्रविततं पातालमत्र क्वचि-
त्क्वाप्यत्रैव धराधराधरजलाधारावधिर्वर्तते ।
स्फीतः स्फीतमहो नभः कियदिदं यस्येत्थमेवंविधै-
र्दूरे पूरणमस्तु शून्यमिति यन्नामापि नास्तं गतम् ।।

दोर्दण्डाञ्चितचन्द्रशेखरधनुर्दण्डावभङ्गोद्यत-
ष्टङ्कारध्वनिरार्यबालचरितप्रस्तावनाडिण्डिमः ।
द्राक्पर्यस्तकपालसंपुटलसद्ब्रह्माण्डभाण्डोदर-
भ्राम्यत्पिण्डितचण्डिमा कथमहो नाद्यापि विश्राम्यति ।।

पूर्वत्र नभस आश्रयस्य वैपुल्येऽप्याश्रितानां द्युप्रभृतीनां पारिमित्यं चारुत्वहेतुः । उत्तरत्र तु टङ्कारध्वनेराश्रितस्य महत्त्वेऽपि ब्रह्माण्डस्याश्रयस्य स्तोकत्वम् ।

परस्परं क्रियाजननेऽन्योन्यम् ॥४६॥

इहापि विरोधप्रस्ताव एव निर्देशकारणम् । परस्परजननस्य विरुद्ध-

धिक्याच्च द्वैविध्यमाह—तत्रेत्यादि[1] ।

द्यौरत्रेति । द्यौस्स्वर्गः, धरा पृथ्वी, जलाधारास्समुद्रास्त[2]दवधिरिति [3]निश्शेषत्वोक्तिः अहो कियत्, इयत्तैव नास्तीत्यर्थः । पूरणं[4] दूरेऽस्तु का पूरणकतयेत्यर्थः । यावता[5] शून्यमिति नाम्नोऽपि नास्ति गतिः काचित् ।

दोर्दण्डेति – आञ्चि[6]तं आया[7]मितम्[8] । नत्वञ्चितमिति पाठः । गतिपूजनयोरनुपयोगात् । [9]आञ्चिराया[10]मार्थो धातुः । भ्राम्य[11]त्पिण्डितचण्डिमा च । योजयति—**पूर्वत्रेति** ।

अना[12]नुरूप्यमधिकमाश्रयाश्रयिणोर्मतम् ।
आश्रयाश्रयिवैपुल्यवशतो द्विप्रभेदकम्[13] ॥

अन्यो[14]न्यार्थं सूत्रम्—**परस्परं[15] क्रियाजननेऽन्योन्यम्** । क्रिया[16]व्यतीहारेऽन्योन्यालङ्कारः । ससङ्गतिकं व्याचष्टे—**इहापीत्यादि[17]** । **न स्व[18]रूपेति** । स्व[19]रूपापेक्षया परस्पर-

---

1. H. आदि अना नु 2. D. तदविरिति 3. A. C. D. F. विशेष 4. A. C. पूरणाकृत 5. A. C. D. यावत्यस्तास्तव्यमिति ना 6. A. C. अञ्चि 7. Except F. all mss. आयमि 8. F. आहि आयाम इति धातुः न त्व 9. A. C. अञ्जि 10. C. आयामर्थो 11. C. म्यपि D. भ्राम्यं च E. भ्राम्यं श्च 12. C. अननु 13. C. भेदकः 14. C. अतोऽन्या 15. F. स्परं इति 16. E. G. व्यति 17. H. आदि क्रियामुख 18. A. रूप स्वरूपा 19. C. रूपो स्वरू

त्वात् । क्रियाद्वारकं यत्र परस्परोत्पादकत्वं, न स्वरूपनिबन्धनं, स्वरूपस्य तथात्वोक्तिविरोधात् तत्रान्योन्यालङ्कारः । यथा—

कण्ठस्य तस्याः स्तनबन्धुरस्य मुक्ताकलापस्य च निस्तलस्य ।
अन्योन्यशोभाजननाद्बभूव साधारणो भूषणभूष्यभावः ॥

अत्र शोभाक्रियामुखकं परस्परजननम् ।

अनाधारमाधेयमेकमनेकगोचरमशक्यवस्त्वन्तरकरणं च विशेषः ॥५०॥

इहाधारमन्तरेणाधेयं न वर्तत इति स्थितावपि यस्तत्परिहारेणाधेयस्योपनिबन्धः, स एको विशेषः । यच्चैकं वस्तु परिमितं युगपदनेकत्र वर्तमानं क्रियते स द्वितीयो विशेषः । यच्च किंचिदारभमाणस्यासंभाव्यवस्त्वन्तरकरणं स तृतीयो विशेषः । आनुरूप्यपरिहाररूपविरोधप्रस्तावादिहोक्तिः । क्रमेण यथा—

दिवमप्युपयातानामाकल्पमनल्पगुणगणा येषाम् ।
रमयन्ति जगन्ति गिरः कथमिव कवयो न ते वन्द्याः ॥

प्रासादे सा पथि पथि च सा पृष्ठतः सा पुरः सा
पर्यङ्के सा दिशि दिशि च सा तद्वियोगाकुलस्य ।
हंहो चेतः प्रकृतिरपरा नास्ति ते कापि सा सा
सा सा सा सा जगति सकले कोऽयमद्वैतवादः ॥

निमेषमपि यद्येकं क्षीणदोषे करिष्यसि ।
पदं चित्ते तदा शम्भो ! किं न संपादयिष्यसि ॥

जननस्यासंभवेन[1] सम्यग्विरोधित्वात् क्रियाद्वारकमेवेह परस्परजननम् । **कण्ठस्येति** । तनुत्वरम्यत्वे देवीकण्ठस्य [2]आत्मोत्कृष्ट[3]त्वे सामग्री मुक्ताकलापस्य च वृत्तत्वात् निस्तलत्वमामोचनीयत्वे । इत्थं द्वयोरपि सम्पन्नसामग्रीकत्वात् भूषणभूष्यभावस्साधारणः[4] । योजयति—**अत्र शोभेति** । क्रियामुख[5]कं क्रियाद्वारकम् ।

क्रियाजननमन्योन्य[6]मन्योन्यालङ्कृतिर्मता ।

विशेषार्थं सूत्रम्—**अनाधार[7]माधेयमेकमनेकगोचरमशक्यवस्त्वन्तरकरणं च विशेषः[8]** । **दिवमपीति** । दिवमुपयातानामपि गिरो रमयन्ति जगन्तीत्यनाधाराधेयता[9] । [10]**प्रासादेति**—अत्रैकस्यानेकगोचरता[11] । **निमेषमपीति** । अत्र सर्वसम्पादनात्मनोऽशक्य-

---

1. D. भवेन न 2. E. G. आमोक्तृत्वे 3. D. omits ष्ट 4. A. F. साधारणं 5. A. C. मखं क्रियाजननं 6. C. योन्यालंकृ 7. F. धारेति 8. A. C. F. H. शेषः गिरो D. शेषः दिवमुप 9. H. धेयत्वात् प्र 10. A. C. H. प्रसादे सति 11. H. चरता व्याघातार्थं (p. 167)

अत्र कवीनामाधाराणामभावेऽप्याधेयानां गिरामवस्थितिरन्यत्रभावो विषयार्थ इति विषयत्वेन तेषामाधारत्वात् । एकस्या एव योषितः प्रासादादौ युगपदवस्थानं, तथा चित्तविषये पदकरणे प्रस्तुतेऽपि भावि लोकोत्तरवस्तुसंपादनं क्रमेण ज्ञेयम् ।

यथा साधितस्य तथैवान्येनान्यथाकरणं व्याघातः ॥५१॥

कश्चिदुपायविशेषमवलम्ब्य केनचिद्यन्निष्पादितं वस्तु तत्ततोऽन्येन केनचित्तत्प्रतिद्वन्द्विना तेनैवोपायविशेषेण यदन्यथा क्रियते स निष्पादितवस्तुव्याहतिहेतुत्वाद्व्याघातः । यथा—

दृशा दग्धं मनसिजं जीवयन्ति दृशैव याः ।
विरूपाक्षस्य जयिनीस्ताः स्तुमश्चारुलोचनाः ॥

अत्र दृष्टिलक्षणेनोपायेन स्मरस्य हरेण दाहविषयत्वं निष्पादितम् मृगनयनाभिः पुनस्तेनैवोपायेन तस्य जीवनीयत्वं क्रियते । तच्च दाहविषयत्वस्य प्रतिपक्षभूतम् । तेन व्याघाताख्योऽयमलङ्कारः । सोऽपि व्यतिरेकनिमित्तत्वेनात्रोक्तः । विरूपाक्षस्येति चारुलोचना इति च व्यतिरेकगर्भावेव वाचकौ । जयिनीरिति व्यतिरेकोक्तिः । पूर्ववदिह प्रकरणस्य लक्षणम् । प्रकारान्तरेणाप्ययं भवतीत्याह—

वस्त्वन्तरस्य[1] करणम् । त्रिष्वपि योजयति—**अत्र कवीनामिति** । येषाम् इति षष्ठीनिर्देशेऽपि न[2] गीर्भिस्सह सम्बन्धमात्रम्[3], अपि तु विशिष्टः[4] सम्बन्ध इत्याह—**अन्य[5]त्रेति** । **भावि लोकोत्तरेति** । किंशब्देन[6] नञा चाक्षिप्तोऽर्थः ।

अनाधारादिभेदेन विशेषोऽपि त्रिधा मतः ।

व्याघातार्थं सूत्रम्—**यथा[7] साधितस्य तथैवान्येनान्यथा[8]करणं व्याघातः[9]** । एकेन यद्यथा साधितं तस्य तथैवान्यथीकरणं व्याघातः । व्याचष्टे—[10]**कंचिदिति** । **दृशेति** । दृशा दग्धस्य दृशैव जीवनाच्चारुलोचना विरूपाक्षस्य जयिन्यः । योजयति—**अत्र दृष्टी[11]ति** । **जीव[12]नीयत्वमिति** । प्राणितव्यं[13] जीवनमित्यर्थः । अयं चात्र व्यतिरेकहेतुरित्याह—**सोऽपीति** । विरूपाक्षचारुलोचनाशब्दौ हि[14] व्यतिरेकगर्भौ । जयेन च व्यतिरेक उक्तः । सङ्गतिमाह—**पूर्ववदिति** । अनानुरूप्यं[15] इह लक्षणं प्रकरणस्य ।

---

1. D. करणस्य कर 2. Omitted in all except E. 3. A. D. E. मात्र 4. A. C. विशिष्टं 5. C. E. अनन्यत्र D. अन्यथेति 6. A. नान्नचाक्षि C. नाक्षिप्तो 7. F. यथेति 8. E. अन्यथी 9. A. C. घातः व्याचष्टे 10. A. C. D. F. किञ्चि 11. H. इति. बाल इतीति (P. 168) 12. A. C. जीवयन्तीति F. जयनीयत्वं 13. A. C. F. तव्यत्वमुक्तं जी F. तव्यत्व जी 14. Omitted in D. 15. C. रूप्यं लक्ष

सौकर्येण कार्यविरुद्धक्रिया च ॥५२॥

व्याघात इत्येव । किञ्चित्कार्यं निष्पादयितुं संभाव्यमानः कारणविशेषस्तत्कार्यविरुद्धनिष्पादकत्वेन यत्समर्थ्यते सोऽपि संभाव्यमानकार्यव्याहतिनिबन्धनत्वाद्व्याघातः । कार्यविरुद्धकार्यनिष्पत्तिश्च कार्यापेक्षया सुकरा । तस्य कारणस्यात्यन्तं तदानुगुण्यात् । न त्वत्र कार्याभिमतस्य कार्यत्वाभावः । तद्विरुद्धस्यात्र सौकर्येण कार्यत्वात् । अत एव द्वितीयाद्विषमाद्भेदः । तत्र हि कार्यस्यानुत्पत्तिरनर्थस्य चोद्गमनम् । इह तु कार्यमकार्यमेव न भवति । तद्विरुद्धस्यानर्थस्य व्यतिरेकिणोऽप्यत्र सुष्ठुकार्यत्वात् । यथा हर्षचरिते राज्यवर्धनं प्रति श्रीहर्षोक्तिषु—

"यदि बाल इति सुतरामपरित्याज्योऽस्मि । रक्षणीय इति, भवद्भुजपञ्जरमेव रक्षास्थानम्" इत्यादि ।

अत्र राज्यवर्धनेन श्रीहर्षप्रस्थाने कार्ये बाल्यरक्षणीयत्वादिकारणत्वेन यत्संभावितं तत्प्रत्युताप्रस्थानकारणत्वेन सुकरतया श्रीहर्षेण राज्यवर्धनस्य समर्थितमिति व्याघातोऽलङ्कारः ।

एवं विरोधमूलानलङ्कारान्निर्णीय शृङ्खलाबन्धोपचिता अलंकारा लक्ष्यन्ते । तत्र—

यथा साधकमेकेन तथैवा[1]न्येन बाध[2]नम् ।
व्याघातोऽथ [3]विरुद्धस्य सौकर्येण क्रिया तथा ॥

तत्र सूत्रान्तरम्—**सौकर्येण कार्य[4]विरुद्धक्रिया च ।** [5]कार्यापेक्षया सुक[6]रस्य विरुद्धस्य करणं कार्यव्याहतिहेतुरिति व्याघातान्तरम् । व्याचष्टे—**व्याघात इत्यादि ।** अयं [7]लक्ष्यपदानुषङ्गः । कार्यार्थं संभावितस्य कारणविशेषस्य तद्विरुद्ध[8]निष्पादनं व्याघातः । विरुद्धनिष्पत्तिश्च सुकरा कारणस्य विशिष्टा[9]नुगुण्यात् । इत्थं च सति अनर्थोत्पत्तिलक्षणाद्विषमात्[10] भेद इत्याह—**न [11]त्वत्रेति ।** न ह्यत्र कार्यम[12]कार्यं किन्तु तद्विरुद्धं [13]सुकरं कार्यम् । अतो द्वितीयविषमाद्भेदः । यतस्तत्र कार्यम[14]कार्यं[15] विरुद्धस्तु अनर्थः । इहोभयमपि कार्यमिति ।

यदि[16] बाल इतीति । अत्र[17] बाल्यं रक्ष्य[18]त्वं चाप्रस्थाने[19] हेतु[20]त्वेन सम्भावितं प्रत्युत[21] सौकर्येण प्रस्थानं साधयति । सङ्गत्यन्तरायाह—**एवमिति ।**

---

1. A. C. F. अन्यस्य 2. E. बोध A. B. C. साधनं 3. A's alt. विरोधस्य 4. D. repeats कार्य 5. C. व्याघात इत्येव कार्या 6. C. संकर 7. A. C. लक्षण 8. C. रुद्धा 9. A. शिष्ट्या D. शिष्टस्यानु 10. A. G. अत्र को भेद C. अत्र भ 11. A. नन्वत्रे 12. D. कार्याकार्यमका 13. A. संकरं 14. C. कार्यं का 15. A. C. F. अकार्यं 16. Omitted in A. C. D. F. 17. A. E. इह 18. A. C. D. F. रक्ष्यत्वे 19. Except H all read स्थाने च 20. A. हेतुमत्त्वेन 21. H. प्रस्तुत

पूर्वपूर्वस्योत्तरोत्तरहेतुत्वे कारणमाला ॥५३॥

यदा पूर्वं पूर्वं क्रमेणोत्तरमुत्तरं प्रति हेतुत्वं भजते तदा कारणमालाख्योऽयमलङ्कारः । यथा—

जितेन्द्रियत्वं विनयस्य कारणं गुणप्रकर्षो विनयादवाप्यते ।
गुणप्रकर्षेण जनोऽनुरज्यते जनानुरागप्रभवा हि संपदः ॥

कार्यकारणक्रम एवात्र चारुत्वहेतुः ।

यथापूर्वं परस्य विशेषणतया स्थापनापोहने एकावली ॥५४॥

यदि पूर्वंपूर्वं प्रति क्रमेण परं परं विशेषणत्वमनुभवति स एकावल्यलङ्कारः । विशेषणं च स्थापनेन निवर्तनेन वा । स्थापनेन यथा—

पुराणि यस्यां सवराङ्गनानि वराङ्गना रूपपुरस्कृताङ्ग्यः ।
रूपं समुन्मीलितसद्विलासमस्त्रं विलासाः कुसुमायुधस्य ॥

अत्र वराङ्गनाः पुराणां विशेषणं स्थापनीयत्वेन स्थितम् । एवं वराङ्गनानां रूपमित्यादि ज्ञेयम् । निवर्तनेन यथा—

न तज्जलं यन्न सुचारुपङ्कजं न पङ्कजं तद् यदलीनषट्पदम् ।
न षट्पदोऽसौ न जुगुञ्ज यः कलं न गुञ्जितं तन्न जहार यन्मनः ॥

तत्र कारणमालार्थं सूत्रम्—[1]पूर्वपूर्वस्योत्तरोत्तरहेतु[2]त्वे कारणमाला[3] । **यदा पूर्वमित्यादि । जितेन्द्रिय[4]त्वमिति ।** जितेन्द्रियत्वाद्विनयः, विनयाद्गुणप्रकर्षः ततो जनानुरागः । अत्र[5] सारादिविच्छित्त्यन्तरसंभवेऽपि नालङ्कारान्तर[6]मित्याह[7]—**कार्यकारणेति ।**

कार्यं कारणमालायां[8] प्राचः[9] प्राचः परं परम् ॥

एकावल्यै सूत्रम् —**यथा[10]पूर्वं परस्य विशेषण[11]तया स्थापनापोहने एकावली[12] ।** [13]यदि पूर्व[14]पूर्वस्य परं परं विशेषणतया स्थाप्यते,[15] सैका[16] एकावली यच्चापोह्यते सान्या[17] । **पुराणीति ।** अत्र पुराणां वराङ्गनास्तासां रूपं तस्य[18] विलासः स[19] कुसुमायुधस्य विशेषणतया स्थाप्यते । योजयति—**अत्र वराङ्गना इति । न तज्जलमिति ।** अत्र जलादेः [20]पूर्वं पूर्वस्य पङ्कजाद्युत्तरोत्तरं विशेषणमपोह्यतया [21]स्थितम् ।

---

1. F. पूर्वेति 2. E. हेतुत्व 3. D. मालां 4. A. C. यत्वाद्विन 5. Omitted in D. 6. D. अलंकारं 7. D. इत्यत आह 8. a. b. c. मालायाः 9. D. प्राच प्राचं H. वाचः वाचः 10. F. यथेति 11. D. शेषणा उपाहनतया स्था 12. D. एकावलीः 13. A. D. F. यदा 14. D. F. G. परपरस्य 15. D. प्यते । योजयति F. प्यते अस्य विलासः 16. A. C. G. सैकावली 17. H. अन्या । एकावल्यां 18. F. अस्य 19. Omitted in C. 20. A. C.F. पूर्वस्य 21. Except E. all read उपस्थित.

अत्र जलस्य सुचारुपङ्कजत्वं विशेषणम् अपोह्यतया स्थितम्। एवं पङ्कजादीनामलीनषट्पदत्वादि ज्ञेयम्।

पूर्वपूर्वस्योत्तरगुणावहत्वे मालादीपकम् ॥५५॥

उत्तरोत्तरस्य पूर्वं पूर्वं प्रत्युत्कर्षहेतुत्वे एकावली। पूर्वस्य पूर्वस्योत्तरोत्तरोत्कर्षनिबन्धनत्वे तु मालादीपकम्। मालात्वेन चारुत्वविशेषमाश्रित्य दीपकप्रस्तावोल्लङ्घनेनेह लक्षणं कृतम्। गुणावहत्वमुत्कर्षहेतुत्वम्। यथा—

सङ्ग्रामाङ्गणमागतेन भवता चापे समारोपिते
देवाकर्णय* येन येन सहसा यद्यत्समासादितम्।
कोदण्डेन शराः शरैररिशिरस्तेनापि भूमण्डलं
तेन त्वं भवता च कीर्तिरतुला कीर्त्या च लोकत्रयम्॥

अत्र कोदण्डादिभिः क्रमेण शरादीनामुत्कर्षो विहितः। समासादनलक्षणक्रियानिबन्धनं च दीपकं दीपनविषयाणामुत्तरोत्तराभिमतत्वेन कृतम्।

उत्तरोत्तरमुत्कर्षः सारः ॥५६॥

पूर्वपूर्वापेक्षयोत्तरोत्तरस्योत्कर्षनिबन्धनं सारः। यथा—

एकावल्यां यथापूर्वं भेदकं [1]तूत्तरोत्तरम्[2]।
स्थाप्यतेऽपोह्यते चैव तेनेयं द्विविधा मता॥

मालादीपकार्थं सूत्रम्—[3]पूर्वपूर्वस्यो[4]त्तरोत्तरगुणावहत्वे मालादीपकम्। एकावल्यामुत्तरोत्तरस्य पूर्वपूर्वगुणावहत्वम् इह तु व्यत्ययः। व्याचष्टे—[5]उत्तरोत्तरस्येति। प्रस्तावो[6]ल्लङ्घने हेतुमाह—मालात्वेनेति[7]। संग्रामेति। अत्र[8] कोदण्डादेः पूर्वपूर्वस्य शराद्युत्तरोत्तर[9]समासादनं दीपनेन गुणावहत्वम्[10]। व्याचष्टे—अत्र कोदण्डादिभिरिति। मालादीपकमा[11]द्यस्योत्तरोत्तरदीपनम्[12]।

सारार्थं सूत्रम्—[13]उत्तरोत्तरमुत्कर्षस्सारः। व्याचष्टे—पूर्वपूर्वेति[14]। निबन्धनं

---

1. A. C. F. G. चोत्तरो 2. D. त्तरं (विशेषणमपोह्यतया स्थितं) स्था 3. F. पूर्वेति 4. D. omits उत्तर 5. D. E. omit उत्तर 6. A. C. E. स्थानो 7. H. इति मालादीपकं 8. Omitted in A. C. 9. A. C. E. F. त्तरस्य पूर्वपूर्वसमा 10. A. C. E. F. हत्वंव्यत्ययः तद्व्याच 11. D. E. a. b. c. आद्याद्यस्योत्तरदी 12. A. दीपनात् 13. F. उत्तरेति 14. A. C. E. पूर्वस्येति

* This line is read in the T. S. S. edition as "संप्राप्ते परिपन्थियोधनिवहे सांमुख्यमासादिताः". Vidyācakravartin does not help in fixing the reading here. In his Sampradāyaprakā'sinī, he comments on the verse twice (P. 72, 315). In his first explanation there is an evidence of his having accepted the reading देवाकर्णयति The two manuscripts of the Sarvasva that were consulted adopt the reading as in the N. S. ed.

राज्ये सारं वसुधा वसुन्धरायां पुरं पुरे सौधम् ।
सौधे तल्पं तल्पे वराङ्गनानङ्गसर्वस्वम् ॥

अत्र राज्यापेक्षया वसुधायाः सारत्वम्, एवं वसुधापेक्षया तदेकदेशस्य पुरस्येत्यादि योजनीयम् ।

एवं शृङ्खलाविच्छित्त्यालङ्काराः प्रतिपादिताः अधुना तर्कन्यायाश्रयेणालङ्कारद्वयमुच्यते । तत्र—

हेतोर्वाक्यपदार्थत्वे काव्यलिङ्गम् ॥५७॥

यत्र हेतुः कारणरूपो वाक्यार्थगत्या विशेषणद्वारेण वा पदार्थगत्या लिङ्गत्वेन निबध्यते तत्काव्यलिङ्गम् । तर्कवैलक्षण्यार्थं काव्यग्रहणम् । न ह्यत्र व्याप्तिपक्षधर्मतोपसंहारादयः क्रियन्ते । वाक्यार्थगत्या च निबध्यमानो हेतुत्वेनैवोपनिबद्धव्यः, नोपनिबद्धस्य हेतुत्वम् । अन्यथार्थान्तरन्यासान्नास्य भेदः स्यात् । क्रमेण यथा—

यत्त्वन्नेत्रसमानकान्तिसलिले मग्नं तदिन्दीवरं
मेघैरन्तरितः प्रिये ! तव मुखच्छायानुकारी शशी ।

ग्रथनम्[1] । **राज्य इति** । सारमित्यत्र वस्त्वित्यध्याहर्तव्यम् । इतरथा [2]लिङ्गासङ्गतिः । योजयति—**अत्र राज्येति** ।

उत्तरोत्तरमुत्कर्षावहत्वे सार इष्यते ।

सङ्गत्यन्तरायाह—**एवं शृङ्खलेति** । तत्र[3] काव्यलिङ्गार्थं सूत्रम्—**हेतो[4]र्वाक्यपदार्थत्वे[5] काव्यलिङ्गम्** । वाक्यार्थपदार्थरूप[6]हेतौ द्विधा[7] काव्यलिङ्गम् । व्याचष्टे—**यत्र हेतुरिति**[8] । [9]तर्कवैलक्षण्यं दर्शयति—[10]**न ह्यत्रेति** । अनुपाधिकः सम्बन्धो व्याप्तिः । हेतोः [11]पक्षेऽवस्थितिः पक्षधर्मता । उपसंहारो निगमनम् । आदिशब्दादुपन[12]यादिः । वाक्यार्थत्वे विशेषमाह—**वाक्यार्थगत्येति**[13] । अनेन हेतुत्वस्य शाब्दत्वनियम उक्तः । [14]आर्थत्वे अर्थान्तरन्यास[15]प्राप्तिः इत्याह—**अन्यथेति** । अर्थान्तरन्यासे हि अर्थात्प्रकृतसमर्थनम्, इह तु शब्दत[16] इति विभागः ।

यत्त्वन्नेत्रेति । नेत्र[17]रुचिसमानरुच [18]इन्दीवरस्य [19]सलिले निमज्जनम्, मुखच्छायानुका[20]रिणः शशिनो मेघैश्छादनं, गमनानुकारिगतीनां हंसानां पलायनं चेति वाक्यार्थत्रयमेकवाक्यतापन्नायां सादृश्यविनोदा[21]क्षान्तौ हेतुः ।

---

1. C. H. ग्रन्थनं 2. D. लिङ्ग 3. C. अत्र omitted in H. 4. F. हेतोरिति 5. E. अर्थता 6. D. अर्थ अनुरूप C. omits रूप 7. E. द्विविधा 8. H. इति काव्यलिङ्गत्वं (P. 172.) 9. A. तत्र 10. A. अन्यत्र 11. A. C. G. पक्षस्थितिः 12. D. E. F. G. H. I. नयनादिः 13. A. C. D. गतेति F. गम्येति 14. E. अर्थ 15. Except. D. all mss. न्यासत्व 16. A. C. F. शब्दात् 17. A. C. F. G. नेत्रसमानरुचीति इ D. नेत्रसमानरुच इ 18. A's alt. पदस्य स C पद्मस्य 19. C. सलिने 20. D. कारस्य 21. C. नोदात्

येऽपि त्वद्गमनानुसारिगतयस्ते राजहंसा गता-
स्त्वत्साद्दश्यविनोदमात्रमपि मे दैवेन न क्षम्यते ॥

मृगयश्च दर्भाङ्कुरनिर्व्यपेक्षास्तवागतिज्ञं समबोधयन्माम् ।
व्यापारयन्त्यो दिशि दक्षिणस्यामुत्पक्ष्मराजीनि विलोचनानि ॥

पूर्वत्र पादत्रयार्थोऽनेकवाक्यार्थरूपश्चतुर्थपादार्थे हेतुत्वेनोपन्यस्तः । उत्तरत्र तु संबोधने "व्यापारयन्त्यः" इति मृगीविशेषणत्वेनानेकपदार्थो हेतुरुक्तः ।

एवमेकवाक्यार्थपदार्थगतत्वेन काव्यलिङ्गमुदाह्रियते । यथा—

मनीषिताः सन्ति गृहेषु देवतास्तपः क्व वत्से ! क्व च तावकं वपुः ।
पदं सहेत भ्रमरस्य पेलवं शिरीषपुष्पं न पुनः पतत्रिणः ॥

यद्विस्मयस्तिमितमस्तमितान्यभाव-
मानन्दमन्दममृतप्लवनादिवाभूत् ।
तत्सन्निधौ तदधुना हृदयं मदीय-
मङ्गारचुम्बितमिव व्यथमानमास्ते ॥

पूर्वत्र वरप्राप्तिहेतुभूततपोनिषेधस्य "मनीषिताः" इति वाक्यार्थरूपो हेतुर्निर्दिष्टः । उत्तरत्र पुनः "अस्तमितान्यभावम्" इत्यत्र विस्मयस्तिमितमिति विशेषणद्वारेण पदार्थः ।

साध्यसाधननिर्देशोऽनुमानम् ॥५८॥

यत्र शब्दवृत्तेन पक्षधर्मान्वयव्यतिरेकवत्साधनं साध्यप्रतीतये निर्दिश्यते

मृग्य[1] **इति** । [2]दर्भनिर्व्यपेक्षत्व[3]लोचनव्यापारणे[4] पदार्थो[5] संबोधने हेतुः[6] । उभयत्र योजयति—**पूर्वत्रेत्यादि** । अत्र वाक्यार्थपदार्थयोरेकैक[7]हेतुत्वेनोदाजिहीर्षुराह—**एवमेकेति** । **मनीषिता इति** । अत्र तपोनिवारणे गृहेष्वपेक्षितदेवतासद्भावो[8] वाक्यार्थो[9] हेतुः । **यद्वि**[10]**स्मयेति** । अत्रानन्द[11]मन्दत्वे विस्मयस्तिमितत्वं पदार्थो हेतुः । योजयति—**पूर्वत्रेत्यादि** ।

काव्यलिङ्गत्व तु[12] हेतुत्वेनोक्तिर्वाक्यपदार्थयोः ।
[13]नायमर्थान्तरन्यासो हेतो[14]श्शाब्दत्वसंश्रयात् ॥

अनुमानाय सूत्रम्—**साध्य**[15]**साधननिर्देशोऽनुमानम्** । साध्यसिद्धयै[16] साधननिर्देशोऽनुमानम् । व्याचष्टे—**यत्र शब्देत्यादि** । शब्दवृत्तेन[17] नत्वर्थस्य । वस्तुतस्तथा भावेन

---

1. A. C. दृश्यत इति 2. A. C. सन्दर्भनि 3. A. C. अत्वं 4. A. C. पारण D. पारान्नेप 5. G. अर्था 6. E. F. G. हेतू 7. D. E. एकयोः हे 8. D. E. भावा 9. D. अर्थै 10. D. स्मरये F. विषये 11. D. मयत्वे 12. Omitted in A. C. 13. C. न्याय 14. C. शब्द 15. F. साध्येति 16. H. सिद्धौ 17. A. नार्थ C. न तर्कस्य

सोऽनुमानालङ्कारः। विच्छित्तिविशेषश्चात्रार्थादाश्रयणीयः। अन्यथा तर्कानुमानात्किं वैलक्षण्यम्? उदाहरणम्—

यथा रन्ध्रं व्योम्नश्चलजलदधूमः स्थगयति
स्फुलिङ्गानां रूपं दधति च यथा कीटमणयः।
यथा विद्युज्ज्वालोल्लसनपरिपिङ्गाश्च ककुभ-
स्तथा मन्ये लग्नः पथिकतरुषण्डे स्मरदवः॥

अत्र धूमस्फुलिङ्गकपिलदिक्त्वानि वह्निलिङ्गानि त्रिरूपत्वाद्दवशब्दप्रतिपादितं वह्निं गमयन्तीत्यनुमानम्। रूपकमूलत्वेनालङ्कारान्तरगर्भीकारेण विच्छित्त्याश्रयणात्तर्कानुमानवैलक्षण्यम्। क्वचित्तु शुद्धमपि भवति। यथा—

यत्रैता लहरीचलाचलदृशो व्यापारयन्ति भ्रुवं
यत्तत्रैव पतन्ति संततममी मर्मस्पृशो मार्गणाः।
तच्चक्रीकृतचापमञ्चितशरप्रेङ्खत्करः क्रोधनो
धावत्यग्रत एव शासनधरः सत्यं सदासां स्मरः॥

अत्र योषितां भ्रूव्यापारेण मार्गणपतनं स्मरपुरोगामित्वे साध्येऽनलङ्कृतमेव साधनमिति शुद्धमनुमानम्। प्रौढोक्तिमात्रनिष्पन्नार्थनिष्ठत्वेन च विच्छित्तिविशेषाश्रयणाच्चारुत्वम्।

अयमत्र पिण्डार्थः—इहास्ति प्रत्याय्यप्रत्यायकभावः। अस्ति च समर्थ्य-

---

पक्षधर्मा[1]न्वयेति त्रैरूप्यमुक्तम्। [2]तर्कानुमानवैलक्षण्यायाह—**विच्छि[3]त्तीति**। अर्थात् कविकल्पितवैचित्र्यात्। **यथा रन्ध्रमिति**। जलदधूमस्य व्यो[4]मस्थगनं खद्योतानां स्फुलिङ्गायमानता, ककुभां [5]विद्युज्ज्वालापिङ्गता च। पथिकतरुषण्डे स्मरदवानललग्नं[6] लिङ्गम्। योजयति—**अत्र धूमेत्यादि**[7]। रूपक[8]मूलत्वमेवालङ्कारान्तरगर्भीकारः। अलङ्कारान्तरविविक्ततयाऽपि दर्शयितुमाह—**क्वचित्त्विति**। **यत्रैता इति**। लहरीवच्च[9]लाश्चलदृशो यासां ताः। यत्र [10]भ्रूव्यापारस्तत्रैव मार्गणपतनम्। स्मरस्याग्र[11]गमने शुद्धतया लिङ्गम्। तदेतदाह—**अत्रेति**। [12]अनलंकृतमेव रूपकाद्यसंकीर्णमेव[13]।

तर्कानुमाना[14]द्वैलक्षण्यायाह—**प्रौढोक्तीति**। मात्रग्रहणादलङ्कारान्तरापोहः। चारुत्वं न तु तर्कानुमानवन्निश्चमत्कारता[15]। अथानुमानकाव्यलिङ्गार्थान्तरन्यासानां विषयं विवेचयति—**अयमत्रेत्यादि**[16]। पिण्डार्थः अवान्तरविशेषनिर्व्यपेक्षो[17] निष्कृष्टार्थः। अप्रतीतः

---

1. A. C. धर्मतान्व F. धर्मादयश्चेति 2. A. तत्र्यायवै C. तर्कन्यायवै 3. C. च्छित्तिरिति 4. D. गगन 5. H. विष्णु 6. D. लगन E. लगनं 7. H. आदि अथानुमान 8. D. पक गर्भत्वमेवालं 9. A. F. G. वच्चलाश्चञ्च C. E. वच्चलाह H. वच्चञ्चलाह 10. A. अवोव्या 11. D. स्यागम 12. F. omits. न 13. A. C. omit एव 14. E. मानवै 15. D. कारतां 16. H. आदि· अप्रतीत प्रतीतौ (P. 175) 17. A. व्यपेक्षा

समर्थकभावः। तत्राप्रतीतप्रत्यायने प्रत्याय्यप्रत्यायकभावः। प्रतीतप्रत्यायने तु समर्थ्यसमर्थकभावः। तत्र प्रत्याय्यप्रत्यायकभावेऽनुमानम्। समर्थ्यसमर्थकभावे तु यत्र पदार्थो हेतुस्तत्र हेतुत्वेनोपादाने, "नागेन्द्रहस्तास्त्वचि कर्कशत्वादेकान्तशैत्यात्कदलीविशेषाः," इत्यादाविव न कश्चिदलङ्कारः। यत्र तूपात्तस्य हेतुत्वं यथोदाहृते विषये "मृगयश्च दर्भाङ्कुरनिर्व्यपेक्षाः" इत्यादौ, तत्रैव काव्यलिङ्गम्। यत्र तु वाक्यार्थस्य हेतुत्वं, तत्र हेतुत्वप्रतिपादकमन्तरेण हेतुत्वेनोपन्यासे काव्यलिङ्गमेव। तटस्थत्वेनोपन्यस्तस्य तु हेतुत्वेऽर्थान्तरन्यासः। एवं चास्यां प्रक्रियायां कार्यकारणवाक्यार्थयोर्हेतुत्वे काव्यलिङ्गमेव पर्यवस्यति। समर्थ्यवाक्यार्थस्य सापेक्षत्वात्ताटस्थ्याभावात्। ततश्च सामान्यविशेषभाव एव अर्थान्तरन्यासस्य विषयः यत्पुनरर्थान्तरन्यासस्य कार्यकारणगतत्वेन समर्थकत्वमुक्तं, तदुक्तलक्षणं काव्यलिङ्गमनाश्रित्य तद्विषयत्वेन लक्षणान्तरस्यौद्भटैराश्रितत्वात्। उक्तलक्षणाश्रयणे तु "यत्त्वन्नेत्रे"-त्यादिर्विविक्तो विषयः काव्यलिङ्गस्यार्थान्तरन्यासे पूर्वं दर्शितमितीयं गतिः आश्रयितव्या।

प्रत्याय्यते चेत् प्रत्याय्यप्रत्यायकभावः तदा[1]नुमानम्, प्रतीतस्समर्थ्यते चेत् समर्थ्यसमर्थकभावः तदा पदार्थस्य त्वत[2]लादिशिरस्कतया हेतुत्वेनोपादाने न कश्चिदलङ्कारः। यथा नागेन्द्रहस्ता इत्यादौ। [3]कर्कशत्वात् ऊर्वोरुपमानबाह्या इति[4] हेतु[5]मङ्गावस्य लौकिकत्वात्। यदा[6] त्वतलाद्यसंस्पर्शेनोपात्तस्य[7] पदार्थस्य[8] हेतुत्वं तदा "मृगयश्च दर्भाङ्कुरे"त्यादौ पदार्थनिबन्धन[9]मेकं काव्यलिङ्गम्। यदा पुनर्वाक्यार्थो हेतुत्वप्रतिपादक[10]-यच्छब्दादिप्रयोगमन्तरेण हेतुत्वेनोपादीयते, तदा वाक्यार्थनिबन्धनमन्यत्काव्यलिङ्गम्। यदा ताटस्थ्येनोपात्तस्य वाक्यस्य अर्थपर्यालोचनया[11] हेतुत्वं तदार्थान्तरन्यासः। इत्थं च सति वाक्यार्थनिबन्धनं काव्यलिङ्ग कार्यकारण एव भवति[12]। समर्थ्य[13] वाक्यार्थ[14]स्यानया क्रियया सापेक्षत्वेन ताटस्थ्याभावात्। अर्थान्तरन्यासस्तु सामान्यविशेषभाव एव भवति। तथात्व एव ताटस्थ्यसंभवात्। यत्पुनः[15] कार्यकारणगतत्वेनार्थान्तरस्य समर्थकत्वं तदुक्त[16]लक्षणं काव्यलिङ्गमप्यन[17]पेक्ष्यैव। आचार्यैर्लक्ष[18]णान्तरकरणात्। इत्थं च सति उक्तलक्षणाश्रयणे, "यत्त्वन्नेत्रे"त्यादौ अर्थान्तरन्यासविविक्तं काव्यलिङ्गमेव। कार्य[19]कारणयोस्तु समर्थकत्वं अर्थान्तरन्यासे[20] दर्शितचरमिति गतिरियती विषयविभागा[21]याश्रयितव्या।

---

1. A F. G. तदनु C. तदामानं 2. C. D. E. G. H. आद्यशि 3. A. C. F. क्वचित्कर्क 4. E. हेतुहे 5. C. सद्भाव 6. C. यदावाद्यसं 7. D. तस्य हेतु 8. C. अर्थस्याहे 9. D. धनमन्यत्काव्य 10. A. पादकः शब्द C. पादकश 11. A. C. D. लोचनाया 12. D. भवति तथात्वं एव 13. A. C. F. सामर्थ्य 14. A. C. F. वाक्यस्य 15. C. omits यत् 16. G. तदु यत्र बलवादित्यादि (under प्रत्यनीक) 17. D. G. H. अपेक्ष्य 18. D. वृत्तान्त 19. C. omits कार्य 20. A. C. F. न्यासेन 21. D. भागाश्र

एवं तर्कन्यायमूलमलङ्कारद्वयमिह प्रतिपादितम् । अधुना वाक्यन्यायमूला अलङ्कारा उच्यन्ते । तत्र—

उद्दिष्टानामर्थानां क्रमेणानुनिर्देशो यथासंख्यम् ॥७६॥

ऊर्ध्वं निर्दिष्टा उद्दिष्टाः पश्चान्निर्देशोऽनुनिर्देशः । स चार्थादर्थान्तरगतः, संबन्धश्चात्र सामर्थ्यात्प्रतीयते, ऊर्ध्वं निर्दिष्टानामर्थानां पश्चान्निर्दिष्टैरर्थैः क्रमेण संबन्धो यथासंख्यमिति वाक्यार्थः । अन्ये त्विममलङ्कारं क्रमसंज्ञयाभिदधिरे । तच्च यथासंख्यं शाब्दमार्थं चेति द्विधा । शाब्दं यत्रासमस्तानां पदानामसमस्तैः पदैरर्थद्वारकः संबन्धः । तत्र क्रमसंबन्धस्यातिरोहितस्य प्रत्येयत्वात् । आर्थं तु यत्र समासः क्रियते तत्र समुदायस्य समुदायेन सह संबन्धस्य शब्दत्वादर्थावगमपर्यालोचनया त्ववयवगतः क्रमसंबन्धः प्रतीयते । तथात्र यथासंख्यार्थत्वम् । आद्यस्योदाहरणम्—

अनुमानं तु साध्या[1]य साधनस्योपवर्णना ।
तत्संकीर्णत्व[2]शुद्धत्वविच्छित्त्यान्यविलक्ष[3]णात् ॥
अप्रतीतप्रतीतौ स्यादनुमानव्यवस्थितिः ।
पदार्थाद्वाथ वाक्यार्थात् निर्देशे सति हेतु[4]तः ॥
समर्थनं प्रतीतस्य काव्यलि[5]ङ्गद्वयं मतम्[6] ।
भवेदर्थान्तरन्यासः ताटस्थ्ये हेतुभावतः ॥
कार्यकारणभावे तु तस्योक्तं लक्षणान्तरम् ।

सङ्गत्यन्तरायाह—**एवं तर्केति** । तत्र यथासंख्यार्थं सूत्रम्—[7]**उद्दिष्टानामर्थानां क्रमेणानु[8]निर्देशो यथासंख्यम्** । प्राङ्निर्दिष्टनां पश्चान्निर्दिष्टैः क्रमेण सम्बन्धो यथासंख्यालङ्कारः । व्याचष्टे—[9]**ऊर्ध्वमित्यादि** । ऊर्ध्वं प्रागित्यर्थः[10] । **स चेति** । अनु[11]निर्देशोऽर्थान्तरगतः[12] न तु उद्दिष्टार्थगतः । सामर्थ्यादुद्दिष्टा[13]नुनिर्देश्ययोः सापेक्षत्वलक्षणात् । सम्बन्धप्रतीतिं[14] निष्कर्षति—**ऊर्ध्वंनिष्ठानामिति** । वाक्यार्थः[15] सूत्रात्मनो[16]वाक्यस्यार्थः । अतः क्रमविशेषः[17] । अन्ये तु क्रम इत्येवाभिदधिरे ।

द्वैविध्यमाह—**तच्चे**[18]**ति** । आद्य[19]स्य लक्षणमाह—**शाब्दं यत्रेति** । व्य[20]स्तानां व्य[21]स्तैरर्थादभिसंबन्धे शाब्दक्रमावलम्बिनः सम्बन्धस्यातिरोधान[22]प्रतीतिकत्वाच्छा[23]-

---

1. A. C. F. साध्यसा 2. A. C. F. र्णत्वविच्छि 3. E. G. लक्षणं 4. D. हेतुकः 5. A. C. लिङ्गान्वयो म 6. A. C. मतः 7. F. उद्दिष्टेति H. उपदि 8. अनूद्देशो 9. C. पूर्वं 10. H. इत्यर्थः प्रागुक्तानां (P. 176.) 11. D. असन्निर्दे 12. A. C. F. गतं न तदुद्दि 13. C. दिष्टानुद्दिष्टानुद्देश्य 14. D. E. प्रतीतिः 15. A. C. अर्थसू 16. C. मनोर्वा 17. E. G. शेषोऽयम् 18. D. तच्चेति 19. A. क्रमस्य 20. A. वस्त्यानां 21. A. D. F. व्यास्तेर 22. A. C. धाव D. धन 23. C. शब्द

"लावण्यौकसि सप्रतापगरिमण्यग्रेसरे त्यागिनां
देव ! त्वय्यवनीभरक्षमभुजे निष्पादिते वेधसा ।
इन्दुः किं घटितः किमेष विहितः पूषा किमुत्पादितं
चिन्तारत्नमहो मुधैव किममी सृष्टाः कुलक्ष्माभृतः" ॥

अत्र लावण्यौकस्त्वप्रभृतीनामिन्द्वादिभिः क्रमसंबन्धस्याव्यवहितत्वेन प्रतीतेः शाब्दं यथासंख्यम् । द्वितीयस्य यथा—

"कज्जलहिमकनकरुचः सुपर्णवृषहंसवाहनाः शं वः ।
जलनिधिगिरिकमलस्था हरिहरकमलासना ददतु" ॥

अत्र कज्जलादीनां सुपर्णादिभिः संबद्धानां जलनिध्यादिभिः सह संबन्धः श्रुत्या समुदायनिष्ठः प्रतीयते । अर्थानुगमानुसारेण त्ववयवानां क्रमसंबन्धावगतिरित्यार्थं यथासंख्यम् ॥

एकमनेकस्मिन्ननेकमेकस्मिन् वा क्रमेण पर्यायः ॥६०॥

क्रमप्रस्तावादिदमुच्यते । एकमाधेयमनेकस्मिन्नाधारे यत्तिष्ठति स एकः पर्यायः । नन्वनेकगोचरमिति प्रागुक्तेन लक्षणेन विशेषालङ्कारोऽत्रोक्तः । तत्किमर्थमिदमुच्यते इत्याशङ्क्योक्तं—क्रमेणेति । इह च क्रमप्रतिपादनादर्था-

---

ब्दता । द्वितीयं लक्षयति—**आर्थं[1]त्विति** । समुदायस्य समुदायेन[2] सम्बन्धे शाब्दे पर्यालोचन[3]या अवयवक्रमसम्बन्ध इत्यार्थता[4] । **लावण्येति** । लावण्यप्रभा [5]त्यागावनीभर[6]क्षम[7]त्वशालिनि त्वयि सति इन्दुपूष[8]चिन्तारत्नकुलक्ष्माभृतां नैरर्थक्यं । योजयति—**अत्र लावण्यौकस्त्वेत्यादि** । कज्जलेत्यत्राऽऽर्थत्वं योजयति—**अत्र[9] कज्जला[10]दीनामिति** । श्रुत्या शब्देन[11] समुदायगतस्संबन्धः ।

"प्रागुक्तानामनूक्तैस्तु सम्बन्धः[12] क्रमिको[13] यदा ।
यथासंख्यं तथा शाब्दम् आर्थं चेति द्विधा मतम्[14]" ॥

पर्यायार्थं सूत्रम्—**एक[15]मनेकस्मिननेकमेकस्मिन् वा क्रमेण पर्यायः[16]** । एकस्यानेकाधारत्वे एक. पर्यायः । अनेकस्यैकाधारत्वे द्वितीयः । ससङ्गतिकं व्याचष्टे—**क्रमप्रस्तावादित्यादि** । क्रमग्रहणस्य प्रयोजनायाह—[17]**नन्वेकमित्यादि** । एकस्याने-

---

1. A. अर्थम् 2. A. C. E. F. G. H. I. दाये सं 3. A. C. F. लोचने यावत्क्रम D. लोचने यावन्वयक्रम 4. D. omits ता 5. A. C. भास्याभाव निचरत्न 6. F. भरत्वत्न 7. C. मत्य 8. A. C. F. G. पूर्व 9. E. omits अ 10. A. C. F. जलानां 11. A. C. F. शाब्द 12. A. C. D. बन्धं 13. A. C. क्रमकोविदाः 14. A. C. F. विदुः 15. F. एकमिति 16. C. यः अनैकस्यैक 17. H. omits ननु

त्तत्र यौगपद्यप्रतीतिः । तेनास्य ततो विविक्तविषयत्वम् । तथा एकस्मिन्नाधारेऽनेकमाधेयं यत्स द्वितीयः पर्यायः । नन्वत्र समुच्चयालङ्कारो वक्ष्यत इत्येतदर्थमपि क्रमेणेति योज्यम् । अत एव "गुणक्रियायौगपद्यं समुच्चय" इति समुच्चयलक्षणे यौगपद्यग्रहणम् । अत एव क्रमाश्रयणात्पर्याय इत्यन्वर्थमभिधानम् । विनिमयाभावात्परिवृत्तिवैलक्षण्यम् । तस्या हि विनिमयो लक्षणत्वेन वक्ष्यते । तत्रानेकोऽसंघातरूपः संघातरूपश्चेति द्विविधः । तच्च द्वैविध्यमाधाराधेयगतमिति चत्वारोऽस्य भेदाः । क्रमेणोदाहरणानि—

नन्वाश्रयस्थितिरियं तव कालकूट
केनोत्तरोत्तरविशिष्टपदोपदिष्टा ।
प्रागर्णवस्य हृदये वृषलक्ष्मणोऽथ
कण्ठेऽधुना वससि वाचि पुनः खलानाम् ॥

विसृष्टरागादधरान्निवर्तितः स्तनाङ्गरागारुणिताच्च कन्दुकात् ।
कुशाङ्कुरादानपरिक्षताङ्गुलिः कृतोऽक्षसूत्रप्रणयी तया करः ॥

क्गोचरत्वलक्षणविशेषालङ्कारव्यावृत्त्यै[1] क्रमग्रहण[2]मित्यर्थः[3] । एवं[4] तर्हि विशेषालङ्कारे यौगपद्य[5]ग्रहणं किं न कृतमित्यत आह—**इह चेति** । इह क्रमप्रतिपादनात्तत्र यौगपद्यं लक्षणत्वेन अर्थात् सिद्ध्यति इत्यर्थः । अतो विविक्तविषयतया द्वितीयमाह—**तथा[6] एकस्मिन्निति** । तत्र[7] क्रमग्रहणात् समुच्चयालङ्कारव्यावृत्तिरित्याह—**नन्वत्रेति** । वक्ष्यमाणे समुच्चये यौगपद्यं लक्षणत्वेन गृहीष्यत इत्याह—**अत एव गुणेति** । लक्ष्यपदं निर्वक्ति—**अत एव क्रमेति** । पर्यायस्य [8]क्रमात्मकत्वात् परिवृत्त्यलङ्कारतो वैधर्म्यमाह—**[9]विनिमयेति** । अस्य चातुर्विध्यं दर्शयति—**तत्रानेक इति** । इह योऽयमनेकार्थः[10] स पृथग्वृत्तिः सङ्घा[11]तात्मा च । द्विविधो[12]ऽप्याधारआधेय[13]श्चेति चत्वारो भेदाः ।

नन्वाश्रयेति । रे कालकूट ! तवाश्रयेषु वृत्तिः उत्तरोत्तरविशिष्टपदन्यासा[14] केनोपदिष्टा यतः[15] प्राक् हृदये, अथ[16] तदपेक्षयोपरि[17]कण्ठे[18] वात्सीः[19] । सम्प्रति तु कण्ठादप्युपरितन्यां वाचि[20] वससि । अत्रार्णवादिराधारो अनेकः पृथग्वृत्तिः ।

विसृष्ट[21]रागादिति । अत्राधर[22] [कन्दु[23]] कौ[24] करा[25]धारौ निवृत्तिक्रियां प्रति

---

1. D. वृत्त्या एतत् क 2. E. F. कृतम् इ 3. H. अर्थः पर्याय एको (P. 178.) 4. A's alt. एकं 5. A. C. पद्यं लक्षणत्वेन गृहीष्यत 6. D. तदेक 7. Omitted in D. 8. D. क्रमक 9. A. C. निमेयेति 10. H. नेकोऽर्थः 11. A's alt. C. सङ्घत D. सङ्घाता च E. सङ्घात्मा 12. A. C. विधोऽस्याधा 13. A. C. F. धेयश्चेति D. E. F. G. H. ष्याधारा धेयश्चेति 14. C. न्यासात् 15. Omitted in A. C. 16. E. अत्र 17. C. D. उपरितने कं 18. C. कण्ठेव वयसि 19. A. C. F. G. H. I. वससि 20. D. अवाचि 21. A. C. सृत्तिरा 22. C. F. अत्राधार D. G. असर 23. All mss. कन्तु 24. All except E. omit कौ 25. A. C. का वाधा

निशासु भास्वत्कलनूपुराणां
यः सञ्चरोऽभूदभिसारिकाणाम् ।
नदन्मुखोल्काविचितामिषाभिः
स वाह्यते राजपथः शिवाभिः ॥

यत्रैव मुग्धेति कृशोदरीति प्रियेति कान्तेति महोत्सवोऽभूत् ।
तत्रैव दैवाद्वदने मदीये पत्नीति भार्येति गिरश्चरन्ति ॥

अत्र कालकूटमेकमनेकस्मिन्नसङ्घाते आश्रये क्रमेण स्थितिमन्निबद्धम् । संहकरश्चैकोऽनेकस्मिन्संहते क्रमवान् । अधरकन्दुकयोर्निवृत्त्यपादानतया संहतत्वेन स्थितत्वात् । अभिसारिकाः शिवाश्चानेकस्वभावा असंहतरूपा एकस्मिन्नाश्रये राजपथे क्रमवर्तिन्यः । वदने चैकस्मिन्नाश्रये मुग्धत्वादिवर्गः पत्नीत्वादिवर्गश्च वर्गत्वादेव संहतरूपोऽनेकः क्रमवानुपनिबद्धः ।

समन्यूनाधिकानां समाधिकन्यूनैर्विनिमयः परिवृत्तिः ॥६१॥

विनिमयोऽत्र किंचित्त्यक्त्वा कस्यचिदादानम् । समेन तुल्यगुणेन त्यजमानेन तादृशस्यैवादानम् । तथाधिकेनोत्कृष्टगुणेन दीयमानेन न्यूनस्य हीनगुणस्य परिग्रहः । एवं न्यूनेन हीनगुणेन त्यज्यमानेनाधिकस्योत्कृष्टगुणस्य

अपादानत्वेन संहतौ । निवृत्तेरनेकत्वेनाविवक्षणात्—**निशास्विति**[1] । संचरः[2] संचाराधिष्ठानम् । अत्राभिसारिकाशिवारूपं अनेकमाधेयं पृथग्वृत्तिः[3] । **यत्रैवेति** । अत्र मुग्धत्वादिकं पत्नीत्वादिकं च[4] अनेकमाधेयम् । वर्गत्वावस्था इति सङ्घात[5]वृत्तिचतुष्टयेऽपि योजयति—**अत्र कालकूटमित्यादि** ।

पर्याय एकोऽनेकस्मिन् एकत्रानेक इत्यपि ।
द्विधा[6] क्रमवशादेतौ[7] न विशेषसमुच्चयौ ॥
नेयं विनिमयाभावात् परिवृत्तिः भिदा[8]स्त्विह ।
चतस्रोऽनेकरूपस्य पृथक् सङ्घातव[9]र्तनात्[10] ॥
पृथक्सङ्घातवृत्तित्वादने[11]कोऽर्थो द्विधा स च ।
आधाराधेयभावस्थश्चतस्रोऽस्य भिदास्ततः ॥

परिवृत्त्यर्थं सूत्रम्—**समन्यूनाधिकानां समा[12]धिकन्यूनैः विनिमयः परिवृत्तिः** ॥ न्यूनस्याधिकेन द्वितीया । अधिकस्य[13] समस्य समेन सह विनिमयः एका परिवृत्तिः । न्यूनस्याधिकेन द्वितीया । अधिकस्य[13]

---

1. D. स्वति 2. D. संवारः, 3. A. F. G. वृत्ति 4. E. G. तु 5. A. C. सङ्घातचतु 6. E. द्विविधा 7. A. एनो A's alt. एका 8. A. C. F. तदात्विह 9. D. वर्ध 10. A. C. D. F. H. र्तनात् परिवृत्त्य 11. E. अनेकाथो 12. A. F. H. समन्यूनाधिकैः 13. C. करणस्य

स्वीकारः । तदेषा त्रिप्रकारा परिवृत्तिः । क्रमप्रतिभासंभवात्पर्यायानन्तरमस्याः लक्षणम् । समपरिवृत्तिर्यथा—

उरो दत्वामरारीणां येन युद्धेष्वगृह्यत ।
हिरण्याक्षवधाद्येषु यशः सा कं जयश्रिया ।।

अत्रोरोयशसोस्तुल्यगुणत्वम् । अधिकपरिवृत्तिर्यथा—

किमित्यपास्याभरणानि यौवने
धृतं त्वया वार्धकशोभिवल्कलम् ।
वद प्रदोषे *स्फुटचन्द्रतारका
विभावरी यद्यरुणाय कल्पते ।।

अत्रोत्कृष्टगुणैराभरणैर्न्यूनगुणस्य वल्कलस्य परिवृत्तिः । न्यूनपरिवृत्तिर्यथा—

तस्य हि प्रवयसो जटायुषः स्वर्गिणः किमिव शोच्यतेऽधुना ।
येन जर्जरकलेवरव्ययात्क्रीतमिन्दुकिरणोज्ज्वलं यशः ।।

अत्र कलेवरेण न्यूनगुणेन यशस उत्कृष्टगुणस्य विनिमयः ।

दत्वा दर्शनमेते मत्प्राणा वरतनु ! त्वया क्रीताः ।
किं त्वपहरसि मनो यद्ददासि रणरणकमेतदसत् ।।

अत्राद्ये समपरिवृत्तिः । द्वितीयार्धे न्यूनपरिवृत्तिः ।

न्यूनेन तृतीया । व्याचष्टे—**विनिमयोऽत्रेति** । सङ्गतिमाह—**क्रम[1]प्रतिभासेति[2]** ।

उरो दत्वेति—हिरण्याक्षवधाद्येषु युद्धेषु उरो दत्वा दैत्यानां यशो गृहीतम् । योजयति—**अत्र उर इति** । **किमितीति**—अरुणायन कल्पते इत्यर्थः । योजयति—**अत्रोत्कृष्टेति** । **तस्य[3]हीति** । प्रवय[4]स्त्वात् स्वर्गमुपेयुषो न शोच्यं किञ्चित् । योजयति—**अत्र कलेवरेणेति** । द्वैरूप्ये[5]णोदाहरति—**दत्वेति** । दर्शनप्राण[6]योस्समता[7] । मनो[8]ऽपेक्षया रणरणकस्य न्यूनता । योजयति—**अत्राद्य इति** ।

---

1. A. अत्र प्रति 2. H. इति योजयति—अत्राद्ये 3. A's alt. त्रस्य C. अस्य 4. A. C. F. G. प्रलयस्त्वां 5. A. C. F. रूप्येति दर्श 6 D. omits ण 7. A. C. F. सतां 8. E. G. मनो व्यप

* The generally accepted reading is स्फुटचन्द्रतारका and that is adopted in the N. S. ed. The Sañjīvanī does not guide us in fixing the reading. The T. S. S. ed. has प्रदोषेषु विकीर्णतारका. Of the two manuscripts of the Sarvasva used for consultation D . 12797 follows the N. S. ed. while No. 68530 reads it as in the T. S. S. ed.

एकस्यानेकप्राप्तावेकत्र नियमनं परिसंख्या ॥६२॥

एकानेकप्रस्तावादिह वचनम् । एकं वस्तु यदानेकत्र युगपत्संभाव्यते तदा तस्यैकत्रासंभाव्ये द्वितीयपरिहारेण नियमनं परिसंख्या । परिवर्जनेन कुत्रचित्सङ्ख्यानं वर्णनीयत्वेन गणनं परिसंख्या । सा चैषा प्रश्नपूर्विका तदन्यथा चेति प्रथमं द्विधा । प्रत्येकं च परिवर्जनीयस्य शाब्दत्वार्थत्वाभ्यां द्वैविध्यमिति चतुःप्रभेदाः । क्रमेण यथा—

किं भूषणं सुदृढमत्र यशो न रत्नं
किं कार्यमार्यचरितं सुकृतं न दोषः ।
किं चक्षुरप्रतिहतं धिषणा न नेत्रं
जानाति कस्तदपरः सदसद्विवेकम् ॥

किमासेव्यं पुंसां सविधमनवद्यं द्युसरितः
किमेकान्ते ध्येयं चरणयुगलं कौस्तुभभृतः ।
किमाराध्यं पुण्यं किमभिलषणीयं च करुणा
यदासक्त्या चेतो निरवधि विमुक्त्यै प्रभवति ॥

भक्तिर्भवे न विभवे व्यसनं शास्त्रे न युवति कामास्त्रे ।
चिन्ता यशसि न वपुषि प्रायः परिदृश्यते महताम् ॥
कौटिल्यं कचनिचये करचरणाधरदलेषु रागस्ते ।
काठिन्यं कुचयुगले तरलत्वं नयनयोर्वसति ॥

"परिवृत्तिर्विनिमयस्त्रिधा सेयं[1] समादिभिः ॥"

परिसङ्ख्यार्थं सूत्रम्—**एकस्यानेक[2]—प्राप्तावेकत्र नियमनं परिसङ्ख्या** । अने-
कत्र[3] प्राप्तवत[4] एकस्यैकत्र[5] नियमनं परिसङ्ख्या एकतरत्र वर्जनेन अन्यतरत्र सङ्ख्यानात् ।
ससङ्गतिकं व्याचष्टे—**एकानेकेत्यादि[6]** । असंभाव्ये[7] स्थूल[8]दृशा संभावयितुं अशक्ये[9] ।
निर्वक्ति—**परीति** । परीत्युपसर्गो[10]वर्जनवृत्तिरित्यर्थः । भेदा[11]नाह—**सा चैषेति[12]** । प्रश्न-
पूर्विका शाब्दी [13]तथैवार्थी[14] अप्रश्नपूर्विका शाब्दी[15] तथैवार्थी[[16]ति] चतुर्धा ।

किं भूषणमिति—आर्यैराचरितम्[17] । इयं प्रश्नपूर्विका शब्दोपात्तवर्ज्या[18] ।
किमासेव्यमिति । यदास[19]क्त्या द्युसरिदादिसमास[20]ङ्गेन । इयं प्रश्न[21]पूर्वा अर्थाक्षिप्त-
वर्ज्या[22] । **भक्ति[23]र्भव इति** । युवतिरूपे कामास्त्रे । इयम् [24]अप्रश्ना शाब्दवर्ज्या । **कौटिल्य-**

---

1. Omitted in A. 2. D. E. F. अनेकत्र 3. A. अनेकं प्रा C. H. अनेक प्रा 4. E. G. प्राप्नुवत 5. C. स्यै अत्र 6. H. आदि निर्वक्ति 7. C. भावे 8. D. स्थूले दशा 9. A's alt. असंख्ये 10. D. उपसर्ज 11. A. भेदेन C. भेदनो हस चै D. भेदायाह 12. A's alt. C. एकेति 13. A. C. E. F. तदैव 14. C. आर्थी तु चतुर्धा 15. A. C. शाब्दिका दैवार्थै 16. All mss. तु 17. All except D. रितं उपरोत्युपसर्गो वर्जनवृत्ति-रित्यर्थः इयं 18. C. वर्जा 19. A. C. पत्याद्युपरतादि 20. A. C. omit स 21. D. F. omit प्रश्न 22. A. C. वर्जा D. प्रशब्दा 23. D. भक्तिभवति 24. A. C. F. omit अ

अत्र चालौकिकं वस्तु गृह्यमाणं वस्त्वन्तरव्यवच्छेदे पर्यवस्यतीति व्यवच्छेद्यं वस्त्वन्तरं शाब्दमार्थं चेति नियमाभावः। अलौकिकत्वाभिप्रायेणैव क्वचित्प्रश्नपूर्वकं ग्रहणम्।

विलङ्घयन्ति श्रुतिवर्त्म यस्यां लीलावतीनां नयनोत्पलानि।
बिभर्ति यस्यामपि वक्रिमाणमेको महाकालजटार्धचन्द्रः॥

तथा—"चित्रकर्मसु वर्णसंकरो यतिषु दण्डग्रहणानि" इत्यादौ श्लेषसंपृक्तत्वमस्या अत्यन्तचारुत्वनिबन्धनम्। अत्र च नियमपरिसंख्ययोर्वाक्यवित्प्रसिद्धं लक्षणं नादरणीयमिति ख्यापनाय नियमनं परिसंख्येति सामानाधिकरण्येनोक्तिः। अत एवात्र पाक्षिकप्राप्तिरपि स्वीक्रियत इति युगपत्संभावनं प्रायिकम्।

मिति। इयम् [1]अप्रश्ना[2] आर्थवर्ज्या। [3]योजनस्य सुज्ञानत्वान्न्यायसंचारायाह—**अत्रालौकिक[4]मिति**। अलौकिकग्रहो हि लौकिकं व्यवच्छिनत्त्येव[5] विरोधात्। अतो व्यवच्छेद्यं शाब्दमार्थं [6]चेति भेदद्वयोदयः। अलौकिकस्य[7] [8]प्रसिद्धेः क्वचित्प्रश्नोऽन्यथा चेति चातुर्विध्यम्। श्लेषभित्ति[9]कतया, दर्शयति—**विलङ्घयन्तीति**। श्रुतिवर्त्म[10] कर्णो[11]-पकण्ठो[12] वेदमार्गश्च। वक्रिमा अरालता दौश्शील्यं च।

चित्रकर्मस्विति[13]—वर्णा वलक्षादयो द्विजातयश्च। दण्डो[14] यष्टिः शास्तिश्च[15]। अत्र श्लेषः पूर्वम[16]सिद्ध इति न बाधकः[17] अपि तु चारुतावह इत्याह[18]—**श्लेषसम्पृक्तत्वमिति**। अलौकिकतां दर्शयितुमाह—**अत्र चेति**। पाक्षिकत्व[19]नियम अनेकत्र[20] युगपत्प्राप्तौ परिसङ्ख्येति हि वाक्यवित्प्रसिद्धं लक्षणम्। तद्वैलक्षण्याय नियमन[21]सामानाधिकरण्यं यतः। इत्थमतः पाक्षिकप्राप्तिरूपं[22] नियमलक्षणमपि स्वीक्रियत[23] इति युगपत्संभावनात्मकं परिसङ्ख्यालक्षणमिह[24] [प्रायिकम्[25]]।

परिसङ्ख्या त्वनेकत्र प्राप्तस्यैकत्र[26] यन्त्रणम्।
चतुर्धा[27] प्रश्नवर्ज्योक्त्योर्भावाभावादियं मता[28]॥
न परं[29] युगपत्प्राप्तिः पक्षेऽपि [30]प्राप्तिरिष्यते।
परिसङ्ख्यानियमयोर[31]तोऽत्रालौकिकी स्थितिः॥

---

1. All except A omit अ. 2. D. E. G. प्रश्नपूर्वा 3. G. अत्र यो 4. A. C. F. लौकिकीं 5. D. एव अतो व्य 6. E. वेति 7. A's alt. स्यापि 8. D. E. अप्रसि 9. D omits क 10. A. F. वर्त्मणा 11. D. कर्णोवेद 12. A. F. G. कण्ठा 13. D. E. गद्येव 14. A. C. F. G. दण्डाः यष्टयः 15. A's alt. C. शास्त्रे 16. D. अप्रसि 17. E. बाधकं 18. D. omits इ 19. D. कत्वेन 20. A. C. F. कत्र परि 21. C. नियमनस्य 22. D. रूप 23. E. omits त 24. D इह प्रातस परि 25. All mss. प्राप्तिकम् 26. A. एकस्य 27. A. B. C. चतुर्द्धा 28. H. मता युगपत्प्राप्तिः 29. A. C. F. वरं 30. A. C. F. अप्रा 31. A. C. E. F. अतन्त्रा लौ

दण्डापूपिकयार्थान्तरापतनं अर्थापत्तिः ॥६३॥

दण्डापूपयोर्भावो दण्डापूपिका। "द्वन्द्वमनोज्ञादिभ्यश्च" इति वुञ्। पृषोदरादित्वाच्च वृद्धचभावः। यथा अहमहमिकेत्यादाविति केचित्। अन्ये तु दण्डापूपौ विद्येते यस्यां नीतौ सा दण्डापूपिका नीतिः। एवमहं शक्तोऽहं शक्तोऽस्यामित्यहमहमिकेति मत्वर्थीयष्ठन्नित्याहुः। अपरे तु दण्डापूपाविव दण्डापूपिकेति "इवे प्रतिकृतौ" इति कनं वर्णयन्ति। अत्र हि मूषककर्तृकेण दण्डभक्षणेन तत्सहभाव्यपूपभक्षणमर्थात्सिद्धम्। एष न्यायो दण्डापूपिकाशब्देनोच्यते। ततश्च यथा दण्डभक्षणादपूपभक्षणमर्थादापतितं तद्वत्कस्यचिदर्थस्य निष्पत्तौ सामर्थ्यात्समानन्यायत्वलक्षणाद् यदार्थान्तरमापतति सार्थापत्तिः।

न चेदमनुमानम्। समानन्यायस्य संबन्धरूपत्वाभावात्। असंबन्धे चानुमानानुत्थानम्। अर्थापत्तिश्च वाक्यविदां न्याय इति तन्नयेनेहाभिधानम्। इयं च द्विधा। प्राकरणिकादप्राकरणिकस्यार्थापतनमेकः प्रकारः। अप्राकरणिकात्प्राकरणिकस्यार्थापतनं द्वितीयः प्रकारः। आद्यो यथा—

पशुपतिरपि तान्यहानि कृच्छ्रादगमयदद्रिसुतासमागमोत्कः।
कमपरवशं न विप्रकुर्युर्विभुमपि तं यदमी स्पृशन्ति भावाः॥

अत्र विभुवृत्तः प्राकरणिको लोकवृत्तान्तमप्राकरणिकमर्थादाक्षिपति। द्वितीयो यथा—

धृतधनुषि बाहुशालिनि शैला न नमन्ति यत्तदाश्चर्यम्।
रिपुसंज्ञकेषु गणना क इव वराकेषु काकेषु॥

अर्थापत्त्यर्थं[1] सूत्रम्—**दण्डा[2]पूपिकया अर्थान्तरापतनं अर्थापत्तिः[3]**। यथा दण्डभक्षणेनापूपभक्षणं कैमु[4]त्येनापतति[5] तथार्थान्तरस्यापतनमर्थापत्तिः। व्याचष्टे—**दण्डापूपयोरिति[6]**। "द्वन्द्व[7]मनोज्ञे"ति वुञ्[8]सिद्धौ पृषोदरादित्वेन वृद्धचभावेऽहमहमिकादिनयेन[9] दण्डापूपिकेति केचित्। अन्ये तु मत्वर्थीयेन[10] रूपसिद्धिमिच्छन्ति। स्वसम्मतिमाह—**अपरे त्विति**। अपरे पुनः "इवे प्रतिकृता" विति कन उपमार्थत्वेन वर्ण[11]यन्ति। निष्कर्षार्थमाह—**अत्रेति**। अनुमानशङ्कां निराचष्टे—**न चेदमिति**। समानन्यायस्य दण्डापूपवृत्तस्य सङ्गतिमाह—**अर्थापत्तिश्चेति**। तज्जा[12]तीयेन तत्सम्बन्धितया भेदायाह—**इयं चेति**।

पशुपतिरिति—उत्कः उन्मनाः। विप्रकुर्युः बाधं[13] विकुर्युः। अमी[14]भावा वनितादयः। अप्राकरणिकापातनं[15] दर्शयति—**अत्र [16]वि[भ्वि]ति**। **धृतधनुषीति**। स्थिरा[17] अपि

---

1. D. पत्त्यं सू 2. F. दण्डेति 3. D. पत्ति 4. D. कैमर्थक्येन 5. D. पतितं 6. H. इति अर्थापत्तिस्तु (P. 183) 7. A. C. D. repeat द्वन्द्व...सिद्धौ 8. A. C. वुङ् E. F. वुन् 9. C. नायेन 10. E. येषु G. येष्वनिरूप 11. C. E. वर्णयति 12. A. C. E. तत्र ज्ञाते येन 13. E. बादं 14. A's alt. C. अति 15. C. पातं. 16. A. C. अत्र त्विति Except A. C. all the others read. विभुंमित्ति 17. C. राह्पापि

अत्र शैलवृत्तान्तोऽप्राकरणिको रिपुवृत्तान्तं प्राकरणिकमर्थादाक्षिपति। क्वचिन्न्यायसाम्ये निमित्तं श्लेषेण गम्यते। यथा—

अलङ्कारः शङ्काकरनरकपालं परिजनो
विशीर्णाङ्गो भृङ्गी वसु च वृष एको बहुवयाः।
अवस्थेयं स्थाणोरपि भवति सर्वामरगुरो-
र्विधौ वक्रे मूर्ध्नि स्थितवति वयं के पुनरमी॥

अत्र विधौ वक्रे इति श्लिष्टम्। अप्राकरणिकस्थाणुवृत्तान्तात्प्राकरणिकार्थापतनम्।

तुल्यबलविरोधो विकल्पः ॥६४॥

विरुद्धयोस्तुल्यप्रमाणविशिष्टत्वात्तुल्यबलयोरेकत्र युगपत्प्राप्तौ विरुद्धत्वादेव यौगपद्यासंभवे विकल्पः। औपम्यगर्भत्वाच्चात्र चारुत्वम्। यथा—'नमन्तु शिरांसि धनूंषि वा, कर्णपूरीक्रियन्तामाज्ञा मौर्व्यो वा' इत्यादि। अत्र प्रतिराजकार्ये नमने शिरसां धनुषां च तुल्यप्रमाणविशिष्टत्वम्। सन्धिविग्रहौ चात्र क्रमेण तुल्यप्रमाणे, प्रतिराजविषयत्वेन स्पर्धया द्वयोरपि संभाव्यत्वात्। द्वौ चेमौ विरुद्धाविति नास्ति तयोर्युगपत्प्रवृत्तिः। प्राप्नुवतश्चात्र युगपत्प्रका-

---

प्र[1]ह्वी[2]भवन्ति, [3]लोलेषु का कथा? अत्र प्राकरणिकार्थापातः[4]। विच्छित्त्यन्तरायाह—**क्वचित्त्विति।** **अलङ्कार इति।** शङ्काकरं किमयं सेव्य[5] उत नेति शङ्काजनकम्। विधुरिन्दुः, विधि[6]र्दिष्टम्। श्लेष[7]तः प्राकरणिकापातमाह—**अत्र**[8] **विधाविति।**

अर्थापत्तिस्तु कैमुत्येना[9]न्यार्थापात इष्यते।
प्रकृताप्रकृता[10]पातादियं च द्विविधा मता॥

विकल्पार्थं सूत्रम्—**तुल्यबलविरोधो**[11] **विकल्पः।** विरुद्धयोः तुल्य[12]बलयोर्युगपत्प्राप्तौ विकल्पः। व्याचष्टे—**विरुद्धयोरिति।** तुल्यप्रमाण[13]विशिष्टत्वं तुल्यबलत्वे हेतुः। वैलक्षण्यं दर्शयति—**औपम्यगर्भत्वादिति**[14]। लौकिक[15]विकल्पस्या[16]तथात्वात्।

नमन्त्विति[17]—[18]सन्धौ शिरसां[19] नतिः विग्रहे धनुषाम्। एवमाज्ञामौर्व्योः कर्ण[20]पूरीकरणमपि। व्याचष्टे—**अत्र प्रतिराजेति।** नमनमिह प्रति[21]राजानां कार्यम्। तत्र

---

1. A. C. बह्वी 2. A. C. G. ह्वीभावं भजन्ती 3. A. C. लोस्तेषु F. लोष्टेषु 4. A. F. G. पात वि 5. C. सव्ये 6. C. र्दिष्टं 7. E. शेष 8. Omitted in C. 9. A. C. F. G. मुत्यन्यायार्था 10. A. C. कृतादियं 11. E. F. G. विरोधे 12. C. वलविरोयोग्युग 13. E. णशिष्टता 14. H. इति विरोधे तुल्य (P. 184) 15. A. F. G. लौकिकस्य वि 16. A. C. F omit अ. 17. C. ज मत्विति 18. A. सिन्धौ 19. E. शिरसा 20. C. पूरि 21. C. राजानं

रान्तरस्यात्रानाशङ्कयत्वात्। ततश्च न्यायप्राप्तो विकल्पः। नमनकृतं च तयोः साद्दश्यमित्यलङ्कारता। एवं कर्णपूरीक्रियन्तामित्यादौ योजनीयम्। औपम्यगर्भत्वाच्चात्रचारुत्वम्। क्वचिच्छ्लेषावष्टम्भेनाप्ययं द्दश्यते। यथा—

भक्तिप्रह्वविलोकनप्रणयिनी नीलोत्पलस्पर्धिनी
ध्यानालम्बनतां समाधिनिरतैर्नीते हितप्राप्तये।
लावण्यस्य महानिधी रसिकतां लक्ष्मीद्दशोस्तन्वती
युष्माकं कुरुतां भवार्तिशमनं नेत्रे तनुर्वा हरेः॥

अत्र नेत्रे तनुर्वेति विकल्पः। उत्तमत्वाच्च तुल्यप्रमाणं श्लिष्टत्वम्। न चात्र समुच्चये वा शब्दः। संभवन्त्यामपि गतौ महाकविव्यवहारे प्रयोगाभावात्। ननु विरोधनिमित्तो विकल्पः। कथं चात्र विरोधः? नैतत्। तनुमध्ये नेत्रयोः प्रविष्टत्वात्तयोः पृथगभिधानमेव न कार्यम्। कृतं च तत्स्पर्धिभावं गमयति। स्पर्धिभावाच्च विरुद्धत्वम्। नेत्रे अथवा समस्तमेव शरीरमित्यर्थावगमे विकल्पस्य सुप्रत्ययत्वात्। स चात्र श्लेषाच्छ्लिष्टः। लिङ्गश्लेषस्य वचनश्लेषस्य चात्र द्दष्टेः। तस्मात्समुच्चयप्रतिपक्षभूतो विकल्पाख्योऽलङ्कारः पूर्वैरकृतविवेकोऽत्र दर्शित इत्यवधातव्यम्।

गुणक्रियायौगपद्यं समुच्चयः ॥६५॥

शिरांसि धनूंषि च[1] सन्धिविग्रहप्रमाण[2]तया तुल्यबलानि विरुद्धत्वाद्युगपत्प्राप्त्ययोगेऽपि प्राप्नुवन्ति। अतस्साधनबाधनादिरूपगत्यन्तराभावात् [3]विकल्पः। वैधर्म्यं योजयति—नम[4]नकृतमिति। एवं कर्णपूरीकरणेऽपि। वैचित्र्यान्तरायाह—**औपम्येति**।

भक्तिप्रह्वेति—प्रणयिनीस्पर्धिनीत्यादौ प्रथमाद्विवचनैकवचनयोः नपुंसकस्त्रीलिङ्गयोश्च श्लेषः। [5]नीतेहितेति[6] नीता ईहितेति च पदभङ्गः। निधी इति निधिरिति च। योजयति—**अत्र नेत्रे**[7] **तनुरिति**। समुच्चयभ्रमो मा भूदित्याह—**न चेति**। अनुशासनात् गतिसंभवेऽपि कविप्रयोगाभावान्न समुच्चयः। अप्रयुक्तदोषापत्ते[8]र्लक्षणे न्यूनतामाशङ्कते—**नन्विति**। परिहरति—**नैतदिति**। **नेत्रे अथवे**[9]**ति**। विकल्पस्वरूपोन्मीलित श्लेषानुगमम् उद्घा[10]टयति—**स चात्रेति**। निगमयति—**तस्मादिति**। स्वो[11]पज्ञ इत्याह—**पूर्वैरिति**।

विरोधे तुल्यबलयोर्विकल्पस्सन्नि[12]पातिनोः।
[13]अश्लेषश्लेषभित्तित्वाद्द्विधायमुप[14]वर्ण्यते॥

समुच्चयार्थं सूत्रम् गुण—[15]**क्रियायौगपद्यं समुच्चयः**। गुणानां क्रियाणां च[16] यौगपद्यं

---

1. Omitted in A. C. F. G. 2. A C. प्रमाणकतया 3. A. F. G. अविक 4. A. C. ननुकृतं 5. A. C. F. G. नते 6. A. इति पदभङ्गः नीते इति च योज 7. A. नेत्रेति तुरिति 8. C. पत्तेल 9. A. C. अथ वैकल्पिकस्व 10. A's alt. C. उच्चाट 11. C. सोपज्ञ 12. C. यातिनोः 13. A's alt. C. सश्लेषाश्ले 14. A. C. उपपत्तितः H. उपपद्यते 15. F. गुणेति 16. A. C. F. चेत्

गुणानां वैमल्यादीनां यौगपद्येनावस्थानेन तथैव च क्रियाणां समुच्चयालङ्कारः । विकल्पप्रतिपक्षेणास्य स्थितिः । क्रमेण यथा—

विदलितसकलारिकुलं तव बलमिदमाशु विमलं च ।
प्रखलमुखानि नराधिप ! मलिनानि च तानि जातानि ॥
अयमेकपदे तया वियोगः प्रियया चोपनतोऽतिदुःसहो मे ।
नववारिधरोदयादहोभिर्भवितव्यं च निरातपत्वरम्यैः ॥

एतद्विभिन्नविषयत्वेनोदाहरणद्वयम् । एकाधिकरणत्वेनाप्ययमलङ्कारो दृश्यते । यथा—

बिभ्राणा हृदये त्वया विनिहितं प्रेमाभिधानं नवं
शल्यं यद्विदधाति सा विधुरिता साधो ! तदाकर्ण्यताम् ।
शेते शुष्यति ताम्यति प्रलपति प्रम्लायति प्रेङ्खति
भ्राम्यत्युल्लुठति प्रणश्यति दलत्युन्मूर्छति त्रुटचति ॥

एवं गुणसमुच्चयेऽप्युदाहार्यम् । केचित्पुनर्न केवलं गुणक्रियाणां व्यस्तत्वेन समुच्चयो यावत्समस्तत्वेनापि भवतीति वर्णयन्ति । उदाहरन्ति च—

न्यञ्चत्कुञ्चितमुन्मुखं हसितवत्साकूतमाकेकरं
व्यावृत्तं प्रसरत्प्रसादिमुकुलं सप्रेमकम्पं स्थिरम् ।
उद्भ्रूभ्रान्तमपाङ्गवृत्ति विकचं मज्जत्तरङ्गोत्तरं
चक्षुः साश्रु च वर्तते रसवशादेकैकमन्यक्रियम् ॥

समुच्चयः । व्याचष्टे—**गुणानामिति** । विकल्पेति सङ्गतिकथनम् । विद[1]**लितेति** । प्र(ख[2])लमुखानि दुर्दान्तप्रचुराणि । अत्र वैमल्यमालिन्ययोः समुच्चयः । **अयमिति** । एकपदे युगपद्भवितव्यं[3] भूत[4]मित्यर्थः । अत्र उप[5]नतिभूतिक्रिययोः । वैचित्र्यान्तरायाह[6]—**एतद्विभिन्नेति** । **बिभ्राणेति** । शल्यभरणं शयनादिक्रियाहेतुः । अत्र शयनादीनां एकाधिकरण[7]तया समुच्चयः । गुणसमुच्चयोऽपि सुज्ञान इत्याह—**एवमिति** । गुणक्रिययोः संभृ[8]तयोरपि संभवतीति दर्शयति—**केचिदिति** ।

न्यञ्चदिति—चक्षुरिह चक्षुर्विकारः । [9]एकैकं चक्षुरन्यक्रियं भिन्नव्यापारं वर्तते । [10]अतो हेतो रसवशात् । रस इह[11] शृङ्गारः, दृग्विकाराणामेषां तदेकनिष्ठत्वात् कथं भिन्नक्रियं[12] न्यञ्चितमित्यर्थः । यदपाङ्गे न्यञ्चति[13] ।

उक्तं हि[14] **मया भरतसंग्रहे**—

---

1. C. E. G. विगलि 2. All mss. बल 3. E. G. तव्य 4. A's alt. C. भृतं 5. A. C. F. उपनीतिक्रि 6. A. C. आह विभि F. आह गुणक्रिययोः 7. A. C. करणं तथा स 8. E. संभव F. संभूत 9. A's alt. हाकक 10. C. E. कुतो 11. A. F. गुणश्च 12. A. F. G. क्रियान्यञ्चन्न्यञ्चितं 13. E. न्यग्भवति 14. Omitted in E.

"स्या[1]न्नयञ्चितन्नयञ्चद[2]पाङ्ग[3]भाव" इति । "अपाङ्गसङ्कोचित[4]कुञ्चितं* स्यात्[5] उन्मुखं" इत्युदञ्चितस्य लक्षणम् ।

उदञ्चितं तूर्ध्वमपाङ्ग[6]वृत्ति निमेषशून्यं[7] हसितं विहासि ।
साकूतमाकाङ्क्षितभावगर्भम् आकेकरं तिर्यग[8]रालतारम् ॥

व्यावृत्तं वलितम्[9] ।

"तिर्यङ्निवृत्तं वलितं विलोक्य प्रेम्णा [10]सुदूरं परिवल्ग [दुक्तम्[11]]" ।

प्रसादि प्रसन्नम् ।

"सभ्रूविलासं स्मयते प्रसन्नं[12] सम्मील्यमानं मुकुलं वदन्ति ।"

सप्रेम प्रेमगर्भम् ।

"स्यात्प्रेमगर्भं असौ द्रवाय[13] (?)" ।

कम्पमुत्कम्पितपक्ष्म[14]तारम् । स्थिरं[15] विदूरान्तरितार्थनिष्ठम् ।
उद्भ्रू[16]-उद्वर्तितं[17]तूर्ध्वविकम्पितभ्रू । भ्रान्तं[18] मदमन्थरं[19]स्यात् ।

अपाङ्गवृत्ति विक्षेपि ।

विक्षेपि पार्श्वे यदपाङ्गवृत्ति ।

[विकचं[20]] विकासि[21] ।

विकासि दृश्ये सविशेषलक्ष्म् ।

मज्जन्निहा[22]ञ्चितम् । नासाग्रनिष्ठन्तु निहञ्चिताख्यम् ।

तरङ्गोत्तरं[23] तरङ्गितम् ।

"तरङ्गितं यद्युतिरूर्मिकल्पा ।"

साश्रु[24] उत्कण्ठितम् ।

"उत्कण्ठितं रागनिबद्धबाष्पम् ।"

---

1. A. F. G. सान्यञ्चि 2. C. पदाङ्ग 3. F अङ्ग इति 4. E omits त 5. E. स्यादिन्दुवत् इत्युद 6. D. E. G. अङ्गसङ्गिनिमे 7. A. D. E. G. H. I. शून्योल्लसितं C. भूल्यं हसितं 8. A. F. दराल 9. A. C. लितं विलोक्या प्रसाद वृत्तं प्रेम्णा 10. A's alt. संपूरं C. सुपूरं 11. All mss. दुल्कं 12. A. F. G. प्रपन्नं 13. A. C. F. यतमुत्कम्पमु 14. C. पक्ष 15. Omitted in C. 16. A. F. G. उदभ्रु 17. A. F. वर्तितदकम्पित 18. C. D. E. G. H. I. भ्रान्त 19. E. G. भरं विश्रान्त मन्तं मदमन्थरं स्या 20. Omitted in all mss. 21. A. C. विकसत् 22. A. C. इहञ्चिनासा 23. A. C. F. उत्तरङ्गितरङ्गितं 24. A. C. साश्र

* The lines and readings here are not clear ; particularly regarding the definitions of कुञ्चित and उन्मुख. The former is अपाङ्गसङ्कोचि or अपाङ्गसङ्कोचित whilst the latter is otherwise called उदञ्चित which is defined as ऊर्ध्वमपाङ्गवृत्तिः With regard to the other words प्रसादि, व्यावृत्त, अपाङ्गवृत्ति, विकचं, तरङ्गोत्तरं etc., they are first explained and then the corresponding definitions given.

अत्राकेकरादयो गुणशब्दा न्यञ्चदित्यादयः क्रियाशब्दा इति समस्तत्वेन गुणक्रियायौगपद्यम् । प्रसादिसप्रेमेत्यादीनां समासकृत्तद्धितेषु संबन्धाभिधानमिति संबन्धस्य वाच्यत्वात् । तस्य च सिद्धरूपत्वेन गुणत्वाद्गुणशब्देन गुणयौगपद्यं द्रष्टव्यम् । एवमयं त्रिधा समुच्चयः । एकं समुच्चयं त्रिप्रकारभिन्नं लक्षयित्वा द्वितीयं लक्षयति—

एकस्य सिद्धिहेतौ अन्यस्य तत्करत्वं च ॥६६॥

समुच्चय इत्येव । यत्रैकः कस्यचित्कार्यस्य सिद्धिहेतुत्वेन प्रक्रान्तस्तत्रान्योऽपि यदि स्पर्धया तत्सिद्धिं करोति तदायमपरः समुच्चयः । न चायं समाध्यलङ्कारेऽन्तर्भवति । तत्र ह्येकस्य कार्यं प्रति पूर्णं साधकत्वम् । अन्यस्तु कार्याय काकतालीयेनापतति तत्र समाधिर्वक्ष्यते । यत्र तु खलेकपोतिकया बहूनामवतारस्तत्र समुच्चयः । अतः महान्भेदोऽनयोः । एष समुच्चयः सद्योगे-

---

योजयति—**अत्राकेक**[1]**रेत्यादि** । नन्वाकूतप्रसादप्रेम्णां गुणवचनत्वे[2]ऽपि समासतद्धिताद्यर्थैस्तिरोधानमित्यत आह - **प्रसादिसप्रेमेत्यादि** । समासादयो[3] हि सम्बन्धाभिधायिनः । सम्बन्धश्च सिद्धरूपो गुणात्मा । न गुणवचनानां स्वभावं भिनत्ति[4] । साकूतं सप्रेम इति समासः । प्रसादीति तद्धितः । निगमयति—**एवमयमिति** । व्यस्त[5]त्वेन उभौ समस्तत्वेन एकेति त्रिधा ।

"गुणक्रियायौगपद्ये[6] त्रिविधस्स्यात्समुच्चयः[7] ।"

समुच्चयान्तरायाह —**एक**[8]**मिति** । सूत्रम्—**एकस्य**[9] **सिद्धिहेतौ अन्यस्य तत्करत्वं च** । एकस्मिन् कस्यचित् सिद्धिहेतौ[10] स्पर्धया अन्यस्यापि तत्करत्वं [11]समुच्चय.[12] । व्याचष्टे—**समुच्चय**[13] **इत्यादि** । इत्येवेत्यनुषङ्गकथनम् । समाधिवैधर्म्यायाह—**न चायमिति** । एकः[14] पर्याप्तः[15] साधकः । अन्यः काकतालीयवृत्त्या चेत्समाधिः । यथा खले कपोताः स्पर्धया प्रतिस्वं अहमहमिकयाऽवतरन्ति । तथा भावे समुच्चयः इति महान् भेदः । खले कपोता अस्यां सन्ति[16] नीताविति खलेकपोतिका । मत्वर्थीयः ठन् । ननु काकतालीयं इति कथमुच्यते । काकस्यागमनं याहच्छिकं[17] तालस्य च[18] पातः । तेन[19] पतता काकस्य वधः । एवं देवदत्तस्य आगमनं दस्यूनाञ्चोपनिपातस्तैश्च तस्य वधः । तत्र देवदत्तदस्युसमागमः काकतालसमागम इवेति एक उपमार्थः । तद्वधः काकवध इवेति द्वितीयः । आद्यः[20]

---

1. F. करस्येत्या 2. C. अपि स्वभावं 3. A. C. योऽपि 4. A. C. नत्ति समास ह्प्रसादमिति तद्धितं 5. A. C. व्यस्ते त्वेकेति 6. A. B. C. पद्यैः 7. H. च्चयः। निगमयति (P. 190) 8. A. F. किमिति 9. F. कस्येति 10. A. हेतोः तथा अन्य C. हेतोः तथा सिद्धिहेतोः तथा अ 11. A. F. च समु 12. C. यः समुच्चयान्तरायाह एकमिति व्या 13. F. एव इ 14. A. एका 15. E. G. पर्याप्तं 16. A. C. सन्तीति ताविति 17. C. च्छिक 18. Omitted in A. C. 19. A.E. F. तेन च 20. G. अन्यः

ऽसद्योगे सदसद्योगे भवतीति त्रिधा भिद्यते । सतः शोभनस्य सता समुच्चीयमानेन योगे यथा—

कुलममलिनं भद्रा मूर्तिर्मतिः श्रुतिशालिनी
भुजबलमलं स्फीता लक्ष्मीः प्रभुत्वमखण्डितम् ।
प्रकृतिसुभगा ह्येते भावा अमीभिरयं जनो
व्रजति नितरां दर्पं राजंस्त एव तवांकुशाः ॥

अत्रामालिन्येन शोभनस्य कुलस्य मूर्त्यादिभिः शोभनैः समुच्चयः । एकैकं च दर्पहेतुतायोग्यं स्पर्धया निबद्धम् । असतोऽशोभनस्यासता समुच्चीयमानेन योगे यथा—

दुर्वाराः स्मरमार्गणाः प्रियतमो दूरे मनोऽत्युत्सुकं
गाढं प्रेम नवं वयोऽतिकठिनाः प्राणाः कुलं निर्मलम् ।
स्त्रीत्वं धैर्यविरोधि मन्मथसुहृत्कालः कृतान्तोऽक्षमो
नो सख्यश्चतुराः कथं नु विरहः सोढव्य इत्थं शठः ॥

अत्र स्मरमार्गणानां दुर्वारत्वेनाशोभनानां तादृशैरेव प्रियतमादिभिः समुच्चयः । नववयःप्रभृतीनां च यद्यपि स्वतः शोभनत्वं तथापि विरहविषयेनात्राशोभनत्वं ज्ञेयम् । सदसतः शोभनाशोभनस्य तादृशेन सदसता समुच्चीयमानेन योगे यथा—

शशी दिवसधूसरो गलितयौवना कामिनी,
सरो विगतवारिजं मुखमनक्षरं स्वाकृतेः ।

समासार्थः[1] काकताल[2]मिति । द्वितीयस्तद्धितार्थः[3] काकतालीय[4]मिति । समासश्चायम् । अस्मादेव ज्ञापकात् "समासाच्च तद्विषया"दाकस्मिक इवार्थेच्छो[5] भवतीति । तद्विषयादिवार्थविषयादित्यर्थः । एवमर्धजरतीयं अजाकृपा[6]णीयं घुणाक्षरीयमित्यादौ समासतद्धितौ ज्ञेयौ ।

भेदानाह—**एष इति** । **कुल**[7]**मिति** । यैर्जनो दर्पं व्रजति, त एव तवाङ्कुशाः उन्मार्गनिवारकाः । योजयति—**अत्रा**[8]**मालि**[9]**न्येति** । अमालिन्यं शोभनत्वहेतुः । एकैकं चैतन्यस्य तत्करत्वं दर्शयति—**दुर्वारा इति** । मन्मथसुहृद्वसन्तादिः [10]शठो वञ्चकः । योजयति—**अत्र** [11]**स्मरेति** । नववयः[12]प्रभृतेः कथमशोभनत्वम् इत्यत आह—**नववय इत्यादि** ।

शशीति—शश्यादि[13]विशेष्यं शोभनं[14] धूसरत्वादि विशेषणवशादशोभनमिति

---

1. G. समासा स्फुटोऽस्तु वाक्यार्थो (under भाविक) 2. A. तालीय C. ताल इति 3. E. G. अर्थे 4. A. तालीय इ 5. C. अर्थे भव 6. C. कृपाणि वपुणान्न 7. A. ककलं 8. A. अत्रमा 9. C. मालान्ये 10. A. C. शरो पञ्चकं 11. A. C. सरेति 12. C. भूतेः 13. F. आदि समुच्चीयते The omitted portion is found after शशिन इत्यादि (P. 189.) 14. Omitted in A.

प्रभुर्धनपरायणः सततदुर्गतः सज्जनो
नृपाङ्गणगतः खलो मनसि सप्त शल्यानि मे ॥

अत्र शशिनः स्वतः शोभनस्यापि दिवसधूसरत्वादशोभनत्वेन सदसत-स्तादृशैरेव कामिनीप्रभृतिभिः समुच्चयः । न त्वत्र कश्चित्समुच्चीयमानः शोभनः, अन्यस्त्वशोभन इति सदसद्योगो व्याख्येयः । ननु "नृपाङ्गणगतः खल" इत्यशोभनोऽन्ये तु शोभना इति कथं समुच्चीयमानस्य सतस्तादृशेनासता योगः ? नैतत् । "नृपाङ्गणगतः खलः" इति प्रत्युत प्रक्रमभेदाद्दुष्टमेव । न तु सौन्दर्य-निमित्तमित्युत्प्रेक्ष्यमेवैतत् ।

अत एवान्यैरेवमादौ सहचरभिन्नोऽर्थ इति दुष्ट एवेत्युक्तम् । प्रकृते तु नृपाङ्गणगतत्वेन शोभनत्वं खलत्वेनाशोभनत्वमिति समर्थनीयम् । एवमपि विशेष्यस्य शोभनत्वं प्रक्रान्तं, विशेषणस्य त्वशोभनत्वं, इह त्वन्यथेति न सर्वथा निरवद्यम् । ननु "दुर्वाराः स्मरमार्गणा" इत्यत्रोक्तोदाहरणवत्कथं न सदसद्योगः ? नैतत् । इह शोभनस्य सतोऽशोभनत्वमिति विवक्षा । तत्र त्वशोभनत्वमेवैतदिति विवक्षितमित्यस्त्यनयोर्भेदः अत एवैकत्रोपसंहृतं

विशिष्टस्य द्वैरूप्यम् । तत्र तथाविधैः कामिन्यादिभिस्स[1]मुच्चीयते । योजयति—**अत्र शशिन इत्यादि** । अन्यथा तु न योजनीयमित्यत[2] आह—**न त्वत्रेति** । न व्याख्येयस्तथा । सदस-द्योगविवक्षणादिति शेषः । अत्राक्षिपति—**ननु नृपेति** । नृपाङ्गण[3]खलयो[4]र्द्वयोरप्यशोभन-त्वादन्ये[5] शोभना इति कथम् । न[6] तथा[7] समुच्चयः । परिहरति—**नैतदिति** । विशिष्ट[8]स्य द्वैरूप्यप्रक्रमे द्वयोरशोभनत्वम् । प्रक्रमभेदो[9] वाक्यदोषः । प्रक्रमभेदा[10]वलम्बेन[11] चान्यै-र्दोषान्तरं उद्भावितमित्याह—**अत[12] एवेति** । विशेष्या[13]न्तरं शोभनं[14] खलत्वरूपं त्व[15]-शोभनमिति सहचरभिन्नोऽर्थः । अत इत्थं विवक्षणीयमित्याह—**प्रकृते त्विति** । तथाऽपि न दोषनि[16]वृत्तिरित्याह—**एवमपीति** । पूर्वोदाहरणे सद[17]सद्योगमाशङ्कते—**ननु[18]दुर्वारा इति** । स्मरमार्गणादीनां शोभनत्वं[19] दुर्वारत्वादीनाम् अशोभनत्वमिति प्रतीतेः । परिहरति—**नैतदिति** । विवक्षाभेदे गमकमाह—**अत एवेति** । [20]सुन्दरत्वेनान्तः प्रविष्टानामपि[21] शश्या[22]दीनां धूसरत्वा[23]दिना वैय[24]र्थ्यहेतुत्वमुपसंहृतम् । दुर्वारेत्यत्रत्वित्थं "शठः[25] कथं

---

1. A's alt. सनच्ची 2. E. इत्याह 3. C. णगतः खल 4. A. C. G. र्योरपि 5. C. अन्यो 6. Omitted in C. 7. A. C. F. तथाऽपि 8. A. C. F. G. शिष्टस्तद्वै 9. C. भेदा 10. F. भेदम दोषा व 11. A. C. G. लंबेति न चा 12. C omits अ. 13. A. C. F. G. विशेषान्त 14. All except F. नख 15. A. C. G. च शोभ 16. A. C. G. omit नि 17. C. सद्योगं 18. Omitted in A. C. E. G. 19. A. C. G. त्वमिति 20. A. सुन्दरान्नु त्वेनान्त्य प्र 21. Omitted in C. E. 22. A. गत्यादीनां C. इत्यादी 23. C. आदीनां 24. A. F. वैधर्म्यहे 25. A. C. F. G. शरः

"मनसि सप्त शल्यानि" इति । अपरत्र तु "शठः कथं सोढव्य" इति सर्वथा दुष्टत्वाभिप्रायेण । तस्मादस्ति प्रकारत्रयस्य विविक्तविषयत्वम् ।

कारणान्तरयोगात्कार्यस्य सुकरत्वं समाधिः ॥६७॥

केनचिदारब्धस्य कार्यस्य कारणान्तरयोगात्सौकर्यं यत्, स सम्यगाधानात्समाधिः । समुच्चयसादृश्यात्तदनन्तरमुपक्षेपः । तद्वैलक्षण्यं तु प्राक्प्रतिपादितमेव । उदाहरणम्—

मानमस्याः निराकर्तुं पादयोर्मे पतिष्यतः ।
उपकाराय दिष्ट्येदमुदीर्णं घनगर्जितम् ॥

माननिराकरणे कार्ये पादपतनं हेतुः । तत्सौकर्यार्थं घनगर्जितस्य कारणान्तरस्य प्राक्षेपः । सौकर्यं चोपकारायेति प्रकाशितम् ।

एवं वाक्यन्यायाश्रयिणोऽलङ्कारान्प्रतिपाद्याधुना लोकन्यायाश्रयिणोऽलङ्कारा उच्यन्ते । तत्र—

प्रतिपक्षतिरस्काराशक्तौ तदीयतिरस्कारः प्रत्यनीकम् ॥६८॥

यत्र बलवतः प्रतिपक्षस्य दुर्बलेन प्रतिपक्षेण प्रतीकारः कर्तुं न शक्यत

सोढव्य" इति सर्वथा कष्ट[1]त्वमेवोपसंहृतम् । निगमयति—**तस्मादिति** ।

एकक्रियाया[2]मन्यस्य[3] क्रिया त्वन्यः[4] समुच्चयः ।
सदसद्द्वैध[5]योगेन स[6]त्रिधा संव्यस्थितः ॥इति॥

समाध्यर्थं सूत्रम्—**कारणान्तरयोगात् कार्यसुकरत्वं समाधिः**[7] । आरब्धस्य कार्यस्य कारणान्तरयोगात् सम्यगाधानं समाधिः । व्याचष्टे—**केनचिदिति** । समुच्चयेति सङ्गत्युक्तिः[8] । समुच्चयवैधर्म्यं स्मार[9]यति—**तद्वैलक्षण्यमिति**[10] । **मानमिति** । पादपतने कारणे गर्जितं कारणान्तरम् । योजयति—**माननिराकरण इति** । उपकारेति सौकर्य[11]-**प्रकाशनम्** ।

समाधिस्सम्यगाधानं कारणान्तरयोगतः ।

सङ्गत्यन्तरायाह[12]—**एवं वाक्येति** । प्रत्यनीकार्थं सूत्रम् । **प्रतिपक्ष**[13] **तिरस्काराशक्तौ तदीयतिरस्कारः प्रत्यनीकम्**[14] । बलवतः तिरस्काराशक्तौ तदीयतिरस्कारः प्रत्यनीकम् । व्याचष्टे[15]—**यत्र**[16] **बलवदित्यादि**[17] । तत्सम्बन्धिनः बलवत्सम्बन्धिनः । तं

---

1. A. C. F. omit त्व 2. A. C. E. G omit यां 3. A. C. E. G. omit स्य 4. H. त्वं एकः सः 5. A. C. भेदयो 6. A. C. E. F. G. H. द्विविधस्संव्यव 7. H. समानः 8. A. C. G. उक्ति 9. A's alt. C. H. साधय 10. H. इति समाधिः 11. A. C. G. प्रयोगकाश 12. A. C. अन्तरमाह 13. A. पक्षेऽतिबलवतः तिर F. पक्षेति 14. A. C. नीकं प्रत्यनीकवदिति व्याच 15. I. चष्टे अत्यद्भुतत्वहेतु (under भाविक) 16. Omitted in H. 17. H. आदि तदीयस्य तिर P. (191)

इति तत्संबन्धिनो दुर्बलस्य तं बाधितुं तिरस्कारः क्रियते, तत्प्रत्यनीकम्। अनीकस्य सैन्यस्य प्रतिनिधिः प्रत्यनीकमुच्यते। तत्तुल्यत्वादिदमपि प्रत्यनीकम्। यथानीकेऽभियोक्तव्ये तत्रासामर्थ्यात्तत्प्रतिनिधिभूतमन्यदभियुज्यते, तद्वदिह प्रतिपक्षे विजेये दुर्बलस्य तिरस्करणमित्यर्थः। प्रतिपक्षगतत्वेन बलवत्त्वख्यापनं प्रयोजनम्। यथा—

यस्य किञ्चिदपकर्तुमक्षमः कायनिग्रहगृहीतविग्रहः।
कान्तवक्त्रसदृशाकृतिं कृती राहुरिन्दुमधुनापि बाधते॥

अत्र राहोर्भगवान्कृष्णो बलवान् प्रतिपक्षः तदीयः पुनर्वक्त्रसादृश्यमुखेन दुर्बलश्चन्द्रमाः तत्तिरस्काराद्भगवतः प्रकर्षावगतिः।

उपमानस्याक्षेप उपमेयताकल्पनं वा प्रतीपम्॥६९॥

उपमेयस्यैवोपमानभारोद्वहनसामर्थ्यादुपमानस्य कैमर्थक्येनाक्षेप आलोचनं क्रियते तदेकं प्रतीपम्। उपमानप्रतिकूलत्वादुपमेयस्य प्रतीपमिति व्यपदेशः। यदप्युमानतया प्रसिद्धस्योपमानान्तरप्रतितिष्ठापयिषयानादरणार्थमुपमेयत्वं कल्प्यते तत्पूर्वोक्तगत्या द्वितीयं प्रतीपम्। क्रमेण यथा—

"यत्र च प्रमदानां चक्षुरेव सहजं मुण्डमालामण्डनं भारः कुवलयदामानि" इत्यादि। यथा वा—

लावण्यौकसि सप्रतापगरिमण्यग्रेसरे त्यागिनां
देव! त्वय्यवनीभरक्षमभुजे निष्पादिते वेधसा।

बाधितुं बलवन्तं बाधितुम्। अत्र दृष्टान्तमाह—**यथा अनीक इत्यादि**। प्रयोजनमाह—**प्रतिपक्षेति। यस्य किञ्चिदिति**। यस्य कृष्णस्य। विग्रहः[1] कलहः। कान्तेन वक्त्रेण सदृशाकृतिः[2]। योजयति—**अत्र राहोरिति**। [3]तत्तिरस्कारादिति प्रयोजनोक्तिः।

तदीयस्य तिरस्कारः प्रत्यनीकमशक्तितः।

प्रतीपार्थं सूत्रम्—**उपमानस्याक्षेप उपमेयताकल्पनं वा प्रतीपम्**[4]। उपमेयस्यैव पुष्कलगुणत्वविवक्षणेनोपमानस्य कैमर्थक्यं[5] प्रातिकूल्या[6]देकं प्रतीपम्। [7]यच्चोपमानान्तरार्थं[8] प्रसिद्धो[9]पमानस्योपमेयत्वक्लृप्तिरनादरात् तद्द्वितीयम्। व्याचष्टे—**उपमेयस्यैवेत्यादि**[10]।

यत्र चेति। चक्षुष एव मुण्ड[11]मालात्व[12]मिति कुवलयदाम्नो नैरर्थक्यम्। अलङ्कारान्तर[13]संभेदेनापरमुदाहरति—**लावण्येति**। लावण्यौकस्त्वादिगुणानामुप[14]मेय एव पौष्क-

---

1. A. C. ग्रहकान्तस्य 2. C. कृतिं 3. A. C. न तिर 4. A. G. प्रतीपः 5. F. वयस्योपमेयत्व 6. E. कूलात् 7. A. C. F. omit यत् 8. A. E. अर्थ 9. A. सिद्धे उप 10. H. आदि उपमानस्य कैमर्थक्यं (P. 193) 11. A's alt. C. मुख्य 12. C. त्व······मेय एव पौनरुक्तिः कुव 13. F. संभवेना 14. C. अंदत्वा श्रणुवचः निष्कल्यादिन्द्वामुप

इन्दुः किं घटितः किमेष विहितः पूषा किमुत्पादितं
चिन्तारत्नमहो मुधैव किममी सृष्टाः कुलक्ष्माभृतः ॥

अत्र यथासंख्यमप्यस्तीति प्राक्प्रतिपादितम् ।

ए एहि दाव सुन्दरि ! कण्णं दाऊण सुणसु वअणिज्जं ।
तुज्झ मुहेण किसोअरि ! चन्दो उवमिज्जइ जणेण ॥

अत्रोपमानत्वेन प्रसिद्धस्य चन्द्रमसो निकर्षार्थमुपमेयत्वं कल्पितम् । वदनस्य चात्रोपमानत्वेन विवक्षा प्रयोजिका । क्वचित्पुनर्निष्पन्नमेवौपम्यमनादरकारणम् । यथा—

गर्वमसंवाह्यमिमं लोचनयुगलेन किं वहसि भद्रे ।
सन्तीदृशानि दिशि दिशि सरस्सु नीलनलिनानि ॥

अत्रोत्कर्षभाज उपमानप्रादुर्भाव एव न्यक्कारकारणम् । अनेन न्यायेनोत्कृष्टगुणत्वाद्युपमानभावमपि न सहते, तस्योपमानत्वकल्पनेऽपि प्रतीपमेव । यथा—

अहमेव गुरुः सुदारुणानामिति हालाहल ! मा स्म तृप्यः ।
ननु सन्ति भवादृशानि भूयो भुवनेऽस्मिन्वचनानि दुर्जनानाम् ॥

ल्यादिन्द्वाद्युपमानानां कैमर्थक्यम् । संभेदमनुस्मारयति—**अत्र यथासङ्ख्यमपीति** । ए[1] **एहीति** । ए[2] इत्यामन्त्रणे ।

अयि एहि तावत्सुन्दरि कर्णं दत्त्वा शृणु वच[3]नीयम् ।
तव मुखेन कृशोदरि चन्द्र उपमीयते जनेन ॥

चन्द्रस्योपमानत्वं वचनीयमिति कथनात् चन्द्रस्य [4]निकृष्टत्वेनोपमेयत्वेन[5]कल्पनम् । प्रयोजनं तु मुखस्यो[6]पमानता[7] । योजयति—**अत्रोपमान[8]त्वेनेति** । [9]क्वचित् उपमानस्य सतः उपमानत्वमेव न्यक्करणाद[10]लङ्कारं समुत्थापयतीत्याह—**क्वचित्पुनरिति** । **गर्वमिति** । ईदृशानि नील[11]नलिनानि सन्तीति उपमानाविर्भावः । एवं[12] निस्सामान्यस्य लोचनयुगलस्य न्यक्कारः । योजयति—**अत्रोत्कर्षेति** । यथात्रोपमेयस्य उपमानासहत्वं, तथैव अतिप्रकर्षादुपमान[13]भूमिमप्यतिपतते ।

उपमानत्वक्लृप्तिरपि[14]प्रतीपमित्याह—**अनेनेति** । **अहमे[15]वेति** । दारुणत्वकाष्ठा-

---

1. Omitted in A. C. 2. C. हीत्याम 3. C. वचनं 4. C. निष्कृष्ट 5. D. H. उपमेयत्वकल्प E. मेयत्वेक्लृप्तं F. मेयत्वक्लृप्तिः 6. all mss. मुखमस्य 7. A. C. माननतां 8. A. मानार्थत्वेने C. मानतात्वेनेति 9. F. अत्र उपमानात् क्वचि 10. C. omits द. 11. E. omits नील 12. E. एव 13. A's alt. C. मानभ्रमिमप्यतीयत 14. E. G. omit अपि 15. A. अन्नमे

अत्र हालाहलत्वं प्रकृष्टदोषत्वादसंभाव्योपमानभावमप्युपमानत्वेन निबद्धम् ।

वस्तुना वस्त्वन्तरनिगूहनं निमीलितम् ॥७०॥

सहजेनागन्तुकेन वा लक्ष्मणा यद्वस्तु वस्त्वन्तरं निगूह्यते, तदन्वर्थाभिधानं निमीलितम् । न चायं सामान्यालङ्कारः । तस्य हि साधारणगुणयोगाद्भेदानुपलक्षणं रूपम् । अस्य तूत्कृष्टगुणेन निकृष्टगुणस्य स्थगनमिति महाननयोर्भेदः । सहजेन यथा—

अपाङ्गतरले दृशौ मधुरवक्त्रवर्णा गिरो
विलासभरमन्थरा गतिरतीव कान्तं मुखम् ।
इति स्फुरितमङ्गके मृगदृशां स्वतो लीलया
यदत्र न मदोदयः कृतपदोऽपि संलक्ष्यते ॥

अत्र दृक्तारल्यादिना स्वाभाविकेन लक्ष्मणा मदोदयकृतं दृक्तारल्यादि तिरोधीयते । आगन्तुकेन यथा—

ये कंदरासु निवसन्ति सदा हिमाद्रे-
स्त्वत्पातशङ्कितधियो विवशा द्विषस्ते ।

प्राप्तस्य हालाहलस्य दुर्जनवचनो[1] उपमानताक्लृप्ति[2]र्न्यक्काराय । तदेतद्योजयति— अत्र हालाहलत्वमिति ।

उपमानस्य कैमर्थ्या[3]दुपमेयत्वकल्पनात्[4] ।
द्विधा प्रतीपं [5]काप्येतदुपमानत्वतोऽपि च ॥

निमीलितार्थं सूत्रम्—वस्तुना[6] वस्त्वन्तरनिगूहनं निमीलितम्[7] । वस्तु[8] वस्त्वन्तरं सहजेन लक्ष्मणा यन्निगू[9]हयति आगन्तुकेन वा तन्निगूहितत्वान्निमीलितम् । व्याचष्टे—सहजेनेत्यादि । सामान्यतो भेदमाह—न चायमिति[10] । तस्य हि गुणसाधारण्याद्भेदानुपलक्षणम् । अस्य पुनरुत्कृष्टेन गुणेन निकृष्टस्य स्थगनम् । अपाङ्गेति । अङ्गके लीलया[11] इति स्फुरितम्[12] इत्थं लीलया[13] प्रसारे[14]त्यर्थः । दृक्तारल्या[15]दिना सहजेन लक्षणेन लीला मदोदयहेतुकं दृक्तारल्यादि तिरोदधाति । योजयति—अत्र दृक्तारल्येति ।

ये[16]कंदरास्विति । त्वत्पाद[17]शङ्कितधियः त्वदा[18]पातशङ्काचकिताः । अत्र हिममा-

---

1. A's alt. C. वचनतो 2. C. क्लृप्ति 3. A. C. अर्थ्यम् उप 4. A. C. E. F. G. H. कल्पन 5. A. चापेतं उप C. चाप्यतदुप H. तीपमाक्षाक्षेप उप 6. F. वस्तुनेति 7. H. तं व्याचष्टे 8. A. C. वस्तुना 9. A. C. गूहनमिति E. गूहति 10. H. इति निमालिताख्यो 11. C. omits ली. 12. A. च्छुरितं चरितं 13. A's alt. C. G. लीलाप्र 14. C. प्रसरे 15. C. आदि तिरोदधाति 16. A. C. एकं धरास्विति 17. A. C. पादाङ्कित 18. A. C. F. त्वदागमचकिताः

अप्यङ्गमुत्पुलकमुद्वहतां सकम्पं
तेषामहो बत भियां न बुधोऽप्यभिज्ञः ॥

अत्र हिमाद्रिकन्दरानिवाससामर्थ्यप्रतिपन्नेन शैत्येन समुद्भाविनावागन्तुकौ कम्परोमाञ्चौ भयकृतयोस्तयोस्तिरोधायकौ । तिरोधायकत्वादेव च मीलितव्यपदेशः ।

प्रस्तुतस्यान्येन गुणसाम्यादैकात्म्यं सामान्यम् ॥७१॥

यत्र प्रस्तुतस्य वस्तुनोऽप्रस्तुतेन साधारणगुणयोगादैकात्म्यं अभेदेनाध्यवसायादेकरूपत्वं निबध्यते तत्सामान्ययोगात्सामान्यालङ्कारः । न चेयमपह्नुतिः । किञ्चिन्निषिध्य कस्यचिदप्रतिष्ठापनात् । यथा—

मलयजरसविलिप्ततनवो नवहारलताविभूषिताः
सिततरदन्तपत्रकृतवक्त्ररुचोरुचिरामलांशुकाः ।
शशभृति विततधाम्नि धवलयति धरामविभाव्यतां गताः
प्रियवसतिं प्रयान्ति सुखमेव निरस्तभियोऽभिसारिकाः ॥

अत्र मलयजरसविलेपनादीनां चन्द्रप्रभया सह अविभाव्यतां गताः इत्यभेदप्रतीतिर्दर्शिता ।

गन्तुकलक्षणा[1]भ्यां कम्परोमाञ्चाभ्यां भय[2]कृतौ कम्परोमाञ्चौ स्थगयति । योजयति—अत्र हिमाद्रीति ।

निजेनागन्तुना[3] वाऽपि लक्षणेनान्यगोपनम् ।
निमीलिताख्योऽलङ्कारः द्विप्रकारः [4]प्रकाशितः ॥

सामान्यार्थं सूत्रम्—[5]**प्रस्तुतस्यान्येन गुणसाम्यादैकात्म्यं सामान्यम्** । प्रस्तुतस्य अप्रस्तुतेन गुणसाम्यादेकरूपत्वं[6] सामान्य[7]योगात्सामान्यालङ्कारः । व्याचष्टे—**यत्र**[8] **प्रस्तुत**[9]**स्येत्यादि** । अपह्नुतेर्भेदायाह—**न चेयमिति**[10] । अपह्नुतौ हि प्रकृतनिषेधेनाप्रकृतप्रतिष्ठापनम् इह तु न तथा । किं तर्हि ? ऐकात्म्यम्[11] । **मलयजरसेति** । दन्तपत्रं करिदशनताटङ्कम् । [12]अविभाव्यता गतिरै[13]कात्म्य[14]लिङ्गम् । योजयति—**अत्र मलयजेति** ।

प्रस्तुतस्यान्यतादात्म्यं सामान्यं गुणसाम्यतः[15] ।

---

1. F. क्षणकम्प 2. A. C. यत्कृतौ 3. A. C. आगन्तुकविल्लक्ष 4. A. C. प्रकीर्तितः F. प्रदर्शितः 5. F. स्तुतेति 6. A. C. साम्यं सामा 7. H. साम्ययो 8. H. यस्त्वत्र 9. A. C. स्तुतेत्या 10. H. इति सूक्ष्मार्थे 11. A's alt. विकल्प 12. A. C. F. omit अ. 13. F. ऐकार्थ्य 14. A. C. F. स्यगति लिङ्गं 15. A. C. G. साम्यतः स्वगुणा

स्वगुणत्यागादत्युत्कृष्टगुणस्वीकारस्तद्गुणः ॥७२॥

यत्र परिमितगुणस्य वस्तुनः समीपवर्तिप्रकृष्टवस्तुगुणस्वीकरणं, स तद्गुणः। तस्योत्कृष्टगुणस्य गुणा अस्मिन्निति कृत्वा। न चेदं निमीलितम्। तत्र हि प्रकृतं वस्तु वस्त्वन्तरेणाच्छादितत्वेन प्रतीयते। इह त्वनपह्नुतस्वरूपमेव प्रकृतं वस्तु वस्त्वन्तरगुणोपरक्ततया प्रतीयत इत्यस्त्यनयोर्भेदः। यथा—

विभिन्नवर्णा गरुडाग्रजेन सूर्यस्य रथ्याः परितः स्फुरन्त्या।
रत्नैः पुनर्यत्र रुचा रुचं स्वामानिन्यिरे वंशकरीरनीलैः॥

अत्र रविरथाश्वानामरुणवर्णस्वीकारः। तस्यापि गारुत्मतमणिप्रभास्वीकार इति तद्गुणत्वम्।

सति हेतौ तद्रूपाननुहारोऽतद्गुणः ॥७३॥

तद्गुणप्रस्तावात्तद्विपर्ययरूपोऽतद्गुण उच्यते। इह न्यूनगुणस्योत्कृष्टगुणपदार्थधर्मस्वीकारः प्रत्यासत्त्या न्याय्यः। यदा पुनरुत्कृष्टगुणसन्निधानाख्ये हेतौ सत्यपि तद्रूपस्योत्कृष्टगुणस्याननुहरणं न्यूनगुणेनाननुवर्तनं भवति सोऽतद्गुणः। तस्योत्कृष्टगुणस्यास्मिन्गुणा न सन्तीति। यद्वा तस्याप्रकृतस्य

तद्गुणार्थं सूत्रम्—**स्वगुण[1]त्यागादत्युत्कृष्टगुणस्वीकारस्तद्गुणः**। परिमितगुणस्य वस्तुनोऽत्युत्कृष्टगुणस्वीकारस्तद्गुणः। व्याचष्टे—**यत्रेति**। निर्वक्ति—**तस्येति**। निमीलिताद्भेदमाह—**न चेति** तत्र हि वस्त्वन्तरनिगूहनम्[2]। इह त्व[3]निगू[4]हितस्य तद्गुणेनोपरागः। **विभिन्नेति**। अरुणेन वर्णभेदं नीता रथवाहा यत्र वंशाङ्कुरनीलैर्मरकतरत्नैः प्रभया पुनः स्वां[5] प्रभां आनि[6]न्यि[7]रे। [8]अत्राश्वानामारुण्ये तद्गुणता। आरुण्यस्य च[9] हारित्येन। योजयति—**अत्र रवीति**।

तद्गुणस्स्वगुणत्यागादुत्कृष्टस्य गुणग्रहः।

सति हेतौ तद्रूपा[10]ननुहारोऽतद्गुणः[11]। तद्गुणविपरीतोऽतद्गुणः। सङ्गतिं व्याचष्टे—**तद्गुणेति**। उत्कृष्टगुणवस्तुप्रत्या[12]सत्तौ हि न्यूनगुणस्य तद्गुणस्वीकारो न्यायोपपन्नः। प्रत्यासत्ता[13]वप्यननुहरण[14]मतद्गुणालङ्कारः। निर्वक्ति—**तस्योत्कृष्टस्येति**। [15]यदि वेति। निरुक्त्यन्त[16]रमनुहरणहेतौ सत्यपि अननुहरणात्[17] अतद्गुणः। अत्र विगृह्णाति—

---

1. F. गुणेति 2. C. गूहः 3. F. omits त्व 4. A. C. गूहे त 5. F. स्तां 6. E. G. omit आ 7. A's alt. निन्युरित्यत्र अश्वा 8. E. F. and H omit अत्र 9. Omitted in A. C. G. 10. A. E. रूपान्यनिहारो 11. G. गुणः ससङ्गतिकं व्याच 12. A. C. पत्तौ 13. C. सक्ताव 14. C. हरणामतः त 15. A's alt. C. यदिन्द्रेति 16. A. अन्तरः अनु 17. A. E. हरणम् अत

रूपाननुहारः सत्यनुहरणहेतावतद्गुणः, तस्याप्रकृतस्य गुणा नास्मिन् सन्तीति कृत्वा । क्रमेण यथा—

धवलो सि जइ वि सुन्दर ! तह वि तुए मज्झ रञ्जिअं हिअअं ।
राअभरिए वि हिअए सुहअ ! णिहित्तो ण रत्तो सि ॥
गाङ्गमम्बु सितमङ्ग ! यामुनं कज्जलाभमुभयत्र मज्जतः ।
राजहंस ! तव सैव शुभ्रता चीयते न च न चापचीयते ॥

पूर्वत्रातिरक्तहृदयसंपर्कान्नायकस्य धवलशब्दवाच्यस्य प्राप्तमपि रक्तत्वं न निष्पन्नमित्यतद्गुणः । उत्तरत्र त्वप्रकृतस्य गाङ्गयामुनजलस्य संपर्केऽपि न तथा रूपत्वमित्ययमप्यतद्गुण एव । धवलोऽसीति त्वतद्गुण एव । कार्यकारणभावस्यात्राविवक्षणान्न विषमालङ्कारः ।

उत्तरात्प्रश्नोन्नयनमसकृदसंभाव्यमुत्तरं चोत्तरम् ॥७४॥

यत्रानुपनिबध्यमानोऽपि प्रश्न उपनिबध्यमानादुत्तरादुन्नीयते तदेक-

---

तस्या[1]प्रकृतस्येति । इत्थमियं द्विधा । **धवलोऽसीति**—

धवलोऽसि यद्यपि सुन्दर[2] ! तथापि त्वया मम[3] रञ्जितं हृदयम् ।
रागभरि[4]तेऽपि हृदये सुभग ! निहितो न रक्तोऽसि ॥

धवलो युवा वलक्षश्च[5] । रागभरितहृदयनिधानेऽप्यरक्तत्वमतद्गुणः । **गाङ्गमिति** । अङ्गेति[6] सम्बोधनम् । [7]चीयते उपचीयते । अत्र [8]अप्रकृत[9]रूपाननुहारः । [10]उभयत्र योजयति—**पूर्वत्रेत्यादि**[11] । [12]प्रथमार्धे कोऽलंकार इत्यत आह—**धवलोऽसीति**[13] । धवलस्यापि रञ्जने अतद्गुणत्वं स्फुटमेव । यतः **कार्यकारणेति** । विषमवैधर्म्यं व्यक्तम् ।

न[14] तद्गुणो[15]ऽनुहारस्तु गुणताद्रूप्ययोर्द्विधा ।

उत्तरार्थं सूत्रम्—**उत्तरात्प्रश्नोन्नयनमसकृदसम्भाव्यमुत्तरं चोत्तरम्** । प्रश्नानुपादाने[16]ऽप्युत्तरा[17]दुन्नयनमेकमुत्तरम्[18] उपात्तस्य च प्रश्नस्य यदसम्भाव्यमसकृदुत्तरं तद्द्वितीयम् । व्याचष्टे—**यत्रानुपनिबध्यमान [19]इत्यादि** ।

---

1. C. तस्य प्र 2. A. C. सुन्दरः 3. Omitted in E. G. 4. A. C. F. G. चरिते हृ 5. A's alt. श्वेदराग 6. C. अङ्गेत्वसं 7. A's alt. C. लीयते 8 Between प्रकृत & रूपा G. repeats the portion इत्थमयं द्विधा ··· यद्यपि 9. A. सपानरू C. सकातरू 10. A. C. चरणम् उभ 11. A E. आदिना 12. F. ननु प्र 13. A's alt. G. असीत्विति 14. A. omits न. C. तद्रूपाननुहारस्तु हेतौ सत्यप्यतद्गुणः 15. A. E. गुशाननुहार C. गुणोऽनुर 16. C. धाने 17. Omitted in A. C. F. G. 18. A. C. F. त्तर उन्न 19. F. इति

मुत्तरम्। न चेदमनुमानम्, पक्षधर्मतादेरनिर्देशात्। यत्र च प्रश्नपूर्वकम-संभावनीयमुत्तरं, तच्च न सकृत्, तावन्मात्रेण चारुत्वाप्रतीतेः। अतश्चासकृ-दुपनिबन्धे द्वितीयमुत्तरम्। न चेयं परिसंख्या व्यवच्छेद्यव्यवच्छेदकपरत्वा-भावात्। क्रमेण यथा—

एकाकिनी यदबला तरुणी तथाह-
मस्मद्गृहे गृहपतिश्च गतो विदेशम्।
कं याचसे तदिह वासमियं वराकी
श्वश्रूर्ममान्धबधिरा ननु मूढ! पान्थ॥

का विसमा देवगई किं लद्धं जं जणो गुणग्गाही।
किं सौक्खं सुकलत्तं किं दुःखं जं खलो लोओ॥

पूर्वत्र मम वासो दीयतामिति प्रश्न उत्तरादुन्नीयते। उत्तरत्र दैवगत्यादि-निगूढत्वादसंभाव्यमसकृत्प्रश्नपूर्वकमुत्तरं निबद्धम्। इतःप्रभृति गूढार्थप्रतीति-परालङ्कारलक्षणम्।

संलक्षितसूक्ष्मार्थप्रकाशनं सूक्ष्मम्॥७५॥

अति[1]व्याप्तिं परिहरति—**न चेद[2]मिति[3]**। त्रै[4]रूप्यनिर्देशो ह्यनुमानलक्षणम्। द्वितीयस्य[5] स्वरूपमाह—**यत्र चेति**। तत्र नियममाह— **तच्चेति**। अत्र[6] अतिव्याप्तिं परिहरति— **न चेय[7]मिति**। परिसंख्यायां व्यवच्छेद्यव्यवच्छेदकभावः विवक्ष्यः। अत्र त्वविवक्षा।

एकाकिनीति—कं[8] याचसे वासयाचनेन किमित्यर्थः। **का विसमेति**।

का विषमा दैवगतिः किं (ल[9]ब्धं) यज्जनो गुण[10]ग्राही।
किं सौख्यं सुकलत्रं किं दुःखं[11] यत् खलो लोकः।

अत्र दैवगत्यादि [12]गूढत्वादप्रतिसम्भाव्यम्। उत्तरं योजयति—**पूर्वत्रे[13]त्यादि**। **असकृदिति**। नाना[14]त्वनियमो[15]द्घाटनम्।

[16]उत्तरं प्रश्नपिशुनं असम्भाव्योत्तरं द्विधा।

सङ्गत्यन्तरायाह—**इतः प्रभृतीति**। सूक्ष्मार्थं सूत्रम्—**संलक्षितसूक्ष्मार्थप्रकाशनं**

---

1. A. C. अत्र व्या 2. F. चेदिति 3. F. इति परिसंख्या 4. A's alt. ऐकरूप्य 5. A. E. F. G. omit स्य 6. Omitted in A. F. 7. A. C. चेयां व्याचष्टे यद्यप्यवच्छेदकभावोपपत्तेः अत्र 8. A. C. कलया च स्वो समवाय वाचवेद किमि F. किं याचस इति वासा याच 9. All mss. लभ्यं 10. C. भागी 11. A's alt. F. दुर्ग्राह्यं खलो 12. C. दृढ 13. A. इति 14. A. C. नानार्थं 15. G. निय त्तत्वं तदप्यन्यथाऽध्यवसाय (P. 204 under भाविक) 16. Except C all mss. प्रश्नाज्ञमुत्तरं तस्माद्रूढं चासकृदुत्तरम्

इह सूक्ष्मः स्थूलमतिभिरसंलक्ष्यो योऽर्थः, स यदा कुशाग्रीयबुद्धिभिरिङ्गिताकाराभ्यां संलक्ष्यते, तदा तस्य संलक्षितस्य विदग्धं प्रति प्रकाशनं सूक्ष्मम् । तत्रेङ्गिताद्यथा—

सङ्केतकालमनसं विटं ज्ञात्वा विदग्धया ।
हसन्नेत्रार्पिताकूतं लीलापद्मं निमीलितम् ॥

अत्र सङ्केतकालाभिप्रायो विटसंबन्धिना भ्रूक्षेपादिना इङ्गितेन लक्षितः रजनिकालभाविना लीलापद्मनिमीलनेन प्रकाशितः । आकाराद्यथा—

वक्त्रस्यन्दिस्वेदबिन्दुप्रबन्धैर्दृष्ट्वा भिन्नं कुङ्कुमं कापि कण्ठे ।
पुंस्त्वं तन्व्या व्यञ्जयन्ती वयस्या स्मित्वा पाणौ खड्गलेखां लिलेख ॥

अत्र स्वेदकृतकुङ्कुमभेदरूपेणाकारेण संलक्षितं पुरुषायितं पाणौ पुरुषोचितखड्गलेखनेन प्रकाशितम् ।

सूक्ष्मम् । इङ्गितादिभिस्संलक्षितस्य सूक्ष्मार्थस्य विदग्धाय प्रकाशनं सूक्ष्मम् । व्याचष्टे—इह सूक्ष्म[1] इत्यादि[2] । कुशाग्रव[3]त्तीक्ष्णा कुशाग्रीया । अत इद[4]मिङ्गिताकाराभ्यां द्विधा ।

आकूतव्य[5]ञ्जिताश्चेष्टा इङ्गितं बुद्धि[6]कारिताः ।
आकाराः[7] पुन[8]राम्नातास्ता एवा[9]बुद्धिकारिताः ॥

तथा—

तारा[10]पुटभ्रूदृष्ट्याद्यैर्विकारानिङ्गितं विदुः ।
आकारास्सत्त्वजा भावा आद्या[11]बुद्ध्या परेऽन्यथा ॥

सङ्केतेति—[12]कालमनसं कालं[13] ज्ञातुमनसमित्यर्थः । नेत्रार्पिताकूतं[14] नेत्राभि[15]व्यञ्जित[16]भावमित्यर्थः । सङ्केतकालमनसो[17] ज्ञानं भ्रूकटाक्षादि । तदीयेङ्गितेन[18] ज्ञात्वेति सूक्ष्मार्थ[19]संल[20]क्षणम् । पद्म[21]निमीलनं तु प्रकाशनम्[22] । योजयति—अत्र सङ्केतेति ।

वक्त्रस्यन्दीति—स्वेदेन आकार[23]स्तेन कुङ्कुमभेदात् पुरुषायितज्ञानं सूक्ष्मार्थ[24]संलक्षणम् खड्गलेखस्तु[25] तत्प्रकाशनम् । योजयति—अत्र स्वेदेति ।

सूक्ष्मं तु सूक्ष्मं[26] संलक्ष्य विदग्धेषु प्रकाशनम् ।
[27]इङ्गिताकारत[28]स्सूक्ष्मसंलक्षणमिति द्विधा ॥

---

1. A. C. ममित्या 2. H. आदि सूक्ष्मं तु 3. A's alt. C. वृत्तिक्ष्मा 4. E. इदमपि 5. a. b. c. व्यच्छिकाः 6. A. C. दुर्विका 7. A. C. आकारः 8. A. C. अन्तराम्ना 9. A. C. एषा दुर्विका 10. A. ताराप्युद्भूतद 11. A. अत्र परोऽन्य C. अत्र बुद्ध्यप 12. A. संकेतकाल 13. Omitted in A. C. 14. A. कूतात् 15. A. C. omit अभि 16. E. F. व्यञ्चित I. व्यञ्जिताया 17. C. न ज्ञानं 18. F. तेन कुङ्कुम 19. A. C. अर्थ 20. A. सुलक्ष 21. A. पद्मं नेतुं प्र C. पद्मं न तु 22. C. प्रकाशन 23. आकारकवस्तुन 24. A. अर्थसुलक्ष 25. E. I. omit तु 26. A. सूक्ष्म omitted in C. 27. C. चेङ्गित 28. C. आकारं सू

उद्भिन्नवस्तुनिगूहनं व्याजोक्तिः ॥७६॥

यत्र निगूढं वस्तु कुतश्चिन्निमित्तादुद्भिन्नं प्रकटतां प्राप्तं सद्वस्त्वन्तरप्रक्षेपेण निगूह्यते अपलप्यते, सा वस्त्वन्तरप्रक्षेपरूपस्य व्याजस्य वचनाद्व्याजोक्तिः । यथा—

शैलेन्द्रप्रतिपाद्यमानगिरिजाहस्तोपगूढोल्लस-
द्रोमाञ्चादिविसंस्थुलाखिलविधिव्यासङ्गभङ्गाकुलः ।
हा शैत्यं तुहिनाचलस्य करयोरित्यूचिवान् सस्मितं
शैलान्तःपुरमातृमण्डलगणैर्दृष्टोऽवताद्वः शिवः ॥

अत्र रोमाञ्चादिनोद्भिन्नो रतिभावः शैत्यप्रक्षेपणेनापलापितः । यद्यप्यपह्नुतोऽपि सस्मितत्वख्यापनेन पुनरप्युद्भिन्नत्वेन प्रकाशितः, तथाप्यपलापमात्रचिन्तयास्यालङ्कारस्योल्लेखः । नन्वपह्नुतिग्रन्थे 'यथा सादृश्याय योऽपह्नवः सापह्नुतिः, तथापह्नवाय यत्सादृश्यं साप्यपह्नुतिः' इति स्थापितम् । व्याजोक्तौ चोत्तरः प्रकारो विद्यते, तत्कथमियमलङ्कारान्तरेण कथ्यते । सत्यम् । उद्भटसिद्धान्ताश्रयेण तत्रोक्तम् । न हि तन्मते व्याजोक्त्याख्यमलङ्करणमस्ति । इह तु तस्य संभवाद्व्यतिरिक्तापह्नुतिरिति पृथगयमलङ्कारो निर्दिष्टः ।

व्याजोक्त्यै[1] सूत्रम्—**उद्भिन्नवस्तुनिगूहनं व्याजोक्तिः** । कुतश्चिन्निमित्तात् प्रका[2]श्यास्यगूढ[3]वस्तुनो व्याजवचसा निगूहनं व्याजोक्तिः । व्याचष्टे—**यत्र[4] निगूढमित्यादि** । वस्त्वन्तरप्रक्षेपेति निरुक्तिः[5] ।

शैलेन्द्रेति । प्रतिपाद्यमाना दीयमाना[6] । आदिशब्दात् स्तम्भवेपथू[7] । विधिव्यासङ्गः क्रियाशक्तिः । शैलान्तःपुरेण मातृमण्डलेन गणैश्च दृष्टः । योजयति—**अत्र[8] रोमाञ्चेति** । असामञ्जस्यं शमयितुमाह—**यद्यपीत्यादि** । अपलापमात्रं चिन्तयेति सस्मितत्वकथनात् पुनः प्रकाशनं[9] लक्षणतया न चिन्तनीयमिति भावः । उल्लेख उट्टङ्कनम् । अव्याप्तिमाशङ्कते—**नन्वपह्नुतीति** । उत्तरः प्रकारः अपह्नवाय[10] [11]सादृश्यं इत्येवमात्मकः[12] । परिहरति—**सत्यमिति** । तत्र तथोक्तिः उद्भटसिद्धान्ताश्रयेण । तन्मते व्याजोक्त्य[13]नुपवर्णनात् तथाऽपह्नुतिसम्भवः । इह तु[14] व्याजोक्त्युपवर्णनात् सोऽपह्नुति प्रकार एव [15]नास्तीत्येकैवापह्नुतिः । अत इयं व्याजोक्तिरेव ।

---

1. A. F. H. जोक्तेस्सू 2. C. omits का. 3. A's alt. C. H. दृढ 4. E. यत्रानि 5. H. उक्तिः व्याजोक्तिर्व्याज 6. A. मानादि 7. A. वेपथुन C. E. वेपथु 8. Omitted in C. 9. A. F. शनल 10. F. ह्नव एव यस्मात् द 11. E. omits सा 12. E. आत्मकं 13. A. जोक्तया च वर्ण F. जोक्तिः व्याजवचनेन 14. Omitted in E. 15. A. नास्तीत्याह कथापह्नुतिः

अन्यथोक्तस्य वाक्यस्य काकुश्लेषाभ्यामन्यथायोजनं वक्रोक्तिः ॥७७॥

उक्तिव्यपदेशसाम्याद्व्याजोक्त्यनन्तरमस्या लक्षणम्। यद्वाक्यं केनचिदन्यथाभिप्रायेणोक्तं सदपरेण वक्त्रा काकुप्रयोगेण श्लेषमुखेन वान्यथान्यार्थघटनया योज्यते, तदुक्तिर्वक्रोक्तिः। काकुप्रयोगेण यथा—

गुरुपरतन्त्रतया बत दूरतरं देशमुद्यतो गन्तुम्।
अलिकुलकोकिलललिते नैष्यति सखि! सुरभिसमयेऽसौ॥

एतद्वाक्यं नायिकया आगमनिषेधपरत्वेनोक्तम्। तत्सख्या च काकुप्रयोगेण विधिपरतां प्रापितम्। काकुवशाद्विधिनिषेधयोर्विपरीतार्थसंक्रान्तिः। श्लेषोऽभङ्गसभङ्गत्वेन द्विविधः। तत्राभङ्गश्लेषमुखेन यथा—

अहो केनेदृशी बुद्धिर्दारुणा तव निर्मिता।
त्रिगुणा श्रूयते बुद्धिर्न तु दारुमयी क्वचित्॥

अत्र दारुणेति प्रथमान्तं प्रक्रान्तं श्लेषभङ्ग्या तृतीयान्ततया संपादितम्। सभङ्गश्लेषमुखेन यथा—

त्वं हालाहलभृत्करोषि मनसो मूर्च्छां ममालिङ्गितो
हालां नैव बिभर्मि नैव च हलं मुग्धेऽस्मि किं हालिकः॥
सत्यं हालिकतैव ते समुचिता शक्तस्य गोवाहने
वक्रोक्त्येति जितो हिमाद्रिसुतया स्मेरोऽवताद्वः शिवः॥

व्याजोक्तिर्व्याजवचनेनोद्भिन्नस्य निगूहनम्।
अपह्नवाय सादृश्यम् इष्टा[1] नापह्नुति[2]र्यतः॥

वक्रोक्त्यर्थं सूत्रम्—**अन्यथोक्तस्य वाक्यस्य काकुश्लेषाभ्यां अन्यथा योजनं वक्रोक्तिः।** एकाभिप्रायेणोक्तस्य वाक्यस्य काकुश्लेषाभ्यां अन्यथा[3]भिप्रायेण योजनं वक्रोक्तिः। ससङ्गतिकं व्याचष्टे—[4]**उक्तिव्यपदेशेति। गुरुपरतन्त्रेति**[5]। दूरतरं गन्तुमुद्यत इति नायिकोक्तिरसौ। गुरु[6]परतन्त्र[7]तया असौ गुरुपरता समयेऽस्मिन् नैष्यति न नेष्यतीति काकुगर्भ[8]सख्युक्तिः। योजयति—**एतद्वाक्यमिति**। ननु गमनविधिनिषेधौ[9] शाब्दौ[10]। तस्माद्गमननिषेधविधिर्योजितौ[11]। अत आह—**काकुवशेति**। ईदृशि विषये काकोर्निषेधद्योतकत्वात् विपरीतार्थसंक्रान्तिः।

अहो केनेति—दारुणा घोरा काष्ठेन च। योजयति—**अत्रेति। त्वं हालाहलेति।** हाला[12]हलवान् मूर्च्छां करोषीति देवी। देवस्तु हालां[13] सुरां न बिभर्मि[14] नापि च हलं

---

1. A. इष्टा न्याप C. तुष्टा 2. a. b. c. मतः 3. A. H. अन्याभि 4. C. उक्त 5. H. इति अन्यथायोजनं (P. 202.) 6. I. omits गुरु 7. A. C. F. तन्त्रा नेष्यति काकु 8. C. सख्युरुक्तिः 9. A's alt. C. निषेधो 10. A's alt. C. शाब्दः 11. A. C. योजिता काकु 12. A. C. हलकरो 13. C. हालनं 14. A. F. बिभ्रति

उभयमुखेन यथा—

विजये ! कुशलस्त्र्यक्षो न क्रीडितुमहमनेन सह शक्ता ।
विजये कुशलोऽस्मि न तु त्र्यक्षोऽक्षद्वयमिदं पाणौ ॥
किं मे दुरोदरेण प्रयातु यदि गणपतिर्न तेऽभिमतः ।
क इह द्वेष्टि विनायकमहिलोकं किं न जानासि ॥

चन्द्रग्रहणेन विना नास्मि रमे किं प्रतारयस्येवम् ।
देव्यै यदि रुचितमिदं नन्दिन्नाहूयतां राहुः ॥
हा राहौ शितदंष्ट्रे भयकृति निकटस्थिते रतिः कस्य ।
यदि नेच्छसि संत्यक्तः संप्रत्येषैव हाराहिः ॥
वसुरहितेन क्रीडा भवता सह कीदृशी न जिह्लेषि ।
किं वसुभिर्नमतोऽमून्सुरासुरानेव पश्य पुरः ॥
आरोपयसि मुधा किं नाहमभिज्ञा किल त्वदङ्कस्य ।
दिव्यं वर्षसहस्रं स्थित्वेति न युक्तमभिधातुम् ॥
इति कृतपशुपतिपेलवपाशकलीलाप्रयुक्तवक्रोक्तेः ।
हर्षवशतरलतारकमाननमव्याद्भवान्या वः ॥

सीरम् । किं हलवत्तया[1] हालिको[2]ऽसि इति पुनर्देवी । गोवा[3]हने शक्तस्य[4]हालिकतैव सत्यमिति । अत्र[5] हालाहलेति सभङ्गश्लेषः[6] ।

विजय[7] इति । कुलकात्मकं वाक्यम् । विजये इति देवीकर्तृकं विजयासंबोधनम् । देवस्योक्तौ[8] जित्वरतायां शक्तोऽस्मि । [8a]न तु [9]त्र्यक्षोऽहमक्षद्वयसद्भावादिति । अक्ष[10]शब्दः पाशव[11]चनः । किं म[12]इति देव्याह । दुरोदरेण किं मे । देव आह—मे दुरोदरेण लम्बोदरेण [13]नार्थश्चेत् गणपतिरप[14]सरतु । देव्याह—को द्वेष्टि विनायकम् ? देव आह—अहिलोक [15]इति । इह विनायको गरुडः । **चन्द्रेति**। चन्द्रग्रहणेन इन्दु[16]पणेन विना न[17]रमे इति देवी । देवस्तु चन्द्रग्रहणापेक्षा चेद्राहुराहूयताम् । **हा [18]राहाविति** । [19]राहौ[20]स्थिते हा ! [21]कस्य रतिरिति देवी । देवस्तु [22]हारोर[23]गोऽपनीयतामिति । **वसुरहितेनेति**। वसु द्रविणं [24]वसवोऽष्टौ च[25]। **आरोपयसीति**। अङ्कः[26] अङ्कन[27]च्छलनं उत्सङ्गश्च । **इति (कृत[28]) पशुपतिरिति**।

---

1. C. वक्तया 2. A. F. हालिकोऽस्मि 3. A. F. वह 4. C. omits स्य 5. A. C. पुनर्हा 6. A. E. श्लेष इति C. श्लेषं 7. F. विषय 8. A's alt. उक्तित्व 8a. All mss. ननु 9. A's alt. त्र्यक्षमत्त C. त्र्यत्तोऽक्षद्वि 10. C. अन् 11. A. C. पाशपरः 12. A. किं मम A's alt. किं मु 13. C. नात्युच्चेत् All mss. except C. नाथ 14. A. अपापस C. अपि अप 15. Omitted. in A. C. F. H. 16. A's alt. पाणान्तवि 17. A. रुद्रे A's alt. रुमे E. ममे 18 A's alt. हालाहलाविति 19. C. राहो 20. C. सुस्थि 21. A. कर्ह्यरति 22. F. राहो हराङ्गादप 23. A. रणादपनी C. रणमप 24. E. अष्टौ वसवश्च 25. Omitted in A. F. 26. A. अङ्कत्यङ्क 27. C. नचछलनं 28. Omitted in all mss.

वक्रोक्तिशब्दश्चालङ्कारसामान्यवचनोऽपीहालङ्कारविशेषे संज्ञितः ।

सूक्ष्मवस्तुस्वभावस्य यथावद्वर्णनं स्वभावोक्तिः ॥७८॥

इह वस्तुस्वभाववर्णनमात्रं नालङ्कारः । तत्त्वे सति सर्वं काव्यमलङ्कारि स्यात् । न हि तत्काव्यमस्ति यत्र न वस्तुस्वभाववर्णनम् । तदर्थं सूक्ष्मग्रहणम् । सूक्ष्मः कविमात्रगम्यः । अत एव तन्निर्मित एव यो वस्तुस्वभावः तस्य यथावदन्यूनातिरिक्तत्वेन वर्णनं स्वभावोक्तिरलङ्कारः । उक्तिवचनप्रस्तावादिहास्या लक्षणम् । भाविकरसवदलङ्काराभ्यामस्या भेदो भाविकप्रसङ्गे निर्णेष्यते । यथा—

हुंकारो नखकोटिचञ्चुपुटकव्याघट्टनोट्टङ्कित-
स्तन्व्याः कुन्तलकण्डुकव्यपनये सीत्कारसीमन्तितः ।
पृष्ठश्लिष्यदवामनस्तनभरोत्सेव्याङ्कपालीसुधा-
सेकाकेकरलोचनस्य कृतिनः कर्णावतंसीभवेत् ॥

---

[1]पाशका अक्षाः[2] । ननु[3] विच्छित्तिरूपत्वात् सर्व एवालङ्कारो वक्रोक्तिरित्यत आह—**वक्रोक्तीति** ।

अन्यथा[4] योजनं[5] वाक्ये वक्रोक्तिरभिधीयते ।
द्विप्रकारा च[6] विज्ञेया काकुश्लेषसमा[7]श्रयात् ॥

स्वभावोक्त्यर्थं सूत्रम्—**सूक्ष्मवस्तुस्वभावस्य[8] यथावद्वर्णनं स्वभावोक्तिः** । कविप्रतिभा[9]गोचरस्य स्वभावस्य सम्यग्वर्णनं स्वभावोक्तिः । व्याचष्टे— **इह वस्त्विति** । **अत [10]एवेति** । कविमात्र[11]गम्यत्वात् । [12]कविना [13]निर्मित एव । उक्तिवचनम् [14]उक्तिशब्दः । अनेन सङ्गतिवैधर्म्यं वर्णयिष्यत इत्याह—**भाविकेति** ।

हुङ्कारेति—कुन्तल[15]गतकण्डूव्यपन[16]यने तन्व्या हुङ्कारः[17] [18]कृतिनः कर्णावतंसीभवेत्[19] । कीदृशः ? चञ्चु[20]पुटाकारया[21] नख[22]कोटचा यद्व्याघट्टनं तेनो[23]ट्टङ्कितस्सीत्कारोपशोभि च । कीदृशस्य ? पृष्ठ[24]श्लिष्यत्कुचा[25]ङ्कपालीसुखेना[26]केकर[27]दृशः ।

स्वभावोक्ति[28]र्बुधोन्नेयवस्तुस्वाभाव्यवर्णनम् ।

---

1. C. पाद्ना: 2. E. अक्षाः का: 3. A's alt. तनु 4. C. यथोज 5. H. नयनं 6. Omitted in C. 7. A. आश्रिता 8. E. omits. स्य 9. E. प्रतिमैकगो 10. A. एव चेति 11. A. विद्यमानत्वात् C. गद्यत्वात् 12. A. omits क 13. A. निर्मृत 14. A. आदिश 15. A. C. H. शत 16. A. C. H. नये 17. C. कारःकक्ृ 18. A. C. कृतः 19. A. भवेतत्की 20. A. चञ्चू 21. A. C. E. काररया 22. A. न योग्या 23. A. C. तन्नाट 24. C. पृष्ट 25. C. कुचाकपा 26. C. D. F. G. H. सुखेन 27. A's alt. कतुरीदृशः 28. E. बुधैः नेय

अतीतानागतयोः प्रत्यक्षायमाणत्वं भाविकम् ॥७९॥

अतीतानागतयोर्भूतभाविनोरर्थयोरलौकिकत्वेनात्यद्भुतत्वाद्व्यस्तसंबन्धरहितशब्दसंदर्भसमर्पितत्वाच्च प्रत्यक्षायमाणत्वं भाविकम्। कविगतो भाव आशयः श्रोतरि प्रतिबिम्बत्वेनास्तीति, भावो वा भावना पुनः पुनश्चेतसि निवेशनं सोऽत्रास्तीति।

न चेयं भ्रान्तिः। भूतभाविनोर्भूतभावित्वेनैव प्रकाशनात्। नापि रामोऽभूदिति वस्तुवृत्तान्तमात्रम्। भूतभाविगतस्य प्रत्यक्षत्वादिगतस्य धर्मस्य स्फुटस्याधिकस्योपलम्भात्। नापीयमतिशयोक्तिः। अन्यस्यान्यतयाध्यवसायाभावात्। न हि भूतभाव्यभूतभावित्वेनाध्यवसीयते, अभूतभावि वा भूत-

---

अथ प्रतीतिवैचित्र्यात्तारतम्यनिरूपणैः[1] ।
भाविकं दूर[2]दुर्लक्षं[3] व्यक्तं[4] व्याक्रियतेतमाम् ॥

तत्र सूत्रम्—**अतीतानागतयोः प्रत्यक्षायमाणत्वं भाविकम्।** भूतभाविनोः अर्थयोः अत्यद्भुतत्वादनाकुल[5]सम्बन्धशब्दसमर्पितत्वाच्च प्रत्यक्षायमाणत्वं भाविकम्। व्याचष्टे—**अतीतेत्यादि। कविगतेति**[6]। कविभावस्य श्रोतरि प्रतिबिम्बतापत्तिर्भाविक[7]मित्यर्थः[8]। **भावो वेति।** भावि भाविकस्य भावनैक[9]प्राणत्वात्। निरुक्त्यन्तरं, **सोऽत्रा(स्ती[10])ति।** भाविकमित्यनुषङ्गः।

ननु मुनिर्जयतीत्युदाहरिष्यमाणे भूतभाविनोः [11]प्रत्यक्षता भ्रान्तिः किं नेष्यत इत्यत आह—**न चेयमिति।** भूतभाविनोर्भूतभावित्वेनैव प्रत्यक्षीभावे का भ्रा[12]न्तिरिति[13] भावः। ननु भूतभाविनोर्भूतभावित्वेन प्रकाशने वस्तुवृत्तमात्रमित्यत आह—**नापि [14]रामोऽभूदित्यादि।** रामोऽभूदिति वस्तुवृत्तान्तमात्रे हि न प्रत्यक्षायमाणता। इह तु स्फुटस्य प्रत्यक्षत्व[15]स्य उपलम्भः। न[16] हि प्रत्यक्षत्वेन अध्यवसायादतिशयोक्तिरित्यत आह—**नापीयमिति।** तत्र हेतुः। **अन्यस्यान्यतयेति।** [17]अतिशयोक्तौ हि अन्य[18]दन्यतया [19]अध्यवसीयते[20] इह तु न तथा। [21]भूते भाविनि प्रत्यक्षत्वे च अन्यत्वाध्यवसायाभावः[22]। एतदुपदर्शयति—**न[23] हि भूतभावीति।** भूतम् अभूत[24]त्वेन भाविन अभावित्वेन ना[25]ध्यवसीयते। एतद्विप-

---

1. A. C. निरूपणे 2. A's alt. C. हर 3. A. C. F. लक्ष्य 4. A's alt. मया 5. A. कुलश 6. H. गतेति उदात्ताय सूत्रं (under उदात्त) 7. A. F. विक इ C. विकसंबन्धेत्यर्थः 8. A. अर्थः प्राण 9. F. प्रमाण 10. All mss. अस्त्विति 11. C. प्रत्यक्षत्वात् E. प्रत्यक्षयता 12. A. C. क्षतिरिति 13. A. C. स्वभाः 14. A's alt. रामोऽयमित्या 15. A. C. क्षत्वस्याप्यवसादनादति 16. E. तर्हि 17. A. C. F. अत्राति 18. F. अन्यान्य 19. A. व्यवसी 20. A. सीयते एतदिव इह C. सीयते एतद्विप इ F. सीयते एतद्विपर्ययोऽपि 21. A. न भूते 22. E. भावात् 23. A. C. omit नहि 24. C. omits अ 25. A. चाध्य E. I. नात्र अध्य

भावित्वेन । न चापि प्रत्यक्षमप्रत्यक्षत्वेन, अप्रत्यक्षं वा प्रत्यक्षत्वेन ।

न हि प्रत्यक्षत्वं केवलवस्तुधर्मः । प्रतिपत्त्रपेक्षयैव वस्तुनि तथाभावात् । यदाहुः—"तत्र यो ज्ञानप्रतिभासमात्मनोऽन्वयव्यतिरेकावनुकारयति स प्रत्यक्ष" इति । केवलं वस्तुप्रत्यक्षत्वे प्रतिपत्तुः सामग्र्युपयुज्यते । सा च लोकयात्रायां चक्षुरादीन्द्रियस्वभावा, योगिनामतीन्द्रियार्थदर्शने भावनारूपा । काव्यार्थविदां च भावनास्वभावैव । सा च भावना वस्तुगतात्यत्यद्भुतत्व-प्रयुक्ता । अत्यद्भुतानां वस्तूनामादरप्रत्ययेन हृदि सन्धार्यमाणत्वात् । नापि

र्ययोऽपि नास्तीत्याह—**अभूतभावि[1] वेति**। यच्चात्र प्रत्य[2]क्षत्वं तदप्यन्य[3]था अध्यवसीयते इत्या[4]ह—**न चापीति**। विपर्ययोऽपि नास्तीत्याह—**अ[5]प्रत्यक्षं वेति**। ननु भूतभाविनोः अप्रत्यक्ष[6]योः प्रत्यक्षायमाणत्वम् अन्यथाऽध्यवसाय इत्यत[7] आह—**न हि प्रत्यक्षत्वमिति**। यदि प्रत्यक्षत्वं केवलवस्तुधर्मः तदा[8] भूतभाविनोरप्रत्यक्षता[9]। वर्तमानस्य तु प्रत्यक्ष[10]त्वम् इति भवेद्व्यवस्था। न हि प्रत्यक्षत्वं केवलवस्तुधर्मः। किं तर्हि ? प्रति[11]पत्त्रपेक्षयैव प्रत्यक्षस्येति वस्तुधर्मता। न हि प्रतिपत्तारमनपेक्ष्य वस्तुनि प्रत्यक्षता नाम काचित्। अत्र प्रामाणिक[12]संवादायाह[13]—**यदाहुरित्यादि**। यो ह्यर्थः स्वग्राहकप्रतिपत्तुः[14] ज्ञान-प्रकाशं[15]स्वान्वयव्यतिरेकावनुकारयति। स्वयमस्ति चेत् ज्ञानप्रतिभासोऽस्ति, नास्ति चेन्नास्तीति[16] व्यवस्थापयति। स प्रत्यक्ष इत्यर्थः।

अतः प्रत्यक्षत्वं न केवलं[17] वस्तुधर्मः प्रतिपत्तु[18]स्तु सामग्री तत्र उपयुज्यत इत्याह—**केवलमिति**। असामग्रीके[19] प्रतिपत्तरि[20] न[21] वस्तु प्रत्य[22]क्षीभवतीत्येतावद्वक्तुं शक्यते। न तु प्रतिपत्त्रन[23]पेक्षेति भावः। तां सामग्रीं विवेचयति—**सा चेति**। लोकयात्रायां लौकिकार्थ[24] प्रत्यक्षीकरणे[25] देशकालादिव्यवधानादतीन्द्रियेऽर्थे योगिनाम् ऐकाग्र्यात्मकभावनारूपा। साक्षात्कर[26]णसामग्री काव्यार्थसाक्षात्करणे[27] काव्यतत्त्वविदामपि भावना[28]स्वभावैव। तां च भावनां काव्य[29]वस्तुगतमत्यद्भुतत्वं योजयति—(**सा [30]चेति**।) अत्यद्भुतानि हि वस्तूनि आदरप्रत्ययेन हृदि सन्धार्यमाणानि तथा भावनां प्रयोज[31]यन्ति। इत्थं च सति

---

1. A. भावी 2. After प्रत्य I. goes back to काकतालमिति etc. under समुच्चय 3. E. F. नान्यथा 4. C. E. इत्यत आह 5. E. G. omit अ. 6. C. यत्तं यः प्र 7. A. F. इत्या 8. A. C. तथा 9. A. क्षतापत्तिः मानसस्य तु 10. A. C. त्तता न हि 11. C. प्रतिरपे 12. A. णिकत्वं वादा 13. A. C. आह यो ह्यर्थस्य ग्रा 14. A. C. पत्तिः 15. A. C. काशः 16. C. omits इति 17. A. C. केवल 18. A. C. पत्तिस्तु इत्याह 19. A's alt. आसामग्रकेवल C. ग्री केवल प्र 20. A. पत्तरि तिनव C. पतरिन वस्तु D. E. F. G. H. I. प्रतिपत्तिः 21. A. इति All mss. except A. इह 22. A's alt. C. प्रतिपेक्षभव 23. C. omits न 24. E. G. श्री तकार्थे 25. A. C. करणे इन्द्रियार्थे यो 26. C. कार 27. A. C. करणसामग्री साक्षात्काव्याथ साक्षात्करण कारण काव्य 28. A. भावग्राह्यैव भावैव 29. A's alt. काव्यस्य प्रयोजयति 30. Omitted in all mss. 31. C. E. जयति

भूतभाविनामप्रत्यक्षाणां प्रत्यक्षतयैव प्रतीतेरिवार्थगर्भीकारेणायं प्रतीयमानोत्प्रेक्षा। तस्या अभिमानरूपाध्यवसायस्वभावत्वात्। न ह्यप्रत्यक्षं प्रत्यक्षत्वेनाध्यवसीयते। किं तर्हि? काव्यार्थविद्भिः प्रत्यक्षं दृश्यत इति। नापि वस्तुगत इवार्थ उत्प्रेक्षायाः प्रयोजकः, तस्या अभिमानरूपायाः प्रतिपत्तृधर्मत्वात्। यदाहुः—"अभिमाने च सा योज्या ज्ञानधर्मे सुखादिवद्" इति।

काव्यविषये च प्रयोक्तापि प्रतिपत्तैव। नाप्यत्यद्भुतदर्शनादतीतानागतयोः प्रत्यक्षत्वप्रतीतेः काव्यलिङ्गमिदम्। लिङ्गलिङ्गिभावेन प्रतीत्यभावात्। योगिवत्प्रत्यक्षतया प्रतीतेः।

लोकयात्रायां वर्तमानार्थसाक्षात्करणसामग्री चक्षु[1]रादिर्योगिनां काव्यतत्त्वविदां चा[2]तीतानागतार्थसाक्षात्करण[3]भावना। अतो योगिवत् काव्यतत्त्वविदामतीतार्थसाक्षात्कारो नान्यथाऽध्यवसाय इति नातिशयोक्तिः शङ्क्या।

ननु प्रत्यक्षतयैव प्रतीय[4]न्ते भूतभाविन इति प्रतीयमानोत्प्रेक्षा किं न स्यादित्यत आह—**नापि भूतभाविनामिति**। तत्र हेतुः—**तस्याभिमानेति**। अभिमानस्संभावना[5] तद्रूपस्याध्यवसाय इति उत्प्रेक्षाया[6] लक्षणम्। न ह्यत्राप्रत्यक्षं[7] प्रत्यक्षतया संभाव्यते। किं तर्हि? प्रत्यक्षं दृश्यते। अतो नोत्प्रेक्षा[8]। अनुत्प्रेक्षात्वे गमकान्तरमाह—**नापि वस्त्विति**। पदार्थगतो हि इवार्थः उपमायाः प्रयोजको नोत्प्रेक्षायाः। तत्र हेतुः—**तस्या अभिमानेति**। उत्प्रेक्षा हि[10] अभिमानरूपा प्रतिपत्तृधर्मः। तस्मादभिमानगोचर एव इवार्थ उत्प्रेक्षाप्रयोजक इति भावः। अत्र संवादायाह—**यदाहुरित्यादि**। सुखादिवज्ज्ञान[11]धर्मेऽभिमानेऽध्यवसायोक्तिरित्यर्थः।

ननु प्रतिपत्तृ[12]धर्मो[13]ऽध्यवसायस्तर्हि प्रयोक्तुः कवेः न[14] स्यादित्यत आह—**काव्यविषये चेति**। कविरपि खलु काव्ये [15]सहृदय एव। अतो नेयमुत्प्रेक्षा।

नन्वद्भुतदर्शनात् प्रत्यक्षत्वमिहेति काव्यलिङ्गमित्यत आह—**नाप्यत्यद्भुतेति**। अत्यद्भुतपदार्थसाक्षात्कारो हि प्रत्यक्षायमाणत्वे हेतुः। अकाव्यलिङ्गत्वे हेतुमाह—**लिङ्गलिङ्गेति**। हेतुत्वे सत्यपि लिङ्गलिङ्गिभावेन नेह प्रतीतिः। तथात्वे पारोक्ष्यं प्रसजेदिति भावः। कथं तर्हि प्रतीतिरित्यत[16] आह—**योगिवदिति**। नन्वत्यद्भुतत्वहेतुका [17]सचमत्कार[18]प्रतीतिरिह पुरः [19]स्फुरतीव। अतोऽत्यद्भुतत्वहेतुको रसवदलङ्कार एव इत्यत आह—

---

1. C. चक्षुर्विदो 2 A. त्वतीत 3. A. विभावना 4. A. C. प्रतीयमानोत्प्रे 5 E. G. भावनं 6. A. C. F. प्रेक्षाक्त 7. C. प्रत्यक्षते किं 8. A. F. प्रेक्षात्वे ग 9. A. C. F. तदार्थ 10. Omitted in A. C. F. 11. A. C. F. धर्मो 12. A. C. पत्तिः 13. A. व्यवसा 14. A's alt. हि तत् स्यात् 15. C. omits स. 16. G. इत्यत क्तलक्षणं काव्य (under काव्यलिङ्ग) 17. C. omits स 18. E. कारा 19. A. पुनर्हरतीव F. परिस्फुर

नाप्ययं पुरःस्फुरद्रूपतया सचमत्कारप्रतीते रसवदलङ्कारः। रत्यादिचित्तवृत्तीनां तदनुषक्तया विभावादीनामपि साधारण्येन हृदयसंवादितया परमाद्वैतज्ञानिवत्प्रतीतौ तस्य भावात्। इह तु ताटस्थ्येन भूतभाविनां स्फुटतया भिन्नसर्वज्ञवत्प्रतीतेः। स्फुटप्रतिपत्त्युत्तरकालं तु साधारण्यप्रतीतौ स्फुटप्रतिपत्तिनिमित्तक औत्तरकालिको रसवदलङ्कारः स्यात्। नापीयं सूक्ष्मवस्तुस्वभाववर्णनात्स्वभावोक्तिः। तस्यां लौकिकवस्तुगतसूक्ष्मधर्मवर्णनेन साधारण्येन हृदयसंवादसंभवात्। इह तु लोकोत्तराणां वस्तूनां स्फुटतया

नाप्ययमिति। तत्र हेतुः—**रत्यादीति**। परिपाट्यापि सचमत्कारप्रतीतेः पुरः[1]स्फुरणा[2] साधारणी, अथापि न भाविकरसवतोरभेदः। कुतः? रतिहासादिचित्तवृत्तीनां[3] तदनुरञ्जितत्वेन विभावानुभावव्यभिचारिणां च यदा परमाद्वैत[4]ज्ञानिवत् ममैव शत्रोरेवेत्यादिविशेषपरिहारात् साधार[5]ण्येन [6]हृदयसंवादिनी प्रतीतिः [7]तदैव रसवतो भावः*। विभावादीन् रसवत्प्रस्तुतौ विवेचयिष्यामः। इह तु भूतभाविनां प्रतीतिर्न साधा[8]रण्येन अपितु प्रतिपत्तुः ताटस्थ्येन। स्फुटतया ताटस्थ्यं[9] हि भेदः। यथा [10]साङ्ख्यादिसिद्धानां[11] भेदे न सर्वं जानतां प्रतीतिः। ननु ताटस्थ्येन प्रतीतावतीतादि[12]स्फुटत्वं हेतुः। स्फुटप्रतीतिश्च प्रमुखे[13] निष्पत्तौ तु साधारण्यप्रतीतिरेव। अतः कथं भाविकमित्यत आह—**स्फुटप्रति**[14]**पत्तीति**। स्फुटप्रतिपत्तिनिमित्तकस्फुटप्रती[15]त्युत्थापितभाविकहेतुक इत्यर्थः। "मुनिर्जयती"त्यादौ हि कुम्भसम्भवादिवृत्तमादौ ताटस्थ्येन अतीतादिरूपतया प्रतीयते तदैव भाविकसिद्धिः। अथोत्तरकालं प्रतिपत्तृ[16]प्रतीतेः ताद्रूप्यापत्त्या विभावादीनां साधारण्ये[17] रसवान्[18] भाविकहेतुकस्स्यात्। न चैतावता भाविकापलापश्शक्यत इति यावत्।

नन्विह सुन्दरवस्तुस्वभावश्चेन्न[19] वर्ण्येत ततस्तदप्रत्यक्षायमाणता। अतस्स्वभावोक्तिरित्यत आह—**नापीयमिति**। तत्र[20]हेतुः—**तस्यां**[21] **लौकिकेति**। स्वभावोक्तेर्हि लौकिकानामेव वस्तूनां य[22]स्सूक्ष्मो धर्मः प्रेक्षावत्प्रतिभैक[23]समधिगम्यस्तस्य वर्णने हृदयसंवादस्साधारण्येन। इह पुनरत्यद्भुतत्वेनालौकिकानां[24] वस्तूनां प्रतीतिः तटस्थतया। अतो हृदयसंवादातिरिक्तानामंशानां वैलक्षण्यम्। ननु लौकिकवस्तुप्रतीतिसाधारण्ये[25] स्वभावोक्तिः, अलौकिकवस्तुप्रतीतिस्फुटत्वे तु[26] भाविकमिति व्यवस्था। यदि लौकिकवस्तुप्रतीतेः

---

1. A. पुनरस्वीकरणा 2. E. स्फुरत्ता 3. A's alt. C. नाम् अनु 4. A. C. त ज्ञानी पदार्थरत्योरेवेत्यादि A's alt. द्वैतं तानि 5. C. रणेन 6. A. G. सहृद 7. A. C. D. G. H. I. अतो भावः 8. C. असाधा 9. A. F. स्थ्यात् त्रिभेदः 10. A. C. F. संख्या 11. D. E. G. H. I. सिद्धान्तानां 12. A. C. स्फुटनं 13. A. C. मुखे दोषान्तसाधा 14. A. पत्तिनिमित्तक C. पत्तिरिति 15. A.F. प्रतिपत्त्यु 16. C. प्रतिपत्ति 17. E. अद्भुतो रस 18. F. वद्भावि 19. C चेद्वर्ण्ये 19a. All mss. 20. A. C. तत्र लौकिकहेतुः 21. A. C. तस्या लौकिका श्रतिः स्व 22. Omitted in A. C. 23. A. C. समाधि 24. A. C. कानां तथा प्र 25. A. F. रण्येन 26. Omitted in A. C.

* That is तदैव रसवान् भवति।

ताटस्थ्येन प्रतीतेः। क्वचित्तु लौकिकानामपि वस्तूनां स्फुटत्वेन प्रतीतौ भाविकस्वभावोक्त्योः समावेशः स्यात्। न च हृदयसंवादमात्रेण स्वभावोक्ति-रसवदलङ्कारयोरभेदः। वस्तुस्वभावसंवादरूपत्वात्स्वभावोक्तेः, चित्तवृत्ति-संवादरूपत्वाच्च रसवदलङ्कारस्य, उभयसंवादसंभवे तु समावेशोऽपि घटते। यत्र वस्तुगतसूक्ष्मधर्मवर्णना स्यात्तत्र स्वभावोक्तिः। अन्यत्र तु रसवद-लङ्कार एव। नाप्ययं शब्दानाकुलत्वहेतुको झटित्यर्थसमर्पणरूपः प्रसादाख्यो गुणः। तस्य हि स्फुटास्फुटोभयरूपवाक्यार्थगतत्वेन झटिति समर्पणं रूपम्

स्फुटत्वं तदा किं स्यादित्यत आह—**क्वचित्त्विति**। लौकिकवस्तुबलात् स्वभावोक्तिः। स्फुटत्वप्रतीतिबलात् भाविकमतस्सङ्करः। हृदयसंवादसाधारण्यात् स्वभावोक्ति[1]रसवतो-र्योऽप्य[2]भेदः प्रसङ्गात्प्रतीतस्तत्र विवेचयति—**न च हृदयसंवादेति**। स्वभावोक्तौ रसवति च यद्यपि साधारण्येन हृदयसंवादस्सचेतसां, तथापि नानयोरभेदः। तत्र हेतुः—**वस्तुस्व-भावेति**। सत्यपि साधारण्ये वस्तुस्वभावस्य संवादः स्वभावोक्तौ रसवति तु चित्त[3]वृत्तेः। वस्तुस्वभावचित्त[4]वृत्तिरूपत्वात् अनयोस्संपाते[5] तु सङ्करः इत्याह—**उभयसंवादेति**। समावेश[6]स्सङ्करः। समावेशघटने लिङ्गमाह[7]—**यत्र वस्तुगतेति**। यत्र चित्तवृत्तिसंवादवति विषये[7a] वस्तुगतसूक्ष्मधर्मवर्णना स्यादित्यर्थः। **अन्यत्रत्विति**। सूक्ष्मवस्तुधर्मवर्णना[8]विरहिणि चित्तवृत्तिसंवादमात्रशालिनि विषये [9]रसवानेव।

ननु व्यस्त[10]सम्बन्धरहितसन्दर्भसमर्पितत्वमिह लक्षणं तथात्वे च प्रसादाख्यो गुण एवेत्यत आह—**नाप्ययं[11] शब्देत्यादि**। इह यद्यपि झटित्यर्थसम[12]र्पणं शब्दानाकुलत्व-हेतुकः[13] अथापि नायं प्रसादः। तत्र हेतुः—**तस्य हि स्फुटा[14]स्फुटेत्यादि**। स्फुटोऽ[15]स्तु वाक्यार्थो अस्फुटो वा। तदुभयगतत्वेन झटिति समर्पणं प्रसादस्वरूपम्।

यदाह—

शुष्केन्धनाग्निवत् स्वच्छजलवत् सहसैव यत्।
व्याप्नोत्यन्यत्[16] प्रसादोऽसौ सर्वत्र विहितस्थितिः॥ इति॥

अत्र शुष्केन्धनाग्निवदित्यस्फुटं वाक्यार्थं प्रत्युपमोक्तिः[17] स्वच्छजलवदिति स्फुटं[18] प्रति। अतस्सर्वत्र विहित[19]स्थितित्वेन झटिति समर्पणं रूपं प्रसादस्य। अस्य तु प्रसादे[20] झटिति समर्पितस्य स्फुटत्वेन प्रतीतौ सत्यां समनन्तरं स्वरूपप्रतिलम्भः। स्वरूपं[21] हि अस्य श्रोतरि कविगतभावप्रतिबिम्बनं पौनःपुन्येन चेतसि विनिवेशस्वभावभावना-

---

1. A. उक्तिरस्वतो E. उक्तिः 2. F. यं भेदः 3. E. प्रवृत्तेः 4. E. प्रवृ 5. A. संवादेन तु 6. A. C. वेशघटने 7. A's alt. C. मात्रे 7a. All mss. read here an additional संवादवति 8. E. वर्णन 9. A's alt. रतिवा 10. A. C. व्यत्यस्त 11. F. नापीति झटि 12. C. अर्पणा 13. A. हेतुः E. हेतुकं 14. F. स्फुटोऽस्तु I. स्फुटा उक्तिव्यवस्था (See towards the end of the Sarvasva) 15. A. वस्तु 16. A. omits त् 17. E. G. उक्ति 18. A. C. स्फुटयतः प्रसादोऽस्य 19. F. स्थितित्वं 20. E. प्रसादेन 21. F. रूपस्य श्रो

अस्य तु झटिति समर्पितस्य स्फुटत्वेन प्रतीतौ स्वरूपप्रतिलम्भः । तस्मादयं सर्वोत्तीर्ण एवालङ्कारः । लक्ष्ये चायं प्रचुरप्रयोगो दृश्यते । यथा—

मुनिर्जयति योगीन्द्रो महात्मा कुम्भसंभवः ।
येनैकचुलुके दृष्टौ दिव्यौ तौ मत्स्यकच्छपौ ॥

यथा वा—हर्षचरितप्रारम्भे ब्रह्मसदसि वेदस्वरूपवर्णने । अत्र हि प्रत्यक्षमिव स्फुटत्वेन तदीयं रूपं दृश्यते । एवं तत्रैव मुनिक्रोधवर्णने, पुलिन्दवर्णनादौ ज्ञेयम् ।

त्मकं वा । तथाविधस्य[1] तु प्रतिबिम्बनं स्फुटप्रतीत्युत्तरकालमेव । अतः प्रसादोऽस्याङ्गत्वेन प्राक्सिद्धिकः[2] । अयं तु तदु[3]पकृत(स[4])मनन्तर(स्व[5])सिद्धिकः । ततोऽ[6]न्य एव । अतो न कुत्रचिदन्तर्भाव[7] इति निगमयति—**तस्मादयमिति** । [8]सर्वोत्तीर्णः भ्रान्त्यादिषु प्रसादगुणान्तर[9]शङ्कितेष्वे[10]कत्रापि नान्तर्भावयितुं शक्य[11]इत्यर्थः । इत्थं लक्षणतोऽस्य नानुपपत्तिः काचित् ।

लक्ष्यतोऽपि[12] प्राचुर्यमित्याह—**लक्ष्ये चाय[13]मिति । मुनिर्जयतीति** । मननात् मुनिः । योगीन्द्रत्वान्महात्मा । स्वयं तु कुम्भसंभवः । तथाविधेन येन एकस्मिन्नेव चुलुके[14] पिपा[15]सोद्धृतनिरवशेषार्ण[16]वाम्भसि प्रसृतिगर्ते दिव्यौ अमानुषा[17]नुभवातिशयौ तौ विष्णोर्दशा[18]वतारेषु प्रसिद्धापदानौ मत्स्यकच्छपौ यदृच्छया चुलुकान्तर्भावात् पर्याकुलं लुठन्तौ दृष्टौ । अत्रातीतवृत्तोऽपि मुनिः अलौकिकत्वेनात्यद्भुतस्सन्नादर[19]प्रत्ययेन हृदि सन्धार्यमाणत्वात् अनाकुलसन्दर्भसमर्पितत्वाच्च प्रत्यक्षायमाणः तथाविधं कविभावं [20]प्रतिपत्तृषु प्रतिबिम्बयति पौनःपुन्येन चेतसि भावनां विनिवेशयतीति भाविकत्वम् । प्राचुर्यार्थमुदाहरणान्तराणि—**यथा[21] वा हर्षचरितेत्यादिना**[22] । हर्षचरितप्रारंभे हि देवीं सरस्वतीं अभिशप्तवते क्रोधमुनये क्रुद्धानां वेदानां स्वरूपम् उपवर्णितम् । यथा—"रोषविमुक्तवेत्रासनैरोङ्कारमुखरमुखैरुत्क्षेपडोलायमानजटाभारभरितदिग्भिः परिकरबन्धभ्रमितकृष्णाजिनपटच्छायाश्यामायमानदिवसैरमर्षनिःश्वासडोलाप्रेङ्खोलितब्रह्मलोकैः सोमरसमिव स्वेदविसरव्याजेन स्रवद्भिः अग्निहोत्रपवित्रभस्मस्मेरललाटपट्टकुशतन्तुचीवरीभिराषाढिभिः प्रहरणीकृतदण्डकमण्डलुमण्डलैः मूर्तैः चतुर्वेदैरिति" । योजनायाह—**अत्र हि प्रत्यक्षमिवेति**[23] ।

---

1. F. धस्य प्रतिलंभः 2. A. कृत् 3. A. तत्प्रकृत C. तत्प्राकृत 4. All mss, कृतस्सम 5. All mss. अन्तरस्य 6. A. C. न्यायेन अतो 7. A's alt. भावामति 8. A. सर्वोक्ती शरभकेतोस्सुन व्याघ्रकेतुं तेषु शङ्कि ९. E. G. अन्तेषु 10. G. एकतरत्र 11. A. C. F. शक्यत 12. A. F. लक्षणतोऽथ प्रा 13. E. चापयं G. चान्वयवमितीति 14. A. C. चुलके 15. A's alt. C. साञ्चित 16. A. C. विशेषाम्भ 17. A. C. D. F. अभाव 18. E. G. दशसु अव 19. A's alt. घनादर 20. A's alt. C. repeat प्रति 21. Omitted in A. C. 22. A. C. आदिना पुलिन्दवर्णनं तु 23. After इति A. E. F. G. give the passages relating to क्रोधमुनिवर्णनं as "पुनर्दृष्टा ... ... to कृष्णाजिनस्य" and to पुलिन्दवर्णनं as "शरभकेतोः सूनुः ... ... to सदा समुद्वहन्तम्"

अयं त्वत्र विचारलेशः संभवति । इह क्वचिद्वर्णनीयस्य वर्णनावशादेव प्रत्यक्षायमाणत्वम् । क्वचित्प्रत्यक्षायमाणस्यैव वर्णनम् । आद्यो यथोदाहृतम् । द्वितीयो यथा—

> **अनातपत्रोऽप्ययमत्र लक्ष्यते**
> **सितातपत्रैरिव सर्वतो वृतः ।**
> **अचामरोऽप्येष सदैव वीज्यते**
> **विलासबालव्यजनेन कोऽप्ययम् ॥**

इति । अत्र प्रथमप्रकारविषयोऽयमलङ्कारो न प्रकारान्तरगोचरः । कविसमर्पितानां धर्माणां ह्यलङ्कारत्वात् । न हिमांशुलावण्यादीनामिव वस्तुसन्निवेशिनाम् । अपि च "शब्दानाकुलता चेति तस्य हेतून्प्रचक्षते" इति भामहीये, "वाचामनाकुलत्वेनापि भाविकम्" इति चोद्भटलक्षणे व्यस्त-

---

ननु वर्णनावशात् प्रत्यक्षायमाणत्वं किं भाविकविषयः आहोस्विदनुभाव[1]विशेषात्प्रत्यक्षायमाणस्य सतो वर्णनमित्यत आह—**अयं** [2]**त्वत्रेत्यादि** । लेश इत्यल्पावशिष्टतामाह—**वर्णनावशादिति**[3] । भणितिमाहात्म्यमाविष्करोति—**प्रत्यक्षायमाण**[4]**स्यैवेति**[5] । भणितिमाहात्म्यनैरपेक्ष्येण निजानुभावविशेषादेव प्रत्यक्षायमाणत्वमनुसन्धत्ते ।

अनातपत्रोऽपीति[6] । अत्र[7] अनातपत्रोऽपि सितातपत्रैरिव वृतत्व[8]मचामरस्यापि बालव्यजने[9]नैवोपलक्षितत्वम् । अनुभावविशेषादेव प्रत्यक्षायमाणत्वं[10] वर्ण्यते न तु वर्णनावशात्प्रत्यक्षायमाणता ।

इत्थं विषयद्वये अवस्थिते भाविकम् एकत्रैवेत्याह—**अत्र प्रथमप्रकारेति** । न[11] प्रकारान्तरगोचर इति यदुक्तं तत्र हेतुः—**कविसमर्पितानामिति** । ये हि [12]कविना प्रतिभया समर्प्यन्ते मुखादौ चन्द्रत्वकमलत्वादयो धर्मास्तेषामेवाङ्कलारत्वम् । न तु परमा[13]र्थतः सन्निविष्टानां हिमांशुलावण्यादीनाम् । अतो द्वितीयप्रकारे प्रत्यक्षायमाणत्वं वस्तुसन्निवेशीति न भाविकालङ्कारः । युक्त्यन्तरेणापि [14]द्रढयितुमाह—**अपि च**[15] **शब्दानाकुलतेत्यादि** । चकाराद[16]भूतभावित्वादयः[17]शब्दानाकुलता चेति हेतवो भामहानुशासने उद्भटलक्षणे च अनाकुलत्वरूपं यदेतद्वचस्तसम्बन्धरहितशब्दसमर्पितत्वं प्रत्यक्षायमाणत्वप्रतिपादकमुक्तं तत्[18] कथं प्रयोजकीभवेत् । वस्तुसन्निवेशिधर्मगतत्वेनापि भाविक[19]संभवे निष्प्र-

---

1. A. F. भव C. भाव्य 2. A. C. omit तु 3. F. इति माहा 4. A. स्यवेति 5. A. C. इति माहा 6. C. इत्यादिना आतपत्रो 7. Omitted in A. C. G. 8. A. G. तत्वे चाय 9. A. F. जनेन वोप 10. A. C. F. G. माणं 11. Omitted in A. C. F. G. 12. A. C F omit क 13. A. C. F. अर्थसन्नि 14. A. G. दढ 15. Omitted in A. C. G. 16. F. रात भूतभावित्वादयो समुच्चीयन्ते भूत 17. A. दय एवानाकुल C. त्वादपि श 18. Omitted in A. C. G. 19. F. विकं नि

संबन्धरहितशब्दसन्दर्भसमर्पितत्वं प्रत्यक्षायमाणत्वप्रतिपादकं कथं प्रयोजकीभवेत्, यदि वस्तुसन्निवेशिधर्मगतत्वेनापि भाविकं स्यात्। तस्माद्वास्तवमेव महत्त्वमुत्तरप्रकारविषये वर्णितमिति नायमलङ्कारः। यदि तु वास्तवमपि सौन्दर्यं कविनिबद्धं कविनिबद्धवक्तृनिबद्धं वा सकलवक्तृगोचरीभूतं स्वभावोक्तिवदलङ्कारतया वर्ण्यते, तदायमपि प्रकारो नातीव दुःश्लिष्टः। अतएव, "प्रत्यक्षा इव यत्रार्थाः क्रियन्ते भूतभाविनः। तद्भाविकम्।" इत्येतावदेवान्यैर्भाविकलक्षणमकारि। स्वभावोक्त्या किञ्चित्साद्दश्या-

---

योजन[1]मेव स्यात्। अतो न[2] द्वितीयप्रकारे भाविकमिति निगमयति—**तस्माद्वास्तवमेवेत्यादि**। अत्र उत्तरे प्रकारे ननु वास्तवेऽपि सौन्दर्ये लौकिकतया[3] मा भूद्विच्छित्तिः। कवेः कविनिबद्धस्य वा[4] वक्तुः[5] निबन्ध[6]वशादस्त्येव सकलव्यवहर्तृगोचरीभूतता[7] दुरपह्नवा विच्छित्तिः। तत्र कुतो न भाविक[8]मित्यत आह—**यदि तु वास्तवमपीत्यादिना**। यदि वस्तुसन्निवेश्यपि सौन्दर्यनिबन्धवशात् सविच्छित्तिकं [9]प्राञ्च आचार्याः स्वभावोक्तिवदलङ्कारतया वर्णयेयुः तदा[10] अयमपि वास्तवसौन्दर्यविषयतया समाशङ्कितो भाविकप्रकारो [11]नातीव दुःश्लिष्टः। [12]सुश्लिष्ट एव सत्यां सामग्र्याम्। अय[13]मिहाशयः—यथा हि स्वभावोक्तिः वास्तवसौन्दर्यावलम्बिनी वस्तुस्वभावसौक्ष्म्यात् साधारण्येन सचेतनसंवादाच्च विच्छित्तिमती[14] वर्णिता तथैव वास्तवसौन्दर्यावलम्बितया निबन्धा[15]द्विच्छित्ति[16]विशेषोऽयमलङ्कारतया वर्णनीय एव। तथा च सति भूतभावित्वादि सामग्रीसद्भावेऽन्यकल्पना[17]-गौरवादयमपि भाविकप्रकार इति उन्मीलनं योग्यतया सुशकमेव। उन्मीलिता[18]श्चोल्लेखभावोदयसन्धि[19]शबलतादय अतिप्रथन[20]स्वातन्त्र्येऽपि चिरन्तनसमयव्यतिक्रमः स्यादिति। [21]अमुमेवाशयमाविश्चिकीर्षुः अभियुक्तसंवादायाह—**अतएवेत्यादि**। भूतभाविनः प्रत्यक्षा इव यत्र क्रियन्ते इत्येतावदेव भाविकलक्षणम[22]कारि यैः[23] खलु तैश्शब्दानाकुलत्वादिव लक्षणत्वेनोक्तम्। नापि वा वस्तुसन्निवेशिनः। सौन्दर्यस्य [24]निबन्धाद्विच्छित्तिः स्वभावोक्तितुल्यनयशालिनी[25] अलङ्कारत्वेन प्रसञ्जिता। अतो भूतभाविप्रत्यक्षवद्भाविकलक्षणस्य भाविकस्य शब्दानाकुलत्ववास्तव सौन्दर्यावलम्बेनापि[26] भाविकप्रभेदोऽभ्यनुज्ञायते। यत इत्थं स्वभावोक्तिप्रतियोगितया मीमांसा प्रवर्तयितव्या, अतः[27] सम्प्रति सङ्गतिमाह—**स्वभावोक्त्या किञ्चिदिति**। वास्तवसौन्दर्यत्वं[28] साद्दश्यम्[29]। तच्च लौकिकत्वसूक्ष्मत्व-

---

1. A's alt. C. जनामपस्यात् 2. A's alt. C. यद्विती 3. A. C. F. ताया 4. A. F. G. वाचकत्वनि 5. C. वस्तु E. वक्तुं 6. C. निबद्ध 7. F. तत्वादुर 8. F. कत्वमित्य 9. C. प्राक् न 10. A. F. तथा 11. A. C. वातावदु 12. A. G. संश्लि 13. A. C. अहमिहादाय यथा 14. A. C. तिरभिवर्णि 15. A's alt. निबद्धा 16. A. C. शेषेष्वयं 17. E. कल्पन 18. A. F. ताश्चो 19. E. F. शब लत्वाद 20. A. प्रधन F. प्रमथ 21. A. अयम् 22. A. आवारि C. आकारि F. omits अ 23. A. C. तयोर्न खलु 24. A. निर्बन्ध 25. A. शालिन्यनलं C. शालिन्यं न ज्ञायते 26. A. C. F. omit अपि 27. A. C. F. अथ 28. E. G. सौन्दर्यविषयत्वं 29. A's alt. C. सन्दश्य

तदनन्तरमस्य लक्षण कृतम् ।

समृद्धिमद्वस्तुवर्णनमुदात्तम् ॥८०॥

स्फुटत्वसाधारण्यताटस्थ्यप्रतीत्या[1]दिभिः वैधर्म्यप्राचुर्यात् अल्पक[2]मित्य[3]भिसन्धायोक्तं—**किञ्चिदिति** । सत्य[4]पि सादृश्यं किञ्चिन्मात्रं अथापि[5] न्यायसञ्चारायेहास्माभिः लक्षणमस्य[6] कृतम् ।

योऽयं प्रत्यक्ष[7]वद्भाव[8]स्त्वतीतानागतार्थयोः ।
तद्भावबिम्बनाच्चित्ते विनिवेशाच्च[8]भाविकम् ॥
[9]नाविपर्ययतो भ्रान्तिः[10] साक्षात्त्वान्नेतिवृत्तकम्[11] ।
अन्यत्वा[12]नध्यवसितेर्न चात्रातिशयोक्तिता ॥
न परं वर्तमानार्थ[13]धर्मः प्रत्यक्षतेष्यते ।
प्रतिपत्त्रनपे[14]क्षायां प्रत्यक्षत्वपरिक्षयात्[15] ॥
प्रत्यक्षत्वे च[16] सामग्री भावना[17]द्भुतवस्तुजा ।
प्रत्यक्षत्वं न संभाव्यमिह नोत्प्रेक्षणं ततः ॥
अलिङ्ग[18]लिङ्गिभावाच्च काव्यलिङ्गं न चेष्यते ।
ताटस्थ्यात्[19]स्फुटसंवित्तेः न तदा रसवद्भ्रमः ॥
पश्चात्साधारणीभावे रसवांस्तन्निमित्तकः[20] ।
स्फुटत्वान्न स्वभावोक्तिर्लोको[21]त्तीर्णस्य वस्तुनः[22] ॥
स्वभावोक्तेः रसवतो भेदस्संवाद[illegible]दतः ।
न प्रसादगुणश्चैतद्यस [illegible]दौत्त[illegible]कालिकम्[23] ॥
वास्तवेऽपि [24]हि सौन्दर्ये योग्यत्वादस्य सम्भवः ।
चिरन्तनानुरोधात्तु तथा व्यक्तं न कीर्तितम् ॥
भाविके[25] बुद्धिसंवादो मया[26]स्याद्यदि[27] कस्यचित् ।
व्याख्याशिल्प[28]स्य निकषः[29] [30]स मे धीमान्भविष्यति ॥

उदात्ताय[31] सूत्रम्—**समृद्धि[32]मद्वस्तुवर्णनमुदात्तम्** । समृद्धिमतो वस्तुनः कविप्रति-

---

1. A. C. तीत्या वै 2. D. E. F. H. I. अल्पक 3. A's alt. इत्यादिभिः 4. C. E. यद्यपि 5. C. मयापि 6. F. लक्षगसुक्तं 7. A. F. सद्भाव C. वद्भाव 8. A. वेशनाच्च 9. A. F. न वि 10. A. C. भ्रान्ति 11. A. वृत्त 12. F. यन्नान 13. A. माना कथं 14. A. C. त्तायाः 15. A. त्तायाः C. E. त्तया 16. A. B. C. स्वसाम 17. C. भावनाभूत 18. C. लिङ्गं 19. E. G. omit त् 20. A. C. E. निमित्ततः 21. A. C. उक्तिः नास्य 22. A. B. C. वस्तुतः 23. A. कालिक्रा C. कालिकः 24. A. B. C. च 25. A. C. द्विर्द्विसं 26. A. न स्यादितिक A's alt. मया सत्यस्य क 27. C. यस्य 28. A. C. रव्यशीलस्य 29. A. C. निष्कर्षः 30. A. सधामान्माभ C. F. स धीमान् मे 31. A. C. दात्तसू 32. A. C. ऋद्धवस्तु E. ऋद्धिमतोव H. ऋद्धिवस्तु

स्वभावोक्तौ भाविके च यथास्थितवस्तुवर्णनम् । तद्विपक्षत्वेनारोपितवस्तुवर्णनात्मन उदात्तस्यावसरः । तत्रासंभाव्यमानभूतियुक्तस्य वस्तुनो वर्णनं कविप्रतिभोत्थापितमैश्वर्यलक्षितमुदात्तम् । यथा—

मुक्ताः केलिविसूत्रहारगलिताः संमार्जनीभिः कृताः
प्रातः प्राङ्गणसीम्नि मन्थरचलद्बालाङ्घ्रिलाक्षारुणाः ।
दूराद्दाडिमबीजशङ्कितधियः कर्षन्ति केलीशुका
यद्विद्वद्भवनेषु भोजनृपतेस्तत्त्यागलीलायितम् ॥

अङ्गभूतमहापुरुषचरितश्च ॥८१॥

उदात्तशब्दसाम्यादिहाभिधानम् । महापुरुषाणामुदात्तचरितानामङ्गिभूतवस्त्वन्तराङ्गभावेनोपनिबध्यमानं चरितं चोदात्तम् । महापुरुषचरितस्योदात्तत्वात् । यथा—

तदिदमरण्यं यस्मिन्दशरथवचनानुपालनव्यसनी ।
निवसन्बाहुसहायश्चकार रक्षः क्षयं रामः ॥

अत्रारण्ये वर्णनीये रामचरितमङ्गत्वेन वर्णितम् ।

भोत्थापितैश्वर्य[1]वर्णनमुदात्तालङ्कारः । ससङ्गतिकं व्याचष्टे—**स्वभावोक्तावित्यादिना**[2] । यथावस्थितत्वं[3] लौकिकत्वम् । आरोपितत्वं कविकल्पितत्वम् । अव (सरः[4]) प्राप्तिः । ऐश्वर्यलक्षितमिति लक्ष्यपदनिरुक्तिः[5] ।

मुक्ताः केलीति— विसूत्रता[6] छिन्नसूत्रता । संमार्जनीभिः [7]प्राङ्कणसीम्नि कृताः [8]यत्कर्षन्तीति वाक्यार्थ[9]परामर्शः । यदेतत्कर्षणं तत्त्यागलीलायितमित्यर्थः ।

उदात्तं तु समृद्धस्य वस्तुनः कविवर्णनम्[10] ।

उदात्तान्तराय सूत्रम्—**अङ्गभूतमहापुरुषचरितश्च** । पूर्वमैश्वर्ययोग उदात्तत्वम् । इह पुनश्चरितस्य उदात्तत्वम्[11] । अतश्शब्दसाम्यात्सङ्गतिः[12] । तदेतदाह—**उदात्तशब्देत्यादि** ।

[13]**तदिदमिति**—अत्रारण्यं तद्वृत्तान्तः[14]पातादङ्गी, यद्वृत्तान्तःपातात् रामचरितमङ्गम् । तदेतदाह—[15]**अत्रारण्य इति** । अस्य चेह कीर्तनं दर्शनान्तरानुसारेण । [16]ध्वनिदर्शने तु द्वितीयोदात्तविषये रसवदादय एव । विवेचयिष्यते[17] चैतत् ।

---

1. A. C. H. र्यवद्व वस्तुवर्ण 2. E. G. omit. ना 3. A. C. E. F. स्थितस्य 4. All mss. अवतार: 5. H. उक्तिः उदात्तं तु 6. A. C. सूत्रिताः सं 7. C. अङ्गण 8. C. यः कर्ष 9. A. C. अर्थः 10. H. वर्णनं विभावादिभिः (P. 213) 11. E. F. G. उदारत्वं 12. C. सन्ति 13. A. C. omit तत् 14. A. वृत्तान्तान्तः C. वृत्तातः 15. A. C. F. तत्र 16. A. C. F. स्वदर्श 17. Except Other mss. A. F. G यिष्यति.

रसभावतदाभासतत्प्रशमानां निबन्धे रसवत्प्रेयऊर्जस्विसमाहितानि ॥८२॥

उदात्ते महापुरुषचरितस्य चित्तवृत्तिरूपत्वाच्चित्तवृत्तिविशेषस्वभावत्वाच्च रसादीनामिह तद्वदलङ्काराणां प्रस्तावः। अत एव चत्वारोऽलङ्कारा युगपल्लक्षिताः। तत्र विभावानुभावव्यभिचारिभिः प्रकाशितो रत्यादिश्चित्तवृत्तिविशेषो रसः। भावो विभावानुभावाभ्यां सूचितो निर्वेदादिस्त्रयस्त्रिंशद्भेदः। देवतादिविषयश्च रत्यादिर्भावः।

अङ्गच[1]न्तरेऽङ्गतापन्नं[2] महच्चरितलक्षणम्[3]।
द्वितीयोदात्तविषयो व्याप्तो रसवदादिभिः॥

रसवदा[4]द्यर्थं सूत्रम्—**रसभावतदाभासतत्प्रश[5]मानां निबन्धे रसवत्प्रेयऊर्जस्विसमाहितानि।** विभावादिभिः अभिव्यञ्जितो[6]रत्यादिभावो रसः[7]। तथा विभावानुभावैः सूचिता व्यभिचारिणः देवताविषया रतिश्च भावः। तावेवाविषयप्रवृत्तावाभासौ। प्रयास्यदवस्था तु प्रशमः। एषां चतुर्णामुपनिबन्धे परिपाटचा रसवान्[8] प्रेयः [9]ऊर्जस्वि समाहितमिति अलङ्कारा इति सूत्रार्थः। ससङ्गतिकं व्याचष्टे—**उदात्ते महापुरुषेत्यादिना।** तदलङ्काराणां चित्तवृत्तिविच्छित्त्यात्मनामलङ्काराणामित्यर्थः। **अत एवेति**[10]। यतश्चत्वारोऽपि चित्तवृत्त्यात्मानः[11] अतस्समानयोगक्षेमतया युगपदेकसूत्रक्रोडीकारेण लक्षिताः। रसस्वरूपं विवेचयति—**तत्र विभावेति**[12]। रतिहास[13]शोकादीनां वासनात्मनां स्थायिभावानां यानि लोके कार्यकारणसहका[14]रीणि तानि काव्ये सन्द्द[15]ब्धानि नाटचे [16]चाभिनीतानि गुणालङ्कारम[17]हिम्ना[18] चतुर्विधाभिनयमहिम्ना च विभावना[19]दनुभावनाद्विशिष्याभिमुख्यचरणाच्च विभावानुभावव्यभिचारिण उच्यन्ते। तैः प्रकाशितो व्यञ्जितो रत्यादिः सामाजिकचित्तवृत्तिविशेषः[20] शृङ्गारादिको रस इति दिक्। विशेषः **सम्प्रदायप्रकाशिन्यादौ** ज्ञेयम्[21]। इहानुपयोगान्न[22] प्रपञ्च्यते।

भाव[23]स्वरूपमाह—**भावो विभावेत्यादि। विभावानुभावाभ्यामिति।** व्यभिचारि-

---

1. A's alt. C. अभ्य 2. A. E. F. H. I. आपन्न 3. A's alt. C. वर्णनम् 4. A. वदर्थे 5. E. G. प्रशम 6. A. G. तो भावो 7. A. C. F. H. रसः व्यञ्जिता देवादि[I.] विषया रतिर्विभावानुभाव[II.] सूचिताः व्यभिचारी[III.] च भावः [I. C. देवाति H. देवादि II. H. संचिताः III. F. चारिणश्च] 8. A. C. वत् 9. A. C. E. ऊर्जडास्वित्समा 10. E. G. व चेति 11. A. आत्मनः 12. H. इति भावोदयार्थं सूत्रं 13. C. भास 14. C. कारि 15. A. C. दिग्धानि 16. A's alt. चाभावेति तानि C. च भावेति तानि 17. A's alt. मङ्गिनो 18. A. C. म्ना विभा 19. A. C. भावनाद्विशि 20. A. C. विशेषाः 21. A. C. F. ज्ञेयः 22. A. C. नोच्यते 23. C. भावप्रशमस्वरूपं

तदाभासो रसाभासो भावाभासश्च । आभासत्वमविषयप्रवृत्त्यानौचित्यात् । तत्प्रशम उक्तप्रकाराणां निवर्तमानत्वेन प्रशाम्यदवस्था । तत्रापि रसस्य परं विश्रान्तिरूपत्वात्सा न संभवतीति परिशिष्टभेदविषयो द्रष्टव्यः । एषामुपनिबन्धे क्रमेण रसवदादयोऽलङ्काराः । रसो विद्यते यत्र निबन्धने व्यापारात्मनि, तद्रसवत् । प्रियतरं प्रेयो निबन्धनमेव द्रष्टव्यम् । एवमूर्जो बलं विद्यते यत्र, तदपि निबन्धनमेव । अनौचित्यप्रवृत्तत्वाच्च तत्र बलयोगः । समाहितः परिहारः । स च प्रकृतत्वादुक्तभेदविषयः प्रशमापरपर्यायः । तत्र

व्यञ्जने व्यभिचार्यन्तराभावो[1]व्यञ्जितः । विभावानुभावाभ्यां व्यञ्जितो[2] व्यभिचारि वाक्यार्थीभावदशायां भाव उच्यते । सोऽपि त्रयस्त्रिंशद्भेदः[3] निर्वेदग्लान्यादिरूपतया । तथा कान्ता[4]व्यतिरिक्ते देवतादिविषये व्यञ्जितो रत्यादिरपि भावः । तस्माद्व्यभिचारिस्थाय्यात्मकतया भावो द्विजातिकोऽवगन्तव्यः । यदाह—

रतिर्देवादिविषया व्यभिचारी तथाञ्जितः ।
भावः[5] प्रोक्तः..................... ॥

आभासयोस्स्वरूपमाह—**तदाभासो रसेत्यादि** । तच्छब्देन रसभावप्रत्यवमर्शः । आभासीभावस्तु अविषयप्रवृत्त्यानौचित्यात्[6] । भावप्रशमस्वरूपमाह—**तत्प्रशम उक्तेत्यादि** । उक्त[7]भावप्रकाराणां निवृत्तौ प्रयास्यदवस्था भावप्रशम उच्यते । ननु[8] रसेऽपि प्रशमः किं नोच्यते इत्यत आह—**तत्रापीत्यादि** । रसस्य हि अखण्डनिरन्तरायप्रतीति[9]चर्वणीयस्य परमविश्रान्तिरूपत्वात् मध्ये प्रयास्य[10]दवस्था दुर्लक्ष्येति[11] रसव्यतिरिक्तपरिशिष्टभेदविषयोऽयं[12] प्रशमो द्रष्टव्यः । एषां च रसभावादीनामुपनिबन्धे परिपाट्या रसवदादयोऽलङ्काराः ।

चत्वार्यपि लक्ष्यपदानि निर्वक्ति—**रसो विद्यत इत्यादिना** । यत्र[13] हि व्यञ्जनोपस्कृतेऽभिधादिव्यापारा[14]त्मनि निबन्धे रसोऽस्ति [15]तद्रसवत्[16] । प्रियतरनिबन्धनमेव प्रेयो ज्ञेयम् । ऊर्जो बलं तद्यो[17]गिनिबन्धनमेव ऊर्जस्वि[18] । ननु निबन्धने बलं नाम किमित्यत आह—**अनौचित्येति** । रसस्यानौचित्येन प्रवृत्तत्वात् दौर्बल्यम् । [19]निबन्धने तु तदुपकृते[20] बलयोगः[21] । समाहितः परिहारः । कस्य ? प्रकृतत्वादुक्तस्य भावभेदस्य यस्य प्रशम इत्यपि[22] पर्यायः ।

ननु रसवदादिना द्वितीयोदात्तस्य च[23]का कक्ष्येत्यत आह—**तत्र यस्मिन्नित्यादि** ।

---

1. E. द्योतितः 2. A. C. G. ञ्जित इति व्य 3. A. भेदः भावप्रशमस्वरूपं 4. F. कान्त्या 5. E. भाव इति आ 6. E. F. G. चित्याभ्यां भाव 7. C. उत 8. A. C. F. G. न तु 9. C. वर्णनीय 10. C. तवस्था 11. A. लक्ष्या भवतीति रस C. लक्ष्या भवतीति र 12. E. यत् 13. A. C. यद्भिन्य 14. A. C पार निब 15. C. तत्र 16. A. C. रसवगानं 17. A. C. योग 18. A. स्वित् 19. A. C. तन्निब 20. A. C. कृति 21. A. C. योगस्य द्वयस्य प्रशम 22. A. अविप 23. omitted in A

यस्मिन्दर्शने वाक्यार्थीभूता रसादयो रसवदाद्यलङ्काराः, तत्राङ्गभूतरसादिविषये द्वितीय उदात्तालङ्कारः। यन्मते त्वङ्गभूते रसादिविषये रसवदाद्यलङ्काराः अन्यस्य रसादिध्वनिना व्याप्तत्वात्तत्रोदात्तालङ्कारस्य विषयो नावशिष्यते, तद्विषयस्य रसवदादिना व्याप्तत्वात्। तत्र रसवत उदाहरणम्—

किं हास्येन न मे प्रयास्यसि पुनः प्राप्तश्चिराद्दर्शनं
केयं निष्करुण! प्रवासरुचिता केनासि दूरीकृतः।
स्वप्नान्तेष्विति वो वदन्प्रियतमव्यासक्तकण्ठग्रहो
बुद्ध्वा रोदिति रिक्तबाहुवलयस्तारं रिपुस्त्रीजनः॥

यत्र हि[1] भामहादिदर्शने वाक्यार्थीभावात् प्रधानभूता एव रसादयो रसवदाद्यलङ्काराः तत्र अङ्ग[2]भूतरसादिविषय उपपद्यते। *कल्पो[3] (?) द्वितीय उदात्तालङ्कारः। यस्मिंस्तु[4] रसवदादिरलङ्कारो अङ्गभूतरसादिविषय[5] एव अङ्गिनस्तु रसादेरलङ्कार्यभावापन्न[6]स्य रसभावादिध्वनिरूपतया व्याप्तत्वात् तत्र धव निदर्शने द्वितीयस्याङ्गभूतमहापुरुषचरितलक्षणस्योदात्तालङ्कारस्य विषयो नावशिष्यते। कुत इत्यत आह—**तद्विषयस्येति**।

इयमिह प्रक्रिया। यत्र[7] रसादयो वाक्या(र्थी[8])भूताः तत्र रसवदादयोऽल-ङ्कारा इत्यलङ्कारमात्ररसिकानां भामहादीनां दर्शने। यदा तु [9]अवाक्यार्थीभावादङ्गभूतो रसादिः, तदाङ्गभूतमहापुरुषचरितलक्षणो द्वितीय उदात्त उपपद्यते नाम। ध्वनिदर्शने तु [10]काव्यात्मनो रसादेः प्राधान्यदशायां[11] अलङ्कार्यत्वादलङ्कारभावानुपपत्तौ अङ्गभूता[12] रसादयो रसवदाद्यलङ्काराः[13]। तथा च सति रसभावादिनायकमहापुरुषचरिताविर्भावोऽपि रसभावाद्यङ्गभावानतिरेकी[14] व्यङ्ग्यव्यञ्जकसम्बन्धात्। व्यञ्जकं हि महापुरुषचरितम्[15]। व्यङ्ग्यं[16] रसभावादि[17]। व्यङ्ग्यभावा[18]विनाभूताङ्गभावं रसवदलङ्कारस्यैव विषयः[19]। व्यञ्जकमात्र विश्रान्तानां अनवगाढधियां द्वितीयोदात्तभ्रम इति।

किं हास्येनेति—स्वप्नदृष्टं नायकं स्वरूप[20]सन्दर्शननिह्नवपरिहासप्रवृत्तं[21] मन्य[22]मानस्य रिपुस्त्रीजनस्योक्तिवर्णनम्। किं हास्येन चिरात्प्राप्तस्सन् पुनर्मे दर्शनं न प्रयास्यसि? निष्करुणता[23] [24]तवेयं प्राप्तिसमकालमेव प्रवासरुचिता इत्युदीरय[25]न्नेव तमदृष्ट्वा "केनासि

---

1. Omitted in A. C. 2. A's alt. C. **अनन्तरं संभूत** 3. A. C. **अल्पद्वि** 4. A. C. **तु विषये रस** 5. A. C. E. G. **विषये अ** 6. C. **अपह्नस्य** 7. A. C. **यद्रसा** 8. All mss. read **वाक्यार्थ** 9. Omitted in A. C. 10. A's alt. **भाव्या** 11. C. **दशायां व्यञ्जकमहापुरुष** 12. A. C. F. **भूत** 13. A. **काराः व्यञ्जकमहापुरुष** 14. Except F. all read **अनतिरेके** 15. A. C. **चरितव्य** 16. A. C. **ङ्गयरस** 17. All mss. read **भावाद्व्यङ्ग्य** 18. A. C. G. **भावोऽपि नाभूता** 19. A. C. F. G. **विषयव्य** 20. A's alt. **दर्शनीयपरि** 21. A. F. **वृत्त** C. **वृत्ति** 22. C. **मन्यरिपु** 23. A. C. **कर्षण** A's alt. **करुणाका** 24. A. **तवह प्राप्ता संप्राप्ति स** C. **तवेह प्राप्तिसम** 25. A's alt. **यन्ते**

* This word seems to be superfluous.

एतन्मतद्वयेऽप्युदाहरणम्। अत्र वाक्यार्थीभूतः करुणो रसः। अङ्गभूतस्तु विप्रलम्भशृङ्गारः। एवं रसान्तरेष्वप्युदाहार्यम्। प्रेयोऽलङ्कारादौ विशेषमनपेक्ष्योदाह्रियते। प्रेयोऽलङ्कारो यथा—

गाढालिङ्गनवामनीकृतकुचप्रोद्भिन्नरोमोद्गमा
सान्द्रस्नेहरसातिरेकविगलच्छ्रीमन्नितम्बाम्बरा।
मा मा मानद माति मामलमिति क्षामाक्षरोल्लापिनी
सुप्ता किं नु मृता नु किं मनसि मे लीना विलीना नु किम्॥

अत्र नायिकाया हर्षाख्यो व्यभिचारिभावः। यथा वा—

तद्वक्त्रामृतपानदुर्ललितया दृष्ट्या क्व विश्रम्यतां
तद्वाक्यश्रवणाभियोगपरयोः श्राव्यं कुतः श्रोत्रयोः।
एभिस्तत्परिरम्भनिर्भरभरैरङ्गैः कथं स्थीयतां
कष्टं तद्विरहेण संप्रति वयं कृच्छ्रामवस्थां गताः॥

दूरीकृतः" इति वदन् [1]व्यासक्तकण्ठग्रहो[2] बुद्ध्वा रिक्तबाहुवलयस्तारं [3]रोदितीति। अत्राङ्गाङ्गिनौ द्वावपि रसावङ्गी रसः। रसवान् मतान्तरे। [4]स्वमते त्वङ्ग[5]भूतो रसवान्। अत उदाहरणमेतन्मतद्वया[6]र्हम्। तदेतदभिसन्धायाह—**एतन्मतद्वयेऽपीति**[7]। तदेतद्विभज्य दर्शयितुमाह—**अत्र वाक्यार्थी[8]भूत इति**। वाक्यार्थीभावात्[9] करुणो रसवान्। मतान्तर इति शेषः। अङ्गभावाद्विप्रलंभशृङ्गारो रसवान्। अस्मन्मत इति शेषः। एवंविधे हि विषये वाक्यार्थीभावात् अङ्गिनं रसं[10] रसवन्तमन्ये प्रतिपेदिरे। अङ्गभूतं तु द्वितीयोदात्तम्। ध्वनिदर्शनविदस्तु अङ्गिनो अलङ्कार्यतां[11] अङ्गभूतस्य रसवदादिरूपतां[12] द्वितीयोदात्ता[13]संभवं च सिद्धान्तितवन्तः। [14]इयं च प्रक्रिया रसान्तरेष्वपि ज्ञेयेत्याह—[15]**एवं रसान्तरेष्विति**। उदाहार्यं उदाहर्तु[16]मर्हं शक्यम्। प्राप्तकालता वोदाहरणस्य। अर्हे[17] शक्ये प्राप्तकालतायां च कृत्यः। इत्थं रसवदलङ्कारे[18] मतद्वयं कक्ष्याविभागेनोदाहृतम्।

प्रेयोऽलङ्कारादौ तु[19] विशेषांशस्तु ज्ञात इति साधारण्येनोदाजिहीर्षुराह—**प्रेयोऽलङ्कारादाविति। गाढा[20]लिङ्गनेति।** मानद मानखण्डन[21] मामेत्यर्धोक्त्या भावावसानहर्षः प्रत्याय्यते। लक्ष्ययोजनायाह—**अत्र नायिकाया इति**। हर्षाख्यो व्यभिचारि[22]भावः सम्भोगशृङ्गारंप्रति [23]गुणत्वात् प्रेयोऽलङ्कार इति शेषः। व्यभिचार्यन्तरायोदाहरति—**तद्वक्त्रेति**। अत्र चिन्तालक्षणो व्यभिचारी विप्रलंभशृङ्गाराङ्गतया प्रेयान्। तदेत-

---

1. A. C. व्यावृत्त 2. C. ग्रहो 3. A. रोदति 4. A. स्वस्यमते A's alt. C. अस्य म 5. A. C. भूते 6. A. C. द्वयोदाहरणं त 7. A इति तदिति तद्विभ 8. A. अर्थ 9. A. C. E. F. भाववत 10. Omitted in A. 11. A. C. कार्यतया 12. A. C. F. रूपत्वात 13. A's alt. C. दात्तसं 14. A's alt. C. इत्थं 15. Omitted in A. 16. A. हर्तु शक्यं 17. C. अर्हो 18. A. कारम C. कारः तद्द्वयं 19. A. C. न 20. F. गाढेति 21. A. C. खण्डक 22. A. C. F. चारी 23. E गुणवा

अत्र चिन्ताख्यो व्यभिचारिभावः । एष एव च भावालङ्कारः । भावस्य चात्र स्थितिरूपतया वर्तनम् । शान्त्युदयावस्थे तु वक्ष्येते । ऊर्जस्वी यथा—

दूराकर्षणमोहमन्त्र इव मे तन्नाम्नि याते श्रुतिं
चेतः कालकलामपि प्रकुरुते नावस्थितिं तां विना ।
एतैराकुलितस्य विक्षततरैरङ्गैरनङ्गातुरैः
संपद्येत कदा तदाप्तिसुखमित्येतन्न वेद्मि स्फुटम् ॥

अत्र रावणस्याभिलाषको विप्रलम्भशृङ्गार औत्सुक्यं च व्यभिचारिभावोऽनौचित्येन प्रवृत्तौ । समाहितं यथा—

अक्ष्णोः स्फुटाश्रुकलुषोऽरुणिमा विलीनः
शान्तं च सार्धमधरस्फुरणं भ्रुकुट्या ।
भावान्तरस्य तव चण्डि ! गतोऽपि रोषो
नोद्गाढवासनतया प्रसरं ददाति ॥

दाह—**अत्र चिन्ताख्य**[1] **इति** । अलङ्कारान्तरभ्रमो मा भूदिति पर्याय[2]मस्याह—**एष एव चेति** । प्रेयान्[3] [4]भावालङ्कारश्चेति पर्यायौ । भावशान्त्यु[5]दयादिभ्योऽस्य भेदमाह—**भावस्य चात्रेति** । स्थितिरूपतायां[6] भावालङ्कारः । [7]शान्त्युदयाद्यवस्था तु पृथगलङ्कारा इति भावः । कौ तौ शान्त्युदयाविति अत आह—**शान्त्युदयेति** । शान्त्यवस्था ऊर्जस्वी[8] समनन्तरं समाहितत्वेन वक्ष्यते । उदयावस्था तु सन्धिशबलताभ्यां सह पृथगलङ्कारत्वेनेत्यर्थः ।

[9]**दूराकर्षणेति** । कालकलामपि[10] नावस्थितिं प्रकुरुते । अत्र[11] विप्रलम्भशृङ्गारोऽनौचित्येन प्रवृत्तः देव्या[12]स्सीताया[13] अविषयत्वाद् । अतो[14] रसं गुणीकृत्य निबन्धन[15]मेव [16]बलादिति ऊर्जस्वी[17] । औत्सुक्यव्यभिचारिणोऽप्यनौचित्यात् प्रेयोऽलङ्कारसङ्करः । तदेतद[18]भिप्रेत्याह —**अत्र रावणस्येत्यादि** । शान्त्यवस्था लक्ष्यत इति प्रतिज्ञातमुदाजिहीर्षुराह—**समाहितं यथेति** ।

अक्ष्णोरिति । उत्क्षुभितेनाश्रुणा [19]पर्याविलोऽरुणिमा चक्षुषो[20]रपगत इत्यादिना [21]रोषापगमः[22] । कटाक्षविलासतारकातारल्याद्यनाविर्भावात् प्रसरा[23]प्रदानम् । अतः[24]

---

1. A. C. F. ताख्या 2. A. पर्ययं C. पर्यायः 3. A. C. प्रेयोऽलङ्कारश्चेति 4. E. तावा 5. A. C. E. F. शान्त्यौद 6. A. F. G. तु भाव 7. A. C. शाम्यदुदयं मवस्था 8. A. स्वित् अन C. स्वितानन्त 9. A's alt. नराक 10. A's alt. मविनाव C. मपिविनाव 11. A. C. F. अत्रापि वि 12. A's alt. C. देव्यां 13. A's alt. C. सीतायामवि 14. A. दातो 15. A. C. नियमबन्ध 16. A. C. बलवदिति 17. A. स्विदौत्सु 18. A. C. अभिसन्धायाह 19. C. पर्यालोचित तलो A's alt. पर्याकुला E. पर्याकुलितोऽरु 20. C. षोपगत Except C. all read अवगत 21. A's alt. रेतव्यो-पगमं 22. A's alt. शमः C. गमं 23. A. प्रसारानुत्पादनं A's alt. C. प्रसारायादानं F. प्रसरानुत्पादनं 24. Omitted in A. C. F.

अत्र कोपस्य प्रशमः । एवमन्यत्राप्युदाहार्यम् ।

भावोदयसन्धिशबलताश्च पृथगलङ्काराः ॥८३॥

भावस्याङ्कुररूपस्योदय उद्गमावस्था, सन्धिर्द्वयोर्विरुद्धयोः स्पर्धित्वेनोपनिबन्धः, शबलता च बहूनां पूर्वपूर्वोपमर्देनोपनिबन्धः । एते च पृथग्रसवदादिभ्यो भिन्नालङ्काराः । एतत्प्रतिपादनं चोद्भटादिभिरेषां पृथगलङ्कारत्वेन निर्दिष्टत्वात् । अथ च सङ्करसंसृष्टिवैलक्षण्येनैते सर्वालङ्काराः पृथक्केवलत्वेनालङ्कारा इति सर्वालङ्कारशेषत्वेनोक्तम् । संसृष्टिसङ्करयोर्हि संपृक्ततयालङ्काराणां स्थितिस्तद्वैलक्षण्यप्रतिपादनमेतत् । तत्र भावोदयो यथा—

एकस्मिञ्छयने विपक्षरमणीनामग्रहे मुग्धया
सद्यः कोपपरिग्रहग्लपितया चाटूनि कुर्वन्नपि ।
आवेगादवधीरितः प्रियतमस्तूष्णीं स्थितस्तत्क्षणं
मा भूत्सुप्त इवेत्यमन्दवलितग्रीवं पुनर्वीक्षितः ॥

प्रशाम्य[1]दवस्था कोपस्ये[2]त्याह—**अत्र कोपस्येति** । इत्थं व्यभिचार्यन्तरेऽपि प्रशमो ज्ञेय इत्याह —**एवमन्यत्रापीति**[3] ।

रसभावगुणीभावादनौचित्यप्रवृत्तितः[4] ।
रसवत्प्रेयऊर्जस्वि[5]समाहितचतुष्टयम् ॥
रस[6]वत्त्वप्रियत्वाभ्याम् ऊर्जः[7]प्रशमयोगतः ।
निबन्धनं रसवदाद्याख्यां[8] सम्प्रतिपद्यते ॥

भावोदयाद्यर्थं[9] सूत्रम्—**भावोदयसन्धिशबलताश्च**[10] **पृथगलङ्काराः** । उक्तसर्वालङ्कारान्य[11]त्वात् सर्वालङ्कारशेषतयै[12]तत् [13]त्रयोक्तिः । पृथग्र[14]सवदादि[15]विविक्तविषयतयेत्यर्थः । व्याचष्टे—**भावस्या**[16]**ङ्कुररूपेत्यादि**[17] । अंकुररूपस्यो[18]द्गमदशोदयः । विरुद्धयोः तुल्यकक्ष्यतया विनिवेशनं सन्धिः । पूर्वपूर्वोपमर्देन बहूना[19]मुत्तरोत्तरनिबन्धश्शबलता । पृथक्प्रतिपादने हेतुमाह—[20]**एतत्प्रतिपादनं चेति**[21] । केवलालङ्कारत्वात्संसृष्टिसंकरवैलक्षण्यम् । तयोः सम्पृक्तत्वं स्वरूपमित्याह—**संसृष्टिसंकरयोर्हीति** ।

एकस्मि[22]**न्निति**—विपक्षनामग्रहणं[23] [24]ग्लपितत्वे, ग्लपितत्वमावेगे[25], आवेगोऽव-

---

1. A. C. F. शाम्यदवस्थस्य इत्याह 2. E. पस्याह 3. A's alt. इति वागुरा रस 4. A. प्रवर्तितः 5. A. स्वित् 6. A. C. सप्रियतरत्वाभ्यां 7. A's alt. नन्दप्रशम 8. A. C. आख्या 9. A. C. दयार्थं 10. A. ताद्याः C. H. ताः पृ 11. E. G. कारत्वात् 12. A. यैव तन्त्रयोक्तिः 13. E. G. त्रितयोक्तिः 14. A. संवादादि 15. C. विविक्ता 16. A's alt. C. H. उक्तरूपे 17. H. आदि संकर 18. A. स्याग्रिम F. स्यांशमद 19. A. C. F. भावानां 20. A. C. सा तत्प्र 21. C. चेत्यादि 22. E. F. G. स्मिन् शयन इति 23. G. हरणादपि तथा भावस्तु 24. Except A. C. all read गृहीतत्वं 25. A. आवेगो यदि रणे अवधीरण प्रियतमे तृप्ति भावे तूष्णींभावस्तु

अत्र औत्सुक्यस्योदयः । भावसंधिर्यथा—

वामेन नारीनयनाश्रुधारां कृपाणधारामथ दक्षिणेन ।
उत्पुंसयन्नेकतरः करेण कर्तव्यमूढः सुभटो बभूव ॥

अत्र स्नेहाख्यरतिभावरणौत्सुक्ययोः संधिः । भावशबलता यथा—

क्वाकार्यं शशलक्ष्मणः क्व च कुलं भूयोऽपि दृश्येत सा
दोषाणां प्रशमाय नः श्रुतमहो कोपेऽपि कान्तं मुखम् ।
किं वक्ष्यन्त्यपकल्मषाः कृतधियः स्वप्नेऽपि सा दुर्लभा
चेतः स्वास्थ्यमुपेहि कः खलु युवा धन्योऽधरं पास्यति ॥

अत्र वितर्कौत्सुक्यमतिस्मरणशङ्कादैन्यधृतिचिन्तानां शबलता । तदेते चित्तवृत्तिगतत्वेनालङ्कारा दर्शिताः । अधुनैषां सर्वेषामलङ्काराणां संश्लेष-

---

धीरणे, अवधीरणं प्रियतमतूष्णींभावे, तूष्णीं[1]भावस्तु पुनर्वीक्षणे हेतुः । अत्रौत्सुक्यं भावस्योदयः तस्य च[2] गुणभाव इह विवक्षणीयः ।

वामेन नारीति । वामेन करेण[3] प्रियतमाया नयनाश्रुधारां दक्षिणेन कृपाणधारां प्रमार्जयन् कर्तव्यमूढोऽभू[4]दित्यर्थः । [5]अत्र रतिभावरणौत्सुक्ययोः सन्धिः । तदेतदाह—**अत्र स्नेहाख्य इति ।** स्नेह[6]ग्रहणादृते शृङ्गारस्थायिता[7]माह भाविस्थायित्वे (भावः, अस्थायित्वे ?) तु [8]रतिः प्रीतिमात्रम् ।

क्वाकार्यमिति[9] । अत्र क्वाकार्यं क्व च शशलक्ष्मणः कुलमिति वितर्कः । भूयोऽपि[10] दृश्येत[11] सा इति औत्सुक्यम् । श्रुतं दोषप्रशमायेति मतिः । अहो कोपेऽपि मुखं कान्तमिति स्मृतिः । किं वक्ष्यन्त्य[12]पकल्मषा इति शङ्का । स्वप्नेऽपि दुर्लभेति दैन्यम् । चेतः स्वास्थ्यं [13]उपेहीति धृतिः । को धन्योऽधरं पास्यतीति चिन्ता । अत्रो[14]त्तरोत्तरेषां पूर्वपूर्वोपमर्देन अवस्थानात् शबलता । तदेतदाह—**अत्र [15]वितर्केत्यादि[16] ।** तानि[17]मान्निगमयति—**तदे[त[18]] इत्यादि[19] ।**

स्थितिप्रशम[20]वद्भाव[21]स्योदयस्सन्धिरेव च[22] ।
शाबल्यं च[23] गुणीभावे पृथक्पृथगलंक्रिया[24] ॥

सङ्करसंसृष्टी [25]प्रतुष्टुषुराह—**अधुना एषामिति[26] ।** संश्लेषस्सम्बन्धः । तस्य

---

1. C. भव 2. Omitted in A. C. 3. E. करणे 4. A. C. F. अभवत् 5. A. C. E. G. इत्यत्र रति 6. A. गुणाच्छुते 7. A. C. स्थायीत्तमाह 8. A. इति C. तुरीति 9. A. C. E. इति क्वच 10. A. C. अपीति 11. C. इयतेत्यौत्सु E. G. त सत्यौ 12. A. वद्यत्यप 13. E. G. उपैहि 14. E. उत्तरेषां 15. A's alt. C. विविक्ते 16. A. C. आदिना 17. A. C. निगमा 18. All read. एतदित्या 19. A's alt. आदिना 20. E. G. omit म 21. A. भाव उद C. वत् सोदय द्विगुरेव च 22. Omitted in E. 23. E. G. H. तु 24. E. G. क्रियाः 25. A's alt. प्रतिष्ठाराह C. प्रतिष्ठेराह 26. F. इति अनुत्कटत्वे

समुत्थापितमलङ्कारद्वयमुच्यते । तत्र संश्लेषः संयोगन्यायेन समवायन्यायेन च द्विविधः । संयोगन्यायो यत्र भेदस्योत्कटतया स्थितिः । समवायन्यायो यत्र तस्यैवानुत्कटत्वेन वर्तनम् । तत्रोत्कटत्वेन स्थितौ तिलतण्डुलन्यायः । इतरत्र तु क्षीरनीरसादृश्यम् । क्रमेणैतदुच्यते—

एषां तिलतण्डुलन्यायेन मिश्रत्वे संसृष्टिः ॥८४॥

उक्तालङ्काराणां यथासंभवं यदि क्वचित्संघटना स्यात् तदा ते किं पृथक्त्व एव पर्यवसिताः, उत तदलङ्कारान्तरमेव किञ्चिदिति विचार्यते । तत्र यथा बाह्यालङ्काराणां सौवर्णमणिमयप्रभृतीनां पृथक्चारुत्वहेतुत्वेऽपि संघटनाकृतं चारुत्वान्तरं जायते, तद्वत् प्रकृतालङ्कारान्तराणामपि संयोजने चारुत्वान्तरमुपलभ्यते । तेनालङ्कारान्तरप्रादुर्भावो न पृथक्पर्यवसानमिति निर्णयः । अलङ्कारान्तरत्वेऽपि च संयोगन्यायेन स्फुटावगमो भेदः, समवायन्यायेन वास्फुटावगम इति द्वैधम् । पूर्वत्र संसृष्टिरुत्तरत्र तु सङ्करः । अत एव तिलतण्डुलन्यायः क्षीरनीरन्यायश्च तयोर्यथार्थतामवगमयतः । तत्र तिलतण्डुलन्यायेन भवन्ती संसृष्टिस्त्रिधा । शब्दालङ्कारगतत्वेन, अर्थालङ्कारगतत्वेन,

---

द्वैविध्यमाह—**तत्र**[1] **संश्लेष इत्यादि**[2] । भेदकोटेरुत्कटतायां संयोगन्यायः अनुत्कटत्वे तु समवायन्यायः । दृष्टान्तेन[3] न्यायभेदमवस्थापयति[4]—**तिलतण्डुलन्यायः क्षीरनीरसादृश्यमिति च** । उभयमपि[5] परिपाट्या सूत्रयितुमाह—[6]**क्रमेणेति** । **एषां तिलतण्डुलन्यायेन मिश्रत्वे संसृष्टिः** । व्याचष्टे—**उक्तालङ्काराणामित्यादि**[7] । य[8] एते अनुप्रासादयो [9]भावशबल[10]तान्ताः[11] पृथगुक्ताः तेषां संभवानुसारेण यदि कुत्रचित् विषये सहभावः तदैते किं पृथक्पृथगेवालङ्काराः उत सहभाववैचित्र्यमलङ्कारान्तरमेवेति[12] चिन्तायां[13] सिद्धान्तयितुमाह—**तत्र यथेत्यादि** । सौवर्ण[14]मणिमयानां[15] पृथक् चारुत्वहेतुत्वेऽपि संश्लेषतो यथा चारुत्वान्तरं तथा[16]नुप्रासादीनां [17]अप्यलङ्कारान्तरमेव । संश्लेषेऽपि भेदांशस्फुटत्वास्फुटत्वाभ्यां विच्छित्तिद्वयमाह—**अलङ्कारान्तरत्वे**[18] **चेति** । तत्र[19]सङ्करसंसृष्टी व्यवस्थापयति—**पूर्वत्रेत्यादि** । यतो[20] भेद उत्कटोऽनुत्कटश्च अतो दृष्टान्तौ सम[21]ञ्जसावित्याह—**अत एवे**[22]**त्यादि** । उत्कटा[23]नुत्कटत्वे भेदस्य यथार्थता ।

संसृष्टिस्त्रिधेत्याह—**तत्र**[24] **तिलतण्डुलेत्यादि** । सङ्करः [25]सप्रभेदं जिज्ञासितोऽपि

---

1. A. C. अत्र 2. H. आदि कोटे 3. A. C. न्ते तन्न्यायं 4. F. यति क्षीरनीरन्यायः तिल 5. H. अपि सूत्र C. अपि पाट्यौ सू 6. A. एषां क्र 7. H. इति 8. A's alt. omits य 9. C. भावा 10. A's alt. लान्ता 11. E. तान्तादपृथ 12. A. एव वेति चि C. एव चेति चि 13. E. चिन्ता सिद्धान्ति तदितुं 14. E. G. वर्णानां मणि 15. G. यानां वा 16. A. C. F. तथा प्रासा 17. C. अपि इत्यलं 18. C. त्वेऽपि चेति 19. *Omitted in H.* 20. F. स्वतो 21. A. C. समरसा 22. F. एव चेत्या 23. A. F. कटत्वे 24. A. C. अत्र 25. E. G. संप्रभेद

उभयालङ्कारत्वेन च । सङ्करस्तु प्रभेदयुक्तो वक्ष्यते । तत्र शब्दालङ्कार-संसृष्टिर्यथा—

कुसुमसौरभलोभपरिभ्रमद्भ्रमरसंभ्रमसंभृतशोभया ।
चलितया विदधे कलमेखलाकलकलोऽलकलोलदृशान्यया ॥

अत्रानुप्रासयमकयोर्विजातीययोः संसृष्टिः । अत्रैव "लकलोलकलो" इति, तथा "कलोलकलोल" इति सजातीययोर्यमकयोः संसृष्टिः । अर्थालङ्कार-संसृष्टिर्यथा—

देवि ! क्षपा गलति चक्षुरमन्दतार-
मुन्मीलयाशु नलिनीव सभृङ्गमब्जम् ।
एष त्वदाननरुचेव विलुण्ठ्यमानः
पश्याम्बरं त्यजति निष्प्रतिभः शशाङ्कः ॥

अत्र सजातीययोरुपमयोः संसृष्टिः ।

लिम्पतीव तमोऽङ्गानि वर्षतीवाञ्जनं नभः ।
असत्पुरुषसेवेव दृष्टिर्निष्फलतां गता ॥

अत्रोपमोत्प्रेक्षयोर्विजातीययोः संसृष्टिः । उभयसंसृष्टिर्यथा—

आनन्दमन्थरपुरन्दरमुक्तमाल्यं
मौलौ हठेन निहितं महिषासुरस्य ।
पादाम्बुजं भवतु मे विजयाय मञ्जु-
मञ्जीरशिञ्जितमनोहरमम्बिकायाः ॥

अत्रोपमानुप्रासयोः संसृष्टिः । पादाम्बुजमित्यत्र ह्युपमाया मञ्जीर-

---

संसृष्टयनन्तरं वक्ष्यत इत्याह—**सङ्करस्त्विति** । **कुसुम**[1]**सौरभेति**[2] । अलकैर्व्याकुलैः लोलदृशा । अत्र पूर्वार्धे [3]भकारापेक्षया उत्तरार्धे च लकारापेक्षया वृत्त्यनुप्रासः[4] । लकलोलकलो इत्यादौ यमकमिति विजातीययोस्संसृष्टिः । तथा लकलोलकलो इति कलोलकलोल[5] इति च सजातीय[6]यमकयोरपि । तदेतदाह—**अत्रानुप्रासेत्यादि** ।

देवि क्षपेति । अत्र नलिनीव रुचेवेति उपमाद्वयं संसृष्टम् । तदेतदाह—**अत्र सजातीययोरिति** । लिम्पतीवेत्यत्र[7] तु विजातीयसंसृष्टिः स्फुटा ।

आनन्दमन्थरेति । [8]मन्थरो मन्दक्रियः । हठेन[9] बलेन[10] । अत्रोपमावृत्त्यनुप्रासयोः उभया[11]लङ्कारयोः संसृष्टिः[12] । नन्वत्रोपमाव्यवस्था कुत इत्यत आह—**पादाम्बुजमिति**[13] । [14]पादाम्बुजमिवेत्युपमाया[15] मञ्जीरशिञ्जित[16]योगो व्यवस्थापकः । पाद[17] एवाम्बुजमिति

---

1. A's alt. वदनसौ 2. H. इति पादावृत्ति 3. A's alt. चकानपे 4. A's alt. C. द्रासादलकाल इत्या 5. A. लोले 6. E. G. तीययोः यम 7. A. C. वेत्र्यत्तु 8. C. मन्द 9. A's alt. हावण 10. F. लेन मञ्जीर 11. A. C. F. भयोः अः 12. Omitted in A. C. F. 13. E. G. इतीति 14. A. C. पादमम्बु 15. A. C. omit या 16. A's alt. ञ्जिनाशागो 17. A. C. F. पादमेवा

शिञ्जितयोगो व्यवस्थापकं प्रमाणम् । स हि रूपके प्रतिकूलः पारिशेष्यादुपमां प्रसादयति । तदेवं संसृष्टिस्त्रिधा निर्णीता ।

अधुना क्षीरनीरन्यायेन सङ्कर उच्यते—

क्षीरनीरन्यायेन तु सङ्करः ॥८५॥

मिश्रत्वमेव । अनुत्कटभेदत्वमुत्कटभेदत्वं च मिश्रत्वम् । तत्रोत्कटभेदा संसृष्टिरुक्ता । अनुत्कटभेदः सङ्करः । तच्च मिश्रत्वमङ्गाङ्गिभावेन, संशयेन, एकवाचकानुप्रवेशेन च त्रिधा भवत्सङ्करं त्रिभेदमुत्थापयति । क्रमेण यथा—

अङ्गुलीभिरिव केशसंचयं सन्निगृह्य तिमिरं मरीचिभिः ।
कुड्मलीकृतसरोजलोचनं चुम्बतीव रजनीमुखं शशी ॥

अत्राङ्गुलीभिरिवेत्युपमा । सैव सरोजलोचनमित्यस्या उपमायाः प्रसाधिका । रजनीमुखमिति श्लेषमूलातिशयोक्तिः । प्रारम्भवदनाख्ययोर्मुख्ययोरभेदाध्यवसायात् । अत एव तयोरङ्गाङ्गिभावः । एवं च वाक्योक्तसमासोक्तिः । उपमाश्लेषेणानुगृहीता चातिशयोक्तिरुत्प्रेक्षाया चुम्बतीवेति प्रकाशिताया अनुग्राहिका । तद्बलेन तस्याः समुत्थानात् । सा च समुत्थापिता समुत्थापकानां चमत्कारितानिबन्धनमित्यस्त्यङ्गाङ्गिभावः । यथा वा—

रूपकपक्षे स प्रतिकूलः अम्बुजे तदयोगात् । अतश्शिञ्जितयोगोऽयं पारिशेष्यादुपमां[1] प्रसादयति । निगमयति[2]—तदेवमिति ।

तिल[3]तण्डुलनीत्या संश्लेषः संसृष्टिरिष्यते ।
सा[4] शब्दार्थोभयगतैरलङ्कारैस्त्रिधा मता ॥

संकरम्[5] उपक्षिपति—अधुनेत्यादि । क्षीरनीरन्यायेन तु सङ्करः । अधिकारमनुस्मारयति—मिश्रत्व[6]मेवेति । चर्चितं सङ्करस्वरूपमनुवदति—अनुत्कटेति[7] । तत्र त्रैविध्यायाह—[8]तच्चेति । अङ्गाङ्गिभावात् संशयादेकवाचकानुप्रवेशाच्च त्रिधा तु सङ्करोत्थानम् ।

अङ्गुलीभिरिवेति[9] । अत्र अङ्गुलीभिरिवेत्युपमा सरोजं लोचनमिवे[10]त्युपमां साधयति । रूपकापोहनं साधने प्रकर्षः । मुखशब्देन प्रारम्भवदनयोरभिधानात् श्लेषः । मुखयोर[11]भेदाध्यवसायात्[12] श्लेषमूलातिशयोक्तिः । अतोऽनयोरङ्गाङ्गिभावः । एवं च सति अङ्गुलीभिरिवेति या वाक्येनोक्ता या च सरोजलोचनम् इति समासेन ताभ्या[13]मुपमाभ्यां[14] श्लेषेण चानुगृहीता मुखम् इति अतिशयो (क्तिः[15]) चुम्बतीवेत्युत्प्रेक्षाया

---

1. C. E. उपमा 2. A. F. यति तावदिति तदे 3. A. E. F. G. तिले 4. A. C. च श 5. C. संकरोत्थानम् 6. E. G. मिश्रकमे 7. A. इति त्रिधा तु 8. E. तत्त्वेति 9. A. C. F. इवेत्युप 10. E. इवास्येत्युपमां 11. C. भेदात् 12. A. F. omit त् 13. F. भ्यां श्लेषे 14. A. C. उभाभ्यां 15. All mss. उक्ति

त्रयीमयोऽपि प्रथितो जगत्सु यद्वारुणीं प्रत्यगमद्विवस्वान् ।
मन्येऽस्तशैलात्पतितोऽत एव विवेश शुद्धचै वडवाग्निमध्यम् ।।

अत्र प्रथमार्धे विरोधप्रतिभोत्पत्तिहेतुः श्लेषः । दर्शनान्तरे तु विरोधश्लेषौ द्वावलङ्कारौ । तदनुगृहीता द्वितीयेऽर्धे मन्येपदप्रकाशितोत्प्रेक्षा । अतश्चाङ्गाङ्गिभावः ।

तथा ह्यत्र यत्कारणमुत्प्रेक्ष्यते तत्र विरोधश्लेषानुप्रवेशः । यच्चात्र कार्यमुत्प्रेक्षानिमित्तं, तत्र पतितत्वाग्निप्रवेशौ वस्तुस्थित्या अन्यथास्थितावपि अन्यथाभूताभ्यां ताभ्यामभेदाध्यवसितौ ज्ञेयौ । तेनात्राङ्गाङ्गिभावः सङ्करः । न च विरोधप्रतिभोत्पत्तिहेतौ श्लेषे श्लेषस्य विरोधेन सहाङ्गाङ्गिभावः सङ्करः, उत्प्रेक्षाया वा निमित्तगतातिशयोक्त्या सहायं सङ्करः, ताभ्यां विना तयोरनुत्थानात् ।

अनु[1]ग्राहिका । तेषां बलेन समुत्थाना[2]दुत्थिता चोत्थापकानां चमत्कारकत्वहेतुः इत्यङ्गाङ्गिता । अतोऽङ्गाङ्गिभावे मिथोऽप्युपकारप्रथना[3]योदाहरणान्तरम्—**त्रयीमयोऽपीति** । वारुणी पश्चिमा दिक् सुरा च[4] । पतनमवतरणमुपहतिश्च । व्याचष्टे—**अत्र प्रथम इत्यादिना**[5] । अत्र वारुणीति श्लेषः त्रयीमयोऽप्यगमदिति विरोधप्रतिभोत्थापकः[6] तद्बाध[7]कश्च । श्लेषस्य निरवकाशत्वा[8]नङ्गीकारिणां[9]मते द्वावपि । तदनुग्रहाच्च[10] "मन्ये पतित" इति शुद्धिं प्रति हेतूत्प्रेक्षा । शुद्धचै विवेशेति फलोत्प्रेक्षा च[11] । एतद्विशिष्योपपादयति—**तथा हीत्यादि** । वारुणीगमनं पाता[12]दिकारणमुत्प्रेक्षितम् । तत्र विरोधश्लेषा[13]वनुप्रविष्टौ[14] यच्च कारणोत्प्रेक्षानिमित्तं पातादिकार्यं तत्र वास्तवौ पाताग्निप्रवेशावुपहति[15]हेतुकपाताग्निप्रवेशाभ्यामभेदेन[16] अध्यवसितौ[17] । तेन श्लेषेण सह हेतुफलोत्प्रेक्षयोरङ्गाङ्गिता । ननु विरोधश्लेषयोरतिशयोक्त्युत्प्रेक्षयोश्च कुतो [18]नाङ्गाङ्गिभाव इत्याह[19]—**न च विरोधेत्यादि** । यद्यपि श्लेषो विरोधप्रतिभोत्पत्ति[20]हेतुः यद्यपि चातिशयोक्तिः उत्प्रेक्षानिमित्तं[21] तथापि नानयोः[22] श्लेषाभ्यां सहाङ्गाङ्गिभावः । [23]तत्र हेतुः—**ताभ्यां विनेति** । विरोधातिशयोक्तिभ्यां विना श्लेषोत्प्रेक्षयोः अनुत्थानात् । अतो निरवकाशयोः[24] श्लेषोत्प्रेक्षयोर्बाधकत्वमेव ।

नन्वभेदाध्यवसायमन्तरेणानुत्थानात् उत्प्रेक्षा[25] वा मा भूत् । अतिशयोक्तिर्विविक्तो

---

1. A. C. गृहीता 2. A. F. रूढिता E. उक्तिका 3. A's alt. प्रथनादुदा 4. च Omitted in A. C. सुरात्पत 5. A. C. आदि वा 6. A. C. F. यापितः 7. A. तदाभासक C. तद्बाध 8. A. C. त्वादङ्गीः D. E. F. G. H. त्वादनङ्गी 9. C. काराणां 10. A. C. F. ग्रह काले च 11. Omitted in E. G. 12. A. C. F. पाताधिकरणं 13. Except C. all read श्लेषानु 14. A. प्रविष्टे 15. A. हति पाता 16. A. C. भेदाध्य 17. A. C. F. सितेन श्ल 18. न Omitted in C. 19. C. इत्यत्राह 20. C. पत्तिः तथापि चाति 21. A. C. मित्तानिमित्ता चापि नान 22. Except C. all read नानया 23. A. C. अत्र 24. E. काशमयोः 25. E. F. G. प्रेक्षाया मा

अतश्च निरवकाशत्वाद्बाधकत्वम् । न च मन्तव्यं विरोधमन्तरेणापि श्लेषो दृश्यत इति श्लेषस्य सावकाशत्वमिति । यतो न ब्रूमो विरोधमन्तरेणापि श्लेषो न भवतीति । किं तर्ह्यलङ्कारान्तरविविक्तो न श्लेषस्य विषयोऽस्तीति निरवकाशत्वात्तेषां बाधः । तन्मध्ये च विरोधोऽनुप्रविष्ट इति सोऽपि तेन बाध्यत इति न कश्चिद्दोषः । एवमर्थालङ्कारसङ्कर उदाहृतः । शब्दालङ्कारसङ्करस्तु कैश्चिदुदाहृतो यथा—

राजति तटीयमभिहतदानवरासातिपातिसारावनदा ।
गजता च यूथमविरतदानवरा सातिपाति सारा वनदा ।।

अत्र यमकानुलोमप्रतिलोमयोः शब्दालङ्कारयोः परस्परापेक्षत्वेनाङ्गाङ्गिसङ्कर इति । एतत्तु न सम्यगावर्जकम् । शब्दालङ्कारयोः शब्दवदुपकार्योपकारकत्वाभावेनाङ्गाङ्गिभावाभावात् । शब्दालङ्कारसंसृष्टिस्त्वत्र श्रेयसी । यथोदाहृतं प्राक् । यद्वा, अत्र शब्दालङ्कारद्वयमेकवाचकानुप्रविष्ट-

---

विषयः । श्लेषस्य तु विविक्तोऽस्त्येवेत्यत आह—**न च मन्तव्यमित्यादि** । अलङ्कारान्तरविविक्त[1]श्लेषविषयो नास्तीति श्लेषविवेचने वितत्योक्तम् । अतः श्लेषेण अन्यबाध इति तन्मध्यानुप्रविष्टो विरोधोऽपि बाध्य एव ।

अर्थालङ्कार[2]सङ्करं निगमयति—**एवमर्थेति** । **शब्दालङ्कारेति** । [3]कैश्चिदित्यवधीरणा[4] । **राजतीति** । दानवानां[5] रासः आक्रोशस्तदतिपा[6]तिनः । सारावा तदा यत्र सेयमद्रेस्तटी राजति । गजता गजसमूहः । स[7] च यूथमतिपाति अतितरां रक्षति[8] । कीदृशी ? [9]अविरतेन दानेन मदेन । [10]वरा उत्कृष्टा सा प्रसिद्धा । सारा[11] बलवती । वनदा[12] वनस्य[13] खण्डयित्री[14] । योजनायाह—**अत्र यमकेत्यादि** । पादावृत्तिलक्षणं यमकम् । आदितो[15] अन्ततश्च पाठे[16] [17]सन्दर्भैक्यादनुलोम[18]प्रतिलोमता च । तदेतदुभयं सापेक्षमिति शब्दालङ्कारसङ्करः । तदेतद्दूषयति—[19]**एतत्त्विति** । अनावर्जकत्वे हेतुमाह—[20]**शब्दालङ्कारयोरिति**[21] । यथा हि शब्दयोर्मिथो [22]नोपकारः तथा शब्दालङ्कारयोरपि । कस्तर्हि ईदृशि[23] विषये प्रकार इत्यत आह – **शब्दालङ्कारेति**[24] । [25]मिथोऽनुपकारात् नैरपेक्ष्यम् । अतः संसृष्टिः श्रेयसी । [26]सङ्करतया चैकवाचकानुप्रवेशः स्यादित्याह—**यद्वेति** ।

---

1. A. C. विक्त विष 2. A. C. काराग्निग 3. A's alt. C. तत्कश्चि 4. F. किरणा G. अवधी योगात् संपन्नाद्योति (P. 228.) 5. A. निरासः 6. A. C. पातन सारावानदा 7. E. सा च 8. A. C. F. न्नतीति 9. A. C. रतेति अविरतेन 10. A. C. F. न परा 11. A. आसारा C. पारा 12. A's alt. C. धनदावप्यखराड 13. A. वनानि 14. F. वितीति वदना योज 15. A. C. दितो ततश्च पा 16. A. C. प्रथमे स 17. A. C. F. संदर्भैणौक्या 18. C. H. लोमता च तदे 19. A. एतदिति E. एवन्त्विति 20. H. तथा श 21. H. कारयोरपि कः. 22. C. नोपस्तथा 23 A. ईदृग्विष C. दृश 24. E. कारे तन्मिथो 25. H. यथो 26. C. संकरत्वे चैक

मिति तृतीयः संकरो ज्ञेयः । एवमेष प्रकारो दर्शितः । द्वितीयः प्रकारस्तु सन्देहसंकराख्यः । यत्रोभयोरेकतरस्य साधकं प्रमाणं नास्ति बाधकं वा, तत्र न्यायप्राप्तः संशय इति सन्देहसंकरस्तत्र विज्ञेयः । यथा—

यः कौमारहरः स एव हि वरस्ता एव चैत्रक्षपा-
स्ते चोन्मीलितमालतीसुरभयः प्रौढाः कदम्बानिलाः ।
सा चैवास्मि तथापि तत्र सुरतव्यापारलीलाविधौ
रेवारोधसि वेतसीतरुतले चेतः समुत्कण्ठते ॥

अत्र विभावनाविशेषोक्त्योः संदेहसङ्करः । तथा ह्युत्कण्ठाकारणाभावे उत्कण्ठाया उत्पत्तौ विभावना । स च कारणाभावो "यः कौमारहर" इत्यादिना कारणविरुद्धमुखेन प्रतिपादितः । तथा "यः कौमारहरः" इत्यादावनुत्कण्ठाकारणसद्भावेऽपि अनुत्कण्ठाया अनुत्पत्तौ विशेषोक्तिः । सा चानुत्पत्तिः समुत्कण्ठत इति विरोधोत्पत्तिमुखेनोक्ता । अत एव द्वयोरप्यस्फुटत्वमन्यत्रोक्तम् । न चानयोः प्रत्येकं साधकबाधकप्रमाणयोग इति सन्देहसङ्करोऽयम् । यथा च—

यद्वक्त्रचन्द्रे नवयौवनेन श्मश्रुच्छलेनोल्लिखितश्चकास्ति ।
उद्दामरामाहृढमानमुद्राविद्रावणो मन्त्र इव स्मरस्य ॥

अत्र वक्त्रं चन्द्र इवेति किमुपमा, उत वक्त्रमेव चन्द्र इति रूपकमिति संशयः । समासस्योभयथापि भावात् । "उपमितं व्याघ्रादिभिः" इत्युपमासमासः, व्याघ्रादीनामाकृतिगणत्वात् । मयूरव्यंसकादित्वात्रूपकसमासः,

---

अतः शब्दालङ्कारपरिहारेण अङ्गाङ्गिभाव इति निर्णयति[1]—**एवमेष**[2] **इति** । सन्देहसङ्करं विवेचयति—**द्वितीय इति** । सन्देहं दर्शयति—**यत्रोभयोरित्यादि** ।

यः कौमारेति[3] । व्याख्यातं प्राक् । योजयति—**अत्र विभावनेत्यादि** । अन्यत्र **काव्यप्रकाशादौ** । इत्थमुपमारूपकयोः सन्देहं दर्शयितुमाह—**यथा चेति** । **यद्वक्त्रचन्द्रेति**[4] । श्मश्रुच्छ[5]लेन नवयौवनेनोल्लिखितो मन्त्रश्चकास्तीव[6] । योजयति—**अत्र वक्त्रेत्यादि** । संशयस्य हेतुमाह—**समासस्योभयथाऽपीति**[7] । व्याघ्रादीनामाकृतिगणत्वाद्विशिष्टगुणानां चन्द्रादीनाम् उपसङ्ग्रह[8] इति । मुखं चन्द्र[9] इवेत्युपमा[10]समासः । "अविहितलक्षणस्तत्पुरुषो मयूरव्यंसकादिषु द्रष्टव्य" इति नीत्या । मयूरव्यंसकादीनामाकृतिगणत्वात् । मुखमेव चन्द्र इति रूपकसमासश्च साधकबाधक[11]प्रमाणविरहादनयोः

---

1. A. C. निर्णयमिति 2. C. एष् (क) इति 3. E. इति प्रथमसंभोगेन कौमार हृतवानं मालतीवत्सुरभयो मालतीसुरभयः कदम्ब इह वसन्तभूः व्याख्या 4. A. C. चन्द्रश्म H. चन्द्रच्छले 5. E. H. छलान्नव 6. F. तीव अत्र 7. A. C. H. omit इति 8. A. C. F. ग्रहः 9. A. चन्द्रः 10. A's alt. C. उपमितस 11. A. C. बाधकान्यतर

मयूरव्यंसकादीनामाकृतिगणत्वात् । नात्र क्वचित्साधकबाधकप्रमाणसद्भाव इति सन्देहसङ्करः ।

यत्र तु कस्यचित्परिग्रहे साधकं बाधकं वा प्रमाणं विद्यते, तत्र नियतपरिग्रहः । तत्रानुकूलं साधकं, प्रतिकूलं बाधकम् । तत्र साधकं यथा—

प्रसरद्बिन्दुनादाय शुद्धामृतमयात्मने ।
नमोऽनन्तप्रकाशाय शङ्करक्षीरसिन्धवे ।।

अत्र शङ्कर एव क्षीरसिन्धुरिति रूपकस्यामृतमयत्वं साधकम् । तस्य शङ्करापेक्षया क्षीरसिन्धावनुकूलत्वात् । उपमायास्तु न बाधकम्, शङ्करेऽप्युपचरितस्य संभवात् । यथा वा—

एतान्यवन्तीश्वरपारिजातजातानि तारापतिपाण्डुराणि ।
संप्रत्यहं पश्यत दिग्वधूनां यशःप्रसूनान्यवतंसयामि ॥

सन्देहः । साधकबाधकान्यतरसद्भावे तु नियतपरिग्रह इत्याह—**यत्र त्विति** । साधक[1]-बाधकस्वरूपं विवेचयति—**तत्रानुकूलमिति**[2] ।

प्रसरद्बिन्द्विति[3] । बिन्दुः शुद्धाध्वोपादान[4]महामाया नादो[5]ऽनाहतः[6] तौ प्रस[7]रतो यस्मात् सिसृक्षोस्तस्मै[8] । शुद्धम् [9]अमृतम्, निष्कृष्टं[10] चैतन्यं तन्मयात्मने । अनन्तो[11] देशकालाद्यनवच्छिन्नः[12] प्रकाशो यश्च तस्मै । अन्यदा तु बिन्दवः शीकराः । नादो लहरी घोषः । अमृतं सुधा । अनन्तः शेषो मथनादौ [13]शेषीभूतः, तेन प्रकाशः प्रथितः[14] । इह[15] शङ्कर[16] एव क्षीर[17]सिन्धुरिति रूपके साधकम् । दर्शयति—**अत्र शङ्कर**[18] **एवेत्यादि** । अमृतशब्दो हि सुधायां प्रचुरप्रसिद्धिकः क्षीरसिन्धावनुकूलतर इति रूपकसमास एवायम्[19] । अमृतमयत्वं च नोपमां[20] प्रति बाधकमित्याह—**उपमायास्त्विति** । न बाधकं किन्तु तटस्थमिति भावः[21] । तत्र हेतुः—**शङ्करेऽप्युपचरितस्येति** । शङ्करत्वेनोपचरितस्य हि सिद्धो[22] रूपकत्वसिद्धिः । अत उपमोत्थापिते[23] रूपके[24] विश्रान्तिरिति यावत् ।

उदाहरणा[25]न्तरेणापि न्यायमिमं द्रढयितुम् आह—**यथा वेति**[26]। [27]**एतान्यवन्तीति** । अवन्ती[28]श्वररूपात् पारिजातात् जातानि यशोरूपाणि प्रसूनानि दिग्रूपाणां [29]वधू-

---

1. A. C. F. धकस्वरू 2. A. C. F. H. कूलत्वमिति 3. H. इति उपचरितस्येति 4. A's alt. द्धात्वेप F. उपादान E. पदानं 5. A. नादेवानाह F. नादौ 6. C. हतौ प्र 7. A. C. प्रहरतो 8. A. C. F. तस्यै 9. A. C. समृतनि 10. A. C. कृष्टाया चै 11. A. तोद्देश 12. A. C. छिन्नावकाशो 13. A. C. शेष 14. A's alt. प्रमतः 15. Omitted in A. C. 16. A. संकर 17. A's alt. सुरासिन्धु 18. A's alt. E. F. संकर 19. E. एव समासोऽयं 20. A. C. E. उपमाप्रतिज्ञाबाध 21. A. C. वः इह तु शं 22. A. बन्धो E. हि यो 23. A. F. पितेन 24. A. C. F. के च विश्रान्ते 25. A's alt. हरणेऽपि C. हरणापि 26. A. चेति 27. A's alt. हतान्य 28. H. न्ती स्वरूप 29. E. बधू

अत्रावतंसनं प्रसूनेष्वनुगुणमिति रूपकपरिग्रहे साधकं प्रमाणम्। बाधकं यथा—

शरदीव प्रसर्पन्त्यां तस्य कोदण्डटङ्कृतौ।
विनिद्रजृम्भितहरिर्विन्ध्योदधिरजायत ॥

अत्र विन्ध्यउदधिरि वेत्युपमापरिग्रहे विनिद्रजृम्भितहरिरिति साधारणं विशेषणं बाधकं प्रमाणम्। "उपमितं व्याघ्रादिभिः सामान्याप्रयोगे" इति वचनादुपमासमासे प्रतिकूलत्वात्। अतश्च पारिशेष्याद्रूपकपरिग्रहः। न तु शरदीवेत्युपमात्रोपमासाधकत्वेन विज्ञेया। न हि चाषेण पञ्चाशत्सिद्धिः।*

नामव[1]तंसयामि, पश्यत[2]। अत्राप्युपमाबाध[3]वैमुख्येन रूपकसाधकं[4] दर्शयति—**अत्रावतंसनमिति**[5]।

बाधकार्थं[6]मुदाहरति—[7]**शरदीवेति**। हरिः सिंहो विष्णुश्च। उपमाबाधकं दर्श[8]यति—**अत्र विन्ध्य इत्यादि**। विनिद्र[9]जृम्भितहरित्वं हि साधारणमुपमासमासं बाधते[10]। 'उपमितं व्याघ्रादिभिः सामान्याप्रयोगे' इति वचनात्। ननु रूपक[11]सिद्धिसाधकाभावे कथमित्यत आह—**अतश्च पारिशेष्यादिति**। ननु [12]शरदीवेति[13] समभिव्याहृतेयम् उपमा कथं नोपमासाधिकेत्यत आह—**नतु शरदीवेति**। न्यायतो वाक्यार्थी[14]भूतं रूपकमाभा[15]सत एकदेशवर्तिन्युपमा न हि बाधितुम् ईष्टे। यावता [16]स्वयमप्याभासीभवतीति भावः।

अत्रोपहासायाह—**न हि** [17]**चाषेणेति**[18]। चाषाणां समूहः चाषमिति स्थितौ पञ्चा-

---

1. H. एव शंसयामि 2. H. पश्यतः 3. A. बाधकमुख्ये 4. A. C. बाधकं 5. A. C. तंसयामीति 6. A. C. H. कात् उ 7. A. C. शरदि चेति 8. E. दर्शयितुमाह 9. A. C. जृङ्गित 10. C. H. घते व्या 11. E. रूपसि 12. A. शरदिवे 13. A. C. इति न्यायतो 14. A. C. अर्थ 15. E. आभासत 16. A's alt. स्वष्टे एवमप्या H. स्वयं ईष्टे एवमप्या 17. A's alt. H. भाषे F. पाषे 18. A. C. H. इति पञ्चा

* The NS. Press text and Jayaratha do not have this bit न हि चाषेण etc. The TSS. edn. and Samudrabandha too do not have it, and both of them read here instead, न ह्यौपम्येन कदाचिदर्थसिद्धिः। Jayaratha has no comment here but Samudrabandha has; but what 'Ullunṭhana or ironical observation is meant according to him in 'न ह्यौपम्येन etc'. is not clear. The reading 'न हि चाषेण etc.' is recorded in the footnote in TSS. edn. and it clearly carries a satirical implication, although the precise terms in which Vidyācakravartin explains the saying are not clear. If 'śa' and 'ṣa' are interchangeable and 'Pañcāśat' could be also 'Pañcāṣat', the word would contain a sound-group *Cāṣa*, common with *Cāṣa* meaning a group of *Cāṣa*-birds; however it would be ridiculous to suggest that 'Pañcāśat' is derivable from 'Cāṣa : This is what Vidyācakravartin's comments probably mean.

न ह्येकेनालङ्कारेण प्रक्रान्तेन निर्वाहः कर्तव्य इति राजाज्ञैषा, नापि धर्मसूत्रकारवचनम्। नाप्येष न्यायः। उत्तरोत्तरसाम्यप्रकर्षविवक्षणे प्रक्रान्तोपमापरित्यागेन रूपकनिर्वाहस्योचितत्वात्। विपर्ययस्तु दुष्ट एव। यथा—"येनेन्दुर्दहनो विषं मलयजो हारः कुठारायते" इति। तस्मात्प्रकृते सामान्यप्रयोग उपमापरिग्रहे बाधक इति मयूरव्यंसकादेराकृतिगणत्वाद्रूपकसमाश्रयेण रूपकमेव बोद्धव्यम्। एवं "भाष्याब्धिः क्वातिगम्भीरः" इत्यादौ द्रष्टव्यम्। साधकबाधकाभावे तु सन्देहसङ्करः। यथोदाहृतम्।

तृतीयस्तु प्रकार एकवाचकानुप्रवेशलक्षणः यत्रैकस्मिन्वाचकेऽनेकालङ्कारानुप्रवेशो न च सन्देहो नाप्याङ्गाङ्गिभावः। यथा—

शच्छब्दः (दे ?) शषयोरभेदा[1]श्रयणा (णे ?) [2]प्यव्युत्पन्नप्रतीतेयं[3] चाष[4]श्रुतिः। न खलु तन्निबन्धना पञ्चाशद्रूपसमूहसिद्धिः।* नन्वितरथा अलङ्कार[5]प्रक्रमभेदः स्यादित्यत आह—**न ह्येकेनेति**। प्रक्रान्तेनैकेनैव निर्वहणीयमिति नैषा राजाज्ञा[6] येन दृष्टबाध आशङ्क्यते। [7]यल्लङ्घनेन दृष्टबाधस्स्यात्। नाप्येतन्मन्वादिधर्मसूत्रकारवचनं [8]यल्लङ्घनेन अदृष्टबाधस्स्यात्। ननु दृष्टा[9]दृष्टयोर्द्वयोरपि बाधस्स्यात् यतो न्यायोऽयमित्यत आह—**नाप्येष इति**। प्रक्रान्तेन निर्वहणीयमिति न सार्वत्रिको[10] न्यायः। किन्तु विशेषा[11]विवक्षायामेव[12]। इह तु उत्तरोत्तरं प्रकर्षविवक्षेति उपमापेक्षया रूपके साम्य[13]प्रकर्षः। अतोऽवयवगतोपमापरित्यागेन वाक्यार्थी[14]भूतरूपक[15]परिग्रह एवोचितः। विपर्ययस्तु साम्यनिकर्षाद्दुष्ट एव। तदेतत्प्रत्युदाहरणेन द्रढयति—**येनेन्दुरिति**। अत्रेन्दुमलयजयोः दहनविषयत्वरूपणात् साम्यप्रकर्षः प्रक्रान्तः। हारः[16] कुठारायत इति तूपमया प्रकर्षं[17] नीतः। [18]चर्चां निगमयति—**तस्मात्प्रकृत इति**। सामान्यप्रयोग उपमाबाधक इति न्यायोपन्नो [19]रूपकप्रक्रम एव निर्वहणीय इति यावत्।

न्यायोऽयमत्रापि[20] ज्ञेय इत्याह—**भाष्याब्धिरिति**। गाम्भीर्यसाधारण्यादुपमाबाधे रूपकमेव द्रष्टव्यम्। साधकबाधकाभावे तु सन्देह इत्युक्तमनुस्मारयति—**साधकबाधकेति**। इत्थमङ्गाङ्गिभावसन्देह[21]रूपं प्रकारद्वयं[22] विविच्य[23] तृतीयं प्रकारं विवेचयति—[24]**तृतीयस्त्विति**। तं विशदयति—**यत्रैकस्मिन्निति**।

---

1. C. भेदादाश्र 2. A. णा व्युत्प C. णाप्युत्प 3. A. C. F. प्रतीतयेयं 4. A's alt. C. भाष H. भाषा 5. C. कारमात्रमथे 6. E. राजाज्ञा यल्लङ्घ 7. H. एनल्ल्योल्ल 8. A. C. उल्लङ्घ 9. A. C. दृष्टयोरपि 10. A. C. H. कोऽयं न्या 11. H. शेषवि 12. H. एव प्रकारान्तर 13. A's alt. साध्यः प्रकृष्टः 14. A. C. अर्थ 15. C. पनिग्र 16. Omitted in A. C. 17. F. निष्कर्षं 18. E. चर्चे 19. A. C. F. रूपकापक्रम 20. E. अन्यत्रापि 21. C. सन्देव्या रूपं 22. A. C. द्वयप्रकारं वि 23. E. विवेच्य 24. A. C. तत्तृती

* *See footnote on previous page.*

मुरारिनिर्गता नूनं नरकप्रतिबन्धिनी ।
तवापि मूर्ध्नि गङ्गेव चक्रधारा पतिष्यति ॥

अत्र मुरारिनिर्गतेति साधारणविशेषणहेतुकोपमा । नरकप्रतिबन्धिनीति श्लिष्टविशेषणसमुत्थोपमाप्रतिपत्तिहेतुः श्लेषश्चैकस्मिन्नेव शब्देऽनुप्रविष्टौ, तस्योभयोपकारित्वात् । अत्र च यथार्थश्लेषेण सहोपमायाः सङ्करः, तथा शब्दश्लेषेणापि सह दृश्यते । यथा—

सत्पुष्करद्योतितरङ्गशोभिन्यमन्दमारब्धमृदङ्गवाद्ये ।
उद्यानवापीपयसीव यस्यामेणीदृशो नाट्यगृहे रमन्ते ॥

अत्र "पयसीव नाट्यगृहे रमन्ते" इत्येतावतैव समुचितोपमा संपन्ना सत्पुष्करद्योतितरङ्गेति शब्दश्लेषेण सहैकस्मिन्नेव शब्दे सङ्कीर्णा । शब्दालङ्कारयोः पुनरेकवाचकानुप्रवेशेन सङ्करः पूर्वमुदाहृतो "राजति तटीयम्" इत्यादिना । एकवाचकानुप्रवेशेनैव चात्र सङ्कीर्णत्वम् । अत एव व्यवस्थितत्वमन्यानुभाषितमप्रयोजकम्, तुल्यजातीययोरप्यलङ्कारयोरेकवाचकानु-

---

मुरारि[1]निर्गतेति । नरकोऽसुरो निरयश्च[2] । ([2a]गङ्गेवेति) सद्गतिप्राप्तिहेतुत्वम्[3] । योजयति—**अत्र मुरारीति**[4] । [5]गङ्गेवेत्युपमा मुरारिनिर्गतेत्यर्थभेदाभावात् साधारणविशेषणेन समुत्थापिता । नरकेति श्लिष्टविशेषणो[6]त्थोऽर्थः श्लेषश्चोपमाप्रतिपत्तिहेतुः । एकत्रैव नरकशब्देऽनुप्रविष्टौ [7]श्लिष्ट[8]शब्देनोभयोपकारात् शब्दश्लेषेणाप्युपमा[9]सङ्करार्थमाह—**अत्र च यथेत्यादि । सत्पुष्करेति** । पुष्करं वाद्यभाण्डमुखं[10] पद्मं च । द्योतिनस्तरङ्गा द्योतितो रङ्गश्च । रज्यन्ते[11]ऽस्मिन् सामाजिकमनांसि इति रङ्गो नाट्यारम्भक्रिया । मृदङ्गसदृशं[12] जलास्फालनवाद्यं मृदङ्गवाद्यं च । योजयति—**अत्र [13]पयसीवेत्यादिना[14]** । रमन्त इति साधारणो धर्मः । अतः[15] सामग्रीयोगात् सम्पन्ना द्योतितरङ्गशोभिनीत्येकस्मिन्नेव शब्दे सभङ्गपदत्वात् शब्दश्लेषेण संकीर्णम् । शब्दालङ्कारयोरे[16]कवाचकानुप्रवेश[17]मुदाहृतचरमनुस्मारयति—**शब्दालङ्कारयोः पुनरित्यादि** ।

विजातीय[18]योरेवैकवाचकानुप्रवेशं(श?)व्यव[19]स्थेति यदन्यैरुक्तं तदप्रयोजकमित्याह—**एकवाचकेत्यादि** । अत्र 'राजति तटीयमि'त्यादौ । एवकारेणाङ्गाङ्गिभावसन्देहसङ्कराव-पोहति । शब्दालंकारत्वं तुल्यजातीयता[20] । उद्भटप्रकाशितस्तु प्रकारान्तरगोचरशब्दार्था-

---

1. A. C. F. रारिर्निग 2. A. C. F. निरयश्च 2a. All the mss. read गतेवेति 3. C. हेतुता 4. C. मुरारिर्निर्गतेति 5. A. C. गङ्गावे 6. A. णोत्थः श्ले C. षणोऽर्थ 7. A. प्रविष्टे 8. A. श्लिष्टे शब्दोभयो C. श्लेषशब्दे 9. C. उपमां 10. C. मुख मा पद्योति 11. A's alt. रन्त्यन्ते 12. A. C. F. सदृश 13. E. वयसी 14. A. C. आदिना शब्दालंकारयोरेक E. F. आदि रम 15. F. अन्तः 16. C. एकं 17. A. C. वेशवाचकमुदा 18. A. C. F. योरेक 19. A. C. वस्थापयति 20. A. C. F. जातीययोः उ

प्रवेशसंभवात् । शब्दार्थालङ्कारसङ्करस्तु भट्टोद्भटेन प्रकाशितः संसृष्टावन्तर्भावित इति त्रिप्रकार एव सङ्करइ होक्तः ।

इदानीमुपसंहारसूत्रम्—

एवमेते शब्दार्थोभयालङ्काराः संक्षेपतः सूत्रिताः ॥८६॥

लंकार[1]संकरः संसृष्टौ अन्तर्भावित इति तस्य संकरत्वमङ्गाङ्गिभाव एवोक्तमित्याह—**शब्दार्था[2]लङ्कारेत्यादि ।**

अङ्गाङ्गिभावा[3]त्सन्देहात्[4] प्रवेशादेकवाचके ।
त्रिधा[5] तु संकरः शब्दालङ्कृत्योरेकवाचके ॥

प्रकरणमुपसञ्जिहीर्षुराह—**इदानीमिति** । तत्र सूत्रम्—[6]**एवमेते शब्दार्थोभयालङ्काराः संक्षेपतस्सूत्रिताः**[7] । व्याचष्टे—**एवमितीति**[8] । तत्र[9] पुनरुक्तवदाभासो[10]ऽर्थस्य पौनरुक्त्ये । छेकवृत्त्यनुप्रासौ व्यञ्जनमात्रस्य । यमकं स्वरव्यञ्जनसमुदायस्य । लाटानुप्रासः शब्दार्थयोरिति पौनरुक्त्ये पञ्चकम् । स्थानविशेषश्लिष्टवर्णपौनरुक्त्ये चित्रम् ।

अथ सादृश्यविच्छित्तौ भेदाभेदतुल्यतायां उपमाना[11]न्वयोपमेयोपमा[12]स्मरणानि । अभेदप्राधान्य आरोपाश्रयतया[13] रूपकपरिणामसन्देहभ्रान्ति[14]मदुल्लेखापह्नुतयः । अध्यवसायाश्रयेणोत्प्रेक्षातिशयोक्ती । गम्यमानौपम्याश्रयेण तुल्ययोगितादीपकप्रतिवस्तूपमादृष्टान्तनिदर्शनाव्यतिरेकसहोक्तिविनोक्तयः । विशेषण[15]विच्छित्त्या समासोक्तिपरिकरौ । विशेषण[16]विशेष्यविच्छित्त्या श्लेषः । अप्रस्तुतात्प्रस्तुतावगतावप्रस्तुतप्रशंसा । सामान्यविशेष[17]भावादिना निर्दिष्टप्रकृतसमर्थनेऽर्थान्तरन्यासः । गम्यस्य भङ्ग्यन्तरेणोक्तौ पर्यायोक्तम् । स्तुत्या निन्दायाः[18] निन्दया वा[19] स्तुतेर्गम्यत्वे व्याजस्तुतिः । प्राकरणिकयोः विशेषार्थनिषेधाभासे अनिष्टविध्याभासे च आक्षेपः[20] । विरोधगर्भतया विरोधविभावनाविशेषोक्त्यतिशयोक्ती' अन्तरा सङ्गतिविषमसम[22]विचित्रा[23]धिकान्योन्यविशेषव्याघातद्व-[24]यानि । शृङ्खलावैचित्र्येण कारणमालैकावलीमालादीपकसाराः । तर्कन्यायेन काव्यलिङ्गानुमाने[25] । वाक्य[26]न्यायेन यथासङ्ख्य[27]पर्यायपरिवृत्ति[28]परिसङ्ख्यार्थापत्तिविकल्पसमुच्चयद्वयसमाधयः । लोकन्यायेन प्रत्यनीक[29]प्रतीपनिमीलितसामान्यतद्गुणातद्गुणोत्त-

---

1. A. C. लंकारसंसृ 2. G. ब्दालंका 3. A's alt. भावत्वं देहात् C. भावात्वं देहात् 4. A. C. देहातत्प्रायिकमुपसञ्जि 5. E. क्रिया तु 6. F. एवमिति 7. A. C. F. सूचिताः 8. A. C. omit. इति 9. A. C. अत्र 10. A. C. भासोऽपि अपौनरुक्त्ये वृत्त्यनुप्रासयोः अपौनरुक्त्ये वृत्त्यनुप्रासशब्दार्थयोरिति 11. A. C. मानत्वादयोऽनन्वयौ 12. A. C. स्तरण 13. A. C. तया भ्रान्ति 14. C. भ्रान्तिमुल्ले 15. A. वैचित्र्यात् C. वैचित्र्यविच्छित्त्या श्ले 16. A. C. षणविच्छि 17. C. शेषादिभाव 18. Omitted in E. F. G. 19. E. F. G. या च वस्तुग 20. A. C. क्षेपार्थापत्ति विरोध 21. A. C. omit वि 22. A. C. 23. अदिक 24. A. C. द्वयादिगुणवैचित्र्यात् कारण 25. A. C. मानेन 26. C. वाक्यन्यायेन 27. C. सङ्ख्यार्थापत्ति 28. A. C. E. F. यथा सं 29. C. नीकमीलित

एवमिति पूर्वोक्तप्रकारपरामर्शः । एत इति प्रक्रान्तस्वरूपनिर्देशः । सूत्रिता अलङ्कारसूत्रैः सूचिताः संक्षेपेण प्रतिपादिताः ।

तत्र शब्दालङ्कारा यमकादयः । अर्थालङ्कारा उपमादयः । उभयालङ्कारा लाटानुप्रासादयः । संसृष्टिप्रकारौ कौचिदलङ्कारौ तद्रूपत्वात् । लोकवदाश्रयाश्रयिभावश्च तत्तदलङ्कारनिबन्धनम् । अन्वयव्यतिरेकौ तु तत्कार्यत्वे प्रयोजकौ, न तदलङ्कारत्वे । तदलङ्कारत्वप्रयोजकत्वे तु श्रौतोपमादेरपि शब्दालङ्कारत्वप्रसङ्गात् । तस्मादाश्रयाश्रयिभावेनैव चिरन्तनमतानुसृतिः ।

संपूर्णमिदमलङ्कारसर्वस्वम् ।

राणि । गूढार्थपरत्वे सूक्ष्मव्याजोक्तिवक्रोक्तिस्वभावोक्तयः । स्फुटार्थत्वे भाविकम् । [1]औदात्त्येन उदात्तद्वयम् । चित्तवृत्त्या[2]लम्बेन रसवत्प्रेयऊर्जस्वित्समाहितभावोदयसन्धिशबलत्वानीति शुद्धाः । मिश्रतया तु सङ्करसंसृष्टी ।

तदिदमभिसन्धायाह—**एवमिति** । पूर्वोक्तप्रकारपरामर्शः—**एत**[3] **इति** । प्रक्रान्त[4]-स्वरूपनिर्देश[5] इति । शब्दार्थोभयालङ्कारान् वर्गशो विविनक्ति[6]—**तत्र शब्दालङ्कारा इत्यादि** । [7]**लाटानुप्रासादय इत्यादि** । [8]शेषानुद्घाटयति—**संसृष्टिसङ्करेति**[9] ।

ननु चान्वयव्यतिरेका[10]भ्यामुक्ति(क्त)व्यवस्थाभङ्ग इत्यत आह—**लोकवदा**[11]**श्रयाश्रयीति । तदलङ्कार्येति** । तच्छब्देन शब्दार्थोभयपरामर्शः । चर्चितं चैतत् श्लेषप्रस्तावे[12] । तर्हि अन्वयव्यतिरेकौ कुत्र निबन्धनमित्यत आह—**अन्वयव्यतिरेकौ**[13]**त्विति** । अलङ्काराणां शब्दादिकार्यत्वे [14]शब्दाशब्दाद्यन्वयव्यतिरेकौ तत्र[15] निबन्धनम्[16] । ननु शब्दाद्यलङ्कारत्वे[17] को दोष इत्यत आह—**तदलङ्कारत्वप्रयोजकत्व**[18] **इति** । श्रौतोपमादौ[19] शब्दान्वयव्यतिरेका[20]नुविधानात् शब्दालङ्कारत्वं प्रसजेत् । निगमयति—**तस्मादाश्रयाश्रयीति** । चिरन्तनमते[21]त्युक्तार्थे संवादसमुद्घाटनम् ।

शब्दन्यासो विषमविषमो [22]दुर्घटार्थव्यवस्था
व्याप्तव्याप्तिप्रकटनपर[23]न्यास(य?)चर्चो गभीरः ।

---

1. A. आदात्त्येन 2. A. C. वृत्त्या ऊर्ज 3. C. एवमिति 4. A. C. F. प्रकारान्तरस्व 5. A. C. F. देशमिति 6. A. C. F. नक्ति लाटा 7. A's alt. मालानु 8. A. E. G. शब्दपरामृश्यानुद्धा A's alt. शबलानुत्पा (पपा) दयति C. शबलानुद्घाट 9. H. इति वक्ति 10. After व्यतिरेक G ends abruptly. 11. A. वादाश्र 12. A. C. तावे निबन्धन 13. A. कौ तृतीयः अलं 14. A. C. त्वे शब्दाद्यन्व 15. A's alt. कुत्र. Omitted in E. 16. A. C. F. G. H. धनं इत्यत आह ननु 17. E. त्वे अर्था दो 18. H. कत्वमिति 19. A. C. E. F. G. उपमादेः 20. A. C. F. G. रेकपरत्वं प्रस 21. A. C. F. G. चिरन्तनोक्त्युक्तार्थे H. तनेत्युक्तार्थ 22. H. दुर्लभार्थ 23. C. पट्ठ

इत्थं भूम्ना[1] रुचकवचसां विस्तरः कर्कशोऽयं
टीकास्माभिः समुपर[2]चिताऽनेन [3]सञ्जीवनीयम् ॥

सूक्ष्मा[4]मव्याकुलामत्र शास्त्र[5]युक्त्यु[6]पबृंहिताम् ।
मीमांसामुपजीवन्तु कृतिनः काव्यतान्त्रिकाः ॥

काव्यप्रकाशेऽलङ्कारसर्वस्वे च विपश्चिताम्[7] ।
अत्यादरो[8] जगत्यस्मिन् व्याख्यातमुभयं ततः ॥

इत्या[9]लङ्कारिकचक्रवर्तिध्वनिप्रस्थानपरमाचार्यकाव्यमीमांसाप्रभाकर[10]-सहजसर्वज्ञमहाकविश्रीविद्याचक्रवर्तिविरचितायां सञ्जीवन्या-मलङ्कारसर्वस्वटीकाया[11]मर्थालङ्कारप्रकरणं समाप्तम् ॥

——:०:——

समाप्ता चेयं सञ्जीवन्याख्या

अलङ्कारसर्वस्वटीका ॥

---

1. C. भूमा 2. E. चरिता 3. A. सञ्जीविनीति A's alt. संवाहनीयं 4. A's alt. अप्याकुल 5. A. शास्त्रे 6. A's alt. C. वृत्त्युप 7. E. सचेतसां 8. E's alt. येनादरो महांस्तेन H. अलंकारो ज 9. A. F. H. अलंकारचक्र C. अलंकार प्रस्था 10. C. कर सर्व 11. C. D. E. तायां अर्था

श्रीमद्विद्याचक्रवर्तिकृता अलङ्कारसर्वस्व-
निष्कृष्टार्थकारिका: ।

APPENDIX I

श्रीमद्विद्याचक्रवर्तिकृता अलङ्कारसर्वस्व-
निष्कृष्टार्थकारिकाः ।

विश्वं प्रकाशयति या जातिगुणा[1]द्यात्मकैः निजैः प्रसरैः ।
सस्कारगुणसमृद्धा वाणी मामवतु सरलसन्दर्भा ॥१॥
विभागाधिगतं[2] त्रित्वं त्रिशब्देन समाप्यते ।
त्रिप्रकारत्ववचनः[3] इतिशब्दस्ततो मतः ॥२॥
पुनरुक्तवदाभासो यत्रेत्येवं हि संस्क्रिया ।
अलङ्कार्यैकनिघ्नत्वव्यक्तये समुपाश्रिता ॥३॥
प्रकृष्टो वर्णविन्यासो[4] रसाद्यनुगतो[5] हि यः ।
सोऽनुप्रासस्स च छेकवृत्त्युपा[6]धिवशाद्द्विधा ॥४॥
समुदायद्वयं यत्र विविधं साम्यमृ[7]च्छति[8] ।
सच्छेकलालनात्प्रौढैः[9] छेकानुप्रास ईरितः ॥५॥
व्यञ्जन[10]व्यापृतिर्वृत्ति[11]र्वर्णानां रसगोचरा ।
तत्संयोगादियं वर्णरचनावृत्तिरिष्यते ॥६॥
सा वैदर्भ्यादिभेदेन[12] त्रिधा पूर्वैर्निरूपिता[13] ।
तयोपलक्षितत्वात्तु वृत्त्यनुप्रास [14]इष्यते ॥७॥
यत्र तावेव शब्दार्थौ तात्पर्यंतु विभिद्यते ।
तत्पौनरुक्त्यमाचार्यैर्लाटानुप्रास इष्यते ॥८॥
दोषापत्तिभयादेव शब्दैक्यं स्यादनन्वये ।
अस्मिंस्तु लाटानुप्रासे साक्षादेव[15]हि लक्षणम् ॥९॥
कर्णिकायां लिखेदेकं द्वौ द्वौ दिक्षु विदिक्षु च ।
प्रवेशनिगमौ दिक्षु पद्मबन्धो भवेदयम् ॥१०॥

---

1. a. गुणात्मिका b. and c. गुणक्रियात्मिका 2. a. b. c. गतत्रित्वं 3. A. C. वचनं 4. C. वित्यासो 5. A. C. अनुगुणो हि यः a. b. c. गतस्तु यः 6. C. उपाय 7. D. F. इच्छति 8. F. ति ईरितः 9. D. E. प्राज्ञैः 10. c. व्यावृत्ति 11. a. b. c. व्यक्तिः 12. A. भेदा त्रि (भेदो त्रि) 13. A's alt. C. उदाहृता 14. A. C. उच्यते 15. H. एवं

आरोप्यलिपिवर्णानां साम्याद्वाचकवर्णताम्[1] ।
खड्गबन्धादिकं चित्रं काव्यालङ्कार इष्यते ॥११॥
भेदाभेदतुलावृत्तौ साधर्म्यमुपमोच्यते ।
धर्मविच्छित्तिवशतः त्रैविध्यमुपयाति सा ॥१२॥
विरुद्धधर्मसंसर्ग[2]स्तुल्यान्तरनिवृत्तये ।
ततस्तदन्वयाभावात् भवेदयमनन्वयः ॥१३॥
उपमानोपमेयत्वव्यत्ययो[3] न क्रमं विना ।
उपमेयोपमा तेन वाक्यभेदैक[4]गोचरा ॥१४॥
स्मृतिस्सा स्मर्यते यत्र सदृशात्सदृशान्तरम् ।
असादृश्यादवाच्यत्वादितः प्रेयान्विभिद्यते ॥१५॥
[5]यत्त्वभेदप्रधानं[6] स्यात्साधर्म्यं[7] तद्द्विधा मतम् ।
आरोपाध्यवसानाभ्यां आरोपे[8] रूपकं मतम्[9] ॥१६॥
वस्तुतो भेदसद्भावाच्छङ्कया[10] नातिशयोक्तिता ।
विषयस्यानपह्नुत्या [11]न चैतत्स्यादपह्नुतिः ॥१७॥
ततो विषयिरूपेण रूपवान्विषयो मतः ।
आरोपणेन क्रियते[12] तेनैतद्रूपकं मतम् ॥१८॥
भेदस्तृतीयो यस्तत्र[13] परंपरितसंज्ञकः[14] ।
साधर्म्येणैव[15] तत्सिद्धिर्वैधर्म्येणापि दृश्यते ॥१९॥
विषय्यारोप्यते येन प्रतिस्वं विषयेषु तत् ।
भवेद्विषयसङ्ख्यात्वं सङ्ख्याभेदेऽपि[16] धर्मिणोः[17] ॥२०॥
रूपकं पूर्वसंसिद्धं श्लेषमुत्थापयेद्यदि ।
तदा रूपकमेव स्यादन्यथा श्लेष इष्यते ॥२१॥
विषय्याकारमारोप्य विषय[18]स्थगनं यदा ।
रूपकत्वं तदा तत्र रञ्जनेन समन्वयः ॥२२॥
यदा तु विषयो रूपात् स्वस्मादप्रच्युतो भवेत् ।
उपयुक्त्यै[19] पराकारं परिणामस्तदा मतः ॥२३॥
आरोप्यमाणः प्रकृते यदासावुपयुज्यते ।
परिणामस्तदा[20] तेन रूपकादस्य भिन्नता ॥२४॥
रूपमात्रसमारोपाद्रूपके रञ्जको ह्यसौ[21] ।

---

1. c. वर्णतः 2. A's alt. C. संबन्ध 3. A's alt. C. व्यत्ययेन 4. A's alt. भेदेन गो 5. D. यत्तु भेद 6. D. प्रधानः 7. D. धर्म्यं भावात् 8. A's alt. C. F. आरोपो 9. A's alt. I. भवेत् 10. A. C. F. H. शक्त्या 11. A's alt. C. चेत्तत् 12. A's alt. क्रियया 13. a. b. c. यस्त्वत्र 14. a. संज्ञतः c. संज्ञिकः 15. A. C. E. F. धर्म्येणापि 16. D. H. वेशेऽपि 17. H. धर्मिणः 18. H. षयस्य तं यदा 19. A. C. युक्तौ 20. A. तदानेरू C. तदानेकरू 21. a. रञ्जकोऽप्यसौ

व्यवहारसमारोपा[1]दिह स्यात्प्रकृतान्वयः[2] ॥२५॥
परिणामसमासोक्त्योर्ज्ञातव्योऽस्माद्विपर्ययः ।
उपादानानुपादानकृतो भेदस्तयोर्मिथः ॥२६॥
सन्देहोऽप्रकृतद्वारा प्रकृतं संस्पृशेद्यदि ।
प्रतिभोत्था[3]पितस्सोऽयं सन्देहालङ्कृतिर्मतः[4] ॥२७॥
सादृश्योत्थापिता भ्रान्तिर्यत्रासौ भ्रान्तिमान्मतः ।
नानाधर्मबलादेकं[5] यदि नानेव गृह्यते ॥२८॥
नानारूपसमुल्लेखात्स[6] उल्लेख इति स्मृतः ।
यदेकं[7] तद्धि[8] नानेति गृह्यते [9]धर्मभेदतः ॥२९॥
[10]रुच्यादिवशतो लोके नानात्वं [11]चेदकृत्रिमम् ।
अतद्रूपस्य ताद्रूप्यान्न ह्यसौ भ्रान्तिरिष्यते ॥३०॥
न चाप्यतिशयोक्तिः स्यादभेदे[12] भेदरूपिणी[13] ।
आद्ये नानेकधात्वं स्याज्ज्ञातृभेदो[14] न चान्तिमे ॥३१॥
विषयज्ञातृभेदाभ्यां विना नोल्लेखसंभवः ।
यद्यपि श्लेषतो बाधो न तथाऽप्यस्य निह्नवः ॥३२॥
अनपेक्ष्यापि[15] यच्छ्लेषं तथैव[16] स्थातुमर्हति ।
प्रकृतं यन्निषिध्यान्यत्साध्यते सा त्वपह्नुतिः ॥३३॥
नञा च्छलादिशब्दैश्च सा शब्दान्तरतस्त्रिधा ।
स्याद्भेदाभेदतुलया[17] विच्छित्तिरुपमादिकः[18] ॥३४॥
रूपकादिस्त्वभेदांशे मुख्येत्वारोपसंश्रयात् ।
उत्प्रेक्षादिरभेदेन वक्ष्यतेऽध्यवसायभाक्[19] ॥३५॥
यदायमुपमानांशो लोकतस्सिद्धिमृच्छति ।
तदोपमैव येनेवशब्दः साधर्म्यसूचकः ॥३६॥
यदा पुनरयं लोकादसिद्धः कविकल्पितः ।
तदोत्प्रेक्षैव येनेवशब्दः सम्भावनापरः ॥३७॥
गुणक्रियादि[20]संबन्धात् प्रकृते[21]ऽप्रकृतात्मना ।
संभावनं स्यादुत्प्रेक्षा वाच्ये[22]वाद्यैः [23]परान्यथा ॥३८॥

---

1. D. रोहादिह 2. A. C. E. F. H. वयः भवेदप्रकृतत्वेन रूपके प्रकृत-स्थितिः परिं 3. A's alt. C. उत्पादित 4. a. मत: प्रकृतं 5. a. A's alt. C. एष 6. a. A's alt. C. समुन्नदाबुल्ले 7. D. एतं 8. a. A. C. F. तर्हि 9. a. b. रूप 10. a. A's alt. C. प्राच्यादि 11. a. A's alt. C. भेदकृत्तथा 12. b. भेदे 13. a. A's alt. रूपिणः 14. a. A's alt. C. भेदनिबन्धनं 15, a. C. D. F. H. पेक्ष्यैव 16. a. b. D. E. F. H. तत्रैव 17. A's alt. तुल्या 18. a. b. c. आदिका 19. b. c. भाक् गुण 20. A. C. क्रियाभि 21. C. कृते प्र. 22. A. वाच्यो वान्यैः C. D. वाच्यवाद्यैः 23. a. b. c. परेऽन्य

जातिक्रियागुणद्रव्योत्प्रेक्षणात्सा[1] चतुर्विधा ।
भावाभावाभिमानत्वे[2] जात्यादेस्साष्टधा पुनः ॥३९॥
गुणक्रियानिमित्तत्वे ज्ञेया [3]षोडशधा तथा ।
द्वात्रिंशच्च निमित्तस्योपादानादन्यथा स्थितेः ॥४०॥
हेतौ स्वरूपे चोत्प्रेक्ष्ये फले[4] षण्णवतिः पुनः ।
द्रव्यहेतुफलात्मत्वासंभवात्तद्विदा[5] च्युतिः[6] ॥४१॥
तथा प्रतीयमानायां[7] निमित्तस्यानुपग्रहः[8] ।
नापि स्वरूपं तद्भेदैः[9] तस्मा[10]न्न्यूना भवेदियम् ॥४२॥
क्वचिच्छ्लेषेण धर्मांश[11]गतेनैषा न [12]बाध्यते[13] ।
उपमोपक्रमाऽप्येषा भवेत्सापह्नवाऽपि च ॥४३॥
अभेदाध्यवसायो[14] हि फलेऽतिशय[15]नामनि ।
न पुनः फलिनोस्तत्राभेदे भेदो न सिध्यति ॥४४॥
[16]प्रकृतेष्वथवान्येषु ज्ञातव्या तुल्ययोगिता ।
गुणक्रियाभिसम्बन्धात्समानादन्वितार्थिका[17] ॥४५॥
[18]दीपकं वास्तवौपम्यं[19] प्रकृताप्रकृताश्रयम् ।
आदिमध्यान्तवाक्येषु क्रियाकारकभेदतः ॥४६॥
असकृद्धर्मनिर्देशः[20] इवादेरनुपग्रहे[21] ।
प्रतिवस्तूपमा ज्ञेया प्रतिवाक्यार्थसाम्यतः ॥४७॥
बिम्बानुबिम्बन्यायेन निर्देशे[22] धर्मधर्मिणोः[23] ।
दृष्टान्तालंकृतिर्ज्ञेया भिन्नवाक्यार्थसंश्रया ॥४८॥
[24]सम्भवद्वस्तुसम्बन्धोऽसंभव[25]द्वावबोधयेत् ।
प्रतिबिम्बं [26]यदि तदा निर्ज्ञातव्या[27] निदर्शना ॥४९॥
बिम्बानुबिम्बार्थतया वाक्ययोः प्रकृतान्ययोः ।
स्यान्नैरपेक्ष्ये[28] दृष्टान्तः सापेक्षत्वे निदर्शना ॥५०॥
भेदप्रधाने साधर्म्ये व्यतिरेको विधीयते ।
आधिक्यादुपमेयस्य न्यूनत्वा[29]द्वोपमानतः ॥५१॥

---

1. A. C. D. E. F. प्रेक्षणा सा 2. D. मानत्वात् 3. A. षोडशथा 4. A. C. ज्ञेया 5. A. C. E तद्द्विधा 6. D. च्युतिं 7. E. मानाया F. मानत्वात् 8. F. ग्रहात् 9. A. C. D. E. तैर्भेदैः 10. A. C. तस्यां न्यू 11. A. C. D. F. धर्माङ्ग 12. A C. E. F. न च बा 13 D. बोध्य 14. A. C. E. सायोऽपि 15. A. C. शायनमिति A's alt. शायिनी मतिः 16. a. b. c. प्रस्तुतेषु 17. A. अर्थका C. आत्मिका E. अर्थिता H. अर्थता 18. This kārikā is omitted in A. C. F. 19. D. वस्तुवद्वाक्यं 20. A. C. D. E. F. निर्देशात् 21. A. C. F. ग्रहात् 22. A. C. D. F. निर्देशो 23. E. धर्मिणां 24. H. पञ्चमं वस्तु 25. D. भवन्वा बो 26. Omitted in A. C. D. F. H. 27. A. निर्णीतव्या 28. a. b. c. D. पेक्ष्य 29. E. वाद्योप

गुणप्रधानभावो यः[1] शाब्दस्तेन भिदोत्कटा ।
संश्रितातिशयोक्तिं च[2] सहोक्तिस्समयोर्मता ॥५२॥
सदसत्त्वनिवृत्तिश्चेन्निवृत्त्या[3]न्यस्य वर्ण्यते ।
तदा द्विधा विनोक्तिस्स्याद्विधि[4]रत्र फलं भवेत् ॥५३॥
अप्रस्तुतं प्रतीतं[5] चेद्भेदकांशैकसाम्यतः[6] ।
व्यवहारं[7] समारोप्य[8] प्रस्तुते न्यग्भवत्यथ[9] ॥५४॥
तेना[10]प्रस्तुतवृत्तान्तारोपेण प्रस्तुतं स्वयम् ।
संक्षेपेणोच्यते तस्मात्समासोक्तिरियं मता[11] ॥५५॥
[12]स्याद्विशेष्यांशसाम्यं चेत्प्रस्तुताकाररूपितम् ।
भवेदप्रस्तुतं भेद्यं रूपकालङ्कृतिस्तदा ॥५६॥
स्यादौपम्यसमासेन समासोक्ति[13]र्विनिश्चये[14] ।
स्यात्संकरसमासेन समासस्य तु संशये ॥५७॥
न रूपकसमासस्य प्राप्तावस्याः प्रवर्तनम् ।
रूपकादर्थसंसिद्धेरेकदेशविवर्तिनः[15] ॥५८॥
विशेषणांशसाम्येनाप्रस्तुतार्थस्य गम्यता ।
समासोक्तिर्मता येन संक्षिप्यार्थो[16]ऽभिधीयते ॥५९॥
शुद्धकार्यसमारोपे साम्यं[17] स्यादौपचारिकम् ।
व्यवहारसमारोपः साक्षादस्यां प्रयोजकः[18] ॥६०॥
स्याद्विशेषणसाम्यं [19]चेत्समासान्तर[20]संश्रयात् ।
उपमा बाधते नैना[21]मेकदेशविवर्तिनीम् ॥६१॥
दृश्यतेऽर्थान्तरन्यासे[22] समर्थ्ये[23] च समर्थके ।
उत्प्रेक्षायोगिनी चैषा क्वचित्स्यादेककालगा[24] ॥६२॥
विशेषणानां व्यङ्ग्यार्थगर्भीकरणलक्षणा[25] ।
सोत्प्राशता[26] परिकरे[27] व्यङ्ग्यः परिकरो यतः ॥६३॥
शब्दसाम्यं[28] भवेच्छ्लेषो विशेषणविशेष्ययोः ।

---

1. A. C. F. यस्य स तेन 2. Omitted in A. C. D. F. H. 3. E. वृत्तान्य a. b. c. वृत्त्यां 4. A. C. D. E. F. द्विधात्र 5. D. प्रतीतः 6. C. सामान्यं तद्व्यव D. साम्यत्वम् 7. C. हारः 8. F. स्वमारोप्य 9. A. C. F. अपि 10. A. C. अनेनाप्र 11. A. C. ततः 12. A. C. F. तद्विशेषणांश 13. A उक्तिवि 14. C. निश्चया 15. b. c. विवर्तिनः सा लौकिके लौकिकस्य समाक्षपोऽय वस्तुनि । शास्त्रीयवस्तुनस्तद्वच्छास्त्रीये वेत्यनेकधा ॥ विशेषणानां व्यङ्ग्यार्थ 16. A. C. F. क्षिप्तार्थो 17. A's alt. E. G. a. b. c. कार्ये 18. C. प्रयोजकम् 19. A's alt. च इत्यपासा 20. E. अन्ते सं 21. A. C. F. H. नैनं 22. A. C. D. E. F. न्यासः 23. C. समर्थे 24. A's alt. कालता 25. A's alt. लक्षणात् 26. A. C. D. E. F. H. प्रासता 27. a. b. c. D. परिकरो 28. A. साम्ये

यद्येकोऽप्रकृतार्थश्चेद्गूढ्यांशे[1] भिन्नशब्दता[2] ॥६४॥
शब्दार्थोभयनिष्ठोऽयं सर्वालङ्कारबाधकः[3] ।
[4]पूर्वसिद्धस्य चेदङ्गं[5] तदा न्यायेन बाध्यते ॥६५॥
अप्रस्तुतप्रशंसा तु प्रस्तुतावगमोऽन्यतः ।
[6]सा सामान्यविशेषादिविच्छित्या पञ्चधा मता[7] ॥६६॥
भवेत्साधर्म्यवैधर्म्ययोगतस्सा[8] पुनर्द्विधा ।
संभवेऽसंभवे[9] द्वैधे वाच्यस्याथ पुनस्त्रिधा ॥६७॥
प्रस्तुत[10]स्यावगम्यत्वात्पर्यायोक्ताद्विभिद्यते ।
इयमर्थान्तरन्यासादद्दृष्टान्तालङ्कृतेरपि[11] ॥६८॥
समर्थ्यत्वेन निर्दिष्टः प्रकृतो [12]यस्समर्थ्यते ।
सोऽयमर्थान्तरन्यासः सामान्यादिभिरष्टधा[13] ॥६९॥
पर्यायोक्तं तु कार्यादिद्वारा गम्यस्य वर्णनम् ।
अप्रस्तुतप्रशंसातो वाच्यस्य प्रस्तुते[14] भिदा ॥७०॥
व्याजेन व्याजरूपा वा स्तुतिर्व्याजस्तुति[15]द्वयम् ।
अप्रस्तुतप्रशंसातः स्तुतिनिन्दात्मिका भिदा ॥७१॥
निषेधाभास आक्षेपः प्रकृतस्येष्टसिद्धये ।
स उक्तविषये वस्तुतदु[16]क्त्योर्वार[17]णात्मकः ॥७२॥
वक्ष्यमाणे[18] पुनस्त्वन्यो ज्ञेय आगूरणात्मकः ।
सामान्यतो विशेषां[19]शादंशश्चेत्येष च द्विधा ॥७३॥
इष्टा[20]र्थोऽस्य निषेधो[21]ऽस्य बाधोऽथातिशयध्वनिः ।
चतुष्टयमिदं ज्ञेयं संभूयाक्षेपकारणम् ॥७४॥
अनुक्तस्य निषेधस्य विध्याभासेन सूचनम् ।
आक्षेपो वक्ष्यमाणैकविषयस्त्वेष सम्मतः ॥७५॥
विरोधस्तु तदाभासो जात्याद्यर्थसमाश्रयः ।
तद्वै[22]चित्र्याद्दशविधो विषयैक्ये[23] व्यवस्थितः ॥७६॥
प्रसिद्धकारणाभावे कार्योत्पत्तिर्विभावना ।
कार्योत्पादनवैशिष्ट्याद्द्विधा चेयं निमित्ततः ॥७७॥
कार्यांशस्य यदा भावा[24]भावौ वक्तुमपेक्षितौ[25] ।

---

1. A. G. गम्यांशे 2. D. शब्दतः 3. D. बाधकं 4. E. सर्वे 5. D. omits चेत् 6. Omitted in D. 7. Omitted in D. 8. D. साधु पुनः 9. A's alt. F. भवासंभ 10. A. स्तुतावग 11. A. C. F. अन्तकृतेरपि 12. C. यत् 13. A. C. F. G. अष्टधीः 14. C. स्तुतो 15. a. b. c. स्तुतिर्द्व 16. A. C. D. E. F. H. तद्युक्त्यो 17. A. F. उच्चारणात्म D. मारणा 18. a. माणो 19. A. C. D. E. G. शेष्यांशांशश्च 20. a. c. इष्टार्थो 21. C. षेधो तथाति 22. D. चित्र्यं 23. A. C. षयैकव्यवच्छित्ता 24. C. भावो 25. A. F. अवेक्षते

विभावनाविशेषोक्त्योस्तदा सन्देहसङ्करः ॥७८॥
विशेषोक्तिर्भवेत्कार्यानुत्पत्तिः सति कारणे ।
अत्रैक[1]गुणहान्या तु साम्यदार्ढ्यमलक्षणम् ॥७९॥
कार्यकारणयोर्यौ[2]तु कालसाम्यविपर्ययौ ।
अन्या त्वतिशयोक्तिस्सा विरोधांशोपजीवनात् ॥८०॥
कार्यकारणयोर्भिन्नदेशत्वे स्यादसङ्गतिः[3] ।
अभेदाध्यवसायादिविच्छित्त्या दृश्यते च सा ॥८१॥
विरूपानर्थयोर्हेतोरुत्पत्तिर्विषमं[4] मतम् ।
तथा [5]विरूपघटना तेनेदं त्रिप्रभेदकम् ॥८२॥
सरूपयोस्संघटना समालङ्कार इष्यते ।
श्लाघ्याश्लाघ्यत्वयोगेन [6]द्वौ भेदावस्य संगतौ[7] ॥८३॥
प्रयत्नस्तु विचित्रं[8] स्याद्विपरीतफलाप्तये ।
निषेधतो[9] वैपरीत्याद्विषमालंकृतेर्भिदा ॥८४॥
अना[10]नुरूप्यमधिकमाश्रयाश्रयिणोर्मतम् ।
आश्रयाश्रयिवैपुल्यवशतो द्विप्रभेदकम्[11] ॥८५॥
क्रियाजननमन्योन्यमन्योन्यालङ्कृतिर्मता ।
अनाधारादि[12]भेदेन विशेषोऽपि त्रिधा मतः ॥८६॥
यथासाधनमेकेन तथैवान्येन[13] [14]बाधनम् ।
व्याघातोऽथ विरुद्धस्य[15] सौकर्येण क्रिया तथा ॥८७॥
कार्यं कारणमालायां[16] प्राचः[17] प्राचः परं परम् ।
एकावल्यां यथा पूर्वं भेदकंतूत्त[18]रोत्तरम् ॥८८॥
स्थाप्यतेऽपोह्यते चैव तेनेयं द्विविधा मता ।
मालादीपकमाद्या[19]द्यस्योत्त रोत्तरदीपनम्[20] ॥८९॥
उत्तरोत्तरमुत्कर्षावहत्वे सार इष्यते ।
काव्यलिङ्गंतु[21] हेतुत्वेनोक्तिर्वाक्यपदार्थयोः ॥९०॥
नाय[22]मर्थान्तरन्यासो हेतोश्शाब्दत्व[23]संश्रयात् ।
अनुमानं तु साध्याय[24] साधनस्योपवर्णना ॥९१॥

---

1. A. C. H. एकहान्या 2. A. योस्तु स्तः काल C. H. योस्तुकाल 3. A. सङ्ग्रहः 4. C. विषमः स्मृतः 5. H. विरूप 6. D. यौ 7. a. b. c. संमतौ 8. A's alt. विचित्रः 9. D. C. विशेषतो 10. C. अनतु 11. C. भेदकः 12. C. नासादितभे 13. A. C. F. अन्यस्य 14. E. बोध a. b. c. साध 15. A's alt. विरोधस्य 16. a. b. c. मालायाः 17. D. प्राचं प्राचं 18. A. C. F. चोत्तरो 19. A. C. F. आद्यस्य 20. A. दीपनात् 21. Omitted in A. C. 22. C. न्यायं 23. C. शब्दत्व 24. A. C. F. साध्यसा

तत्संकीर्णत्व[1]शुद्धत्वविच्छित्त्यान्यविलक्ष[2]णात् ।
अप्रतीतप्रतीतौ स्यादनुमानव्यवस्थितिः ॥९२॥
पदार्थाद्वाथ वाक्यार्थान्निर्देशे सति हेतुतः[3] ।
समर्थनं प्रतीतस्य काव्यलिङ्गद्वयं[4] मतम् ॥९३॥
भवेदर्थान्तरन्यासः ताटस्थ्ये हेतुभावतः ।
कार्यकारणभावे तु तस्योक्तं लक्षणान्तरम् ॥९४॥
प्रागुक्तानामनुक्तैस्तु सम्बन्धः [5]क्रमिको यदा ।
यथासङ्ख्यं तथा शाब्दं आर्थं चेति द्विधा मतम्[6] ॥९५॥
पर्याय एकोऽनेकस्मिन् एकत्रानेक इत्यपि ।
द्विधा[7] क्रमवशादेतौ[8] न विशेषसमुच्चयौ ॥९६॥
नेयं विनिमयाभावात् परिवृत्ति[9]भिदास्त्विह ।
चतस्रोऽनेकरूपस्य पृथक्सङ्घातवर्तनात्[10] ॥९७॥
पृथक्सङ्घातवृत्तित्वादनेकोऽर्थो[11] द्विधा स च ।
आधाराधेयभावस्थश्चतस्रोऽस्य भिदास्ततः ॥९८॥
परिवृत्तिर्विनिमयस्त्रिधा सेयं[12] समादिभिः ।
परिसंख्या त्वनेकत्र प्राप्तस्यैकत्र[13] यन्त्रणम् ॥९९॥
चतुर्धा[14] प्रश्नवर्ज्योक्त्योर्भावाभावादियं मता ।
न [15]परं युगपत्प्राप्तिः पक्षेऽपि [16]प्राप्तिरिष्यते ॥१००॥
परिसङ्ख्यानियमयोरतो[17]ऽत्रालौकिकी स्थितिः ।
अर्थापत्तिस्तु [18]कैमुत्येनान्यार्थापात इष्यते ॥१०१॥
प्रकृताप्रकृता[19]पातादियं च द्विविधा मता ।
विरोधे तुल्यबलयोर्विकल्पस्सन्निपातिनोः[20] ॥१०२॥
[21]अश्लेषश्लेषभित्तित्वाद्द्विधाऽयमुपवर्ण्यते[22] ।
गुणक्रियायौगपद्ये[23] त्रिविधस्स्यात्समुच्चयः ॥१०३॥
एकक्रियाया[24]मन्यस्य[25] क्रिया त्वन्यः समुच्चयः ।
सदसद्द्वैध[26]योगेन स[27] त्रिधा संव्यवस्थितः ॥१०४॥
समाधिस्सम्यगाधानं कारणान्तरयोगतः ।

---

1. A. C. F. त्वविच्छि 2. E. लक्षणां 3. D. हेतुकः 4. A. C. लिङ्गान्वयो मतः 5. A. C. क्रमकोविदाः 6. A. C. F. विदुः 7. E. द्विविधा 8. A. एका 9. A. C. F. तदास्त्विह 10. A. C. D. F. H. वर्तनात् परिवृति 11. E. अनेकार्थो 12. Omitted in a. 13. a. एकस्य 14. a. b. c. चतुर्द्धा 15. A. C. F. वरं 16. A. C. F. अप्राप्तिः 17. A. C. E. F. अतन्त्रा 18. A. C. F. G. कैमुत्यन्यायार्थ 19. A. C. कृतादियं 20. C. यातिनोः 21. A's alt. C. सश्लेषाश्ले 22. A. C. उपपत्तितः 23. a. b. c. पद्यैः 24. A. C. E. G. क्रियामन्य 25. A. C. E. omit स्य 26. A. C. सद्भेद 27. A. C. E. F. G. H. न द्विविधस्संव्यव

तदीयस्य तिरस्कारः प्रत्यनीकमशक्तितः ॥१०५॥
उपमानस्य कैमर्थ्या[1]दुपमेयत्वकल्पनात्[2] ।
द्विधा प्रतीपं क्वाप्येत[3]दुपमानत्वतोऽपि च ॥१०६॥
निजेनागन्तुना[4] वाऽपि लक्षरोनान्यगोपनम् ।
निमीलिताख्योऽलङ्कारो द्विप्रकारः प्रकाशितः[5] ॥१०७॥
प्रस्तुत[6]स्यान्यतादात्म्यं सामान्यं गुणसाम्यतः ।
तद्गुणस्स्वगुणत्यागा[7]दुत्कृष्टस्य गुणग्रहः ॥१०८॥
न[8] तद्गुणो[9]ऽनुहारस्तु गुणताद्रूप्ययोर्द्विधा ।
उत्तरं[10] प्रश्नपिशुनं असंभाव्योत्तरं द्विधा[11] ॥१०९॥
सूक्ष्मं तु सूक्ष्मं[12] संलक्ष्य विदग्धेषु प्रकाशनम् ।
[13]इङ्गिताकारत[14]स्सूक्ष्मसंलक्षणमिति द्विधा ॥११०॥
व्याजोक्तिर्व्याजवचनेनोद्भिन्नस्य निगूहनम् ।
अपह्नवाय सादृश्यं [15]इष्टा नापह्नुति[16]र्यतः ॥१११॥
अन्यथा योजनं[17] वाक्ये वक्रोक्तिरभिधीयते ।
द्विप्रकारा च[18] विज्ञेया[19] काकुश्लेषसमाश्रयात्[20] ॥११२॥
स्वभावोक्तिर्बुधोन्नेयवस्तुस्वाभाव्यवर्णनम्[21] ।
अथ प्रतीतिवैचित्र्यात्तारतम्यनिरूपणैः[22] ॥११३॥
भाविकं दूर[23]दुर्लक्षं[24] व्यक्तं[25] व्याक्रियतेतमाम् ।
योऽयं प्रत्यक्षवद्भाव[26]स्त्वतीतानागतार्थयोः ॥११४॥
तद्भावबिम्बनाच्चित्ते विनिवेशाच्च[27] भाविकम् ।
ना[28]विपर्ययतो भ्रान्तिः साक्षात्त्वान्नेतिवृत्तकम्[29] ॥११५॥
अन्य[30]त्वानध्यवसितेर्न चात्रातिशयोक्तिता ।
न परं वर्तमानार्थ[31]धर्मः प्रत्यक्षतेष्यते ॥११६॥
प्रतिपत्त्रनपेक्षायाः प्रत्यक्षत्वपरिक्षयात् ।

---

1. A. C. अर्थ्यै 2. A. C. E. F. G. H. कल्पनं 3. A. चोपेतां C. चाप्येतदु 4. A. C. गन्तुकविलक्ष 5. A. C. प्रकीर्तितः 6. a. स्तुतेन 7. a. त्यागादत्युत्कृ 8. C. तद्रूपाननुहारस्तु हेतौ सत्यप्यतद्गुणः A. E. omit न 9. A. E. गुणाननु C. गुणोऽनु 10. Except C. all mss. प्रश्नाङ्गमुत्तरं तस्माद्गूढं चास कृदुत्तरम् 11. After द्विधा A. gives आकूतव्यञ्जिता etc. which is quoted is the Sañjīvanī as from Vidyācakravartin's Bharatasaṁgraha. 12. A. सूक्ष्म 13. C. चेङ्गित 14. C. कारं सू 15. A. इष्टान्याय C. तुष्टा 16. A. C. G. मतः 17. H. नयनं 18. Omitted in C. 19. A's alt. C. सा ज्ञया 20. A. आश्रिता 21. C. वर्णनम् यो यः प्रत्यक्ष 22. A. C. रूपणे 23. A's alt. C. हूर 24. A. C. F. लक्ष्य 25. A's alt. मया 26. A. F. सद्भाव 27. A. वेशनाच्च 28. A. F. न विप 29. A. वृत्तं 30. F. अन्यत्रान 31. A. माना कथं ध

प्रत्यक्षत्वे च[1] सामग्री भावनाद्भुत[2]वस्तुजा ॥११७॥
प्रत्यक्षत्वं न संभाव्यमिह नोत्प्रेक्षणं ततः ।
अलिङ्गलिङ्गिभावाच्च काव्यलिङ्गं न चेष्यते ॥११८॥
ताटस्थ्यात्स्फुटसंवित्तेर्न तदा रसवद्भ्रमः ।
पश्चात्साधारणीभावे रसवांस्तन्निमित्तकः ॥११९॥
स्फुटत्वान्न स्वभावोक्तिर्लो[3]कोत्तीर्णस्य वस्तुनः[4]।
स्वभावोक्तेः रसवतोर्भेदस्संवादभेदतः ॥१२०॥
न प्रसादगुणश्चैतद्यस्मादौत्तरकालिकम्[5] ।
वास्तवेऽपि हि सौन्दर्ये योग्यत्वादस्य संभवः ॥१२१॥
चिरन्तनानुरोधात्तु तथा व्यक्तं न कीर्तितम् ।
भाविके बुद्धि[6]संवादो मया[7] स्याद्यदि कस्यचित् ॥१२२॥
व्याख्याशिल्पस्य[8] निकषः[9] स[10] मे धीमान्भविष्यति।
उदात्तं तु समृद्धस्य वस्तुनः कविवर्णनम् ॥१२३॥
अङ्गत्यन्तरेऽङ्गतापन्नं महच्चरितलक्षणम्[11] ।
द्वितीयोदात्तविषयो व्याप्तो रसवदादिभिः ॥१२४॥
रसभावगुणीभावादनौचित्यप्रवृत्तितः[12] ।
रसवत्प्रेयऊर्जस्विसमाहितचतुष्टयम् ॥१२५॥
रसवत्त्वप्रियत्वाभ्यां[13] ऊर्जः[14]प्रशमयोगतः ।
निबन्धनं रसवदाद्याख्यां सम्प्रतिपद्यते ॥१२६॥
स्थितिप्रशमवद्भाव[15]स्योदयस्सन्धिरेव च[16] ।
शाबल्यं च[17] गुणीभावे पृथक् पृथगलङ्क्रिया[18] ॥१२७॥
तिल[19]तण्डुलनीत्या संश्लेषः संसृष्टिरिष्यते ।
सा[20] शब्दार्थोभयगतैरलङ्कारैस्त्रिधा मता ॥१२८॥
अङ्गाङ्गिभावा[21]त्सन्देहात् प्रवेशादेकवाचके ।
त्रिधा तु सङ्करश्शब्दालङ्कृत्योरेकवाचके[22] ॥१२९॥

---

1. a. b. c. स्वसाम 2. C. वनाभूत 3. A. C. लोकोक्तिः 4. a. b. c. वस्तुतः 5. A. कालिका C. कालिकः 6. A. C. द्विर्द्विसंवा 7. C. मया सत्यस्य क 8. A. C. शीलस्य 9. A. C. निष्कर्षः 10. A. स धीमान् मा भ C. F. स धीमान्मे भ 11. A's alt. C. वर्णनम् 12. A. प्रवर्तितः 13. A. C. रसप्रियतरत्वाभ्यां 14. A's alt. नन्दप्रश 15. A. भावोद् 16. Omitted in E. 17. A. C. F. च 18. E. G. क्रियाः 19. A. E. F. G. तिले त. 20. A. C. च शब्दा 21. A's alt. भावत्वं देहात् 22. After वाचके A. gives the verse शब्दन्यासो विषम etc. and काव्यप्रकाशेऽलंकारसर्वस्वे etc. that are found at the end of his Sañjīvanī. After the above verses, it reads. "अवान्तरविशेषनिर्व्यपेक्षो निष्कर्षार्थः ॥"

अलङ्कारसर्वस्वसूत्रविवृतिः ॥

APPENDIX II

VARIANT READINGS IN THE ALAMKARA-SARVASVA ACCORDING TO THE THREE EDITIONS.

N. S. ed. (1939) with Jayaratha's Vimarśinī.	T. S. S. ed. (1938) with Samudrabandha's Vyākhyā.	Present edition with Vidyācakravartin's Sañjīvanī.
P. 1. L. 2. निजालङ्कार	P. 1. L. 2. गुर्वलङ्कार	P. 1. L. 2. as in N. S.
P. 8. L. 1. प्रेयःप्रभृतौ	P. 6. L. 1. प्रेयऊर्जस्वि-प्रभृतौ	P. 7. L. 2. as in T. S. S.
P, 8. L. 2. उक्तः तदित्थं	P. 7. L. 1. उक्तः। उत्प्रेक्षातु स्वयमेव प्रतीयमाना कथिता। तदित्थं	P. 8. L. 1. as in T. S. S.
P. 8. L 2. द्विविधं	P. 7. L. 1. त्रिविधं	P. 8. L. 2. as in T. S S.
P. 9. L. 2. काव्यात्मकत्वेन	P. 7. L. 5. काव्यात्मत्वेन	P. 9. L. 1. as in T. S. S.
P. 9. L. 7. जीवितं	P. 8. L. 1. जीवं	P. 9. L. 3. as in N. S.
P. 9. L. 8. अभिधान	P. 8. L. 3. अभिधा	P. 9. L. 4. as in T. S. S.
P. 9. L. 4. काव्यांशत्वं	P. 9. L. 2. काव्ये सत्वं	P. 11. L. 4. काव्यात्मत्वं
P. 11. L. 1. ब्रुवता	P. 9. L. 2. as in N. S.	P. 11. L. 5. कथयता
P. 11. L. 4. अभिधातात्पर्यलक्षणाख्यव्यापार	P. 10. L. 2. अभिधाभावकत्वलक्षणातात्पर्याख्य-व्यापार	P. 11. L. 6. as in T. S. S.
P. 12. L. 1. गम्यत्वात्	P. 10. L. 4. गन्तव्यत्वात्	P. 12. L 2. as in N. S.
P. 13. L. 2. विश्रान्तिधामत्वं	P. 10. L. 6. as in N. S.	P. 12. L. 4. विश्रान्तिस्थानत्वं
P. 13. L. 4. विदितत्वाभावात	P. 10. L. 8. विचार्यत्वाभावात्	P. 12. L. 6. as in T. S. S.

N. S. ed.	T. S. S. ed.	Present ed.
P. 13. L. 4. आश्रयेण	P. 10. L. 5. आश्रयणे	P. 12. L. 5. as in T. S. S.
P. 15. L. 1. लिङ्गितया	P. 10. L. 7. लिङ्गतया	P. 12. L. 6. as in T. S. S.
P. 15. L. 7. आद्योऽप्यर्थ	P. 10. L. 7. as in N. S.	P. 15. L. 1. आद्योऽथ
P. 15. L. 8. लक्षणामूल शब्द	P. 13. L. 2. लक्षणामूलः शब्द	P. 15. L. 2. as in N. S
P. 18. L. 2. ध्वनिरलङ्कार-मञ्जर्यां दर्शितः । काव्य-स्य श्रृङ्गारप्रधानत्वात् । शिष्टस्तु यथा । वसरं तत्रैव विभक्तः । गुणी	P. 13. L. 4. ध्वनिः कालिदासादि प्रबन्धेषु	P. 23. L. 1 as in T. S. S.
P. 18. L. 3. गुणीभूतव्य-ङ्ग्यो	P. 13. L. 5. गुणीभूत-व्यङ्ग्यं	P. 23. L. 1. as in T. S. S.
P. 19. L. 1. दर्शितः	P. 13. L. 6. प्रदर्शितं	P. 23. L. 2. as in T. S. S.
P. 19. L. 5. वक्ष्यमाण	P. 13. L. 10. as in N. S.	P. 24. L. 4. निरूपयिष्य-माण
P. 19. L. 5. शाब्दप्रस्तावे	P. 14. L. 3. शाब्दे प्रस्थाने	P. 24. L. 6. as in T. S. S.
